नं० २८२-घ

किरातार्जुनीयम्

कर्त्ता भारविः (काव्यम्)

(अपूर्ण) घंटाप

घंटापथः

पत्राणि

१८६

किरात काव्य सटीक पत्रे १५८

३९०

श्रीगुरुचरणाभ्यां नमः ॥ तत इति ॥ ततो मुनिमुष्टियुद्धानंतरं उग्रवेगे महति द्विरदे गज इव भीमे भुजावेवायुधे यस्य सः तथाभूते रणमुपेयुषि मुनौ
शंकरः स्वयमपि सबाणधिं सतूणीं धनुरपास्य मुष्टिभिर्घनैर्लोहमुद्गरैरिव प्रतिजघान प्राक् मुनिकृतघातस्य प्रतिघातं चक्रे तवानित्यर्थः
घनाः कठिनसंघात इति वैजयंती । विस्तारे मुद्गरे इति विश्वः । यद्यपि मुष्टिशब्दो हस्तो मुष्ट्या तु बद्धया । सरत्निः स्यादरत्निस्तु निष्कनि-
ष्ठेन मुष्टिनेत्यमरः । कोशे उभयथा प्रतिपादनाद् द्विलिंगः । तथाप्यत्रोपमानसारूप्यायपुल्लिंगो ग्राह्य इति द्रुतविलंबितं वृत्तं ॥ १ ॥ हरेति ॥
हरपृथासुतयोरसकृदु निबिडं बंधं यथा तथा संवलिताः संघट्टिता अंगुलयो येषां ते मुष्टिभूता इत्यर्थः तेषु पाणिषु जातस्तयोर्ध्वनिः स्फु-

ततउग्र इव द्विरदे मुनौ रणमुपेयुषि भीमभुजायुधे ॥ धनुरपास्य सबाणधि शंकरः प्रतिजघान घनैरिव मुष्टिभिः ॥ १ ॥
हरपृथासुतयोर्ध्वनिरुत्पत[illegible]न्मृदु संवलितांगुलिपाणिजः ॥ स्फुटदनल्पशिलारवदारुणः प्रतिननाद दरीषु महीभृतः ॥ २ ॥
शिवभुजाहतिभिन्नपृथुक्षतीः सुखमिवानुबभूव कपिध्वजः ॥ क इव नाम बृहन्मनसां भवेदनुकृतेरपि सत्त्ववतां क्षमः ॥ ३ ॥

टती । ना विदलंतीनां अनल्पानां शिलानां रव इव भीषणो दारुणो ध्वनिरुत्पतन् उद्गच्छन् दरीभृतो गिरेर्दरीषु गुहासु प्रतिननाद प्र-
तिदध्वान ॥ २ ॥ शिवेति ॥ कपिध्वजः शिवस्य भुजाहतिभिर्मुष्टिघातैः भिन्ना विदीर्णाः पृथुक्षतयः प्रहारव्रणाः ताः सुखमिवानुबभूव
दुःखकरीति भावः क्षतिदुःखं नाजीगणदित्यर्थः । ननु दुःसहदुःखवेगेषु कथमगणनमित्यत्राह । क इव नाम को नु खलु सत्त्ववतां सत्त्वाधि-
कानां बृहन्मनसां मनस्विनां अनुकृतेरनुकरणस्य भिन्नेयस्यापि क्षमो न भवेत् मनस्विनां चरित्रं नटवदनुकर्तुं अपि न कश्चिदाय-
क्ते तथा च रणांतु दुरापास्तं रौद्ररसाविष्टमनसां मनस्विनां कुतः सुखदुःखगणनेति भावः ॥ ३ ॥ । । ३ । । ५ ॥

व्रणेति॥ व्रणमुखेभ्यः च्युतस्य शोणितस्य शीकरैः स्थगितमावृतं शैलतटाभं भुजांतरं वक्षः यस्य स तथोक्तः उमापतिः अभिनवमौषसरागं
संध्यारागं बिभर्तीति तथोक्तेन जलधरेण समानं तुल्यं यथा तथा बभौ उपमा॥४॥ उरसीति॥ शूलभृतः शिवस्य उरसि प्रहिताः प्रयुक्ताः
अर्जुनस्य मुष्टयः पृथुनि सह्यमहीभृतः सह्याद्रेः रोधसि भृशं रयात् तीव्रवेगाः सिंधोः महोर्मय इव मुहुः प्रतिहतिं ययुः॥५॥ निपति
त इति॥ अयुगानि चक्षूंषि यस्य स अयुगचक्षुः त्रिलोचनः तस्य आय[illegible]ले दीर्घे अरत्नियुगे हस्तौ मुष्ट्या अनुबद्धया। सरत्निः स्यादरत्निस्तु निष्क

व्रणमुखच्युतशोणितसीकरस्थगितशैलतटाभभुजांतरः॥ अभिनवौषसरागभृता बभौ जलधरेण समानमुमापतिः॥४॥
उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः॥ भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिंधुमहोर्मयः॥५॥
निपतिते धिशिरोधरमायते सममरत्नियुगे युगचक्षुषः॥ त्रिचतुरेषु पदेषु किरीटिना लुलितदृष्टिमदादिव चस्खले॥६॥
अभिभवोदितमन्युविदीपितः सममभिसृत्य भृशं जवमोजसा॥ करयुगेन विभुज्य समाददे शशिकलाभरणस्य भुजद्वयं॥७॥

निष्ठेन मुष्टिना इत्यमरः। प्रहते तु मुष्टिपाते विवक्षया प्रयोगः। शिरोधरायामधि अधिशिरोधरमधिकंठं समं युगपत् निपतिते सति।
किरीटिनार्जुनेन मदादिव त्रीणि चत्वारि वा त्रिचतुराणि। संख्ययाव्ययासंनादूरेत्यादिना समासो बहुव्रीहिः। चतुरोऽच् प्रकरणे त्र्युप
भ्यामुपसंख्यानमिति समासांतोऽच् प्रत्ययः। त्रिचतुरेषु पदेषु लुलितदृष्टि घूर्णितनेत्रं यथा तथा चस्खलते तद्भावे लिट्॥६॥
परिभवेति॥ परिभवेनोत्करूपेणोदितउपपन्नो यो मन्युः क्रोधस्तेन विदीपितः प्रज्वालितः सोऽर्जुनः भृशं जवं च सममभिसृत्या
हत्याऽऽ ओजसा बलेन शशिकलाभरणस्येंदुमौलेः भुजद्वयं करयुगेन वियोज्य समाददे जग्राह॥७॥ ॥७॥

प्रववृतइति॥ अथमहाहवेमहारणेमल्लयोर्वेलीयसोः मल्लः पात्रेकपालेवमत्स्यभेदेवलीयसीतिविश्वः। गुरुभुजावेवायुधंतेनगर्वितयोः तयोः
शिवार्जुनयोः करणानिकरचरणादिबंधाः तेएवश्वभ्रं खलानितेषांकुलेनासंघट्टेना तयागुरुः दुस्तरः अचलस्यहिमाद्रेःसंचलनंकंपः
तस्याहरणअध्यापकः कर्तरिल्युट्‌कारणःप्रववृतेप्रवृत्तः॥८॥ अयमिति॥ अयंपरोवर्तीपुमान्‌ असौभगवान्प्रसिद्धोदेवः तदुक्तं
इदमप्रत्यक्षगतंसमीपवर्तिचैतदोरूपं अदसस्तुविप्रकृष्टंतदितिपरोक्षंविजानीयादिति। उक्तःपांडवः अयंहितिष्ठदवस्थायां
अमइतिचेदितव्यं। अथपतितावेस्त्रामाह।मुनिनाअसेवंवेगादृशात्‌गणेमुमुहे।भ्रांतंमुमुहेचेविसेभावेलिट्‌॥९॥ प्रवालि

प्रववृतेथमहाहवमल्लयोरचलसंचलनाहरणोरणः॥ करणश्वभ्रखलसंकुलनागुरुगुरुभुजायुधगर्वितयास्तयोः॥८॥
अयमसौभगवानुतपांडवः स्थितमवाङ्मुनिनाशशिमौलिना॥ समधिरूढमजेननुजिष्णुनास्विदितिवेगवशान्मुमुहेगणैः॥९॥
प्रचलितेचलितंस्थितमास्थितेविनमनेनतमुन्नतमुन्नतौ॥ वृषकपिध्वजयोरसहिष्णुनामुहुरभावभयादिवभूभृता॥१०॥
करणश्वभ्रखलनिस्सृतयोस्तयोः हुतभुजध्वनिवल्गुविवल्गितैः॥ चरणपातनिपीडितरोधसः प्रससृपुः सरितः परितस्थलीं॥११॥

तमिति॥ असहिष्णुनातयोर्भारंव्यसहमानेनभूभृताशैलेनाभावभयाद्विनाशभयादिववृषकपिध्वजौध्वजयोस्तयोर्वृषकपिध्वजयोश्चलि
तेचलनेसतिप्रचलितंप्रचलेआस्थितस्थिरमवस्थानेस्थितंतथैवतस्थौविनमनेसतिनतंआनामितउन्नतावुन्नमनेसतिउन्नतमुदना
मिसर्वत्रभावेक्तः॥१०॥ करणेति॥ करणानिकरचरणबंधनविशेषाः तान्येवश्वभ्रंखलानितेभ्योनिःसृतयोर्मुहुर्मुहुःसक्तबंधयोरित्यर्थः
कृतःभुजध्वनिःभुजास्फोटशब्दोयस्मिन्कर्मणितत्तथावलासुन्दरंयथातथाविवल्गितैरुत्प्लवमानयोश्चरणपातैःपादक्षेपैःनिपातिता
निरोधांसियासांताःसरितोनद्यःस्थलींपरितःप्रससृपुःप्रसनुःआभितःपरितइत्यादिनाद्वितीयाजानपदेत्यादिनाङीप्कूलपातक्षोभा
उच्छलितसलिलाःसरितःस्थल्यान्यमक्रोपन्निस्यर्थः एतेनतयोर्भारउक्तः॥११॥

वियतीति॥ वियति वेगेन परिप्लुतमुत्पतितं तिसृणां पुरां विजयिनं त्रिपुरांतकं जितदक्षी सादिनाहनिमत्सपः। कपिध्वजश्चरणाभ्यामानमिताक्षितिः सन्
रयेण समभिसरसाभिराप्तश्चैतक रमध्येमार्गयोश्चरणयोर्निजाग्रहे निर्गृहीतवानुत्पतितस्य भगवतः चरणौ स्वकराभ्यां जग्राहेत्यर्थः॥१२॥ वि
विस्मितः इति॥ तेन कर्मणा चरणग्रहणकर्मणा सपदि विस्मितः सविस्मयः कर्मणोऽक्षयकरः मोक्षप्रदः इत्यर्थः। परः पुमान् हरः अवनौ ष्टुभुकामो
यस्य तं तु काम मनसोरप्रीतिमकार लोपः अत्कुमम क्रांतं तं पार्थं वक्षसा परिरभ्य निःपपिपेष गाढमालिलिंगेत्यर्थः। रथोद्धता वृत्तं॥१३॥ तप
सेति॥ भगवान्देवोऽस्या[illegible]र्जुनस्य विपुलसत्वतया विपुलसत्वसंपदेत्यर्थः यथा तथा तपसा मुदं न पयौ तथा रिलतां गुणसंहतेः तपसो वा द्वि
गुणसंपतापः। स्तमतिरिक्तमतिशयितं तं निजं सत्वमेवोपकारि उपकारक अहो प्रमिताक्षरा वृत्तं॥१४॥ अथेति॥ अथ हिमशुचिना हिशुभ्रेणमा

वियति वेगपरिप्लुतमंतरा समभिसृत्य रयेण कपिध्वजः॥ चरणयोश्चरणानमितक्षितिर्निजग्रहे तिसृणां जयिनं पुरां॥१२॥ विस्मितः स
पदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान्॥ स्प्रष्टुकाममवनौ तमम्लेममनिष्पिपेष परिरभ्य वक्षसा॥१३॥ तपसा तथा न मुदम
स्य पपौ भगवान्यथा विपुलसत्वतया॥ गुणसंहतेः समतिरिक्तमहो निजसत्वमेव मुपकारि सतां॥१४॥ अथ हिमशुचिभस्मभूषितं
शिरसि विराजितमिंदुलेखया॥ स्ववपुरतिमनोहरं हरं दधतमुदीक्ष्य न नाम पांडवः॥१५॥ सहशरधि निजं ततः कार्मुकं वपु
रतनु तथैव संवर्मितं॥ निहितमपि तथैव पश्यन्नसिवृषभगो लिरूपाययौ विस्मयं॥१६॥ ॥१६॥ १६

समेनाभूषितं शिरसि इंदुलेखया विराजितं शोभितं अतिमनोहरं स्ववपुर्दधतं किरातरूपं विहाय निजविग्रहं दधानं हरमुदीक्ष्य न नाम पांडु
वोऽप्रणतवान् अपरव[illegible]वृत्तं अपरजितमनरत्न युग्म सभेक्षमपरवक्रमिदं ततोजरा विति लक्षणात्॥१५॥ सहेति॥ वृषभस्य वगतिर्यस्य सो
र्जुनः ततस्तस्मिन्समये सह शरधिभ्यां वर्ततेऽइति सहशरधि सनिषंगं वोपसर्जनस्येविकल्पान्न सहशब्दस्य सभावः निजं कार्मुकं तथैव पूर्व
वदेव संवर्मितं सम्यक्कवचितं अतनु महत् निजं वपुस्तथैव निहितं यथापूर्वं स्थापितं असिं खड्गं च पश्यन् विस्मयमुपाययौ प्रमुदितं
वदना वृत्तं॥ प्रभुभेद्वद नाम वेन्मौ ररा विति लक्षणात्॥१६॥ १६ ॥ १६

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

सिषुरिति॥ अंबुवाहाः शनैरवनिं सिषुषिचुरुक्षां चक्रुः दिवं तलविक्षाश्चित्रं विचित्रं स्मूरे कुसुमं मंदारकुसुमानि जातावेकवचने स्याय जगाम अ
नाहतस्याताडितस्य दुंदुभेः जातावेकवचनं ध्वनिर्विमिलरुचिप्रसमम स्खिलन ओम्रशम्भोन शोपाप। अताडिताए व दुंदुभयो नेदुरित्यर्थः। सव
मिदमस्य सर्वलोकहितार्थत्वादिति वेदितव्यं ॥१७॥ आसेदुषामिति। गोत्रभिदः इंद्रस्यानुचरस्यानुसरणेन आसेदुषां मासन्नानां भुवनत्रय
स्य गोपायकानां रक्षकानां लोकपालादिकानां गम्पृधत्वेत्यादिना आयप्रत्ययः। हृदं तात्तण्वुल्हरो विछुव प्रकाशनशीलाः रत्नावलयो
येषां ते अलंकृत्यादिना इत्छुवुप्रत्ययः। विमानैः पुष्पकैराचिताव्याप्ता द्यौस्तारकितासंजाततारकेवरेजे उत्प्रेक्षालंकारः॥१८॥ हंसा

3 [illegible]षुचुरवनिं बुपाहाः शनैः सुरकुसुममियाय चित्रं दिवः॥ विमलरुचिभृशं नमो दुंदुभेर्ध्वनिरस्खिलमनाहतस्यानश्रे॥१७॥
आसेदुषां गोत्रभिदोनुवृत्या गोपायकानां भुवनत्रयस्य॥ से वि[illegible]छुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेवरेजे॥१८
हंसा बृहंतः सुरसद्मवाहाः संह्रादिकंठाभरणाः पतंतः॥ चक्रुः प्रयत्नेन विकीर्यमाणैर्व्योम्नः परिष्वंगमिवाग्रपक्षैः॥१९
मुदितमधुलिहो वितानलेखाः स्वजउपरि वितसत्सांतानिकीः॥ जलदइव निषेदिवांसमेनं मरुदुपसुखयांबभूव शश्वत्॥२०॥

इति॥ बृहंतो महांतः सुरसद्मानि विमानानि वहंतीति सुरसद्मवाहाः कर्मण्यण्। संह्रादिनीमुखराणि कंठाभरणानि किंकिण्यो येषां
ते पतंतो धावंतः हंसाः प्रयत्नेन विकीर्णमाणैः विक्षिप्यमाणैरग्रपक्षैः पक्षाग्रैः व्योम्नः परिष्वंगमालिंगनमिव चक्रुः उत्प्रेक्षा॥१९॥
मुदितेति॥ अथ मरुद्वायुर्जलदमेघ इव वषमेनिषेदिवांसमुपविष्टमिमं शश्वरं मुदिताः मधुलिहो भृंगा याभिस्ता वितानलेखाः उल्लो
चनाकाराः अस्त्रीवितानमुल्लोचइत्यमरः। सांतानिकीः संतानकुसुमविकाराः स्रजो मंदारमालाः इत्यर्थः संतानशब्दादिकार्थे ठक् उपरि विलसत्विकी[illegible]स्तीर्य उपसुखयांबभूव प्रह्लादयामास॥२० ॥ २० २० २०.६ २० २०॥ ४

॥३॥

कृतेति ॥ अभिन्नरोमोद्गमैर विरलरोमांचैर्गणपतिभिः प्रमथमुख्यैः रुद्रमुख्यैः परिवंदिते न साधुसाध्विति संस्तुतेन वदिअभिवर्णनस्तुत्योः कर्म द
ति कः हरेः सूनुना अर्जुनेन तपःसिद्ध तपःफलं भवसाक्षात्कारलक्षणं येन तस्मिन्नृद्धे तपःफले सतीत्यर्थः ॥ कृतध्वस्तिः ॥ तसंलोगधंयथा तथा
फलज्यायसी फलाधिका इति वक्ष्यमाणा स्तुतिर्जगदे कथिता ॥२१॥ शरणमिति ॥ अजितापराजित हे भव अतिकारुणिकमतिदयालुं
प्रयोजनमिलितठक भक्तिगम्यं भक्तिमात्रसुलभं भवंतं शरणं रक्षकमधिगम्य जितमृत्यवो जनाः ससुरासुरस्य जगतः भये आपदि श
रणो स्वयं रक्षिता रो भवंति शरणं गृहरक्षित्रोरिति विश्वः ॥२२॥ विपदेति ॥ हे ईश पुरुषजनेन यावत्त्वत्तव नतिः प्रणामो न क्रियते ताव

कृतध्वस्तिपरिवंदिते नोद्भवके गणपतिभिरभिन्नरोमोद्गमैः ॥ तपःसिद्धतपःफले फलज्यायसी स्तुतिरिति जगदे हरेः सूनुना ॥२१॥
शरणं भवंतमतिकारुणिकं भव भक्तिगम्यमधिगम्य जनाः ॥ जितमृत्यवोऽजित भवंति भये ससुरासुरस्य जगतः शरणं ॥२२॥
विपदेति तावदवसादकरी न च कामसंपदभिकामयते ॥ न नमंति चैकपुरुषं पुरुषास्तव यावदीश न नतिः क्रियते ॥२३॥
संसेवंते दानशीला विमुक्त्यै संपश्यंतो जन्मदुःखं पुमांसः ॥ यन्निःसंगस्त्वं फलस्यानतेभ्यस्तत्कारुण्यं केवलं न स्वकार्यं ॥२४॥

देवैकं पुरुषमेकाकिनं संतमवसादकारी क्षयकरी विपदेति प्राप्नोति कामसंपन्मनोरथसंपच्च नाभिव ॥ कामयते नेच्छति पुरुषाश्च न
नमंति न वशंवदतां निष्ठ निवृत्तिर्नापीष्टप्राप्तिर्भवतीत्यर्थः ॥ यथा तु त्वां प्रणमंते तथैव सर्वं लभ्यंत इति भावः ॥ प्रमिताक्षरा वृत्तं ॥२३॥
संसेवंत इति ॥ दानं शीलं स्वभावो नित्यधर्मो येषां ते दानशीलाः त्वमेव बोद्धिश्य दानं कुर्वंतः तस्माद्दानं परमं वदंतीति श्रुतेः कुतः
यतो जन्मदुःखं संपश्यंतोऽनुभवंतः पुमांसो विमुक्त्यै संसेवंते भवंतमिति शेषः ॥ न च त्वत्तश्चित्रं फलवत्त्वादिति भावः ॥ किंतु निःसंगः
निस्पृहस्त्वमानतेभ्यो नतेभ्यः प्रणतेभ्यः फलसीति यत्तत्केवलं निरुपाधिकं कारुण्यं करुणा स्वार्थेष्यप्रसयः ॥ न स्वकार्यमेत
देव चित्रं केवलं परार्थत्वादिति भावः ॥ ॥२४॥ २४ १४ २४ ३४ २४ २८

प्राप्यत इति॥ यत्तीर्थमिहास्मिन् लोके दूरमगत्वा प्राप्यते स्मर्तिमात्रसुलभमित्यर्थः। गंगादिकं न तथेति भावः। यत्तीर्थं परलोकगताय
फलति फलं यच्छति। अत्रापि स्मरणमात्रादेवेति भावः। भवः संसारः स एवार्णवस्तस्माद् बाह्यं बहिर्भवं संसारातीतं मोक्षप्रदमित्यर्थः। बाह्ये व
पंच्य्यजनेभ्य इति यत्प्रत्ययः। सर्वे कामाः प्रयोजनमस्येति सार्वकामिकं प्रयोजनमिति ठक्। तत्ताद्दृक् तरंतीत्यनेनेति तीर्थं
तारकं भवतस्तव दत्तः। अन्यारादिसादिनापं चमी। अन्यत्राक्ति। औपच्छंदसिकं वृत्तं॥२५॥ व्रजतीति॥ हे वरद त्वयि प्रीतिमान् शुचि विनिर्म
लं पदं कैवल्यं व्रजति प्रीतिहतमतिरूपहतबुद्धिः त्वद्द्वेषीत्यर्थः। घोरां गतिं तीव्रं नरकमेति। न चैतावता तव रागद्वेषकलंकशंकेत्याह।

प्राप्यते यदिह दूरमगत्वा यत्फलत्यपरलोकगताय॥ तीर्थमस्ति न भवार्णवबाह्यं सार्वकामिकमृते भवतस्तत्॥२५॥
व्रजति शुचि पदं त्वयि प्रीतिमान् प्रतिहतमतिरेति घोरां गतिं॥ इयमनघ निमित्तशक्तिः परा तव वरद न चित्तभेदः क्वचित्॥२६॥
दक्षिणां प्रणतदक्षिण मूर्तिमेतव तव शिवकरीमविदित्वा॥ रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय॥२७॥

इयमिति॥ हे अनघ निःकलंक इयं भक्त्यभक्त्योरेवेत्यर्थः। विधेयप्राधान्यात् स्त्रीलिंगता। परा दुस्तरा निमित्तशक्तिः स्वच्छेच्छिलम दि
मा तव क्व चिद्भक्ते द्वेषिणि वा कुत्रापि चित्तभेदो बुद्धिवैषम्यं नास्ति। स्वकर्मणैव तत्तुल्यफलतिपततिवान्। साक्षितया सर्वत्र सम इत्यर्थः॥२६॥
दक्षिणामिति॥ हे प्रणतदक्षिण भवप्रणतेषु दक्षिण दाक्षिण्यसंपन्न दाक्षिण्यं परच्छंदानुवर्तिः दक्षिणः सरलो वामपरच्छंदानुवर्तिनि स
मरः। शिवकरीं श्रेयस्करीं। हेत्वाहेत्वादिनार्थः दक्षिणत्वे इपि पूर्ववद्दक्षिणां मूर्तिं याथात्म्येन अविदित्वा पि रागिणापि रागद्वेषि
णापि रागद्वेषवतापि भक्त्या विहिता तव संस्मृतिर्भवाय संसारसंसारनिवृत्तये प्रसत्ति निषेधेपि न समासः रच्यते भवंतितत्संज्ञा
नं। विनापि भक्तिपूर्विका तव स्मृतिरेव मुक्तिनिदानमित्यर्थः। स्वागतावृत्तं॥१९ २७॥ २७॥ २७॥ २७॥

दृष्ट्वेति ॥ प्रेक्षया बुध्या करोतीति प्रेक्षाकारी विमृश्यकारी दृश्यानि द्रष्टव्यानि दृष्ट्वा ज्ञात्वा आचरणीयानि विधाय कर्तव्यानि च कृत्वा अपायैर्मुक्तं
पदं पाति अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इति श्रुतेः ज्ञानकर्मभ्यां मुक्तिरित्यर्थः किं तु ते पि ज्ञानकर्मणी त्वद्विषये एव मुक्तिसाधनं
नान्यविषये इत्याशयेनाह । सम्यगिति ॥ यः परं त्वां पश्यतीति तस्य सम्यक् दृष्टिः सम्यक् ज्ञानं यश्च त्वां उपास्ते स एव साधु विधेयं विधत्ते स एव साधु
कारीत्यर्थः । मत्तमयूरवृत्तं ॥ २८ ॥ मुक्ता इति ॥ मुनयो व्यासादयः स्वशक्त्या निजयोगमहिम्ना मुक्ताः तथा हि ज्ञानोपदेशैर्विधिनिषेधवाक्यैः
स्मृतीतिहासपुराणमुखेन प्रजानामुपकारवंतस्तो बहूपकाराश्च मोक्षप्रदस्तु तेषामन्येषां च त्वमेवेत्याह । समुच्छिनत्सीति ॥ अचिंत्यधामा अचिंत्यम
हिमा त्वमेवोपेतस्य शरणं प्राप्तस्य स्वस्य संबंधीनि सुदुस्तराणि कर्माणि बंधकानि पुण्यपापानि समुच्छिनत्सि न त्वत्र समर्था एवेति भावः ॥ २९ ॥

दृष्ट्वा दृश्यान्याचरणीयानि विधाय प्रेक्षाकारी याति पदं मुक्तमपायैः ॥ सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां यश्चोपास्ते साधु विधेयं स
विधत्ते ॥ २८ ॥ मुक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरुपकारवंतः ॥ समुच्छिनत्सि त्वमचिंत्यधामा कर्माण्युपेतस्य दुरुत्तराणि ॥ २९ ॥
सन्निबद्धमपहर्तुमहार्यं भूरिदुर्गतिभयं भुवनानां ॥ अद्भुताकृतिमिमामतिमायस्त्वं बिभर्षि करुणामय मायां ॥ ३० ॥ नरागिचे
तः परमा विलासिता वधूः शरीरे न तवास्ति मन्मथः ॥ नमस्क्रिया चोषसि धातुरित्यहो निसर्गदुर्बोधमिदं तवेहितं ॥ ३१ ॥

सन्निबद्धमिति ॥ अतिक्रान्ता मायां बंधरूपामतिमायः अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः हे करुणामय सन्निबद्धं स्वकर्मणा दृढबद्धं अ
त एवाहार्यमक्षयैरनुच्छेद्यं भूरि प्रभूतं भुवनानां दुर्गतिभयं नरकभयं दुर्गत्या नारकस्तु नरको निरयो दुर्गतिः स्त्रियामित्यमरः । अपहर्तुं अद्भुताकृतिमयीति वि
चित्ररूपामिमां दृश्यमानां मायां विग्रहलीलां बिभर्षि अन्येषां कर्मानुबंधी विग्रहपरिग्रहः भवतः परोपकारार्थः ॥ ३० ॥ नेति ॥ हे देव चेतस्तव चित्तं रा
गि रागयुक्तं न तु परमयोगित्वादिति भावः । तथापि परमा निरतिशया विलासिता शृंगारचेष्टाशीलता भिक्षाटनादिषु विग्रहेणांगीकृत्य
समानतयोच्यते भावः । किं च शरीरे अर्धांगे वधूः प्रसिद्धैवेत्यादि ति भावः । तथापि मन्मथश्च नास्ति तस्य भस्मीकरणादिति भावः । किं च उषसि प्रा
तःकाले दधातीति धातुः ब्रह्मणो ब्रह्मस्वरूपस्य तव नमस्क्रिया नमस्करणं च सर्वलोकं नमस्कुर्वतस्तवान्यनमस्करणमनुचितमिति भा
वः । इतीत्थं विरुद्धं दुर्दर्शं ईहितं चेष्टितं निसर्गतो दुर्बोधं दुर्ग्रहमित्यर्थः अदृष्टपूर्वत्वादिति भावः । वंशस्थं वृत्तं ॥ ३१ ॥ ३१ ॥ ॥

लवेति॥ हे देव तव सांगजं सलोमकं करिचर्म उत्तरीयं संविद्यानं दुस्पर्शमिति भावः। ज्वलन्मणिः ज्वलन् रत्नो महानहिः सारसनं कटिभूषाविशेषः। योऽन्येषां प्राणहरः इति भावः। क्लीबे सारसनं चाथ पुंस्कट्यां शृंखलं त्रिषु इत्यमरः। आस्यपंक्तिः कपालमाला स्रक् माल्यं शवभस्म चंदनं तु भयत्रयमस्यममंगलं चेति भावः। किंच एतानि हिमांशोः कला च समं तुल्यं तया च चकासति दीप्यन्ते त्वदाश्रयवशादरम्यस्यापि रम्यतेति किम कल्पितमिति भावः॥ ३२॥ अविग्रहस्येति। अविग्रहस्य वस्तुतोऽशरीरस्यासतः अतुलेन दुर्बोधत्वाद् असादृश्येन हेतुना केनापि कारणेनेत्यर्थः समेता संगता भिन्ना विलक्षणा च द्वयाद्विविधास्त्रीपुंसात्मिका मूर्तिर्यस्य अर्धनारीश्वरत्वेन भिन्नद्वयमूर्तिर्यथा तथा तिष्ठतः। अशरी

5 तवोत्तरीयं करिचर्म सांगजं ज्वलन्मणिः सारसनं महानहिः॥ स्रगास्यपंक्तिः शवभस्म चंदनं कला हिमांशोश्च समं चकासति॥ ३२॥
अविग्रहस्याप्यतुलेन हेतुना समेतभिन्नद्वयमूर्ति तिष्ठतः॥ तवैव नान्यस्य जगत्सु विद्यते विरुद्धवेषाभरणस्य कांतता॥ ३३॥
आत्मलोभपरिणामनिरोधे भूतसंघ इव नेत्वमुपेतः॥ तेन सर्वभुवनातिग लोके नोपमानमसि नाप्युपमेयः॥ ३४॥

रमेव विरुद्धं तदपि मारीनरात्मिकमिति किमत्र चित्रमस्तीति भावः॥ एवंविधस्य तवैव जगत्सु विरुद्धवेषाभरणे पूर्वोक्ते यस्य तस्य रुद्धवेषाभरणस्यापि सतः कांतता रमणीयता दृश्यते अन्यस्य न दृश्यते तस्मादचिंत्योऽसि महिमेति भावः॥ ३३॥ आत्मेति॥ हे देव त्वं भूतसंघ इव शरीरादिसंघात इव आत्मलाभपरिणामनिरोधैर्जन्मजरामरणैरुपेतो युक्तो नासि तेन कारणेन सर्वभुवनातिग सर्वलोको-त्तर उपमीयते येन तदुपमानं नासि उपमीयते यत्तदुपमेयमपि नासि। न कश्चित्त्वादृशोऽस्ति त्वमपि नान्यसदृशः अनन्यसाधारणत्वादित्यर्थः। भुजमुक्तं॥ ३४॥ ३४। ३४ ३४ ३४ ३४

त्यमिति॥ हेनाथ त्वं स्थावरजंगमानामंतकः संहर्ता त्वया हेतुना विश्वं सर्वं जगत्प्राणिति जीवति। त्वं योगिनां हेतुः प्रवर्तकं कर्मफलं भोगस्तेन हेतुफले
रूणासि निवर्तयसि तेषां त्वमेव बंधमोचकइत्यर्थः। किं च त्वं कारणानि महत्तादीनि तेषां कारणं निलजन्मान्यो णितेषां कारणकारणानां कारणं। अ
त्र सर्वत्र यतो वा इमानि भूतानि जायंते इति श्रुतिः प्रमाणमिति भावः॥ ३५॥ रक्षोभिरिति॥ रक्षोभिः राक्षसैः सुरमनुजैश्च दितेः सुतैः
दैत्यैर्वा लोके षु पदविकलमाधिप संप्राप्तं तत हे सर्व शरणागतानां आर्त्तिहारिणी भवते तुभ्यं नमः। स्वस्तीत्यादि नो भ्रुवर्धी व्याविन्याः पायाहारि
ण्याः नमस्क्रियायाः माहात्म्यसामर्थ्यं न कस्यो उन्नत्ये भवति शिर सस्त्वय्य नवतिरिति भावः॥ प्रहर्षिणीवृत्तं मान्नो जौ गस्त्रिदशापतिः प्रहर्षि
णीयमिति लक्षणात्॥ ३६॥ अथाष्टमूर्तिषु क्षितिस्तु वन्न वायुमूर्तितावदाह॥ तरसेति॥ यः पवनः तरसा बलेन तरसी बलरंहसीति विश्वः॥

त्वमंतकस्थावरजंगमानां त्वया जगत्प्राणिति देवविश्वं॥ त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणानां॥ ३५॥ ॥
रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा यल्लोके षु विकलमापमाधिपस॥ यात्विन्याः शरणगतार्तिहारिणी तन्माहात्म्यं भवभवते नमोस्क्रि
यायाः॥ ३६॥ तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्मयतः परं पवित्रं॥ परितो दुरितानि यः पुनीते शिव तस्मै पवनात्मने नमस्ते॥ ३७॥
भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषां॥ दहते भवबीजसंहतिं शिखिने नैकशिखाय ते नमः॥ ३८॥ ३८॥

भुवनानि बिभर्ति प्राणापानाद्यात्मना धारयति यतो यस्मात् शरणात् स्वपित्रं परं पवित्रं मंत्रं प्रणवं सकं ब्रह्म ध्वनति नदति सोऽहोर्णम् धर्म धर्मभिरितो व
त्क्रमाद्याद्यमारुतः। वर्णोजनयन नयत इति वचनात्। यः पवनः परितो दुरितानि पुनीते शोधयति मार्जयतीति यावत्। हे शिव तस्मै पापानप
तीति पवनो वायुः स एवात्मा यस्य तस्मै पवनात्मने नमः। वृत्तमुक्तं॥ ३७॥ अथाग्निमूर्तिमाह॥ भवत इति॥ जयिनि जयशीले सवात्मके
ब्रह्ममये ब्रह्मप्रधाने सदासने सम्यगासने योगासने इत्यर्थः। निषेदुषामुपविष्टानां भवतः स्मरतां भवतं ध्यायतां अधीगर्थदयेशादि
नाशेषे कर्मणि षष्ठी॥ भवबीजसंततिं संसारनिदानं कर्मसंघातं दहते भस्मीकुर्वते अनेकशिखाय बहुज्वालाय शिखिने वह्निमूर्तये
तुभ्यं नमः॥ ३८॥ ।

कि॰

॥८॥

अथायमायीमूर्तिमाह॥ आबाधेति॥ हे बीजानां प्रभवकारणभूत तेषां तत्प्रतिबिंबत्वादिति भावः॥ आबाधा आध्यात्मिकादिदुःखं मरणं प्रतीता भ्यां भयं तद्दर्वाविर्भावस्य तेमहत्ता भवानलेन संसाराग्निना विराग्यपुष्टेभ्यः समुपागमेन संसेवितया निर्वाणं गताय शांति येषु तेदृहते जीवय तीति जीवनं तत्स्मै जीवनाय जीवात्मने तुभ्यं नमः॥३९॥ अथामोमूर्तिमाह॥ यइति॥ वरीयान् गुरुतरो विभुरित्यर्थः॥ प्रियस्थिरेस्या दिनागुरुशब्दस्य वरादेशः॥ यः सर्वेषां वस्तूनां आवरिता आच्छादयिता वरणोतेस्तृ अस्य यः॥ सर्वैः शश्वं नावृतः स्वयं केनापि कस्यावि दपि अनावृतः अविद्यमाने आदिनिधने उत्पत्तिनाशौ यस्य सो नादिनिधनो निस्यः॥ निधनमित्यत्ति नाशं तान्हत्य मरः॥ इंद्रियाणां मार्गातीता

6

आबाधामरणभयार्चिषा विराग्यपुष्टेभ्यः श्रिवमहताभवानिलेन॥ निर्वाणं समुपगमेनयच्छतेते जीवानां प्रभवनमोस्तु जीव नाय॥३९॥ यः सर्वेषामावरितावरीयान्सर्वैः शश्वनावृतोनादिनिष्ठः॥ मार्गातीतायेंद्रियाणां नमस्ते विज्ञेयाय व्योमरूपाय त स्मै॥४०॥ अणीयसेविश्वविधारिणेनमोनमोंतिकस्थाय नमो दवीयसे॥ अतीत्य वाचां मनसां च गोचरे स्थिताय ते तस्य तये नमोनमः॥४१॥ ४१ ४१ ४१ ४२ ४३॥

य अतींद्रियाय अत एवाविज्ञेयाय अपरिच्छेद्याय कस्मै व्योमरूपाय तेनमः॥४०॥ ॥अणीयसेति॥ अणीयसे सूक्ष्मतरा य तथापि विश्वधारिणे जगद्धारकाय अंतिकस्थाय अंतर्यामिकतया सन्निहिताय ते नमः॥ तथा पिदवीयसे दुर्गहत्वात् दूराय ते नमः॥ वाचां मनसां च अगोचरं विषयमतः सस्थिताय वाङ्मनसगोचराय तस्तये तेषां वाङ्मनसानां अध्यक्षाय तदध्यक्ष नमः॥ वाचपले भवतइति वत्तये ऋ अमितिदिदूरुक्तिः संभ्रमेण प्रवृत्तिः चापलमिति काव्य तेरेवन हस्यत इति विरोधः तुभ्यं नमोनमः॥ मत्यद्रुकाव्यसंभ्रमः विरोधाभासोलंकारः॥ ॥४१॥ ४२ ॥

॥दि॥

असंविदानस्येति ॥ हे संविदं ज्ञानानां ईश ईशानः सर्वविद्यानामिति श्रुतेरिति भावः । प्रेक्षोपलब्धिः चित्संविदित्यमरः । असंविदानस्य अजानतस्य
समोऽगम्यृच्छि इत्यादिना विदेः सपूर्वादकर्मकात् शानच्प्रत्ययः । मम दुश्चरितं शस्त्रप्रयोगरूपं दुश्चेष्टितं तितिक्षितुं सोढुं तिजः
सनंतात्तुमुन्प्रत्ययः । त्वमर्हसि मोहाद्विरुध्य पुनरभ्युपेयुषां पश्चाच्छरणागतानां दुरात्मनामपि भवानेव गतिः । न हि शरणागतानामपराधं
गणयतीत्यर्थः ॥४२॥ संप्रति वरं याचते । आस्तिक्येति । हे धर्मप्रिय प्रियो धर्मो यस्येति प्रियधर्मः समासांतो विधिरनित्य इति न समासांतो
ऽस्य पः । अस्तीति मतिरस्यास्त्यास्तिकः पारलौकिकः । अस्ति नास्ति दिष्टं मतिरिति ठक् । तस्य भावः आस्तिक्यं विश्वासः तेन शुद्धं विमलं

असंविदानस्य ममेश संविदां तितिक्षितुं दुश्चरितं त्वमर्हसि । विरोध्य मोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनामपि ॥४२॥
आस्तिक्यशुद्धमवतः प्रियधर्म धर्मं धर्मात्मजस्य विहितागसि शत्रुवर्गे । संप्राप्नुयां विजयमीश यया समस्तौ तां भूतनाथ विभुता
वितराहवेषु ॥४३॥ इति निगदितवंतं सूनुमुच्चैर्मघोनः प्रणतशिरसमीशः सादरं सांत्वयित्वा । ज्वलदनलपरीतं रौद्रमस्त्रं दधा
नं धनुरुपपदमस्मै वेदमभ्यादिदेश ॥४४॥ ॥ श्रीरामचंद्रो जयति ॥ ॐ श्रीरघुनाथार्पणमस्तु ॥ ॥

धर्मं वैदिकाचारमवतः पालयतः धर्मात्मजस्य युधिष्ठिरस्य विहितागसि कृतापकारे शत्रुवर्गे विषये ॥४३॥ इतीति । इत्येवं निगदित
वंतं प्रणतशिरसं मघोनः सूनुमर्जुनमीशः सादरं यथा तथा सांत्वयित्वा उपलभ्य अस्मै अर्जुनाय ज्वलतानलेन तेजसा परीतं व्याप्तं रौ
द्रं रुद्रदेवताकं पाशुपतास्त्रं दधानं धरूपदं वेदं शब्दस्य न तु संज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञितत्वाद्विभावात् । अवाच्यदोषवचनं दो
षमाहुरलंकारिकाः । तदुक्तं पदवाप्यस्य वचः स्यादवाच्यवचनं गदितमिति समाधानं तु धनुःशब्देन शब्दपरिणामोऽर्थः परोपदेशयो
ग्यो धनुर्वेदो लक्ष्यत इति कथंचित्संपाद्यं ॥४४॥ ४॥ ४४। ४४ ॥ ४४ ४४ ॥

सइति॥पिंगाक्षः पिंगलाक्षः श्रीमान् शोभावान् भुवनमहनीयेन लोकपूज्येन महसा तेजसा भीमां तनुं बिभ्रत् त्रिगुणस्त्रिशिखपरिवारः आकाश
यस्य तत् त्रिगुणपरिवारं त्रिशूलं तद्देवप्रहरणयुधं यस्य स तथा॥ सूर्यपक्षे तु गुणात्रयपरिवार इति त्रय्यात्मक इति वायोर्गयं स धनुर्वेदः सुर
गणैः स्तुतिभिरुपगीतः सन् ईशानं शिवं त्रिस्त्रिवारं द्विश्चतुर्भ्यैः सुमु इति सुमप्रत्ययः परीत्य प्रदक्षिणीकृत्य वीरं पांडोः सुतं मत्कुनेषभास्वा
नूजलधिमिवाभियय्यौ शिखरिणी वृत्तं॥४५॥ अथेति॥ अथ त्रिदशपतिपुरोगाः इंद्रादयो लोकपालाः शशधरमौलेः शंभोरभ्यनुज्ञा

सपिंगाक्षः श्रीमान् भुवनमहनीयेन महसा ततनूं भीमां बिभ्रत् त्रिगुणपरिवारप्रहरणः॥ परीत्येशानं त्रिस्तुतिभिरुपगीतः सुरगणैः सुतं
पांडोर्वीरं जलदमिव भास्वानभिययौ॥४५॥ अथ शशधरमौलेरभ्यनुज्ञामवाप्य त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै॥ अवितथ
फलमाशीर्वादमारोपयंतो विजयि विविधमस्त्रं लोकपाला वितेरुः॥४६॥ असंहार्यो त्वाहं जयिनमुदयं प्राप्य तरसा धुरं गु
र्वी वोढुं स्थितमनवसादाय जगतः॥ स्वधाम्ना लोकानां तमुपरि कृतस्थानममरास्तपोलक्ष्मीदीप्तं दिन कृतमिवोच्चैरूपजगुः॥४७॥ ॥

मवाप्य पूर्णकामाय तस्मै पांडवाय अवितथफलममोघ अफलमाशीर्वादमारोपयंतः प्रयुंजानाः विजयी जयशीलं विविधं नानाविधं
अस्त्रं इंद्रादिकं वितेरुः ददुः॥४६॥ असंहार्येति॥ जयिनं जयशीलं उदयं अस्त्रलाभरूपं अन्यत्रोदयमुदयाद्रिं प्राप्यासंहार्यो त्वाहं
हर्तुमशक्यात्वाहं जगतोऽनवसादाय क्षेमायगुर्वीं धुरं दुष्टनिग्रहभारं तपोपहारं च वोढुं स्थितं स्वधाम्ना तेजसा लोकानामुपरि
कृतस्थानं कृतस्थितिं कृतपदं अन्यत्रोपरिवर्तमानं तपोलक्ष्म्या दीप्तं पांडवममरा दिनकृतमिवोच्चैरूपजगुः॥ धन्योसि माहा
भाग्योसि इत्यादि तुष्टुवुः॥ शिखरिणी वृत्तं॥४७॥ ४८ ॥ ॥ ॥ ॥ ॥ ॥ ४८॥ ॥

रयेणेति॥ रयेण पतंती सा चापयष्टिः भवोद्भवेन ईश्वरेण परे ओजसि परमस्योतिषि स्थितेन जन्हुना राजर्षिणा समुद्धता उत्कटता अनेकमार्गा त्रिस्रोता सिं-
धुर्गंगेव आत्मनि सन्निदधे सम्यग्धृता अंतर्निलायितेत्यर्थः॥५२॥ विकार्मुकइति॥ विकार्मुकः भग्नचापः अतएव परिच्युतौदार्यो दानवर्जितः उप-
चारः सत्कार इव कर्मसु कृत्येषु वशोऽवनीयः पूज्यस्य सत्वावष्टंभेनानाधिलत्वात् सोऽर्जुनः भल्लभृता सलीलम् अदूरपातैरतिगाढप्रहारैः पत्रिभिः दूर-
आसंतं विचिक्षिपे नुन्नः॥५३॥ उपोढेति॥ उपोढम् आसन्नं कल्याणफलं मस्त्रलाभरूपं स्वर्गादिकं च यस्य सः वीरव्रतम् आहवादनिवृत्तिरूपं तीव्रं
तपश्च अशिक्षन्न पात्र्य यत्र पुण्यायोरण्ये आश्रमः तत्र तिष्ठतीति पुण्यरण्याश्रमस्थः संयतात्मा नियतवितः मुनिरर्जुनः कश्चित्तपस्वीव तैः शिवस्ये

रयेण सा सन्निदधे पतंती भवोद्भवेनात्मनि चापयष्टिः॥ समुद्धता सिंधुरनेकमार्गा परिस्थितेनौजसि जन्हुनेव॥५२॥
विकार्मुकः कर्मसु शोच्यपूज्यः परिच्युतौदार्य इवोपचारः॥ विचिक्षिपे भल्लभृता सलीलं स पत्रिभिर्दूरमदूरपातैः॥५३॥
उपोढकल्याणफलोऽभिरक्षन्वीरव्रतं पुण्यरणाश्रमस्थः॥ महोपवासैरिव संयतात्मा तेपे मुनिस्तैरिषुभिः शिवस्य॥५४॥
ततोऽग्रभूमिं व्यवसायसिद्धेः सीमानमन्यैरतिदुस्तरं सः॥ तेजःश्रियामाश्रयमुत्तमासिं साक्षादहंकारमिवाललंबे॥५५॥
शरानवद्यन्ननवद्यकर्मा चचार चित्रं प्रविचारमार्गैः॥ हस्तेन निस्त्रिंशभृता तिदीप्तः सांशुना वारिधिरूर्मिणेव॥५६॥

इषुभिः जपोपवासैरिव तैः तेपे तपः कर्मणि लिलिहे॥५४॥ ततइति॥ ततः तस्यापातर्जिनामंतरं सोऽर्जुनः अग्रभूमिं वियद्दिगंतव्यस्थानं शरणमित्यर्थः कुतः
व्यवसायसिद्धेः सीमानमवधिं साधकतममित्यर्थः। अन्यैः परैरतिदुस्तरं दुरतिक्रमं तेजः श्रीयां प्रतापसंपदं आश्रयं हेतुमित्यर्थः उत्तमासिं
महारवड्गं सन्नोहृदि साद्दिनासमासः साक्षात्सोसपद्मम अहंकारं सविग्रहं अभिमानमिवाललंबे जग्राह॥५५॥ शरानिति॥ अनवद्यकर्मा अ-
गर्ह्यकर्मा अवद्यपण्येत्यादिना निपातः शरान् अवद्यन् खंडयन् निस्त्रिंशभृता खड्गयुक्तेन करेण सांशुसहितेन ऊर्मिणा वारिधिरिव दीप्तः
सोऽर्जुनः प्रविचारमार्गैः खड्गिनां गतिभेदैश्चित्रं यथा तथा चचार॥५६॥ ५६ ५५५५५ ।५६

॥

यथेति॥ भाभिरुपलक्षितः सहस्ररश्मिरर्को यथा निजे वर्त्मनि नभसि तथो छायामयप्रतिबिंबरूपः सन्नप्सु यस्य स्पष्टद्विमूर्त्तिर्विभाति तथासावर्जुनो नभसि व्योम्निर
पास्थलीषु च। आशु भ्रमन् तथा स्पष्टद्विमूर्त्तिर्यस्य सः स्पष्टद्विमूर्त्तिः सोऽर्जुनः भूतैर्गणैः ददृशे दृष्टः। यथैकोऽपि नभस्यप्सु चानेक इव दृश्यते तथासावपि
द्विविधविचाशुसंचारयोगपद्यभ्रमादेवैकोऽप्यनेक इव गणैः दृष्ट इत्युत्प्रेक्षा॥५७॥ मुष्टिप्रदेशादिति॥ शिवेन प्रणुन्नः क्षिप्तः तेन शिलीमुखेन
त्सरात्मदेशान्मुष्टप्रदेशमवधीकृत्य त्सरुः खड्गादिमुष्टिरित्यादि सनमः। अपवर्त्तितांगो लेनविग्रहः असिः खड्गः तस्यार्जुनस्य पाणेः करान्मेघस्य
वप्रात्तटाद्वैद्युतो विद्युत्संबंधी अग्निरिव ज्वलन् पपात॥५८॥ आक्षिप्तेति॥ आक्षिप्तानि अपहृतानि चापावरणेषुजालानि धनुर्वर्मबाण
समूहाः यस्य सः। लूनोत्तमासिः छिन्नमहाखड्गः मृधे रणे मृधमास्कंदनं संख्यमित्यमरः अवधूतो निरस्तः सोऽर्जुनः उत्सादितं उद्यानं यस्य स भूमेः प्र

यथा निजे वर्त्मनि भाति भाभिश्छायामयश्चाप्सु सहस्ररश्मिः। तथा भ्रमन्नाशु नगस्थलीषु स्पष्टं द्विमूर्त्तिर्ददृशे स भूतैः॥५७॥
मुष्टिप्रदेशादपवर्त्तितांगः शिवप्रणुन्नेन शिलीमुखेन। ज्वलन्नसिस्तस्य पपात पाणेर्घनस्य वप्रादिव वैद्युतोऽग्निः॥५८॥
आक्षिप्तचापावरणेषुजालः छिन्नोत्तमासिः समृधेऽवधूतः। रिक्तः प्रकाशश्च बभूव भूमेरुत्सादितोद्यान इव प्रदेशः॥५९॥
स खेटकेनाप्राप्य परामर्षवान्भुजद्वितीयोऽपि विजेतुमिच्छया। ससर्ज वृष्टिं परिरुग्णपादपां दरीजयेनश्मघनः पयस्सामिवाश्मनां॥६०॥
नीरंध्रं गमितेऽवतिक्षयं पृषत्कैर्भूतानामधिपतिना शिलाविताने। उच्छ्रायस्थगितनभोदिगंतरालं विक्षेपक्षितिरुह जालमिंद्रसूनुः॥६१॥

देशो भूभाग इव रिक्तः प्रकाशो निःसंबाधश्च बभूव॥५९॥ स इति॥ परात्परस्मात् शत्रोः पूर्वादिभ्योऽनभ्येयेति विकल्पान्नस्मादेशः खड्गेनो भंगं प्रा
प्य अमर्षवान् क्रोधवान् सोऽर्जुनो भुजद्वितीयो भुजमात्रसहायः सन्नपि जेतुमिच्छया द्रवेभ्य इतराणि तेषां इवेतरेषां कठिनानां पयसामिव करणानि
स्यर्थः। अश्मनां संबंधिनी परिरुग्णाः पादपा यया सा तां वृष्टिं ससर्ज अश्मसंघातं ससर्जः॥६०॥ नीरंध्रेति॥ शिलाविताने शिलासमूहे भूतानां
मधिपतिना शिवेन पृषत्कैर्बाणैः क्षयं गमिते नीते सति इंद्रसूनुरर्जुनः उच्छ्रायेण उच्छ्रायेण स्थगितं नभः दिगंतरालं च येन तत् नीरंध्रं सांद्रं रोह
तीति रुहाः इगुपधज्ञाप्रीकिरः कः। क्षितेरुरुहा लेषां तालं विक्षेप प्रेरयामास गमिते वालि इति प्रामादिक पाठः॥ ॥६१॥ ॥ ॥६१॥

निःशेषमिति। ईशानः शिवः शानवृनिःशेषं पश्चात्तथा शकलितानि वल्कलानि विरक्षल्वुः अंगानि शाखाप्रशाखारोमज्जावयोषां आ बुद्धितं नमोदिशामंतराले चये च
नीरंध्रं सा उद्रोहं रोहतीति रुहः इगुपधलक्षणकप्रत्ययः। क्षितौरुहा वृक्षास्तेषां तालेविक्षेपप्रेरयामास वृषक्षयंगमितवतीतिग्रामादिकः पाठः भुवमपि
तः कषायो रागः स्वरसेन रंजनं निलियावत् रागो कषायः कषायो रक्तोऽइति वैजयंती। तेन चित्रां विचित्रवर्णां कुर्वद्भिः सकुसुमपल्लवैस्तैस्तैः नगेंद्रवृक्षैः रंगार
णरंगे याद्देवतास्ताभ्यो बलिपूजामिव आत्तेने विस्तारयामास ॥६२॥ उन्मज्जन्निति। गांडीवी अर्जुनः उन्मज्जन्नुत्तरन् मकरो जलग्राह विशेषः अमरापगा
याः गंगाया इव वापा नद्या बाणप्रवाहात् वेगेन प्रतिमुखमभिमुखमेत्यागत्य कनकशिलानिभं कनककठिनं काठिण्यातिशयद्योतनार्थं विषमलोचनस्य
त्र्यंबकस्य वक्षो हृदयं भुजाभ्यामाजघ्ने प्रहृतवान् अत्र आङ्नेपदविवायें आङोयमहन इति स्वार्थकर्मकाधिकारात् नापि स्वांगेकर्मकत्वाद्भवेति वक्तव्य

निःशेषं शकलितवल्कलांगसारैः कुर्वद्भिर्भुवमपितः कषायचित्रां। ईशानः सकुसुमपल्लवैर्नगेंद्रैरातेने बलिमिव रंगदेवताभ्यः॥६२॥
उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः। गांडीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः॥६३॥
अभिलषित उपायं विक्रमं कीर्तिलक्ष्म्योरसुगममरिसैन्यैरंकमभ्यागतस्य। जन इव शिशुलेसुप्रियस्यैकसूनोरविनयमपि सेहे पांडव
स्य स्मरारिः॥६४॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारवीकृतौ शस्त्राभिगमनो नाम सप्तदशः सर्गः समाप्तः॥१७॥

बलपद्नो विसापादना वारणाच्च न हि युद्धाय सन्नद्धाः श्रुतिपूर्णा अपि मध्वा स्वपक्ष्मा ताडनमाचरंतीति किं तु स्वभुजास्फालनं किं वानेनतरं वक्ष्यमाण
भावफलेका विनयसहनप्रतिघाताविरोधाश्च वक्षणवेत्यनयस्तु व्यवधानास्तु वैरवेदूषितः तस्माद्व्याकरणांतराद्वृद्ध्या ॥६३॥ अभिलषत इति। कीर्ति
लक्ष्म्योरूपायसाधनभूतं अरिसैन्यैरसुगमं दुरासदं विक्रमं हननकारणमिति सूच्यते शिशुले शैशवसुप्रियस्य प्रेमाभिलषतः सानुपक्षेपयत्किं
चिन्महत्फलं प्रार्थ्यमानस्येत्यर्थः। अत एवांकमभ्यागतस्योत्संगमारूढस्य पांडवस्याविनयं स्मरारिः। अनेकमनूकवात्सल्यमेवस्य सुतएव
सूनुस्तस्यैकसूनोरविनयं जनक इव सेहे॥६४॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथविरचितायां किरातार्जुनीयव्याख्यायां सप्तदशः सर्गः

17

9

4 ॥ ॥ किरातस्याऽयंसमाप्तसर्गःसप्तदशः ॥ ॥

२८१०

किरातस्याऽयंप्रारंभसर्गः सप्तदशः

श्रीअन्नपूर्णायै नमः ॥ अथ पंचभिः पार्थविशेषणान्यद्भिः कुलकमाह ॥ अथेत्यादि ॥ अथ जयलक्ष्मीप्राप्त्याकांक्षानंतरं आपदामुद्धरणक्षमेषु आपन्निवारणसमर्थेषु
अस्मेषु प्रस्थापनादिषु तादृशेषु मित्रेष्वपि व तिरोहितेषु अंतर्हितेषु सत्सु गुरूणाम दृष्ट्वा स्वपौरुषेणैव तादृशेन शरासनेन धृतिं धैर्यमभियुष्मन् वर्द्धय
न् ॥ अद्यापि धनुषि पौरुषे सति किं यानयं किरात इति धैर्यमवलंबमान इत्यर्थः ॥ अत एव वगुरुश्रीः प्रवृद्धशोभः शोभासंपत्तिसंप्राप्त लक्ष्मी
श्रीरिव गम्यत इति शेषः ॥ १ ॥ पुनश्च भूरिप्रभावेन महानुभावेन सह रणाभियोगाद्रणलाभात् शीलः तद्वीर्यध्यात्मनुविध्या वितिष्ठो विष्टम्यः
तथा स्वस्पृष्टः प्रज्वलन्नपि अविस्पष्टो विप्रकाशो यस्य सः कृतः सर्पन् प्रसरन् महाधूमो यस्य सर्पन्महाधूमो द्विवह्निरिव स्थित इतः ॥ २ ॥ तेज इति ॥
पुनश्च परैरहार्यम् अभेद्यं निजं स्वकं महत् तेजो वीर्यं मित्रमिव समाश्रित्य अत एव भीमे अरिरवदुर्गस्य स्मिन्नरिदुर्गे शत्रुसंकटे अस्खलितस्वभावम्

अथापदामुद्धरणक्षमेषु मित्रेष्विवास्मेषु तिरोहितेषु ॥ धृतिं गुरुश्रीर्गुरुणाभियुष्मन् स्वपौरुषेणेव शरासनेन ॥ १ ॥
भूरिप्रभावेण रणाभियोगात्प्रीतो निविष्टस्तु श्चतदीयवध्या ॥ सम्बोप्य विस्पष्टवपुःप्रकाशः सर्पन्महाधूम इवाद्रिवह्निः ॥ २ ॥
तेजः समाश्रित्य परैरहार्यं निजं महन्मित्रमिवोरुधैर्यम् ॥ आसादयन्नस्खलितप्रभावं भीमे भुजालंबमिवारिदुर्गे ॥ ३ ॥
ने वंशोचितत्वादभिमानवत्या संप्राप्तया संप्रियतामसुभ्यः ॥ समक्षमादित्सितया परेण वध्वेव कीर्त्या परितप्यमानः ॥ ४ ॥

वलशीलमुरु धैर्यं महाधैर्यं भुजालंबमिवासादयन् प्राप्नुवान् ईदृक्संकटे महावीरतात् धैर्यमत्यजन्नित्यर्थः ॥ ३ ॥ वंशेति ॥ पुनश्च
अभिमानो भ्रमता बुद्धिस्तद्वत्या विषयतया कर्मणि कर्तृकर्मविपर्ययः अभिमानदे नैसर्थः असंन्यत्र कुलशीलाद्यभिमानेव स्ववंशोचित
त्वात् स्वकुलानुरूपात् असुभ्यः प्राणेभ्योऽपि संप्रियतां संप्राप्तयापरेण शत्रुणा समक्षेणा समीपे समक्षमग्रतः अव्ययीभावेशरत्समन्ती
भ्य इति समासांतः आदातुमिष्टा तया आदित्सितयेत्यर्थः आङ्पूर्वाद्दातेः सनंता(क्मणि क्तः) कीर्त्या हेतुना वध्वेव परितप्यमा
नः कर्तव्ये शमनचहेलावितितत्तीया कन्यया शोक इति वत् ॥ ४ ॥ ५ ॥ ॥ ४ ॥ ४ ॥

पतितमिति॥पुनश्च नगानां पतिं हिमवंतमिव बद्धमूलं विपक्षं शत्रुं तरसा बलेन उन्मूलयिष्यन्तं किं तु त्रिपथगैर्गंगा बतीति त्रिमार्गगा उत्तरपदसमासः त
स्याविगइ वेश्वरेण लघुप्रयत्नमल्पप्रयत्नतेयाऽर्थैर्विनिहीनवीर्यः प्रतिबद्धशक्तिः॥पुराकिल हिमाद्रि विदलनाय गंगा भास्वतं गंगाप्रवा
हं गंगाधरो निजजटाजूटेन निजग्रहे इति पौराणिकी कथा एतदित्यर्थः॥५॥संस्कारेति॥एवं भूतः पार्थः संस्कारवत्त्वात्संस्कारश्चित्र रचना
न्यत्र साधुत्वं असाधूनां प्रयोगानिषेधादिति भावः॥अथवा संस्कारो व्युत्पत्तिस्तद्वत्त्वाच्छ्रेष्ठिलोऽर्मय स्तु प्रयोगः संधानमोक्षा॥अभ्यासः गु
णः तदाहितो तिशयः मौर्विविअन्यत्र तु प्रयोगो नियुक्तव्यवहारः शिक्षा अभ्यासः रगुणाः स्वस्थानकरणादयः श्लेषप्रसादादयो वा ते भूष

पतिं नगानामिव बद्धमूलमुन्मूलयिष्यंस्तरसा विपक्षं॥ लघुप्रयत्नं निगृहीतवीर्यस्त्रिमार्गगावेगमिवेश्वरेण॥५॥
संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु॥जयं जयार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे॥६॥ कुलक
भूयः समाधानविवृद्धतेजा नैवं पुरा युध्यत इति मेथावान्॥सनिर्ववामास्त्रममर्षनुन्नं विषं महानाग इवेक्षणाभ्यां॥७॥

णं येषां तेषु यथाऽभूतोऽर्थो येषां तेषु यथार्थेषु अन्यत्र नियमार्थेषु अर्णं ति हिंसंतितेशराः तेषु जयं तन्निर्वाहकत्वात्तदाधारविवक्षायां सप्तमी
शब्देषु सुप्तिङ्पदेषु भावः प्रवृत्तिनिमित्तं सामान्यादिस एवार्थः तमिव आशशंसे आचकांक्षा यथा शाब्दिकाः शब्दैरर्थं साधयंति तद्वदयं
शरैः जयं साधयितुमियेषेत्यर्थः॥६॥भूय इति॥भूयः पुनरपि समाधानेन युद्धमनो व्यवस्थापनेन विवृद्धतेजाः प्रवृद्धप्रता
पः पुरा पुरा तनं युद्धं एवं इत्थं शक्तिसादकरं न भवतीति हेतोर्व्यथावानूपरितापवान्सोऽर्जुनः ईक्षणाभ्यां दृष्टिभ्यां महानागो
महानागो महासर्पो विषमिवामर्षनुन्नं क्रोधोत्थापितं अस्त्रं अशुनिर्ववाम निर्जगार॥सात्विकानां सर्वरससाधारण्याद्रौद्रे अ
श्रुदयोक्तिः॥७॥ ७॥ ७॥७॥

तस्येति॥ आहवायासेन विलोलमौलेः स्रस्तकेशबन्धस्य॥ चूडाकिरीटकेशाश्च संयता मौलयस्त्रियमित्यमरः। संरम्भताम्रे कोपारुणे आ
आयते लोचने यस्य संरम्भः संभ्रमे कोप इति विश्वः। तस्यार्जुनस्य रोषेणात तप्तं मुखं। निदाघो घर्मः निर्वापयिष्यन् शिशिरीकरिष्यन्निव सुप्रक्षा
प्रस्नापयामास सिषेच। स्वेदं जनयामासेत्यर्थः। स्नातेर्ण्यन्ताद्विकल्पत्वात् मित्वात् ह्रस्व इति ह्रस्वत्वविकल्पः॥८॥ क्रोधेति॥ क्रोध एवान्धका
र इव तेनान्तरितः आवृतः सोऽर्जुनः घनोपरुद्धो मेघावृतः तिग्मरश्मिर्वृष्टेः प्रभवाय वर्षणायेति ऊर्ध्वा अंशवस्तेषां राजीरिव अर्कस्योर्ध्वांशुरेखा
द्वयोर्वृष्टिलिंगमित्यागमः। रणाय रणप्रवृत्तये तिस्रस्त्रिसंख्याकाः भ्रूभेदा भ्रूभंगस्तस्य रेखा बभार॥९॥ सइति॥ सोऽर्जुनः अम्बुदव
न्नदतीति अंबुदनादि कर्तर्युपमाने इति णिनिः। चापं दिङ्नागो दिग्गजोऽद्रिशृंगमिव हस्तेन करेण प्रध्वनय्य ध्वानयित्वा शंभोर्बलानि अशरीरः अनंगः कामः
चेतांसि युवमनांसि चिन्ताभिः प्रयोजनध्यानैरिव इषुभिस्तताप तापयामास तपतिः सकर्मकः अत्रेषुशब्दः स्त्रीलिंगः अन्यथा उपमानोपमेययोर्भिन्न

तस्याहवायासविलोलमौलेः संरम्भताम्रायतलोचनस्य॥ निर्वापयिष्यन्निव रोषतप्तं प्रस्नापयामास मुखं निदाघः॥८॥
क्रोधान्धकारान्तरितो रणाय भ्रूभंगरेखाः स बभार तिस्रः॥ घनोपरुद्धः प्रभवाय वृष्टेरूर्ध्वांशुराजीरिव घर्मरश्मिः॥९॥
स प्रध्वनय्याम्बुदनादि चापं हस्तेन दिङ्नाग इवाद्रिशृंगं॥ बलानि शंभोरिषुभिस्तताप चेतांसि चिन्ताभिरिवाशरीरः॥१०॥
सद्वादितेवाभिनिवि[redacted]ष्टबुद्धौ गुणाभ्यसूयैव विपक्षपाते॥ अगोचरे वागिव चोपरेमे शक्तिः शराणां शितिकण्ठकाये॥११॥

लिंगताषादोपत्तेः। पत्री रोप इषुर्द्वयोरित्यमरः॥१०॥ सदिति॥ अभिनिविष्टा शास्त्रनिश्चिता बुद्धिर्यस्य तस्मिन् अभिनिविष्टबुद्धौ शास्त्रनिश्चितबु
द्धौ विषये सद्वादिता प्रामाणिकार्थसमर्थनकथेव नहि सम्यगभ्यस्ता आस्त्रप्रतिसद्वाघपिशाचीति तिव्याचक्षते। इति केचित्। अन्ये तु अभिनि
विष्टबुद्धौ आग्रहविशिष्टचित्ते विषये सद्वादिता हितोपदेष्टृत्वमिव न ह्याग्रही हितं गृह्णातीति भावः। विपक्षपाते वीतरागे विषये गुणाभ्यसूया
गुणासहिष्णुता इव सहि समदर्शी द्विषन्मतिं न दुष्यति इति भावः। अगोचरे अवाङ्मनसगोचरे ब्रह्मणि वागिव। यतो वाचो निवर्तन्ते अप्रा
प्य मनसा सहेति श्रुतेरिति भावः। शराणां शक्तिः शितिकण्ठकाये शिवशरीरे विषये उपरमे उपरता। तस्याक्षोभ्यमहिमत्वादिति भावः। विभाषा कर्म

उमेति॥ पांडुसुतप्रणुन्नाः क्षिप्ताः शिलीमुखाः शल्यमुखे येषां ते शिलीमुखाः बाणाः उमापतिं शिवं अभ्युच्छ्रितस्य अभ्युन्नतस्यादेर्नितंबं कटकं हेमंते भव
स्य हैमनस्य सर्वत्राण्च तलोपश्चेति अण्प्रत्ययः तकारलोपश्च अर्कस्य पादा रश्मय इव पादा रश्म्यङ्घ्रितुर्यांशा इत्यमरः। न व्यथयां बभूवुः।
पटांतरे मध्ये स्थितस्य हैमनस्यार्कपादा असुभृतां प्राणिनां सम्यक् हिमवन दुःखमुत्पादयामासुरिति॥१२॥ समिति॥ गणानां पतिः शिवः नी
व्रं तस्यार्जुनस्य पराक्रमं वेप्र आनतस्य पत्रिणः तस्य तटप्रहारिण इत्यर्थः। सुरद्विपस्यासत्यं विषाणभेदं दंतप्रहारं हिमवानिव संप्रीयमाणः
सन् हृष्यमाणः अनुबभूव अनुभवति स्म। तस्याक्षोभ्यत्वादनुत्थितक्षतत्वाच्चेति भावः॥१३॥ तस्मा इति॥ तस्मै पार्थाय भारस्य भूभारस्योद्धरणे

उमापतिं पांडुसुतप्रणुन्नाः शिलीमुखा न व्यथयां बभूवुः॥ अभ्युत्थितस्यादिपतेर्नितंबमर्कस्य पादा इव हैमनस्य॥१२॥
संप्रीयमाणोऽनुबभूव तीव्रं पराक्रमं तस्य पतिर्गणानां॥ विषाणभेदं हिमवानसह्यं वप्रानतस्येव सुरद्विपस्य॥१३॥
तस्मै हि भारोद्धहने समर्थं प्रदास्यता बाहुमिव प्रतापं॥ चिरं विषेहेऽभिभवस्तदानीं स कारणानामपि कारणेन॥१४॥
प्रत्याहतौजाः कृतसत्त्ववेगः पराक्रमं ज्यायसि यस्तनोति॥ तेजांसि भानोरिव निष्पतंति यशांसि वीर्यज्वलितानि तस्य॥१५॥

निराकरणे समर्थं प्रतापं बाहुमिव वावहं मत्वा इति शेषः। अन्यथा भारोद्धहनस्य दुष्करत्वादिति भावः। प्रदास्यता वितरिष्यता कार
णानां ब्रह्मादीनामपि कारणेन जनकेन देवेन सोऽभिभवोऽर्जुनपराभव चिरं प्रसेहे। सोढः। वात्सल्यादिति भावः॥१४॥ अथ
त्रिभिर्भगवदभिप्रायमाविष्कुर्वन् चतुर्भिः कलापकमाह॥ प्रत्याहतौजा इति॥ प्रत्याहतौजाः परेण प्रतिहतबलः सन्नपि
कृतसत्त्ववेगः कृतोत्साहातिशयः पुमान् ज्यायसि स्वस्मादभ्यधिके पराक्रमं तनोति। तस्य पुंसः भानोरर्कस्य तेजांसीव वीर्ये
ण शौर्येण ज्वलितानि प्रकाशितानि यशांसि निष्पतंति उद्भवंतीत्यर्थः। हीनस्याधिकाभियोगो यशस्कर इति भावः॥१५॥१५॥

ततः किमित्यत आह ॥ दृष्टेति ॥ दृष्टावदानमहत्कर्मयस्य तस्मात् दृष्टावदानात् दृष्टपौरुषादरिलोको व्यथते बिभेति धृ ज्ञे टि विजायिनस्त
स्यान्यः किं यान्नामेति । मन्वाद्य इति भावः । व्यथिताद् भीतात् तेजः प्रध्वासं नाशमेति ॥ तेजोविहीनं दर्पउत्साहः शांतार्चिषं निर्वाणज्वा
ज्वालं दीपं प्रकाश इव जहाति त्यजति ॥ ४६ ॥ ततइति ॥ ततो दर्पहान्यनंतरं अस्तोक्षयं गतो मदावलेपो मदगर्वौ यस्य सोऽरिलोको
गंधेनैव जेतुर्जयनशीलस्य तन्प्रत्ययः प्रमुखागतस्याभिमुखागतस्य प्रति द्विपस्यान्योमतंगजौघ इव । जिगीषोर्नायकस्य जय्य
तायाः पदवी प्रायाति प्राप्नोति । विजिगीषुणां जेतुं शक्यो भवतीत्यर्थः । क्षय्यजय्यौ शक्यार्थे इति निपातः । अत्र श्लोकद्वयेन न्याय
सिपराक्रमकारणादीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वभावकल्पनात्कारणमालाख्योऽलंकारः । लक्षणं तूक्तं ॥ गुंफः कारण

दृष्टावदानाद्व्यथतेरिलोकः प्रध्वंसमेति व्यथिताच्च तेजः । तेजोविहीनं विजहाति दर्पः शांतार्चिषं दीपमिव प्रकाशः ॥ ४६ ॥
ततः प्रयात्यस्तमदावलेपः स जय्यतायाः पदवीं जिगीषोः । गंधेन जेतुः प्रमुखागतस्य गंधद्विपस्येव मतंगजौघः ॥ ४७ ॥
एवं प्रतिद्वंद्विषु तस्य कीर्तिं मौलिं दुलेखाविशदां विधास्यन् । इयेष पार्थाय जयावसादारणक्रियां शत्रुरनुक्रमेण ॥ ४८ ॥
त्रिभिर्विशेषकं ॥ मुनेर्विचित्रैरिषुभिः स भूयान्निन्ये वशं भूतपतेर्बलौघः । सहाललाभेन समुत्सतद्भिर्जातिस्वभावैरिव जीवलोकः ॥ ४९ ॥

मालास्याद्यथाप्राक्तन कारणैरिति ॥ ४७ ॥ एवमिति ॥ एवमुक्तरीत्या प्रतिद्वंद्विषु प्रत्यर्थिमध्ये तस्यार्जुनस्य मौलिं दुलेखाविशदां कीर्तिं विधास्य
न्करिष्यन् । अनुक्रमेण विपर्यासेन पर्यायेण जयावसादौ भंगाश्च तौ न च्यावसादो जयावसादौ यस्यां ता पर्याय जयावसादारणक्रिया
मिषेषइच्छतिस्म । तयानंतरं भंगो भंगानंतरं जय इति तात्पर्यार्थः । तस्य विपर्यासो ऽन्यतरनैरंतर्यं तदभावोऽनुक्रमइत्यपौनरुक्त्यं ॥ ४८
मुनेरिति ॥ मुनेर्विचित्रैस्त्रिरिषुभिः स भूयानेऽसंख्योभूतपतेर्बलौघः पुरा सलाभेन जन्मना सहोत्सतद्भिः आविर्भवद्भिः आजन्मसिद्धैरित्यर्थः । जा
मुनेरिति ॥ मुनेर्विचित्रैरिषुभिः स्वभावाः जातिनियताधर्माः तैर्जातिस्वभावैर्जीवलोकः प्राणिजातमिव वशं नीतः । कर्मणि लिट् । प्राणिनां जातिधर्मा
तयोगोत्वमनुष्यत्वादयः स्वभावाः जातिनियताधर्माः

प्रवितन्वतीति ॥ अत्रस्तानि सैन्यानि संततवेपथूनि निरंतरकंपानि वंद्रानि प्रवर्षतः वर्षं कुर्वतः क्षपाघनस्य रात्रिमेघस्येव शरैरंधकारं तं वि
तन्वतः विस्तारयतस्तस्य मुनेः संबंधिनं खं शरैर्वर्षं घोरं निरोद्धुं ॥ शुशुभुः ॥ न तु किं दूर्द्रुः स्वशस्त्रातु दुरापास्तेति भावः ॥ २० ॥ सइति ॥ अति
सौष्ठवेनाति लाघवेन सायकान् क्षिपन्स अर्जुनः साध्वसेन विपुलानां त्रातानां परेषां द्विषां दोषेण रोगादिनाऽऽवृतलोचनानां दुष्टचक्षुषां
शशीव पृथग्विभिद्यमानः अवभासे एकोप्यनेक इव दृष्ट इत्यर्थः ॥ २१ ॥ क्षोभेणेति ॥ अथ गणाधिपानां संबंधिना तेन क्षक्षोभेण कंपेन
ईश्वरस्याकृतिराकारमूर्तिः महाहृदानां तरंगकंपेन छायामयस्य प्रतिबिंबरूपस्य दिवाकरस्याकृतिरिव भेदं विकारं ययौ प्राप ॥ स्वयं निर्वि

वितन्वतस्तस्य शरांधकारं त्रस्तानि सैन्यानि रवं निरोद्धुः ॥ प्रवर्षतः संततवेपथूनि क्षपाघनस्येव गवां कुलानि ॥ २० ॥
स सायकान्साध्वसविप्लुतानां क्षिपन्परेषामतिसौष्ठवेन ॥ शशीव दोषावृतलोचनानां विभिद्यमानः पृथगाबभासे ॥ २१ ॥
क्षोभेण तेनाथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य ॥ तरंगकंपेन महाहृदानां छायामयस्येव दिनस्य भर्तुः ॥ २२ ॥
प्रसेदिवांसं न तमाप कोपः कुतः परस्मिन्पुरुषे विकारः ॥ आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥ २३ ॥

कारोपि प्रतिभासूर्यवत्संसर्गात्तथा प्रतीयत इत्यर्थः ॥ २२ ॥ यदि देवोपि विकृतस्तर्हि कोपोपि किं न कृत इत्यत आह ॥ प्रसेदिवां
समिति ॥ प्रसेदिवांसं अर्जुनं प्रति प्रसन्नचित्तं देवं प्रति कोपो न तत्र हेतुः ॥ परस्मिन्पुरुषे परमात्मनि देवः स्वत्वो निर्विकार इ
त्यर्थः ॥ तत्राप्यनुग्रहाय भावः ॥ रजः विकारः कोपरूपः कुतः न कुतश्चिदित्यर्थः ॥ तर्हि एतस्य निर्विकारस्य कुतः बहिराका
रभेदः कारणाभावादिति चेत् ॥ अविक्रियरस्याह ॥ इदं पूर्वोक्तवैषम्यं च भेजे केनापि कारणेन कुप्यतीत्यर्थः ॥ नन्वि
कार कुतः कोपस्तत्राह ॥ महतां वृत्तिश्चेष्टा दुर्लक्ष्यचिह्ना दुर्ग्रहहेतुका हि ॥ २३ ॥ २३ २३ ॥

विकारमेवाह। ततोनंतरं विस्फार्यमाणस्येति॥ भूतानि भर्त्रो भूतपतिनाथस्त्र स्तन्त्रात्रस्तन्त्रस्यय:। लए वनलोकेत्यादिनाषष्ठिप्रतिषे
धः। भुजाभ्यां कर्तृकरणयोस्तृतीया विस्फार्यमाणस्याकृष्यमाणस्य। धनुरंतक इवतस्य धनुरंतकेस्यसंबंधिनी संस्फुरंतीं च
लंतीं अतएव भिन्नाकृधेवदृश्यमाना आकृतिर्यस्यास्तां ज्यां कुद्धस्य लक्षकस्यजिह्वामिव ददृशुः। द्विधाभावाज्ज्यं करत्वाच्चेतिभा
वः॥२४॥ सव्येति॥ पार्थः सव्यापसव्याभ्यां वामदक्षिणगतिभ्यां ध्वनितं नादितमुग्रं चापं येन तं किराताधिपं अपराद्धः प्रमत्तो यंता
वैषम्ये पर्यायेण योगपद्येन संपादितः कर्णयोस्तालः आस्फालनं येन तं व्यालं दुष्टं भेद्यालिंगो शटेमालद्दस्समरः। गतेंद्र मिवा
शशंके। तच्चापस्वातुर्यदर्शनादुर्जयः कोप्ययमनर्थकरश्चेतिशंकितवानित्यर्थः॥२५॥ निजघ्निर इति॥ हरेषुजालैरर्जु

विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रो धनुरंतकस्य॥ भिन्नाकृतिं ज्यां ददृशुः स्फुरंतीं क्रुद्धस्य जिह्वामिव लक्षकस्य। २४॥
सव्यापसव्यध्वनितोग्रचापं पार्थः किराताधिपमाशशंके। वैषम्यसंपादितकर्णतालं यंतारमग्नं व्यालमिवापराद्धः॥२५॥
निजघ्निरे चास्य हरेषुजालैः पतंति वृंदानि शिलीमुखानां। ओजस्विभिः सिंधुमुखागतानि यादांसि यादोभिरिवार्णवस्य।२६।
विभेदमंतः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः। नेतारि लोकेषु करोति यद्यत्तत्तच्चकारास्य शरेषु शंभुः॥२७॥ \ \

नस्यपतंति धावंति शिलो शल्यं मुखं येषां शिलीमुखानां शराणां वृंदानि ओजस्विभिः प्रबलैः अंबुराशेर्यादोभिर्जलग्राहैः सिं
धुमुखेन नदीमुखेन आगतानि यादांसीव निजघ्निरे हतानि।२६॥ विभेदमिति॥ अंतारि लोकेषु करोति वृंदं। व्यूह श्लेषणं उपेजा
पं च पदवी निरोधं मार्ग एव प्रतिबंधं अन्यत्र त्वासार प्रासार प्रतिबंधनं विध्वंसनं खंडनं दुर्गलुंठनदाहादिकं च पन्ने तानाना
यकः विजिगीषुरविदितप्रयोगः संवृतमंत्रत्वादविज्ञातियायप्रयोगः अज्ञातबाणमोक्षादिकः सन् अरि लोकेषु शत्रु कुले
षु करोति तत्तच्छंभुरविदितप्रयोगः सन् अस्यार्जुनस्य शरेषु चकार श्लेषालंकारः॥२७॥ \ \ \

सोढेति॥सोढा निपरैरवगीतानि गर्हितानि प्रथमायुधानि पूर्वोत्सृष्टबाणा यस्य तस्यार्जुनस्य संबन्धिभिः क्रोधोज्झितैः पूर्वबाणवैकल्या
त्कोपेन मुक्तैः अत एव वेगितया वेगेन सह पतद्भिर्वेगं कुर्वद्भिः अत एव छिन्नैरपि त्रासिता वाहिन्यो यैस्तैरत एव कृतार्थैरिव बाणैः
पेते पतितं भावे लिट्। वस्तुतस्तु अकृतार्थैरेवेत्यर्थः॥२८॥ अलमिति॥ ऋजुता अवक्रकारत्वं अवक्रशीलत्वं च सैव गुणः तेनाल
कृतानां गुरूपदिष्टां विदितां गतिमास्थितानां प्राप्तानां मार्गणानां शराणां सतां साधूना
मिवापूर्वं वर्णपसंघो अन्यत्र प्रस्तावे अकाण्डे इत्यर्थः। पर्वस्याद्युत्सवे ग्रन्थोप्रस्तावे लक्षणान्तरे इति विश्वः। सर्वेश्वरकृतो भंगः तुच्छो व्यसनं च तत्र
स्तोरर्जुनस्य कस्य चित्त्रिलोचनस्य जिष्णुः शक्रे धनंजये जित्वरे इति विश्वः। ध्वजिनीं ध्वजिनीं जमराथ जहारेत्यर्थः। अकाण्डे साधु विपत्ति दर्शनात्

सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर्वेगितया पतद्भिः॥ छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थैरिव तस्य बाणैः॥२८॥
अलंकृतानामृजुतागुणेन गुरूपदिष्टां गतिमास्थितानां॥ सतामिवापर्वणि मार्गणानां भंगः स जिष्णोर्धृतिमुन्ममाथ॥२९॥
अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमीयुः॥३०॥
बाणच्छिदस्ते विशिखाः पुरारेरवाङ्मुखीभूतफलाः पतन्तः॥
विश्राणयमाना न तिलाघवेन प्रमाथिनस्तान्भवमार्गणानां॥ शंकाकुला मानिव खानदूरं बाणान्ध्वजिन्या हृदये पराऽऽतेः॥३१॥

दिवशरभंगस्यार्जुनस्य धैर्यावसादो भूदित्यर्थः॥२९॥ बाणेति॥ बाणच्छिदः पार्थशरच्छेदिनस्ते स्मरारेः विशिखा अवाङ्मुखीभूतफला वि
मुखाग्राः विपरीताश्च सन्तः पतन्तः पाण्डवसायकेभ्यः क्रियाग्रहणाच्चतुर्थी पाण्डवसायकानां कृतस्य फलभंगरूपस्य कर्मणः सद्यो खण्डितं प्रति
कारं ययुः अस्मत्कृतं कर्मसद्यः फलं दर्शयतीति भावः॥३०॥ पुनरर्जुनस्य जयमाह॥ विश्रीयमाणानिति॥ अरातिरर्जुनः अतिलाघवेन विश्री
यमाणान् विश्रमाश्चर्यं कुर्वाणान्नमो वरिवस्याचित्रकङ् इत्यत्र क्यच्। भवमार्गणानां प्रमाथिनः खण्डयंतस्तान्बाणान्समाकुलायाः संक्षु
भितायाः ध्वजिन्याः सेनायाः हृदयेषु दूरं गाढं निचखान निखातवान्॥३१॥ ॥ ३२॥ ॥ ३२॥ ॥ ३१॥

तस्येति॥ तस्यार्जुनस्य पराक्रमे ऽतिपत्नाद्धेतोरन्यैन्योन्यस्य विशेषेणातिशयकरणे नातिरिच्यमाने तुल्यमाणे सति पुरा हंता त्रिपुरविजयी हरो भूरि प्रभूतं पृषत्कवर्षं विशिख बाणवर्षं निदाघे भवः नैदाघः निदाघो मेघो ऽम्बुवाहो ऽम्बुजलमिव निरास मुमोचा अस्य लालिटूं। निदाघग्रहणं वर्षस्याधीति तीव्रता द्योतनार्थं ।३२॥ प्रियेषुणा प्रियः चिकीर्षुणा शिवेनानुप्रयुक्ताः अत एव क्वचिदपि मर्म अनाघ्नंतः अस्पृशंतः ।शराः सुहृन्मित्रं सो पि प्रियैषितेन प्रयुक्ताः उच्चारिता नर्मवादाः प्रियवाद इव मुनेरर्जुनस्य प्रीतिकरा बभूवुः॥३३॥ अस्त्रैरिति॥ अस्त्रैः स्वायुधैः समानां तुल्यां अतिरेकिणीं ततोधिकां तस्य मुनेरिपूणाम् अपि शक्तिं पश्यन् विषादेन उत्साहभंगेन वक्तुं व्यानिवल्का नियस्य सः प्रमाथी शत्रुमर्द्दनः

तस्यातियत्नादतिरिच्यमाने पराक्रमे न्योन्यविशेषणेन। हंतायुधं भूरि पृषत्कवर्षं निरास नैदाघ इवांबुमेघः॥३२॥
अनाघ्नंतः क्वचिदेव मर्म प्रियैषिणानुप्रहिताः शिवेन। सुहृत्प्रयुक्ता इव नर्मवादाः शरा मुनेः प्रीतिकरा बभूवुः॥३३॥
अस्त्रैः समानामतिरेकिणीं वा पश्यन्निषूणामथ तस्य शक्तिं। विषादवक्तव्यबलः प्रमाथी स्वमाललंबे बलमिंदुमौलिः॥३४॥
ततस्तपोवीर्यसमुद्धतस्य पारं यियासोः समरार्णवस्य। महेषुजालान्यखिलानि जिष्णोरर्कः पयांसीव समाचचाम॥३५॥
रिक्ते स विस्त्रंभमथार्जुनस्य निषंगवक्त्रे सपपात पाणिः। अन्येद्युपापीतजले सतर्षं मतंगजस्येव नगाश्मरंध्रे॥३६॥

इंदुमौलिः स्वं बलं महिमानं आललंबे॥३४॥ तत इति॥ ततो महिमाप्रादुर्भावानंतरं देवस्तपोवीर्याभ्यां समुद्धतस्य प्रगल्भस्य समरएवार्णवस्तस्य पारं यियासोर्जिगमिषोर्जिष्णोरर्जुनस्याखिलानि महेषुजालानि समग्रबाणसमूहान् अर्कः पयांसीव समाचचाम सं जहारेत्यर्थः॥३५॥ रिक्त इति॥ अथ बाणालब्धोनानंतरं अर्जुनस्य स पाणिः रिक्ते बाणशून्ये निषंगवक्त्रे तूणीरमुखे अन्येद्युरन्येन गजान्तरेणापीतजले नगस्याचलस्याश्मरंध्रे शिलागर्भप्रदेशइत्यर्थः। स तर्षं सतृष्णं यथा भवति तथा मतंगजस्य पाणिः लक्षणया करइव स विस्त्रंभं संत्येव बाणा इति स विश्वासं निपपात॥३६॥ ३८ ३८

३६ ।।

च्युते इति॥ शरार्थात् एनार्थो धनंयस्मात् च्युते भ्रष्टे तस्मिन्निषुधौ निषंगे सहसा अकांडे ध्वस्तार्थसारे नष्टधनसारे बंधाविव तत्कालं तत्समये मो
घो विफलः प्रणयः प्रीतिर्यस्य स तत्कालमोघप्रणयः पूर्वं हि तार्थ एवेति भावः। सप्राप्तिर्नि र्वीर्य्यतां हृतधृताय वाद्दिा हिंसंकामय
त इति निर्वाण्यकामः शिलिकामिभिक्षा चाति च्योणस्य एवे त्युत्प्रेक्षा। आभिमुख्यंमप्रपेदे यथा कश्चित् कन्न ल्लः। तत्कालं ... हृतो
पकारमपि बंधुं पूर्वोपकारस्मारणात् पुनः पुनरनुबध्नाति तद्वदित्यर्थः॥ ३७॥ आघट्टेति॥ अस्य मुनेरगंतचा सांबगु ... लिक्ष
हस्तागस्त योर्गुल्तिनोर्भेदाभेदादितिवामनः। विधेयमार्गं कर्त्तव्यान्वेषणे उत्सुरवस्य दुःसुरवस्य प्रवर्त्तमानस्य गां भुवं जिगीषोर्न

च्युतेऽसतस्मिन्निषुधौ शरार्थात्ध्वस्तार्थसारे सहसेव बंधौ॥ तत्कालमोघप्रणयः प्रपेदे निर्वाप्यता काम इवाभिमुख्ये॥ ३७॥
आघट्टयामासगतागताभ्यां सव्यापसव्यांगुलिरस्य तूणौ॥ विधेयमार्गं मतिरुत्सुकस्य नयप्रयोगौ विव गां जिगीषोः॥ ३८॥
बभार शून्याकृतिरर्जुनस्तौ महेषुधी वीतमहेषुजालौ॥ युगांतसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवांबुराशी॥ ३९॥ लो ३

यकस्य मतिर्बुद्धिः नयो नीतिप्रयोगः षाड्गुण्यप्रयोगः उपायप्रयोगः तौ नयप्रयोगौ विवत् तूणौ निषंगौ सव्यांससंभ्रमं इच्छानिष्ठागमात्ता
नात्। अविगाश्रितसंभ्रमं इति शास्त्रतः। गतागताभ्यां यातायाताभ्यां आवायोद्वयाभ्यां च आघट्टयामास ताडयामास। अन्यत्र तु
वितर्कयामास शरग्रहणाय पुनः पुनस्तूणयोः पाणिं व्यापारयामासेत्यर्थः॥ ३८॥ बभारेति॥ शून्याकृतिरिष्टनाशात्। निस्तेजाः
र्जुनः तौ वीतमहेषुजालौ वीतानि रिक्तानि महेषुजालानि ययोः तौ महेषुधी महानिषंगौ विजिह्मः शून्यः लोकः युगांते संशुष्क
जलौ शुष्कः इति निष्ठातकारस्य ककारः पूर्वापराव बुराशिद्वयं बभार॥ ३९॥ ३९॥ ३९॥ ९॥

तेनेति ॥ पार्थस्तयोस्तूणयोः रिक्ततया हेतुना यथा अनुतेपे शुशोच । तथा तेनानिमित्तेन बाणक्षयरूपेण दुर्निमित्तेन न शुशोच । तथा हि सं-
तः स्वामापदं प्रोझ्य विसृज्य विपदि निमग्नं उपकारिणं वर्गं शोचंति । स्वव्यसनापेक्षाया परकीयव्यसनमेव सतां पीडाकरमित्यर्थः ॥४०॥
प्रतीति ॥ प्रतिक्रियायै प्रतिकर्तुं विधुरोऽसमर्थ इत्यर्थः । तुमर्थाच्च भाववचनादिति चतुर्थी । तस्यार्जुनस्य स पाणिः पराङ्मुखत्वे पितृकु-
लत्वे मुख्येऽपि कृतोपकारात् तस्मात्तूणीमुखात् मित्रकुलादार्यः साधुः कृतज्ञ इव । आर्यः साधुकुलीनयोरिति विश्वः । कृच्छ्रेण मह-
कष्टेन विश्लेषं वियोगं इयाय गोरादित्वात् तूणशब्दात् ङीष् ॥४१॥ पश्चादिति ॥ तदानीं भर्तुः स्वामिनः कर्तरि षष्ठी पश्चात्क्रियायै

6

तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयाऽनुतेपे ॥ स्वामापदं प्रोझ्य विपत्तिमग्नं शोचंति संतो ह्युपकारिपक्षं ॥४०॥
प्रतिक्रियायै विधुरः स तस्मात् कृच्छ्रेण विश्लेषमियाय हस्तः ॥ पराङ्मुखत्वेऽपि कृतोपकारात् तूणीमुखान्मित्रकुलादिवार्यः ॥४१॥
पश्चात्क्रियातूणयुगस्य भर्तुर्जिह्रेत तदानीमुपकारिणीव ॥ संभावनायां विफलीकृतायां पत्युः पुरः साहसमासितव्यं ॥४२॥
तं शंभुराक्षिप्तमहेषुजालं लोहैः शरैर्मर्मसु निस्तुतोद ॥ हृतोत्तरं तत्त्वविचारणायां वादीव दोषैर्गुरुभिर्विपक्षं ॥४३॥

षतः करणं तूणीयुगस्योपकारिणीव उपकारिके ववजह्रे लज्जा तथा हि संभावनयोः स्वयोग्यतायां अफलीकृतायां सत्यां स्वामिनः पुरो-
ग्रे आसितव्यं आसितं स्थितिः । बहुलं ग्रहणाद्भावे तव्यप्रत्ययः । साहसं न क्षमं न योग्यं भर्तृसंभावितस्य अवसरे नुपकर्तुर नुजी-
विनः तत्समक्षं स्थातव्यमनुचितमित्यर्थः ॥४२॥ तमिति ॥ शंभुराक्षिप्तानि आहृतानि महेषुजालानि यस्य तं मुनिं तत्त्वविचारम-
ध्ये वादमध्ये हृतोत्तरं निरुत्तरीकृतं विपक्षं प्रतिवादिनं वक्ता वादी गुरुभिः दोषैर्निग्रहस्थानैरिव लोहैर्लोहमयैर्मर्मसु निस्तु-
तोद व्यथयामास ॥४३॥ ४३ ४३

जहारेति ॥ किं चास्मान्मुनेर् अचिरेण शीघ्रं ज्वलद्भिर्मणिभिर्द्योतिता हेम्नः सौवर्ण्यः लेखा यस्य तत्तथोक्तं वर्म कवचं चंडो मरुत् पतंगात् सूर्यात्
एकं नीलं केवलं कृष्णवर्णम् एकमुख्यान्यकेवलम् इत्यमरः । तडित्वतः तडिद्युक्तस्याम्बुदस्य खंडमिव तदा भगवन्मायया मुक्तके चुके
नि२ मुनिर्मेघमुक्तसूर्यइव दिदीप इति भावः ॥४४॥ अथ युग्मेनाह ॥ विकोशेति ॥ सो मुनिः तनुं त्रायत इति तनुत्रं वर्म अत्रातो नुपसर्गे कः
तेन विकोशः कोशाद् उद्धृतः निर्धौततनुः शाणोल्लीढमूर्तिः ततो विशेषणसमासः तस्य विकोशनिर्धौततनोः महासेर्महाखड्गस्य
तथा त्वचि विच्युतायां सत्यां फणावतो भुजंगस्याहेश्च तथा प्रतिद्विपे प्रतिगजे आबद्धरुषः बद्धकोपस्य समक्षं प्रतिगजस्या

जहार चास्माद् अचिरेण वर्म ज्वलन्मणिद्योतितहेमलेखं ॥ चंडः पतंगान्मरुद् एकनीलं तडित्वतः खंडमिवांबुदस्य ॥४४॥
विकोशनिर्धौततनोर्महासेः फणावतश्च त्वचि विच्युतायां ॥ प्रतिद्विपाबद्धरुषः समक्षं नागस्य चाक्षिप्तमुखच्छदस्य ॥४५॥
विबोधितस्य ध्वनिना घनानां हरेरपेतस्य च शैलरंध्रात् ॥ निरस्तधूमस्य च रात्रिवह्नेर्विना तनुत्रेण [illegible]वं स लेभे ॥४६॥ २२
युग्मं ॥ अचिंत्ततायामपि नाम युक्तामनूर्ध्वतां प्राप्य तदीयकृच्छ्रे ॥ महीं गतौ ताविषुधी तदानीं विवव्रतुश्चेतनयेव योगं ॥४७॥

यो आक्षिप्तमुखच्छदस्य निरस्तमुखावरणस्य नागस्य गजस्य च ॥४५॥ विबोधितस्येति ॥ घनानां ध्वनिना गर्जितेन विबोधितस्य
शैलरंध्रात् कंदराद् अपेतस्य निष्क्रांतस्य हरेः सिंहस्य च तथा निरस्तधूमस्य गतधूमस्य रात्रिवह्नेश्च रूपं शोभां भेजे एतेन अस्य
क्षणं तं वैर निर्याण तुर[illegible]दुर्मदत्वम् अनस्तितत्वं तेनस्वितो[illegible]मुत्युक्तानि अत्र रूपमिव रूपमिति सादृश्याक्षेपाद् असंभवद्वस्तुसंबंधो नि
दर्शनालंकारो मालोपमायां ॥४६॥ अचिंत्ततायामिति ॥ तदानीं कवचपतनसमये महीं गतौ तौ ताविषुधी निषंगौ अचिंत्ततायामपि
नाम अचेतनत्वेपि किल तदीयकृच्छ्रे स्वामिव्यसने युक्तां योग्यां नाम किल । अकिंचित्करत्वादिति भावः । अनूर्ध्वतामवाङ्मुखत्वं प्रा
प्य चेतनतया योगं चेतनत्वं संबंधमिव प्रापतुरित्युत्प्रेक्षा । अचेतनत्वेऽवाङ्मुखत्वादि चेतनधर्मागादिति भावः ॥४७॥

कि॰स॰१७
॥८७॥

स्थितमिति ॥ विशुद्धे निर्मले नभसीव सत्वे सत्वगुणे स्थितं तपोवीर्यमयेन तपोवीर्याभ्यामागतेन धाम्ना तेजसा युक्तं तमर्जुनं ईशः त्वष्टा विश्वकर्मा विवस्वंतमिवाजस्रं निरंतरं शस्त्राभिघातैः शस्त्राकर्षणैः उल्लिलेख ततक्ष ॥४८॥ संरंभेति ॥ संरंभवेगेन संभ्रमातिशयेन उज्झितवेदनेषु त्यक्तदुःखेषु वाधियं स्तैमित्यं उपागतेषु सत्सु अगणिता इषुराशयो येन तस्य मुनेः अर्जुनस्यात्ममन्युः स्वकोपो लोहस्य विकारो लौहः रोषवशात् न किंचित्प्रहारदुःखमज्ञासीदित्यर्थः ॥ कार्ष्ण्यायसः तिरस्क्रियते नेति तिरस्कारः कंचुक इव क्रोधैकवर्मितां विमन्ये लौहभारे इतिभावः ॥४९॥ अथ युग्मेनाह ॥ तत इति ॥ ततोनंतरं अनुपूर्वं पूर्वपूर्वं अनुगतौ गोपुच्छाकारौ आयतौ दीर्घौ वृत्तौ वर्तुलौ च बाहू यस्य सः श्रीमान्

स्थितं विशुद्धे नभसीव सत्वे धाम्ना तपोवीर्यमयेन युक्तं ॥ शस्त्राभिघातैस्तमजस्रमीशस्त्वष्टा विवस्वंतमिवोल्लिलेख ॥४८॥
संरंभवेगोज्झितवेदनेषु गात्रेषु वाधियमुपागतेषु ॥ बभूव तस्यागणितेषुराशेः लौहस्तिरस्कार इवात्ममन्युः ॥४९॥ ४९॥
ततोनुपूर्वायतवृत्तबाहुः श्रीमान् क्षरल्लोहितधातुदिग्धः ॥ आस्कंद्य वेगेन विमुक्तनादः क्षितिं विधुन्वन्निव पार्ष्णिघातैः ॥५०॥
साम्यं गतेनाशनिना मघोनः शशांकलेखाकृतिपांडुरेण ॥ शंभुर्बिभित्सुर्धनुषा जघान स्तंभं विषाणेन महानिवेभः ॥५१॥ युग्मं ॥

शोभावान् क्षरल्लोहितधातुदिग्धदेहः स्रवद्रुधिरलिप्तगात्रः पार्ष्णिघातैः चरणाघातैश्च तद्ग्रंथी घुटिके गुल्फे स्त्रियां पार्ष्णिरधस्तयोः इत्यमरः ॥ क्षितिं विधुन्वन् प्रकंपयन्निव वेगेनास्कंद्याभिद्रुत्य विमुक्तनादः सोर्जुनः ॥५०॥ साम्यमिति ॥ मघोन इंद्रस्याशनिना वज्रेण साम्यं गतेन वज्रकल्पेन शशांकस्य खंडं शशांकलेखा तस्येवाकृतिर्यस्य तद्वदुक्तमित्यर्थः ॥ पांडुरं च तद्वद्वेति भावः ॥ तेन धनुषा शंभुर्बिभित्सुः भेत्तुमिच्छुः सन् महान् इभो विषाणेन स्तंभमिव जघान ॥५१॥ ५१ ॥ ५१ १ ॥

13

किरातस्य त्रयोदशसर्गसटीकः प्रारंभः ॥

श्रीगणेशायनमः॥ श्रीकालभैरवायनमः॥ वपुषेति॥ अथेश्वरप्रस्थानानंतरं महेंद्रसूनुरर्जुनः परमेणवपुषाहेतुना भूधराणां विभेदे विदार
णे संभाव्यपराक्रमं शक्यमित्यर्थः पोयमितिप्रलक्ष्यपौरुषं स्थिराभ्यां दृढाभ्यां दंष्ट्राभ्यां उग्रमुखं वयसस्यस तं मृगं वराह मित्यर्थः॥ आशु तदागमनानंतर
मविलंबेनेत्यर्थः। विलोकयां बभूव ददर्शेत्यर्थः॥ अस्मिन्सर्गे आचतुस्त्रिंशश्लोकादौ यत्युद्गसिकं वृत्तं॥१॥ स्फुटबद्धेति॥ स्फुटं बद्धास्यह
विरचितासटानां केसराणां उन्नतिरुद्गतिर्यस्यस सः क्रोधादूर्ध्वितलोम सर्थः॥ दूरादभिधावन् जटाः सकेसरस्योरिति विश्वः। तथावधीरिता
न्यकृत्यः सत्यक्तान्यकर्माचसवराहः जयमिच्छतिजयप्रार्थिनि अतएव जातशंकेस्वयं जिघांसो र्हिं ष्यामेकलक्ष्यत्वादिति भावः। तस्य

वपुषापरमेण भूधराणामथसंभाव्यपराक्रमं विभेदे॥ मृगमाशु विलोकयां बभूव स्थिरदंष्ट्रोग्रमुखं महेंद्रसूनुः॥१॥
स्फुटबद्धसटोन्नतिः स दूरादभिधावन्नवधीरितान्यकृत्यः॥ जयमिच्छति तस्य जातशंके मनसीमं मुहुराददे वितर्कं॥२॥
घनपोत्रविभिन्नशालमूलो निबिडस्कंधनिकाषरुग्णवप्रः॥ अयमेकचरोभिवर्तते मां समरायैव समाजुहूषमाणः॥३॥

मुनेर्मनसिमुहुरिमं वितर्कं वक्ष्यमाणं दुहेम्भ्याहारस्तर्कं मुहुरस्समरः। आददे उत्पादितवान्॥२॥ अथैकादशभिर्वितर्कमेवनिरूपति॥
घनेति। घनेन कठिनेन पोत्रेण मुखाग्रेण विदीर्णानि विदलितानि शालमूलानि येनस सः। पोत्रं तुंडं घोणेप्रि नामकरइत्यमरः॥ निबिडस्य दृढस्य स्कंधस्य
निकाषेण निकषणेन रुग्णवप्रो भग्नसानुरतो महासत्वसंपन्न इति भावः॥ एकश्चासौ चरश्चेत्येकचरः। एकाकी न्यूहइत्येतइत्यर्थः॥
अतोयं वराहः समराय समरं कर्तुं क्रियार्थोपपदस्येत्यादिना चतुर्थी। समाजुहूषमाणइव समाह्वातुमिच्छन्निव ह्वेञ् स्पर्धायां शब्दे च। सं
भावनायां समाहूयतेः सन्नंताच्छानच् प्रत्ययः॥ स्पर्धायामाङः पूर्ववत्सनइत्यात्मनेपदं। अभ्यस्तस्य चेति संप्रसारणं मा
मभिवर्तते अभिधावति। उपसर्गवशात्सकर्मकत्वं। अतः सर्वथा नायमुपेक्ष्य इति भावः॥३॥ ३॥ ३॥

इहेति ॥ इह अस्य तपोनुभावात् वीतभया विगतवैरा इत्यर्थः । अत एव व्यालाः मृगाः । व्यालो भुजंगमे क्रूरे श्वापदे दुष्टदंतिनीति विश्वः । परेषु प्राण्यंत रेषु । वृत्तिं जीविकां जहति । अतिहिंस्रया न जीवंतीत्यर्थः । अयं वराहो मामपि मद्विषये तां वृत्तिं सुतरां विधत्ते करोति । मां हंतुमिच्छतीत्यर्थः । मादि यं विकृतिः तपःसामर्थ्यभंगरूपा भवेत् । किं नु एष यद्वा कस्य चिद्दैत्यस्य वराहरूपात्मिका भवेत् किं नु किंनुशब्दोत्र वितर्के ॥४॥ अथवेति ॥ अथवेति पक्षांतरे । एष मृगः पूर्वजन्मांतरे आसेवितया अतिपरिचितया रुषा कोपेन अभिज्ञो वरस्येति शेषः । कृतघ्नः कृतज्ञतयेव पूर्वं सेवां वि जानन्त्येव सु अपेक्षा न मुक्तः न त्यक्तः । अद्यापि न त्यजतीति शेषः । न न सपंप्रागपगमनीय वैरानुबंधी कश्चित् तं प्रति वैरबीजासंभवादिति भा वः । कुतः यस्मात् आरात् समीप एव । आराद्दूरसमीपयोरित्यमरः । विरोधिनीर्मृगजातीरवधूय तिरस्कृत्य जवेन मामभियाति । अन्यथा नाभियाया

इह वीतभयास्तपोनुभावाज्जहति व्यालमृगाः परेषु वृत्तिं ॥ मयि तां सुतरामसौ विधत्ते विकृतिः किं नु भवेदियं नु माया ॥ ४
अथ वैष कृतज्ञयेव पूर्वं भृशमासेवितया रुषा न मुक्तः ॥ अवधूय विरोधिनीर्यदारान्मृगजातीरभियाति मां जवेन ॥५॥
न मृगः खलु कोप्ययं जिघांसुः स्खलति ह्यत्र तथा भृशं मनो मे ॥ विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ॥६॥

दिति भावः ॥५॥ न केवलमभियानमेव प्रमाणं किंतु मनोवृत्तिरपि अत्र प्रमाणमित्याह । न मृग इति ॥ अयं मृगो न खलु । किंतु कोपि क श्चिदन्य एव जिघांसुर्हंतुमिच्छुः । हंतेः सन्नंतादुप्रत्ययः । अन्यासामात्यंतिकुर्वं । अस्य सनेन मांसनीतिहिंस्रार्थः । कुतः हि यस्मात् अत्रास्मिन्मृगे वि षये मे मनः तथा भृशं स्खलति क्षुभ्यति यथायं जिघांसुरिति बुद्धिमनुभवतीत्यर्थः । तथा हि । विमलं प्रसन्नं सत् तथा कलुषीभवत् क्षुभ्यच्चेतः एव हितैषिणं रिपुं वा मित्रममित्रं च यथा कथयति । यत्र यत्र मनः प्रसीदति तदेव मित्रं अन्यथा त्वन्यथेति निश्चितमित्य र्थः । अतोयं वध्य एवेति भावः ॥६॥

ननु मुनेः किमनया दुःशंकयेत्यत्राह। मुनिरिति। मुनिरस्मि निरागसो निरपराधस्य कुतो भयमित्येष अभिमानः नयकारिणं मां कोपि किं करिष्य
तीति बुद्धिर्न भूतये श्रेयसे भवति। तथा हि। परवृद्धिषु विषये बद्धमत्सराणां दुरात्मनां नामलंघ्यं किमिवास्ति। न किंचिदकार्यमस्तीत्यर्थः। इवशब्दो
वाक्यालंकारे॥७॥ अस्तु तर्हि घोरासुरः पिशुनः किं न करिष्यतीत्याह॥ दनुज इति॥ अयं दनुजः स्वित् क्षपाचरो राक्षसो वा न तु मृगः। कुतः
वन्ये सत्त्वे वन्यप्राणिनि ईदृशं बलं नास्ति बत आश्चर्ये। बलमेव समर्थयते। तथा हि मेघनीलोयं सकलं शैलराजं अभिभूय आक्रम्य
कंपयतीव। पदविष्टंभनया तथा प्रतीयत इत्यर्थः। अत्र कंपयतीवेत्युत्प्रेक्षा। गभीर्यं शैलकंपनरूपकार्येण तत्कारणरूपबलातिरेकेण
समर्थनात् कार्यकारणरूपः समर्थनरूपोर्थान्तरन्यासः॥८॥ [redacted] किं स्वयोयं मृगयाकलकलैः वञ्चयते सोप्येतन्मायाकल्पितमेवेत्याह॥

मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेभिमानः। परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलंघ्यं॥७॥ दनु
जः स्विदयं निशाचरो वा वनजे नेति बलं बतास्ति सत्त्वे॥ अभिभूय तथा हि मेघनीलः सकलं कंपयतीव शैलराजं॥८॥ अय
मेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे॥ पृथुभिर्ध्वजिनीरवैरकार्षीच्चकितोद्भ्रांतमृगाणि काननानि॥९॥

अयमिति॥ अयमेव शमस्थे शांतिनिष्ठ इति रंध्रोक्तिः मयि अधिकरणविवक्षायां सप्तमी। मायया प्रहरिष्यन् प्रहर्तुमिच्छन्नित्यर्थः। लृट्
शेषे चेति क्रियार्थः। चकारात् क्रियार्थक्रियायां लृट् इत्यर्थः। मृगव्यं मृगया। तस्य सत्रं वनं तदर्थं वनमित्यर्थः। तत्कामयत इति मृगव्य
सत्रकामो मृगयाभूमिपरिग्रहार्थी सन्नित्यर्थः। कर्मण्यण्। आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियामित्यमरः। सत्रमाच्छादने यज्ञे
सदा दाने वनेपि चेत्यमरः। पृथुभिः स्वरैः ध्वजिनीरवैः सेनाकलकलैः स्वयं मायाकल्पितैरित्यर्थः। काननानि अधिनि चकितोद्भ्रां
तमृगाः त्रस्ताः पलायिता मृगा येषु तानि तथा चकार। अयमेव रंध्रान्वेषी मत्सहायार्थं स्वयमेव मृगयुर्भूत्वा वनरोधाद्युपसे
नाद्योपं कल्पयामास। अथ मृगरूपेणागतोस्तीत्यर्थः॥९॥ राम राम

वितर्कांतरमाह। बहुशइति॥ अथवा बहुशः कृतास्ते[redacted]नि:सत्कारे येन तस्य दुर्योधनस्य प्रियंमद्वधरूपं प्रातिप्रियं विधातुमिच्छन्यः कश्चिदिति शेषः। वनंगोचरः स्थानं येषां ते वनेचराणामभियोगादुद्वेरोधात् क्षुभितमुद्विग्नं आकुलं चलं तिरश्चां गणं मृगादिपशूनां आशिश्रियत् वराह रूपेण प्राविशत्। किरिश्च्छुरस्तु भयः कृत्तेति वङ्क्वङ्कीतिद्विजौ वः॥१०॥ वितर्कांतरमाह। अवलीढेति। खांडवजातवेदसा खांडववनाग्निना प्रसभमवलीढस्य नाभिः दग्धबंधुः सपिंडास्तु सनाभयः। स्वगोत्रबांधवज्ञातिबंधुस्वस्वजनाः समाइत्यमरः। अत एव समन्युर्बद्धवैरः तस्यार्जुनस्यापकारपितत्वाद्दिति भावः। अश्वसेनस्तक्षकपुत्रः कश्चिन्महाशयः प्रतिकर्तुं वैरनिर्यातनार्थमुपागतो वा। वाराहमायये ति शेषः

बहुशः [redacted] कृतसत्कृतेर्विधातुंप्रियमिच्छन्नथवा सुयोधनस्य॥ क्षुभितं वनगोचराभियोगाद्गणमाशिश्रियदाकुलं तिरश्चां॥१०
अवलीढसनाभिरुद्धतेन प्रसभं खांडवजातवेदसा वा॥ प्रतिकर्तुमुपागतः समन्युः कृतवैरोयदि वा वृकोदरेण॥११॥
बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः॥ नियमेन मया निबर्हणीयः परमं लाभमरातिभंगमाहुः॥१२॥

पक्षांतरमाह यदि वा वृकोदरेण कृतवैरो जनितक्रोधो वाय कश्चिदिति शेषः। पुरा किल पांडवः खांडवदाहे पावकभयात्पलायमानात्तक्षकसूनोरश्वसेनस्य बंधून्बाणैरवरुध्य दाहयामासेति भारतकथा॥११॥ अथ द्वाभ्यामनंतरकरणीयमध्यवस्यति॥ बलेति॥ किंबहुनायथा तथा वास्त्वयं मायिकः परमार्थिको वास्त्वित्यर्थः। सर्वथापि बलशालितया बलदृप्ततयेत्यर्थः। उच्छेदपरां धियं दधानो मांजिघांसुरित्यर्थः। अतोयं मृगो नियमेनावश्यं मया निबर्हणीयो वध्यः प्रमारणं निबर्हणमित्यमरः। तथाहि अरातिभंगं परमं लाभमाहुः॥१२॥

नन्वु तपोविरोधिनी हिंसेत्याशंक्याह ॥ कुर्विति ॥ हे तात मार्गदायी न भवतीत्यमार्गदायी रन्ध्रान्वेषिणां प्रवेशमयच्छन्नित्यर्थः । कुतः जयार्थित्वादित्या
ह विजयाय तपांसि कुर्विति मुनिर्व्यासो मामलमत्यर्थमन्वशात् अनुशिष्टवान् । शासेर्लुङ् । ननु मुनिर्व्यासो कथमधर्ममन्वशात् तत्राह । बलि
न इति । बलिनः प्रबलस्यास्य मृगस्य वधादृते वधं विना । अन्यारादितरर्ते इत्यादिना पञ्चमी । अन्यथा उपायान्तरेण व्रतसंरक्षणं तपोरक्षणं कर्तुं
न शक्यं । हिंसापि दुष्टनिग्रहात्मिका नाम धर्म इति भावः ॥१३॥ इतीति । तेनार्जुनेन इति इत्थं विचिन्त्य वितर्क्य चापनाम चापाख्यं पौरुषं
पौरुषचिह्नं तस्य पुरुषायुधत्वादिति भावः । आललम्बे गृहीतं कर्मणि लिट् । अथ परस्य शत्रोर्भेदे विदारणे उपजापे चोपलब्धगुणो ज्ञातश
क्तिः बाणश्च प्राप्तमौर्वीकश्चेति शेषः । शुद्धः ऋजुः स्निग्धत्वादिदोषरहितो वा । न कर्णभेदगो नामिज्वलिलेरिति निषेधात् । अन्य

3

कुरु तात तपांस्यमार्गदायी विजयायेत्यलमन्वशान्मुनिर्माम् ॥ बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्तुम् ॥१३॥
इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललम्बे ॥ उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः ॥१४॥
अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनंजयेन ॥ स्वबलव्यसनेऽपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥१५॥ ॥

त्रोर्भयदः शुद्धो बाणश्च सचिव इवाददे । अत्र बाणसचिवयोः शब्दमात्रसाधर्म्यादुक्तोपमालंकारः । प्रकृतविषय इति विषभ्रवविकारः उपमे
येति केचित् ॥१४॥ अन्विति । गुरु महत् स्थूलं च स्थिरत्वादविसंवादि अभंगमन्यत्र प्रतिष्ठितत्वात् । असत्यरहितं च गुणवत्सज्यं औदार्या
दिमत् धनुर्मित्रमिवानुभाववता निश्चयबुद्धिमता अनुभावः प्रभावे च सतां च मतिनिश्चय इत्यमरः । धनंजयेन स्वबलस्य व्यसनेन तपसा
क्षीणत्वेऽपि अन्यत्र स्वबलव्यसनेऽपि नाशेऽपि पीड्यमानमाकृष्यमाणमपरत्र ध्यमानं च सन्मित्रसत्रिमिवानतिं नम्रतां
मानुकूल्यं च प्रपेदे । अलंकारस्तु पूर्ववत् ॥ १५ ॥ ॥ १५ ॥

प्रवीति ॥ तदानीं महेषो बाणगांडीवैर्मर्जुन चापं अधिरोहति सति गांडीवं गांडीवोजिष्ठोः कोदंडे कार्मुकेपि चेति विश्वः । कपिध्वजस्य गांडीवगांडी
वौ पुंनपुंसके इत्यमरः ॥ गांडुस्त्वजगवः सं लायामिति च रभसः ॥ प्रकर्षेणयो निनादः तेन भिन्नं रंध्रः विदलितगव्हरः ॥ तथा पादविष्टंभेण पादाक्रमे
ण निपीडितो नुन्नः सकलशैलः संशयं जीवितसंदेहमारुरोह प्राप इत्यर्थः । अत्र शैलस्य संशयासंबंधेपि संबंधाभिधानादियमतिशयो
क्तिः ॥१६॥ ददृश इति ॥ अथ बाणसंधानानंतरं शिवेन स्थिरं निश्चलं पूर्णं चयथा न तथा आयते आकृष्टे चापमंडले तिष्ठतीति तथोक्तः । चापमं
डलमंतर्मध्ये स्थित इत्यर्थः । तिसृणां न तिसृ च तसृ इति दीर्घप्रतिषेधः त्रिपुरां त्रिपुरासुरस्येत्यर्थः वधसंहारं विधातुं रचित कल्पितः

प्रविकर्षणनादभिन्नरंध्रः पदविष्टंभनिपीडितस्तदानीं ॥ अधिरोहति गांडिवं महेषौ सकलः संशयमारुरोह शैलः ॥१६॥
ददृशेऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमंडलस्थः ॥ रचितस्त्रिसृणां पुरां विधातुं वधमात्मेव भयानकः परेषां ॥१७॥
विचकर्ष च संहितेषुरुच्चैश्चरणास्कंदननामिताचलेंद्रः ॥ धनुरायतभोगवासुकि ज्यावदनग्रंथिविमुक्तवन्हि शंभुः ॥१८॥

स्थानविशेषास्थापित इतियावत् ॥ आत्मा स्वयमिव परेषां भयानकोऽभयंकरः सोर्जुनः सविस्मयं ददृशे दृष्टः उपमालंकारः ॥१७॥
अथ पिनाकिवर्णनमाह ॥ विचकर्षेति ॥ अथ शंभुरुच्चैः संहितेषुः उच्चैः भृशं चरणास्कंदनेन पदविष्टंभेन नामितः अधोनीतः अचलें
द्रो येन सः तथोक्तः सन् आयतभोगः आकृष्टचापो वासुकिरेव ज्या तस्या वदनमेव ग्रंथिस्तेन विमुक्तः उत्सृष्टो वन्हिर्यस्य तद्धनुर्वि
चकर्षेति स्वभावोक्तिः ॥१८॥

सपूर्ति॥ स रिपुः सह संभूयार्थं मदिवधरूपं प्रयोजनं यस्मिन् विधास्यतोः करिष्यतोः रत्यत्र सहार्थमभिधाय मभिधास्यतोरित्यर्थः। प्रकृति
प्रत्ययोः सहार्थौ भूतेति वचनात्। भवक्षयैकहेतोः संसारोच्छित्तिनिदानस्य भवस्य शिवस्य सितसप्तेरर्जुनस्य मध्यं रिपुर्वराहः। य
स्मात् प्रत्ययो विधीयते सा प्रकृतिः। धात्वादिः प्रत्ययः स नादिः तयोर्मध्यमनुबंधः इत्संज्ञको वर्णः। यथा भूतेर्भूरित्यादौ ककारः
स इव पराभवाय नाशार्थं लोपार्थं मेवायं प्राप्त इत्युत्प्रेक्षा सर्वः॥१९॥ अथेति॥ अथ दीपितो मध्यप्रवेशानंतरं दीपितं वारिवाहवर्त्म आका
शं येन सः। अवार्यो दुर्वारः इषुर्बाणः रवविंत्रासितवारणात् स्वघोषभीषितदिग्गजात् पिनाकात् महतोऽभ्रात् मेघात् विद्युतोयं वैद्यु

स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विधास्यतोः सहार्थं॥ रिपुरेव पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबंधः॥१९॥
अथ दीपितवारिवाहवर्त्मा रवविंत्रासितवारणादवार्यः॥ निपपात जवादिषुः पिनाकान्महतोऽभ्रादिव वैद्युतः कृशानुः॥२०॥
व्रजतस्य बृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशंकः॥ प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः॥२१॥

तः कृशानुरशनिरिव जवान्निपपात। आदुधाव॥२०॥ व्रजत इति॥ व्रजतो धावतोऽस्य बाणस्य बृहद्भ्यः पत्रेभ्यो पक्षेभ्यः जन्म यस्य स तथो
क्तः। कृततार्क्ष्योपनिपातवेगशंकः गरुडागमवेगभ्रमो येन स तथोक्तः। अत एव महोरगाणां हृदयानि श्रोत्राणि भिनत्तीति हृदयश्रोत्रभित् लक्ष
णहेत्वोरिति निर्देशात् श्रोत्रशब्दस्य पूर्वनिपातव्यभिचारः प्रतिनादैः प्रतिध्वनिभिः महान् संमूर्छितो निनाद उत्पपात उत्थितः। अत्र
दानस्योरगभेदकत्वात् संबंधेऽपि संबंधाभिधानादतिशयोक्तिः। सा च तार्क्ष्यवेगभ्रमोत्थापितेति घोरं गांभीर्यभावेन संकरः॥२१॥

नयनादिति ॥ शूलिनो नयनादिव प्रवृत्तैर्निर्गतैरिवेत्युत्प्रेक्षा नेत्राग्निशिखाकल्पैरित्यर्थः पिशङ्गैर्विलसत्तडिल्लताभैः विद्युदाभतुल्यैरित्युपमा मनसोऽपि
त्वादप्याशुतरं शीघ्रतरं आशु शब्दादव्यया त्तरप् किमेत्तिङव्ययघादिनामुप्रत्ययः ॥ क्लीबे शीघ्राद्यसत्वेस्यात् त्रिष्वेषां सत्वगामि यत् इत्यमरः ॥
लं३ यतो गच्छतो इणः शतृप्रत्ययः ॥ मार्गणस्य शरस्य कादम्बमार्गणशरा इत्यमरः ॥ किरणैर्व्योमनि मार्गः उज्ज्वलरेखाकारः पन्थाः विदधे विरचित इति
स्वभावोक्तिरलंकारः ॥२२॥ अपयन्निति ॥ पृषत्को बाणः विशिखावित्यमरः ॥ धनुषः पिनाकादपयन्निर्गच्छन् इणः शतृ प्रत्ययः ॥ शिवान्तिकस्थैर्न
गता५ नभश्चरैः अभिख्यया शोभया जिहानः शोभमानं गच्छन्नित्यर्थः ॥ ओहाङ् विति ष्यान्तो शानच् ॥ अभिख्या नामशोभयो रित्यमरः ॥ विवरे सीदन्तीति वि
रेसदः तैर्विवरे सद्भिरन्तरालवर्तिभिः नभश्चरैः सत्सूद्विषेत्यादिना क्विप् ॥ तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् ॥ अथ वराहं विशन्नदुपोढैस्तव

नयनादिव शूलिनः प्रवृत्तैर्मनसोऽप्याशुतरं यतः पिशङ्गैः ॥ विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः ॥२२॥
अपयन्धनुषः शिवान्तिकस्थैर्विवरेसद्भिरभिख्यया जिहानः ॥ युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कः ॥२३॥
सतमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः ॥ भयविप्लुतमीक्षितो नभःस्थैर्जगतीं ग्राह इवापगां जगाहे ॥२४॥

राहं तदुपोढैः प्रत्यासन्नैः वहेः कर्तरि क्तः नभश्चरैश्च युगपद्ददृशे दृशेः कर्मणि लिट् बाणवेगोक्तिः अतः क्रमेण निष्क्रमणादिक्रियाविशिष्टस्य बाणस्य
शिवान्तिकादिभिन्नदेशस्थनभश्चरकर्तृकदर्शनयोगपद्यासंबन्धेऽपि तत्संबन्धोक्तेरत्यन्तातिशयोक्त्या लोकोत्तरवेगप्रतीतेरलंकारेण वस्तु
ध्वनिः ॥२३॥ स इति ॥ स बाणस्तमालनिभे नीलवर्णे इति शेषः ॥ सुराणां रिपौ वराहे घननीहारे सान्द्रतुहिने इव अविषक्तवेगोऽप्रतिहतवेगः सन् त
था नभःस्थैः खेचरैः भयेन विप्लुतं विह्वलं यथा तथा ईक्षितः सन् अपां संबन्धि वेगः आपः अपां समूहो वा आपः आपेन गच्छतीत्यापगा नदी
तां गडः ग्राहो नक्रो ग्राहो जलचर इतियादवः विभाषाग्रहः इति णप्रत्ययः ॥ स इव जगतीं भूमिं जगतीविष्टपे भूम्यामिति वैजयन्ती ॥ जगाहे विवेश ॥२४॥

अथार्जुनबाणप्रयोगमाह॥ सपदीति॥ सपदि शिवबाणपातसमय एव प्रियं रूपं आकृतिः पर्वाणि ग्रंथयो रेखा रचना यस्य सः अंगुलिपक्षे रेखाः
प्रसिद्धाः यस्य सः अंगुलिः लोहाग्रमयः फलं तन्मुखमिव सुपमित समासः शितलोहाग्रं नखं यस्य सः कुपितस्यांतकस्य यमस्य या तर्जनस्यांगुलि
स्तर्जनांगुलिः तस्याः श्रीरिव श्रीर्यस्य सः कपिध्वजेषुरर्जुनबाणः प्राणभृतो व्यथयन्भीषयमाणः खमाकाशमाससाद । उपमालंकारः ।२५॥
परमेति॥ परमास्त्रपरिग्रहेण दिव्यास्त्राधिष्ठानेन उरु महत् । अत एव स्फुरदुल्काकृति । उल्कावद्दीप्यमानामित्यर्थः । तेजो वनेषु विक्षिपन्ने ज
वेन पतन्धावन्स बाणः शताः परे परःशताः तेषां शताधिकसंख्याकानामित्यर्थः । परःशताद्यास्ते येषां परा संख्या शताधिके त्यमरः । पंच
मीति योगविभागात्समासः । राजदंतादिषु परमित्युपसर्जनस्य शब्दस्य परनिपातः । कस्कादित्वात्सुडागमः । पततां पतत्रिणां । पत

सपदि प्रियरूपपर्वरेखः शितलोहाग्रमुखः खमाससाद॥ कुपितांतकतर्जनांगुलिश्रीर्व्यथयन्प्राणभृतः कपिध्वजेषुः ॥२५॥
परमास्त्रपरिग्रहोरुतेजः स्फुरदुल्काकृति विक्षिपन्वनेषु ॥ स जवेन पतन्परःशतानां पततां व्रात इवारवं वितेने ॥२६॥
अविभावितनिर्गमप्रयाणः शमितायाम इवातिरंहसा सः ॥ सह पूर्वतरं नु चित्तवृत्तेरपतित्वा नु चकार लक्ष्यभेदं ॥२७॥ ॥२७॥

त्रिपत्रपतगपतत्ररथांडजाः इत्यमरः व्रातः समूहः इवारवं वितेने॥ विस्तारयामास॥२६॥ अविभावितेति॥ अतिरंहसा अतिवेगे
न अविभाविते निःक्रमोत्क्रांतीचान्निःक्रमणं प्रयाणमंतरालगमनं च यस्य सः शमितायामः संक्षिप्तदैर्घ्य इव स्थित इत्युपमा अत्र
वेगगुणनिमित्ताद्दैर्घ्यगुणाभावोत्प्रेक्षा सशरः सहसा नु सह वा चित्तवृत्तेः पूर्वतरं नु प्रागेव वा उभयत्रापि लक्ष्ये पति
त्वेति शेषः । अथवा अपतित्वा नु लक्ष्ये इति शेषः । लक्ष्यभेदं चकार अत्रोपात्तगुणनिमित्तेनाभावाद्बाणस्य चित्तवृत्तिसहपातपूर्व
पातनभावोत्प्रेक्षा तिस्रः तिस्र उत्तरोत्कर्षेण वेगातिशयव्यंजक इति अलंकारेण वस्तुध्वनिः॥ ॥२७॥ ॥२७॥ ॥२७॥

सइति॥ जयहेतुः सशरो वृषध्वजसायकावभिन्नं एषणीयं वेद्धुमितिशेषः। इषवि अर्थादनिप्रत्ययः। प्रतिकायं प्रतिपक्षं विधिना विधिवाक्येनोदीरितं।
फलसाधनतया प्रतिपादितं अर्थयागादिकं प्रयत्नः पुरुषव्यापार इव अथवा विधिना दैवेन प्राक्तनेनमुदीरितं अर्थेधनादिकं प्रयत्न इवेति वाल
घुअल्पप्रयत्नेन यथा तथा साधयितुं प्रसेहे। श्लेषानुप्राणितउपमालंकारः॥२८॥ अविवेकेति॥ अविवेकोऽतरानभिज्ञत्वं। वृथाश्रमो निःफलप्रयासः
तौ अर्थघनमिव अस्थानविनियोगहेतुत्वादनयोर्धनहानिकरत्वमिति भावः। क्षयोलुपचयः लोभोः क्षत्त्वं तौ संश्रितानामनुजीविनां अनुरागमिव
अकिंचित्करत्वा मिन्यनुरागस्यानवस्थानादिति भावः। अनयोर्दुर्नीतिः प्रमादोनवधानता तौ विजिगीषुमिवरं प्रभूयिष्ठस्य जयासिद्धेरितिभावः
विशिखौ। शिवार्जुनबाणौ तं वराहं अवसादकरणशैथिल्यं निन्यतुः। नीतवंतौ। नीयते द्विकर्मकत्वं मालोपमेयं॥२९॥ अथेति॥ अथ दीर्घतरं तमो

सवृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयं॥ लघुसाधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः॥२८॥ अविवे
क वृथाश्रमाविवार्थं क्षयलोभाविवसंश्रितानुरागं॥ विजिगीषुमिवानयप्रमादाववसाद विशिखौ विनिन्यतुस्तौ॥२९॥ ।।
अथ दीर्घतरं तमः प्रवेक्ष्यन्सहसा भग्नरयः ससंभ्रमेण॥ निपतंतमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने॥३०॥ ३०।।
सगतः क्षितिमुष्णशोणिताद्रः खुरदंष्ट्राग्रनिपातदारिताश्मा॥ असुभिः क्षणमीक्षितेन्दुसूनुर्विहितामर्षगुरुध्वनिर्निरासे॥३१॥

निद्रां दीर्घनिद्रां प्रवेक्ष्यन्मरिष्यन्नित्यर्थः। सहसा सद्यस्तिरुग्णरयः भग्नवेगः स वराहः संभ्रमेण भ्रांत्या संभ्रमो भ्रांतिहावयोरिति विश्वः
उष्णरश्मिं सूर्यं उर्व्यां भूमिनिपतंतमिव मेने धरां च वलयीभूतां मंडलीभूतास्तरवो यस्यां तां तथा मेने तथा वभ्रामेत्यर्थः स्वभावोक्तिर
लंकारः॥३०॥ सइति॥ क्षितिंगतः क्षितौ पतितः उष्णेन प्रत्याहतत्वात् शोणितेन आर्द्रः प्लुतः खुराणां दंष्ट्रयोश्च अग्राणां निपातेन घातेन दा
रिताश्मा पाटितपाषाणः। किंवा क्षणमीक्षितेन्दुसूनुः स्वार्थविघातरोषादिति भावः। विहितः कृतः अमर्षगुरुः क्रोधोद्धुरो ध्वनिः
क्रंदितं येन स। तथोक्तः। स वराहः असुभिः प्राणैर्निरासे निरासितः। स्वकर्तृस्यार्थः। अस्यतेः कर्मणि लिट्। इयं च स्वभावोक्तिः॥
३१। ९ ।। ९।। ३२।। ७।। ।।३१।। ९।। ७।। ।। ९ ।।

स्फुटेति॥ अथ वराहपातानंतरं पार्थोऽर्जुनः प्राज्यशरः प्रभूतशरः सन्नपीत्यर्थः। प्राज्यं प्रभूतं प्रचुरमित्यमरः। स्फुटपौरुषं व्यक्तव्यक्तविक्रमं वराहभेदिनं
तं शरं जिघृक्षुः ग्रहीतुमिच्छुः गृह्णः सन्नंतादुप्रत्ययः। आपपात। आधावितस्म। कृतं तत्तयोः शरग्रहणेन तु लोभादित्यर्थः। नन्वन्येष्वपुपकर्त्तारः एव
किमत्रैवादरस्तत्राह नेति। कृतवेदिनां कृतज्ञानां कृतावदानः॥ कृतकर्मा। अवदानं कर्म वृत्तमित्यमरः। यथा प्रियतामिति तथा करिष्यन्त्रि
यतां नेति॥ कृतकरिष्यमाणयोः कृतं बलीय इति न्यायादिति भावः॥ ३२॥ अथ युग्मेनाह उपकार इति॥ असति नीचे प्रयुक्तः उपकार इव मृगे
स्थितिमप्राप्य प्रणाशमदर्शनं गत इत्युपमा। तथा कृतशक्तिः कृतपौरुषः गुरुत्वाद्धेतोः भारगौरवत्वात् अधोवाङ्मुखोऽनम्रमुखः। अत
6 एवात्मपौरुषेण जनितव्रीड इव स्थित इत्युत्प्रेक्षा॥ ३३॥ स इति। उत्तमां स्वरुचिं कीर्तिमिव दधान इत्युत्प्रेक्षा किंच वि विचिंत्य सर्वथा ग्राह्य

स्फुटपौरुषमापपात पार्थस्तमथ प्राज्यशरः शरं जिघृक्षुः॥ न तथा कृतवेदिनां करिष्यन् प्रियतामेति यथा कृतावदानः॥ ३२॥
उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगे गतः प्रणाशं॥ कृतशक्तिरधोमुखो गुरुत्वाज्जनितव्रीड इवात्मपौरुषेण॥ ३३॥
स समुद्धरता विचिंत्य तेन स्वरुचं कीर्तिमिवोत्तमां दधानः॥ अनुयुक्त इव स्ववार्त्तमुच्चैः परिरेभेऽनुभृशं विलोचनाभ्यां॥ ३४॥
तत्र कार्मुकधरं महाभुजः पश्यति स्म सहसा वनेचरं॥ सन्निकाशयितुमग्रतः स्थितं शासनं मकरकेतुविद्विषः॥ ३५॥

इति विमृश्य समुद्धरता तेनार्जुनेनोच्चैः स्ववार्त्तं स्वपाटवं वार्तं पाटवमारोग्यं च कल्यं स्वस्थमनामयमिति यादवः। अनुयुक्तः पृष्ट इव स्थि
त इत्युत्प्रेक्षा। आदरात्तथा प्रतीयत इति भावः। प्रश्नोऽनुयोगः पृच्छा चेत्यमरः। स बाणो विलोचनाभ्यां भृशं परिरेभेऽनु आलिंगितो वि
तः किमित्युत्प्रेक्षा तेनात्यादरेणापश्यदित्यर्थः॥ ३४॥ तत्रेति॥ तत्र प्रदेशे महाभुजोऽर्जुनो मकरकेतुविद्विषः स्मरारेः शासनं वक्ष्यमाणमा
देशं सन्निकाशयितुं निवेदयितुमिति यावत्। अग्रतः अग्रे स्थितं कार्मुकभृतं वनेचरं सहसा पश्यति स्म इतः प्रभृति रथोद्धता वृ
त्तं रोन्नराविह रथोद्धता लगाविति लक्षणात्॥ ३५॥ ॥ ३५ ॥ ॥ ॥

सइति॥सवनेचरोमहीपतेस्तनयेराजपुत्रेऽर्जुनेआत्मजातिसदृशीं किरातजात्यनुरूपां किलेतिजातेरनीकतोदर्शयति।यत्तःपरमार्थतः
प्रथमएवसःआनतिंप्रयुज्यसांत्वपूर्वकंसामपूर्वकं।सामसांत्वमुभेसमेइत्यमरः।अभिनीतिहेतुकंयुक्तियुक्तंवचइत्थं वक्ष्य
माणप्रकारेणवक्तुमुपचक्रमे॥३६॥तत्रतावच्चतुर्भिःसांत्वमाह॥शांतेति॥शांततातव अनौद्धत्यंतेतवविनययोगिविनयेनौद्धत्ययुक्तं
मानसंकर्मआह।अनुभूतेखलुतथाभूरिमहद्धामतेजोयस्यकिंनूनतपःकृतं विमलंसंप्रदायशुद्धंश्रुतंप्राह।किंचद्योर्दिवमोको
वेषांतेदिवौकसःदेवानांपृषोदरादित्वात्साधुः।दिवंस्वर्गंलक्षितिदिक्ष्वेतिविश्वः।सदृशीतुल्याआकृतिमूर्तिरवदातंशुद्धमन्ववायंवंशं
प्राह।वंशोन्ववायःसंतानइत्यमरः।शांत्यादिभिर्लिंगैर्विनयादयोनुमीयंते॥अन्यथातदसंभवादितिभावः॥३७॥दीपितइति॥मुनिः

सप्रयुज्यतनयेमहीपतेरात्मजातिसदृशींकिलाननतिं॥सांत्वपूर्वमभिनीतिहेतुकंवक्तुमित्थमुपचक्रमेवचः॥३६॥
शांततविनययोगिमानसंभूरिधामविमलंतपःश्रुतं॥प्राहतेनसदृशीदिवौकसामन्ववायमवदातमाकृतिः॥३७॥
दीपितस्त्वमनुभावसंपदागौरवेणलघयन्महीभृतः॥राजसेमुनिरपीहधारयन्नाधिपत्यमिवशातमन्यवं॥३८॥
तापसोपिविभुतामुपेयिवानास्पदंत्वमसिसर्वसंपदां॥दृश्यतेहिभवतोविनाजनैरन्वितस्यसचिवैरिवद्युतिः॥३९॥

सन्नपिऐश्वर्यरहितोपीत्यर्थः।अनुभावसंपदाप्रभावातिशयेनदीपितःप्रकाशितःगौरवेणमहत्त्वेनमहीभृतोराज्ञःलघयन्ल
घुकुर्वन्त्वमिहाद्रौशातमन्योरिदंशातमन्यवंऐंद्रमाधिपत्यं।तस्येदमित्यण्।अधिपतेःकर्माधिपत्यंत्रैलोक्यरक्षाधिकारंआधिप
त्यादिलाघवंअस्यायः।धारयन्नाराधयन्निवइंद्रपदेतिशेषः।राजसे।तस्याप्युपजीव्यइतिप्रतीयसेमहिम्नेत्यर्थः॥३८॥तापसइति॥विभुतां
प्रभावंउपेयिवानुपगतोऽतएवतापसोपिसर्वसंपदामास्पदंस्थानमसि।आस्पदंप्रतिष्ठायामितिनिपातनः।विभुतामेवसमर्थयते।त
थाहि।भवतस्तवजनैर्विनाविएकाकिनोपीत्यर्थः।सचिवैरन्वितस्येवद्युतिस्तेजोदृश्यते।अतःसर्वसंपदामास्पदंत्वंयुक्तमित्यर्थः॥३९॥

विस्मयेति॥ किंच तव जयश्रिया हेतुना प्राप्तिर्व्याप्तिरतिशयः। कइव वा विस्मयो न कश्चिदित्यर्थः। यतो मुक्तिरपि ते दवीयसी दूरतरा दूरवर्तिनी न
भवत्येव। स्थूलदूरेत्यादिना यणादिपरलोपः पूर्वगुणश्चेति तथा हि। विनिर्जितौ रजस्तमसी एव गुणौ येन सः कस्येप्सितस्य वाञ्छितस्यो
पाश्रयः आस्पदं न भवेत् भवेदेवेत्यर्थः॥५०॥ अथागमनप्रयोजनमनुपालम्भमुखेनाह॥ हेयपन्नेति॥ त्विषा तेजसा अभिभूतेजसं हेय
न्नल जयन्नुपपन्नपौरुषः संभावितविक्रमः सप्रसिद्धः त्वं वराहमे दिनं हृतापकारमित्यर्थः। एनं त्वकृतवरगतमस्मदीयपक्षस्य सा
यकमिषुं स्वहस्तेनाहर्तुं नार्हसि॥५१॥ अनर्थमेवाह॥ स्मर्यतेति॥ उत्तमैर्नरैः ससुरेषैर्मन्वादिभिस्तैः अनुभूतो शरीरिणां सनातनो नि
त्यं न्याय्यं। न्यायादनपेतं मोचारः स्मर्यते न कलं व्यतयेति शेषः। न सनातनमित्यर्थः। अथानीचारदोषमाह॥ ध्वंसत इति। भवादृशानिवद्ध्यते

विस्मयः कइव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी॥ ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः॥५०॥ हेयप
न्नमभिभूतसंविषा सन्निभ त्वमुपपन्नपौरुषः॥ हर्तुमर्हसि वराह मेदिनं नेन मस्मदधिपस्य सायकं॥५१॥ स्मर्यते तनुभृ
जर तां सनातनं न्याय्यमाचरणमुत्तमैर्नृभिः॥ ध्वंसते यदि भवादृशस्ततः कः प्रयातु वर्त्मना॥५२॥ आकुमार
मुपदेष्टुमिच्छवः सन्निवृत्तिमपथान्महापदः॥ योगशक्तिजितजन्ममृत्यवः शीलयन्ति मुनयः सुशीलतां॥५३॥

भवादृशः ततः सदाचारात् ध्वंसेत भ्रश्येत यदि तेन वर्त्मना मार्गेण न्याय्यमार्गेण कः प्रयातु न कोपीत्यर्थः। तथा च सन्मार्गे एव शी
लं स्यादिति भावः॥५२॥ आकुमारमिति॥ किंच योगशक्त्या अभ्यासेन महिम्ना जितौ जन्ममृत्यू येस्ते यतयः योगिनः कुमारेभ्य
आ आकुमारं कुमारादारभ्येत्यर्थः। आङ् मर्यादाभिविध्योरित्यव्ययीभावः। महत्याऽपद्यस्मिन् तस्मान्महापदः अनर्थहेतोरित्य
र्थः अपथात् मार्गात् पथो विभाषेति निषेधविकल्पात् समासान्तः। अपथं नपुंसकं सन्निवृत्तिमपगमनमुपदेष्टुमिच्छवः सुशी
लतां सद्वृत्ततां शीलितं स्वभावे सद्वृत्तं सम्यक् शीलयन्त्यभ्यसंति। अतो न त्याज्यं शीलमित्यर्थः॥५३॥ ॥ ५३॥ ॥

न केवलं सोऽशिक्यादनर्थनिवृत्तिः किं त्वर्थप्राप्तिरपीत्याह। तिष्ठतामिति॥ तपसि तिष्ठतां तपोनिष्ठानां धर्मार्थिनामित्यर्थः। पुण्यं धर्ममास
जन् स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृष इत्यमरः। सुखैषिणां सुखार्थिनां संपदः सुखसाधनभूताः अनुगुणयन् अनुकूलयन्।
अर्थकामयोरपि हेतुभूत इत्यर्थः। तथा योगिनां विमुक्तये परिणमन् संपद्यमानो विनयः सौशील्यं केन हेतुना सतां प्रियो मास्तु सं भाव
नायां लोट्। सर्वथा विनय एव चतुर्वर्गफलसाधन इत्यर्थः। अतस्त्वया नामास्मात्स्वामिशरस्याग्रं [illegible]मिति तात्पर्यं॥४४॥ अथवा किं न
वादेऽशेषु अन्यसंभावनया यतो भ्रान्तिरपि संभाव्यत इति युक्तिरवलम्बते॥ नूनमिति॥ अयमस्मदीयः सायकः। अत्र भव

तिष्ठतां तपसि पुण्यमासजन्संपदोऽनुगुणयन्सुखैषिणां। योगिनां परिणमन्विमुक्तये केन नास्तु विनयः सतां प्रियः॥
॥४४॥ नूनमत्र भवतः शराकृतिं सर्वथायमुपयाति सायकः॥ सोऽयमित्यनुपपन्नसंशयः कारितस्त्वमपदे मपदं यया॥४५॥

तः पूज्यस्यैवेत्यर्थः। तत्र पूज्यस्तत्र भवानत्र भवानिति सप्तम्यन्ताः अन्येभ्योऽपि दृश्यन्त इति सार्वविभक्तिकस्तसिः सुप्सुपेति समा
सः। शराकृतिं सर्वथा स्वरूपेण रेखादिना सर्वप्रकारेणाप्यनुयाति। अनुसरति। असंतमनुकरोतीत्यर्थः। नूनमिति वितर्के। यया
आकृत्या कर्त्र्या समनुपपन्नसंशयोऽसंतसादृश्यादनुसन्नस्वान्यदीयसंदेहः सोऽयमिति यः स्वकीयः स एवायमिति भ्रां
तिरेवास्यास्तीति शेषः। अपथे अमार्गे शरापहरणरूपपदं कारितः प्रधायित इत्यर्थः। हृक्रोरन्यतरस्यामिति अणि क
र्तृकर्मण्यन्ते कर्तुर्ण्यन्ते कर्मणा इति तेनैवाभिहितः कर्तेति द्रष्टव्यः॥४५॥ ॥ ४५ ॥ ४५॥ ४५॥

पुरपि स्तेयमेवपरि दूढयन्दोषांतरमुत्पादयति। अन्यदीयमिति॥ सद्भिर्वेलसास्येत सोमनस्विनः तेऽन्यदीयविशिखविषये आहृत
माहरणं भावितः तस्मिन्नन्यदीयविशिखस्यहरणे सत्यर्थः निस्पृहेणैव नभवितव्यं किंतु परनिबर्हितं तमपरेण प्रहृतं मृगं निघ्नतः तेनि
घ्नता स्वयं सत्यर्थः। तस्यामं कृतत्वात् निवृत्तिषष्ठी। व्रीडितव्यं लज्जितव्यमिति। भावे तव्य प्रत्ययः। संप्रति तु त्वया परविद्धं मृगं विहतमि
लिन व्रीड्यते प्रत्युत स्तेनस्तेयं च क्रियते इत्यहो महत्सामर्थ्यं मृत्सर्थः। मृगमित्यत्र शेषत्वविवक्षया। जासिनिप्रहरणेतिषष्ठी न भ
४ वति। शेषाधिकारात्सति हारणेत्यत्र संघात निगृहीत विपर्यस्तानां ग्रहणात्॥४६॥ अथास्मिन्नूत प्रतापि ये गायस्वापका

अन्यदीयविशिखेन न केवलं निस्पृहस्य भवितव्यमाहते। निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः॥४६॥
संततं निशमयंत उत्सुका यैः प्रयांति मुदमस्य सूरयः। कीर्तितानि हसितेपि तानि यं व्रीडयंति चरितानि मानिनां॥४७॥

रकत्वं वर्णयितुं विकत्थनरोषंलाव यमेनाह॥ संततमित्यादि॥ सूरयो विद्वांसः अस्यास्य स्वामिनः संबंधिभिर्यैश्चरितैः कूर
णभूतैः संततमुत्सुकाः सोत्कंठाः संतैः निशमयंतः श्चरितानि शृण्वंतः मुदं प्रयांति अत्र चरितानां तुमुत्साक्तोशाकं करणत्वं
अर्थान्निशमन कर्मत्वमिति विवेकः। तानि चरितानि हसितेपि परिहासेपि कीर्तितानि परैरुच्चारितानि सतिमानिनं व्रीडयंतिमा
निता व्रीड॥ ननु चरितदोषादिति। तेषामलंकारभूतत्वादिति भावः॥४७॥ ॥ ४७॥ ॥

अन्येति॥ अधृष्टतया विकत्थनेन शालीनतया जडस्तब्धः अविकत्थनः समरः सोस्मत्स्वामी अन्यदोषं परदोषमिव स्वकं स्वकीयं गुणं कथं ख्यापये
त् प्रकटयेत् । आत्मप्रशंसां परगर्हामिव वर्जयेदिति स्मरणात् । तथापि कार्यवत्तया कार्यार्थितयेत्यर्थः । स स्वगुण उच्यते खलु । कार्यार्थिनां
कुतो गर्व इति भावः । निर्भिन्नमेवार्हं विभिन्नबुधसेतुं आर्तिकां तत्सुजनमर्यादामर्थितां धिक् । निन्दामीत्यर्थः । यद्वायं इत्थं विकत्थयितुं प्रवृत्तोऽ इ
ति भावः । धिक् निर्भर्त्सननिन्दयोरिति विश्वः । उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ॥ द्वितीयाम्रेडितान्तेषु ततोन्यत्रापि दृश्यत इति ॥५८॥
संप्रति स्वोपकारं दर्शयति । दुर्वचमिति ॥ वाहिनीपतिः सेनापतिरस्मत्स्वामी । शितेन पत्रिणा शरेण एनं मृगं आशु न प्रत्यपत्स्यत यदि ना

अन्यदोषमिव स स्वकं गुणं ख्यापयेत्कथमधृष्टताजडः । उच्यते स खलु कार्यवत्तया धिग्विभिन्नबुधसेतुमर्थितां ॥५८॥ ([illegible])
दुर्वचं तदथ मा स्म भून्मृगस्त्वय्यसौ यदकरिष्यदोजसा । नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्रिणा ॥५९॥ ॥
कोनिमं हरितुरंगमायुधस्थेयसीं दधतमंगसंहतिं । वेगवत्तरमृते चमूपतेर्हन्तुमर्हति शरेण दंष्ट्रिणं ॥५०॥ ५०॥ ५०

भियुंजीत चेत् असौ मृगः ओजसा बलेन त्वयि विषये यदकरिष्यद् यदनिष्टं कुर्यात् तद्दुर्वचममंगलं तथा वक्तुमशक्यं तदनिष्टं अथा
नंतरमपि मा स्म भूदिति सौहार्दकथनं । तदुपेक्षणे सम्यग् गत्वा हन्यादिति भावः । लिङ्निमित्ते तिकरोतेः पद्यतेश्च लृङ् ॥५९॥ ॥
ननु मृगो मयैव हतो न सेनापतिनेत्यत्राह । क इति ॥ हरितुरंगमायुधं इन्द्रायुधं तद्वत्स्थेयसीं स्थिरां वज्रकठिनामित्यर्थः । स्थिरश
ब्दादियसुनि प्रियस्थिरेत्यादिना स्थादेशः । अंगसंहतिं अवयवसंघातं दधतं वेगवत्तरं दुर्वारवेगमित्यर्थः । इमं च दंष्ट्रिणं वराहं
चमूपतेः ऋते चमूपतिं विना । अन्यारादितरर्त्तेत्यादिना पंचमी । कोनु को वा । एकेन शरेणेति भावः । हंतुमर्हति । न कोपीत्यर्थः ॥
॥५०॥५०॥ ॥५० ५०॥ ॥ ॥५० ५०५० ॥ ५०॥५०॥ ॥५० ५५०॥ ॥ ५ ५० ५०॥

अस्तु स एव मृगस्य हंता ततः किं मित्यत्राह ॥ मित्रमिति ॥ तथा च वतस्यैवमनर्गहं त्वं त्वे सलीत्यर्थः। अयं मेदिनीपतिः। किरातभूपतिः ते नव संशये
प्राणसंकटे उपकारि इष्टं मित्रं ततोपि किं तत्राह। तमिति। तं मित्रभूतं विरोध्य सज्जनैकवसतिः भवादृशः सुजनमात्राधारा कृतज्ञता उपकारवेदित्वं मा
निरासिन निराक्रियतां अन्यथा जगति कृतघ्ने लेअस्तं यातेत्कृतघ्नता चते भवेदितिभावः। अस्यतेः कर्मणि णिः। आशिषि माङि लुङ् ॥५१॥ नेनु
सर्वथाप्यपथ्यं मूलत्वात्स एवास्तु किं मित्रेण सार्थक्यं मित्रस्य सर्वाधिक्यं युग्मेनाह। लभ्यमिति ॥ जिगीषतां जेतुमिच्छतां। जयतेः सनंताद्
तप्रत्ययः। दुर्लभोऽ [illegible] भिलब्धुमशक्यः। असुरक्ष्यमभूतपः रक्षितुम [illegible] शक्यमहिमानः तथापि नित्यं रक्षणक्लेशावहाश्चेति भावः। अ
तविरसाः गत्वर्यं इत्यर्थः। लभ्यं तदिति लभ्याः। अर्थास्तेषां संपदः एवमसु कृतेन एकोपकारेण लभ्यं सुलभं रक्षितारं न तु रक्ष्यं ॥ स्वतंत्रशुमा

मित्रमिष्टमुपकारि संशये मेदिनीपतिरयं तथा च ते ॥ तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥५१॥ ॥
लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्ष्यभूतयः ॥ स्वंतमंतविरसा जिगीषतां मित्रलाभमनुलाभसंपदः ॥५२॥
चंचलं वसु नितांतमुन्नता मेदिनीमपि हरंत्यरातयः ॥ भूधरस्थिरमुपेयमागतं मा वमंस्त सुहृदं महीपतिं ॥५३॥

वसानं न त्वंतविरसं मित्रलाभाद्धीना निकृष्टा इत्यर्थः। हीन इत्यनोः कर्मप्रवचनीयसंज्ञा तद्योगे द्वितीया। अत्रोपमेयस्य मित्रलाभ
स्य लाभांतरप्रस्ताधिक्याभिधानात् व्यतिरेकालंकारः ॥५२॥ चंचलमिति ॥ किं च वसु धनं नितांतं चंचलं चलं मेदिनीमपि उन्नताः प्रब
लाः अरातयो हरंति मित्रं तु न तथेत्याह। भूधरवत् स्थिरमुपेयं। अन्विष्य गंतव्यमप्यागतं स्वतः प्राप्तमपि महीपतिं सर्वधुरीणमित्यर्थः।
सुहृदं मित्रं मा अवमंस्त मावज्ञासीत्। भवानिति शेषः। अन्यश्लोकगतो भवच्छब्दो विभक्तिपरिणामेनात्रानुषज्यः। अन्यथा मध्यमपुरुषः
स्यात् मन्यतेः कर्तरि। माङि लुङ्। अलंकारस्तु व्यतिरेक एव भूधरमित्युपमासंगतिसंकरः ॥५३॥ ५३

ननु मुमुक्षोः किं मित्रसंग्रहेणेत्यत्राह॥ जेतुमिति॥ भवतां जेतुमेव जयार्थमेव तपस्यते तपश्चर्यते। कर्मणो रोमन्थेत्यादिना भावे लुङ्। कुतः मुमुक्षवः मोक्षा
र्थिनः आयुधानि न दधते अतो मित्रसंग्रहः कार्य इति भावः तथापि किं भवान् स्वामिसख्येनेत्यत्राह। प्राप्यत इति। महिम्ना सह संगतेन त्वया सकलं च
तपःफलं प्राप्यते अतः सख्ये सखा अस्मत्स्वामिना युक्त इत्यर्थः॥५४॥ ननु किं वनैः कुत्रोपयुज्यते तत्राह॥ वाजीति॥ तस्य भूपतेः वाजिभूमिरश्वाकरः
इभशालानां काननं गजोत्पत्तिस्थानं भूरि शोभन निचयाश्च सन्तीति शेषः॥ ननु विद्यमानैः किमत्र कश्चोपकारो वनपत्रकोऽप्येकेन ह्रियत इत्यत्राह। अस्य
कोऽवनेन सौवर्णेन पत्रिणा शरेण किमिव न किं वनप्रयोजनमस्तीत्यर्थः। किंतु केवलं विलङ्घनं व्यतिक्रमणं न सहते नायं शरैर्लुब्धः किं त्वाधिक्षेपास
हिष्णुरित्यर्थः। अत्र प्रथमार्धे समृद्धिमद्वस्तुवर्णनादुदात्तोऽलंकारः॥५५॥ ननु भूदकुलुब्धः किमुपकारी तत्राह। सावलेपमिति॥ महानयं रजस्यपि

जेतुमेव भवतां तपस्यते नायुधानि दधते मुमुक्षवः॥ प्राप्यते च सकलं महीभृता संगतेन तपसः फलं त्वया॥५४॥
वाजिभूमिरिभसालकाननं हेमरत्ननिचयाश्च भूभृतः॥ कोऽवनेन किमिवास्य पत्रिणा केवलं न सहते विलङ्घनं॥५५॥
सावलेपमुपलिप्सिते परैरभ्युपैति विकृतिं रजस्यपि॥ प्रार्थितस्तु न महान्समीहते जीवितुं किमु धनं धनायितुं॥५६॥
तत्तदीयविशिखातिसर्जनात् अस्तु वां गुरु यदृच्छयागतं॥ राघवप्लवगराजयोरिव प्रेम युक्तमितरेतराश्रयं॥५७॥

परैः सावलेपं सगर्वमुपलिप्सिते उपलब्धुमिष्टे जिघृक्षिते सति विकृतिमभ्युपैति प्रकुप्यतीत्यर्थः। अर्थितो याचितस्तु जीवितं धारयितुं मयजं तावत् न समी
हते जीवितं त्यक्तुमनोनेह तु ति किं त्वर्थिनः प्रयच्छतीत्यर्थः। धनं किमु धनायितुं धनमात्मन एषितुं धनायितुमिति विग्रहः। अत्र त्विड्ग्रामात्रम
र्थः अन्यथा धनमिच्छनेनेपो न रूपं स्यात् सुप आत्मनः क्यच्। अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु इति निपातनादाकारः॥५६॥
उक्तमर्थं गमयति॥ तदिति॥ तत्तस्मात् तदीयविशिखस्यातिसर्जनात् प्रसर्पणात् वां युवयोः षष्ठीद्वितीयास्वयोर्वांनावाविति वामादेशः
राघवप्लवगराजयोरिव राघवसुग्रीवयोरिव यदृच्छया दैवादागतं गुरु महत् युक्तमनुरूपं इतरेतराश्रयमन्योन्यविषयं प्रेम सख्यमस्तु
॥५७॥ ५७॥ ५७॥

ननु शरलोभाभिमिथ्याभियुञ्जसे तेनेत्याह ॥ नेति ॥ त्वमनृतं मिथ्याभूतं अभियोक्तुं अभ्याख्यातुं श्रयोऽर्थग्रहणाद्विकर्मकत्वं। मिथ्याभियोगोऽभ्याख्या
नमित्यमरः। अस्माभिरिति शेषः। नेष्यसे नेष्टोसि ॥ कुतः तपस्वी मुनिः शाक्यः श्रमुनिशेभ्यो तपस्विनां विशिखाः श्वतः। तस्य विशिखेषु कः आद
रः का आस्थानकाविदित्यर्थः। हि यस्मान्नः भूभृति शैलपरे। अन्ये शराः सन्ति ये शराः वज्रिणः शक्रस्य पराक्रमवसूनि पराक्रमधनानि शौ
र्यसर्वस्वभूतानीत्यर्थः। वज्रिग्रहणाद्धेन्द्रादपि रिक्थं लेभिरे इति सूच्यते। अत्र शरेषु पराक्रमसाधनेषु पराक्रमरूपं वस्तु व्यज्यते ॥ ५८ ॥ अथ
10 ते शराऽपेक्षा चेत् तर्हि तथोच्यतामित्याह ॥ मार्गणैरिति ॥ अथ तव मार्गणैः शरैः प्रयोजनं तर्हि भूभृतो गिरेः पतिं किमु न नाथसे किमिति न या

नाभियोक्तुमनृतं त्वमिष्यसे कस्तपस्विविशिखेषु चादरः। संति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥ ५८ ॥
मार्गणैरथ तव प्रयोजनं नाथसे किमु पतिं न भूभृतः। त्वद्विधं सुहृदमेत्य सोऽर्थिनं किं न यच्छति विजित्य मेदिनीं ॥ ५९ ॥
तेन सूरिरुपकारिताधनः कर्तुमिच्छति न याचितं वृथा। सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभंगवेदनां ॥ ६० ॥

चसे नाथ धातोर्लिङ्गन चयां आभंगशंकायेत्याह। त्वदिति॥ सोस्मत्स्वामी तव विधेव विधा प्रकारोयस्य तं त्वद्विधं त्वादृशं महानुभावमित्य
र्थः। तथापि सुहृदं मित्रभूतामर्थिनं मेरसूक्तव्या मेदिनी विजित्य न प्रयच्छतीति न ददाति। किं तुदास्यत्येव किं पुनः प्रश्नो निति भावः ॥ ५९ ॥
यदुक्तं त्वद्विधामित्यादि तत्रोपपत्तिमाह। तेनेति॥ तेन प्रकारेण सूरिर्विद्वान् अत एव उपकारिताधनः उपकारैकधनः सयाचितं
यां आवणाथा कर्तुं निबुति। कुतः यत् यः येन प्रकारेणासीदतां क्लिश्यतामर्थिनां प्रणयभंगवेदनां आशाभंगदुःखं स्वयमनुभव
न्निव वेद वेत्ति जानातीति। अतो न वैफल्यसंकार्येत्यर्थः ॥ ६० ॥ ६० ॥ ६० ॥ ६० ॥ ६० ॥

ननु स्वयंग्राहिणः किंयाच्या दैन्यं तत्राह॥ शक्तिरिति॥ अर्थपतिषु विषये शक्तिः सामर्थ्यं स्वयंग्रहं स्वाम्यनुज्ञां विना ग्रहणं कारयति। यद्वा निरस्य
यं अपराधेपि अविकारि निर्बाधं प्रेम कर्तृ स्वयंग्रहं कारयति। प्रबलः प्रियो वा परस्य धनं स्वयं गृह्णातीत्यर्थः। अन्यथा दोषमाह। इदं पूर्वोक्तं
कारणद्वयं निरस्यतस्त्यजतः पुंसः दूलिशेषः। आधिकबले प्रबलविषये प्रार्थना तद्धन लिप्सा विपत्फला नर्थफलका अशक्तस्याप्रिय
स्य वा सतः प्रबलधनग्रहणा फणि शिरोमणिग्रहणसाहसवदनर्थाय कल्प्यत इत्यर्थः। ६१॥ ननु शस्त्रास्त्र संपत्या शक्त त्वादभिमानः तत्राह॥
अस्त्रवेदमिति। इह जागलितापसेषु लेषस्थितेनां मूध्येपतश्च निर्दारणमितिसप्तमी। जामदग्न्यमपहाय परशुरामं विनेत्यर्थः। अस्त्रवेदं धनुः
शास्त्रं तत्त्वतो धिगम्य भुजवीर्येण शालित इति भुजवीर्यशालिनः उभयसंपन्नस्येत्यर्थः। शालन क्रियापेक्षया समानकर्तृकत्वात् निर्देशः। क

शक्तिरर्थपतिषु स्वयंग्रहं प्रेम कारयति वा निरस्यतः॥ कारणद्वयमिदं निरस्यतः प्रार्थनाधिकबले विपत्फला॥ ६१॥
अस्त्रवेदमधिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः॥ जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधं॥ ६२॥
अभ्यघाति मुनि चापलात्त्वया यन्मृगः क्षितिपतेः परिग्रहः॥ अ[illegible]क्षमिह तद्यं प्रमाद्यतां संवृणोति खलु दोषमज्ञता॥ ६३॥

स्य वा आयुधं चरितः प्राप्तः अर्थो येन तच्चरितार्थं सार्थकं गीयते न कस्यापीत्यर्थः। अत स्तथापि तापसत्वादकिंचित्करस्य ते न सहसख्य
मेव मुख्यमिति भावः॥ ६२॥ ननु युष्मन्मृगः शरेणाहिंस्यो मम मलेन सह कथं सख्यं स्यादित्याशंक्य सख्यं तथापि तावन्मृगवधापराधं क्षमि
तव्य इत्याह। अभीति॥ त्वया मुनिचापलात्त्वं ब्राह्मणचापलादित्यर्थः। क्षितिपतेरस्मत्स्वामिनः। परिगृह्यत इति परिग्रहः। तेन स्वीकृत इत्य
र्थः। परिग्रहः परिजने पत्न्यां स्वीकारमूलयोरिति विश्वः। मृगोभ्यघाति प्रतिहत इति यत् हन्तेः कर्मणि लुङ्। तदूनं नमयमस्य त्वो
मीअक्षमित्रसोढवान्नैव तथाहि प्रमाद्यतां अविमृश्यकारिणां इत्यर्थः। दोषमपराधं अज्ञाता ऽज्ञानं तासंवृणोतीति। आच्छाद
यति खलु नाज्ञस्यापराधो गण्यत इत्यर्थः॥ ६३॥ ॥ ॥ ॥ ६१॥ ॥ ६३॥ ॥ ॥

७०॥

अथ सुहृद्भावेन हितमुपदिशति ॥ जन्मेति ॥ सत्कुलप्रसूतिः वेषो जटावल्कलादि तपो नियमः तेषां विरोधिनीं विरुद्धां अमूमेवंविधां अप
क्रियामपकारं पुनः इतः परमपि सर्वथा मा कुरु करोतेः कर्तरि माङि लुङ् वयोबुध्यर्थवाग्वेषश्रुताभिजनकर्मणां आचरेत्सदृशीं वृत्तिमजि १म
ह्मामशठां तथेति स्मरणात् अपथे वर्तमानं दुर्मतिं पुरुषमिति शेषः। उभौ लोकौ दूषयतीति उभयलोकदूषिणी तद्धितेत्यादिना उत्तरपदस
मासः। आपदेति प्राप्नोति समासविषये उभशब्दस्थाने उभयशब्द एव साधुः येनाह कैयटः पाठः उभादुदात्तो नित्यमिति नित्यग्रहणस्ये
दं प्रयोजनं वृत्तिविषये उभशब्दप्रयोगो माभूत् उभयशब्दस्यैव यथा स्यात् इत्युभयेत्र इत्यादिर्भवति ॥६४॥ यदुक्तं नभ्यस्यति मुनिव्रा

जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमूमपक्रियां ॥ आपदेत्युभयलोकदूषिणी वर्तमानमपथे हि दुर्मतिं ॥६४॥
यष्टुमिच्छसि पितॄन्न सांप्रतं संवृतोर्चिचयिषुर्दिवौकसः ॥ दातुमेव पदवीमपि क्षमः किं मृगेंऽग विशिखं न्यवीविशः ॥६५॥

पलादिति। तदेव स्फुटयति। यष्टुमिति ॥ सांप्रतं संप्रति एतर्हि संप्रतीदानीं अधुना सांप्रतं तथेत्यमरः। पितॄन्कव्यवाहनादीन्य
ष्टुमर्चितुं नेच्छसि। तथा दिवौकसो देवान् अर्चिचयिषुः अर्चयितुमिच्छुः नासि अतः न पित्र्यर्थं यं हिंसा नापि देवतार्था। तदपराधं वि
हितत्वादिति भावः। अथ सर्वतः आत्मानं गोपायेदिति श्रुतेरात्मरक्षार्थमिति चेत् नेत्याह। दातुमिति। हे अंग हे आतपदवीरा
तुमेव न हंतुं मुनित्वादिति भावः। क्षमोपि योग्यः सन्नपि किमर्थं मृगे विशिखं न्यवीविशः निवेशितवान् विशतेर्ण्यंतात् लुङ् आ
मिधावतो मृगाद्यसरणेनैवात्मरक्षणे कर्त्तव्ये देवधीत स्वापलमेव न हिंस्यात्सर्वा भूतानीति श्रुतिनिषेधादिति भावः ॥६५॥

य१

किं बहुना परमार्थेन ःश्रूयतामित्याह ॥ सज्जन इति ॥ सज्जनोसि अतश्चापलं चापलस्य कर्म विजहीहि त्यज । जहाते लौंट् । आ च हा वितीकारः ।
सर्वदा क इव वा के वासहिष्यते । इव शब्दो वाक्यालंकारे वा शब्दो नवधारणे असहने कारणांतरमाह । अनिम्नता अर्थे पलापुनः पुनरकार्यक
रिणो गुरून् धैर्ययुक्तानपि अन्यत्र विशालान पियुगांत वायवो वारिधीनिव क्षोभयंति प्रतानुप्राणि ॥ तो थतिरन्यासः ॥ ६६ ॥ नन्वयं क्षुभि

सज्जनोसि विजहीहि चापलं सर्वदा क इव वासहिष्यते ॥ वारिधीनिव युगांत वायवः क्षोभयंसनिम्नतागु
रूनपि ॥ ६६ ॥ अस्त्वा चेद् विदयं महीपतिः पार्वतीय इति मा व जीगणः ॥ गोपितुं भुवमिमां मरुत्वता शै
लवासमनुनीय लंभितः ॥ ६७ ॥ ६७ ॥ श्री ॥ ५ ॥ ६३ ॥ य ॥ न ॥ ए ॥ मः ॥

तः किरातः किं करिष्यतितत्राह ॥ अस्त्वेति अयं महीपतिरस्त्रवेदवित् निग्रहानुग्रहसमर्थः । अतः पनतेभवः पार्वतीयः प
र्वतः इतिप्रत्ययः । मा व जीगणाः वेनेचर बुध्या मा वज्ञासीरित्यर्थः ॥ गणपतेर्माङि लुङ् ई चगण इतीकारः ॥ नन्वीदृशश्चेत् किमेर्थ
मिह वने वसतीत्यत्राह । गोपितुमिति ॥ मरुत्वता इंद्रेण मां भुवं गोपितुं रक्षितुं आपाद्यत्र आधेधातुकेचेति विकल्पात् गुपूधूपे
स्वामिना आपादेशः । अनुनीय प्राथ्ये शैलवासलंभितः प्रापितः राप्रतेः कर्तुश्च च कर्मणि ॥ क्तः ॥ मति बुद्धी सादिना अणि कर्तुः
कर्मत्वं ॥ ६७ ॥ ॥ ६७ ॥ ६७ ॥ ६३ ॥ ७ ॥ ६७ ॥ ६८ ॥ ६७ ॥

उपसंहरति ॥ तदिति ॥ तत् तस्मान्मुनिचापलत्वात् मुनेः संबंधीदं मृगवधरूपं मया तितिक्षितं सोढमिति वनाश्रयः भूपतिरवोचत प्रारो हिणस्तु शरस्य प्रसर्पणमेव प्रतीकारो इत्याह ॥ अत्रभवते पूज्याय अस्मत्स्वामिने अत्रभवानू व्याख्यातः निजं [redacted] बाणां तदीयमेव दिशन् प्रसर्पयन् त्वमपि सर्वसंपदः प्राप्नुहि सख्येनेति भावः ॥ ६८ ॥ ननु मनेतस्य सख्यमेव न रोचते किं पुनः तन्मूलाः

[redacted] तत्तितिक्षितमिदं मया मुनेरित्यवोचत वचः सभूपतिः ॥ बाणमत्रभवते [redacted]
। । निजं दिशन्नाप्नुहि तमपि सर्वसंपदः ॥ ६८ ॥ आत्मनीनमुपतिष्ठते गुणाः
संभवंति विरमंति चापदः ॥ इत्यनेकफलभाजि मास्म भूदर्थिता कथमिवार्यसंगमे ॥ ६९ ॥

संपदस्तत्राह ॥ आत्मनीनमिति ॥ आत्मने हितमात्मनीनं आत्मन् विश्वजनभोगोत्तरपदात् खः ॥ उपतिष्ठते संगच्छते । उपादेवपूजासंगतिकरणपथिष्विति वक्तव्यो दात्मनेपदं गुणाः विनयादयः संभवंति । आपदश्च विरमंति । व्याङ्परिभ्यो रमयमिति परस्मैपदं । इत्यनेकफलभाजि आर्यसंगमे साधुसंगमे साधुसंगतौ अर्थिता [redacted] क्षा कथमिव मास्म भूत् सर्वथा भवत्येव ॥ ६९ ॥

13 92

किरातस्यायंसर्गस्त्रयोदशः समाप्तः



न्वायंदूरेवर्ततइत्याह॥दृश्यतामिति॥ तिग्महेतिभिस्तीक्ष्णायुधाभिःपृतनाभिरन्वितोभूपतिःसाहयःससर्पाःवीचयोयस्यससिंधुःसमु
द्रवोद्धतः किंतुसमयोमर्यादासेतुरिवसमयसेतुस्तेनवारितःसन्नहस्तेननिर्दिशन्नाह। अयमनोकहांतरेद्रुमांतर्धानेवर्ततइतिशेषः।
दृश्यतां अनोकहःकुटःशालःपलाशीद्रुद्रुमागमाइत्यमरः॥७०॥ अथास्यहिदूतानयनमाह॥सज्यमिति॥ स्थेयान्स्थिरःप्रियस्थि

13

दृश्यतामयमनोकहांतरेतिग्महेतिपृतनाभिरन्वितः॥साहिवीचिरिवसिंधुरुद्धतोभूपतिःसमयसेतुवारितः॥७०॥
सज्यंधनुर्वहतियोहिपतिस्थवीयःस्थेयाञ्जयन्हरितुरंगमकेतुलक्ष्मीं॥ अस्यानुकूलयमतिंमतिमन्ननेनसख्या
सुखेसमभियास्यसिचिंतितानि॥७१॥इतिश्रीकिरातार्जुनीयेमहाकाव्येलक्ष्म्यंकेभारवीकृतौमृकदानववधोनाम॥१३॥

रेस्यादिनास्थादेशः।यश्चभूपतिःहरितुरंगमकेतोरिंद्रध्वजस्यलक्ष्मींशोभांजयन्। अहिपतिःशेषइवस्थवीयःस्थूलतरं।स्थूल
दूरेस्यादिनापूर्वगुणादिपरलोपो।सज्यंसज्यंधनुर्वहतिहेमतिमन्अस्यचभूपतेर्मतिमनुकूलयअनुकूलांकुरुसख्यंकुर्वि
त्यर्थः।मतिमत्तायाःफलमेतदितिभावः।कुतःसख्यात्अनेनचभूपतिनाहेतुनासुखेनाक्लेशेनचिंतानिमनोरथान्अभियास्य
सिप्राप्स्यसि।वसंततिलकावृत्तं॥७१॥ ७१॥ राम राम इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांकि
रातार्जुनीयव्याख्यायांघंटापथसमाख्यायांमृकदानववधोनामत्रयोदशःसर्गःसमाप्तोयं॥श्रीगजाननार्पणमस्तु॥

oooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooo

14

॥ किरातस्य चतुर्दशसर्गः प्रारंभः ॥

श्रीगणपतिर्जयति॥ ततः किरातवाक्यश्रवणानन्तरं उद्धतैः प्रगल्भैः किरातवचोभिरर्णवाम्बुभिः शैल इव पराहतोऽभिहतः अत एव कुपितोऽपि पां
डवो धैर्यं निर्विकारचित्तत्वं न जहौ। न तत्याज। प्रसन्नमपि कोपं स्तम्भयामासेत्यर्थः। तथा हि साधवः सज्जनाः सुदुर्ग्रहं सुष्ठु दुरासदम् अप्रकंप्यम
न्तःकरणं येषां ते सुदुर्ग्रहान्तःकरणा हि। अर्थान्तरन्यासः॥१॥ सलेशमिति॥ सह लेशैः सलेशं सकलं यथा तथा उल्लिङ्गितम् उद्भूतलिङ्गं कृतं उल्लि
ङ्गं लिङ्गैस्तद्वाक्यमङ्गिभिरेव सम्यग्गतमित्यर्थः। शत्रुरेव शात्रवः स्वार्थेऽण्प्रत्ययः। तस्येङ्गितमभिप्रायः उल्लिङ्गितो येन सः। गिरां वा
वाक्संबन्धि विस्तरे तत्त्वसंग्रहे वैभाषिको द्वंद्वैकवद्भावः। कृती कुशलः। प्रमाणीकृतं प्रधानीकृतं काल एव साधनं येन सः। अवसरोचितं वि
वक्षुरित्यर्थः। अयं पाण्डवः प्रशान्तसंरम्भ इव क्षोभरहित इव वचः आददे उवाचेत्यर्थः॥२॥ सान्त्वपूर्वकं तावदाह। विविक्तेति॥ विविक्ताः

ततः किरातस्य वचोभिरुद्धतैः पराहतः शैल इवार्णवांबुभिः॥ जहौ न धैर्यं कुपितोऽपि पाण्डवः सुदुर्ग्रहान्तःकरणा हि साधवः॥१॥
सलेशमुल्लिङ्गितशात्रवेङ्गितः कृती गिरां विस्तरतत्त्वसंग्रहे॥ अयं प्रमाणीकृतकालसाधनः प्रशान्तसंरम्भ इवाददे वचः॥२॥ कृ॰१
विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषां॥ प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती॥३॥

संयोगादिना अश्लिष्टाः वर्णा अक्षराण्येवाभरणानि यस्याः सा। अन्यत्र तु विविक्तानि शुद्धानि वर्णरूपाण्याभरणानि च यस्याः सा। वर्णो द्विजा
दौ शुक्लादौ स्तुतौ च वर्णं तु वाक्षरे इति सुमयत्राप्यमरः। सुखा श्रुतिः श्रवणं यस्याः सा सुखश्रुतिः। श्राव्येत्यर्थः। अन्यत्र श्रूयत इति श्रुतिः वेदः
सा सुखा यस्याः सा मन्त्रभाषिणीत्यर्थः। द्विषामपि हृदयानि प्रसादयन्ती किं पुनः सुहृदामिति भावः। प्रसन्नानि वाचकानि पदानि गंभी
राण्यर्थगुरूणि च पदानि सुप्तिङन्तरूपाणि यस्याः सा। अन्यत्र तु विमला लसच्छरय्या सरस्वती वाक् स्त्री रत्नं च तथा चोक्तं। स
रस्वती सरिद्भेदे गोवाग्देवतयोरपि स्त्रीरत्ने चेति। न कृतं पुण्यकर्म यैस्तेषां न प्रवर्तते न प्रसरति। किं तु सुकृतीनामेवेत्यर्थः॥ भव
द्वाणी चैवंविधेति भावः॥१॥ अत्र काचिल्लौकिका वा गेदेवता च प्रतीयते तत्रादो समासोक्तिरलंकारः। विशेषणसाम्येनाप्रस्तु
तप्रतीतेः। अपि च श्लेषः॥३॥

भवतीति॥ ते विपश्चितां मध्ये सभ्यतमाः सभायां साधुतमाः निपुणाः साधुः समर्थो निपुणो वेति काशिकायां। भवंति। ये मनोगतं मनसा गृहीतं
मर्थं वाचि निवेशयंति। वाचा उद्गिरंतीत्यर्थः तेष्ववक्तृष्वपि उपपन्नैः पुणाः संभावितकौशलाः कतिचिदेव गभीरं निगूढमर्थं प्रकाश्य प्रकाशितं
स्फुटतां नयंति। लोके तावज्ज्ञातार एव दुर्लभाः तत्रापि वक्तारः तत्रापि निगूढार्थप्रकाशकाः त्वमपि सर्वमस्तीति श्रुतिः वनेचरवाक्यं रहस्य
ज्ञातत्वमिति स्वयमपि तादृश एवेति रहस्यं॥४॥ स्तुवंतीति॥ किंच केचित गुर्वीमभिधेयसंपदं अर्थसंपत्तिं स्तुवंति। अपरे विपश्चितः उच्चैः श
ब्दस्य विशुद्धिसामर्थ्यं स्तुवंति। इति प्रतिपुरुषं रुचौ प्रतीतौ स्थितायां भवस्थितायां सर्वमनोरमाः सर्वेषां शब्दार्थरुचीनां पुंसां मनोरमाः गिरः सु

भवंति ते स[redacted]भ्यतमा विपश्चितां मनोगतं वाचि निवेशयंति ये॥ नयंति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशतां॥४॥
स्तुवंति गुर्वीमभिधेयसंपदं विशुद्धिमुक्तेरपरे विपश्चितः॥ इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः॥५॥
समस्य संपादयता गुणैरिमां त्वया समारोपित भार भारतीं॥ प्रगल्भमात्मा धुरि धुर्य वाग्मिनां वनेचरेणापि सताधिरोपितः॥६॥

दुर्लभाः। त्वद्गिरस्तु सर्वमनोहराः। उत्कर्षगुणसंपन्नस्येति भावः॥५॥ समस्येति॥ धुरं वहतीति धुर्यः कार्यनिर्वाहकः। धुरो यड्ढकाविति
यत्प्रत्ययः। अत एव समारोपितभारेत्याभिमानिहितसंध्यादिकार्यभारतस्य संबुद्धिः हे समारोपितभार यद्वाहमनुः। इतसंधिविपर्यया
दिति। इमां शांतता विनय योगित्वादिकां भारतीं वाचं गुणैर्विविक्तवर्णादिभिरिति भावः। समस्य संक्षिप्योऽप्य प्रगल्भं निर्भीकं यथा तथा
संभावयता स्वयता व्याहरतेत्यर्थः। त्वया वनेचरेणापि सता अपि शब्दो विरोधद्योतनार्थः। आत्मा स्वयं वाग्मिनां। वाचो युक्तिपटु
२ वाग्मीत्यमरः। वाचोग्मिनिरिति मत्वर्थीयो ग्मिनिप्रत्ययः। धुर्यके धिरोपितः स्थापित इत्यर्थः। रूढः योन्यतास्यामिति प्रकारः। अ
त्रमनुः। वपुष्मान्वीतभीर्वाग्मी हृतो राजः प्रशस्यत इति॥६॥ ६॥

वाग्मितामेवाह ॥ प्रयुज्येति शान्ततादिनययोगैरित्यादिना साम सान्त्वं प्रयुज्य तिष्ठो प्रविलोभनं प्रलोभनमाचरितं मित्रमिष्टमित्यादिनेत्यर्थः।
आचरितं संपादितं तथा बुद्धेर्विभेदाय व्यामोहनार्थं शक्तिरर्थयतित्यादिना भयं प्रदर्शितं किं तु। शिलीमुखार्थिना न तु साध्यार्थिने
तिभावः। यथेति शेषः। नाभियोक्तुमित्यादिना तथाभियुक्तं यथे[illegible]तरन्यायादन्यदन्याय्यमित्यर्थः। न्याय्यं न्यायादनपेतमिवावभासते इत्युपमा।
अनेन चाग्मिनामग्रसरोसीतिभावः॥७॥ ततः किं तत्राह। विरोधीति ॥ किंतु सिद्धेः फलस्य विरोधि विघातकमिति इदमस्मदास्कंदनरूपं कर्मक
र्तुमुद्यतो महीपतिर्महतां धुर्येणेतिभावः किं न वारितः निराकरणे हेतुमाह भूतिमिच्छता इहामुत्र च श्रेयार्थिना सहचरितो अर्थनाशोस्वार्थान
र्थोयिस्यते न सहार्थनाशेन समानसुखदुःखेनेत्यर्थः। अनुजीविना भसेनेनृपः स्वार्थे हिते नियोज्ये नियम्यः खलु। अन्यथा स्वामिद्रोहपातकी अ

प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय धियः प्रदर्शितं॥ तथाभियुक्तं च शिलीमुखार्थिना यथेतरं न्याय्यमिवावभासते॥७॥
विरोधि सिद्धेरिति कर्तुमुद्यतः स वारितः किं भवता न भूपतिः॥ हिते नियोज्यः खलु भूतिमिच्छता सहार्थनाशेन नृपोनुजीविना॥८॥
ध्रुवं प्रणाशः प्रहितस्य पत्रिणः शिलोच्चये तस्य विमार्गणं नयः॥ न युक्तमत्रार्यजनातिलंघनं दिशत्यपायं महतामतिक्रमः॥९॥ अती
तसंख्या विहिता ममाग्निना शिलीमुखाः खाण्डवमत्तुमिच्छता॥ अनादृतस्यामरसायकेष्वपि स्थिता कथं शैलजनाशुगे धृतिः॥१०॥

यसश्च भ्रष्टः स्यादिति भावः॥८॥ तर्हि न्योबाणाः क्रियतां किमत्रान्याय्यं तत्राह॥ ध्रुवमिति॥ प्रहितस्य प्रयुक्तस्य पत्रिणः शरस्य प्रणाशो ध्रुवं निश्चि
तः प्रहित[illegible]श्चेतिभावः। तस्य प्रणष्टस्य पत्रिणो शैलोच्चये शैले विमार्गणं अन्वेषणं न यो न्यायः। अन्वेषणं निचयनं मार्गणं मृगयामृगयुत्यमरः।
अत्र विषये आर्यजनातिलंघनं सज्जनातिक्रमो न युक्तः हि यस्मात्कारणात् महतामतिक्रमः अपायमनर्थं दिशति॥९॥ यदुक्तं हर्तुमर्हसितत्रोत्तरमाह।
अतीतेति। खाण्डवमिन्द्रवनं अत्तुं भक्षयितुमिच्छता अग्निना मम अतीतसंख्याः शिलीमुखाः विहिताः खाण्डवदाहे अक्षय्यतूणीरदानमुक्तं भारते अतो मर
सायकेष्वपि अनादृतस्याश्चर्यरहितस्य भावेन क्वः। तेन बहुव्रीहिः मम कथं शैलजनाशुगे किरातबाणे धृतिः आस्थानकथं विधिरित्यर्थः। अनेनापि
हारशंका कार्येत्यर्थः। यदुक्तं स्मयते तनुभक्तामित्यादिना सदाचारः प्रमाणमिति तत्रोत्तमाह॥१०॥ १०

यदिति ॥ आर्यचेष्टितं सच्चरितं प्रमाणीकृतं यदि साधुत्वेनांगीकृतं यदीत्यर्थः न हीदं दोषे अदोषापादनमेपि च कृति संज्ञाप्रतिषेधेपि नञ्समास इति भा
ष्यकारः उपलक्षणे तृतीया वयं किमिति तिरस्कृताः अवमानिताः न युक्तमित्यर्थः हि यस्मात् परिवादगोचरं परनिंदास्पदं अयातपूर्वा पूर्वं न याता
सा तां वाणी गुणमेव भाषते न तु दोषं अतस्त्वमपि दोषभीषिणो न सदाचारप्रामाण्यबुद्धिरित्यर्थः यावद्दोषान्न पश्यति तावत् गुणमेव ब्रूते
भवता तु दोषमदृष्ट्वैव वयमाक्षिप्ता इति भावः पूर्वं याता यातपूर्वा सुप्सुपेति समासः पद्यासर्वनाम्नोपि निर्देशायः पूर्वनिपातः स्त्रियाः पुंव
द्भाषितादिना पुंवद्भावः सर्वलिंगता अर्थांतरन्यासः ॥११॥ नन्वप्रत्यक्षा बुद्धिः कथं दुह्यते निश्चीयते तत्राह गुणेति गुणापवादेन विपर्यमा
न गुणापवचनेन तदन्यारोपणात् तस्माद्गुणादन्यस्य दोषस्यारोपणाद् विपर्यासानस्येवारोपणात् समंजसं सुजनं जनं भृशाधिरूढस्याति मात्रमाक्रम्य स्थि

यदि प्रमाणीकृतमार्यचेष्टितं किमित्यदोषेपि तिरस्कृता वयं । अयातपूर्वापरिवादगोचरं सतां हि वाणी गुणमेव भाषते ॥ गुणापवादे
न तदन्यरोपणाद्भृशाधिरूढस्य समंजसं जनं ॥ द्विधेव कृत्वा हृदयं निगूहतः स्फुरन्नसाधोर्विवृणोति वागसिः ॥१२॥
वनाश्रयाः कस्य मृगाः परिग्रहाः शृणाति यस्तान्प्रसभं हिंस्यते । प्रहीयतामत्र नृपेण मानिता न मानिता चास्ति भवंति च श्रियः ॥१३॥

तस्य अधिक्षिप्तस्येत्यर्थः वक्रीकृतः निगूहतो हृदयं संवृण्वतोपि असाधोर्नार्यस्य कर्मेव स्फुरन् विलसन् वागेवासिः इति ज एव तं द्विधा हृत्सा भिन्नं वि
वृणोति दुष्टया वाचैव तत्सूचिकया कुटिलस्यापि दोषमनुमीयत इति भावः वागसिरित्यत्र द्विधाकरणतुल्यरूपसाधनत्वं ॥१२॥ यदुक्तमभ्यधानिति तत्रोत्तरमा
ह वनेति ॥ वनाश्रया अत एव मृगाः कस्य परिग्रहाः न कस्यापीत्यर्थः किंतु यस्तान् मृगान्प्रसभं बलात्कारेण शृणाति हिनस्ति शॄ हिंसायामिति धा
तोर्लट् तेन मृगास्तस्य हेतुः परिग्रहाः इदं तावाचाहमेवेति भावः ननु मयायमिसाभिमानात् नृपस्य स्वामित्वमाशंक्याह प्रहीयतामिति अत्र मृगे
नृपेण मानिता ममेत्यभिमानः प्रहीयतां त्यज्यतां कुत इत्याशंक्याह अभिमानमात्रेण स्वत्वाभावादित्याह मेति मानिता चास्ति श्रियः स्वामिभ
वंतीति न किंतु न भवंत्येव सत्यामपि मानितायामित्यर्थः अभिमानमात्रेण स्वत्वेऽतिप्रसंगादिति भावः ॥१३॥ ॥१३॥ ॥ ॥

यद्दृमित्युसिपितृनिसादिनायन्निःकारणमवधीरिपुपालंभितंतत्रोत्तरमाह।नेति॥ कस्मैचिदपिवर्त्मनप्रदीयतामित्येवंमहर्षिणाव्यासेनमेमह्यं
विहितमुपदिष्टमित्यर्थः। अस्माकारणाज्जिघांसुर्हंतुमिच्छुः आपन्नत्राणिधावन्नयंमृगोमयानिहतः इयस्माद्भूतस्याभिरक्षारक्षणासतामे
लंक्रियानतुद्रोहः। अतोमयात्मरक्षणार्थंवधोविहितः। नाज्ञिःकारणमित्यर्थः॥१४॥ दुर्वृत्तंतधिसादिनायदुक्तानिबंधुत्वमुक्तंतत्राबवहे। मृगान्नि
ति॥ स्वमासैवहेतुस्तेनस्वहेतुनास्वार्थमित्यर्थः सर्वनाम्नस्तृतीयाचेतितृतीया मृगान्निति निघ्नन्प्रहरन्मृगान्यातीतिमृगयुः व्याधश्च मृगयुर्व्या
धश्चेत्योणादिकोयुप्रत्ययांतोनिपातः। व्याधोमृगवधाजीवो मृगयुर्लुब्धकोपिसइत्यमरः। नपरं धृतातपस्विनां कथंकृतापकारः। नकथंचि
दित्यर्थः। अथकृपलिचेद्व्याधस्यापीतिशेषः। अस्तुविंडघकलहेनेतिभावः। परंतुयदुक्तंनिघ्नतःपरानिबर्हितमित्येतस्यप्रथमप्रहार

नवर्त्मकस्मैचिदपिप्रदीयतामितिव्रतंमेविहितंमहर्षिणा॥ जिघांसुरस्मान्निहतोमयामृगो व्रताभिरक्षाहिसतामलंक्रिया॥१४॥
मृगान्निनिघ्नन्मृगयुःस्वहेतुना कृतोपकारःकथमिच्छतांतपः॥ तथेतिचेदस्तुमृगःक्षतःक्षणादनेनपूर्वंनमयेतिकागतिः॥१५॥
अनायुधेसत्त्वजिघांसितेमुनौ कृपेतिवृत्तिर्महतामकृत्रिमा। शरासनंबिभ्रतिसज्यसायकं कृतानुकंपःसकथंप्रतीयते॥१६॥

कृतत्वंतदयुक्तमित्याह। मृगःक्षणात्क्षतःहतः आवाभ्यांयुगपदेवविद्धइत्यर्थः। एवंसति अनेननृपेणैवपूर्वंहतोमयातुनेत्यत्रका
गतिःकिंप्रमाणंपौर्वापर्यस्यदुर्लक्ष्यत्वादितिभावः। तथाचमदीयमित्याद्युपलंभस्तस्यैवकिंनस्यादितिभावः॥१५॥ पूर्वंनृपेतिचेदस्तु
इत्युक्तंसंप्रतितदप्यसहमानआह॥ अनायुधमिति॥ अनायुधेनिरायुधेसत्त्वेनकेनचित्प्राणिनाजिघांसितेहंतुमिष्टेहंतेःसन्नं
तात्कर्मणिक्तः। मुक्केनोमुनिविषयेकृपेतिमुक्तिवृत्तिर्व्यवहारोमहतामकृत्रिमा॥ कृपयासहज्ययासज्यःसायकोयस्मिंस्तच्छरासनंध
नुर्बिभ्रतिमयिसन्नृपःकथंकृतानुकंपःप्रतीयतेज्ञायते। इणःकर्मणिलिट्। अक्षमेकृपाविहितानतुक्षमइत्यर्थः॥१६॥ ॥१६॥

अथ कृपामभ्युपगम्याह। अथो इति॥ अथो अस्मे तेन नरूपेण मदुद्दिश्य मदर्थं यथा तथा अर्थेन सह इति समासः॥ शरः उज्झितस्त्यक्तः तस्योज्झितस्य फलं
च प्रतिकायस्य प्रतिपक्षस्य साधनं वधः। साधनं निर्वर्त्तितो मे द्रसैन्ये सिद्धो वधो गतावितिविग्रहः। अविक्षते अखंडिते अस्मिन् फले मया आ
त्मसात्कृते सति। तद्धीन वनेचर इति साति प्रत्ययः। चमूपतेः अधिका कृतार्थता साफल्यं तनु खलु स्वायुधस्य परत्राणं शत्रुवधमात्र प्रतिया
दनार्थैकहेलया सिद्धिरित्यर्थः। तथाप्ययं शरः लोभ इति कृपालुतया मया न्यापि वृत्तीति भावः॥१७॥ मार्गणैरथ तव प्रयोजनमित्यादिकि
नायदुक्तं तन्निराचष्टे॥ यदि इति॥ स नृपः कामं भवताय्याच्यतामिति यदा [illegible] इति विशेषः। एतद् नल्पचेतसां मनस्विनां न क्षमं न युक्तं॥ कु

अथो शरस्तेन मदर्थमुज्झितः फलं हितस्य प्रतिकायसाधनं॥ क्व अविक्षते तत्र मयात्मसात्कृते कृतार्थता नन्वधिका चमूपतेः॥१७॥
यदा स्वकामं भवतास याच्यतामिति क्षमं नैतदनल्पचेतसां॥ कथं प्रसह्याहरणैषिणां प्रियाः परावनत्या मलिनीकृताः श्रियः॥१८॥
अभूतमासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सते नृपः॥ विजानतोपि ह्यनयस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः॥१९॥

तः प्रसह्य बलादाहरणैषिणां आहर्तुमिच्छूनां क्षत्रियस्य विजितव्यमिति स्मरणादिति भावः। परावनत्या याञ्चादैन्येन मलिनीकृताः श्रियः
कथं प्रियाः न कथंचिदित्यर्थः॥१८॥ अथ परं गिलमुद्घाघभयं दर्शयति॥ अभूतमिति॥ तव नृपः अभूतं अनृतं आसज्य मिथ्याभियु
ज्येत्यर्थः। युक्त्वा क्ष्मादावर्तमभूतमिति समरः॥ अलभ्यं लब्धुमशक्यं विरुद्धं विपरीतफलं मनोरथं बलाल्लिप्सते लब्धुमिच्छति नवै
तच्चित्रमित्याह। हि यस्मादनयस्य दुर्जनस्य रौद्रतां भयंकरत्वं विजानतोपि मतिः अपाये विनाशकाले परिमुह्यतीति परिमोहिनी भ
वति। संपृचादिसूत्रेण ताच्छील्ये घिनुण् प्रत्ययः। प्रायेण विनाशकाले विपरीतबुद्धिरिति भावः॥१९॥ ॥१९॥

अथ सर्वथा लभ्यस्ते शरस्तर्हि किमनया कुसरसूत्या विस्रब्धं त्वया ख्यातां शरो ऽन्यो हेत्याह। असि मिरिति॥ असिः खड्गः शराः वर्म्म कवचं उच्चकैरुच्चैः धनु
श्च धनुर्वा तेतव ईश्वरेण स्वामिना विविच्याल[illegible]कैकशो विमृश्य किं न प्रार्थितं किं नया चितं येन प्रयोजनं न तद्दास्यामीति भावः। नपुंसके कशेषः। अथ चेदस्य
विरामिमानिनः नस्तस्य शक्तिरस्ति वेदितिशेषः। तर्हि यां[illegible] अयाकृतमेव साध्या भावनया चितव्या मेवेत्यर्थः। गम्यमानक्रियापेक्षया करणे तृतीये
सुखं प्राकरूतं कृतं निषेधार्थमव्ययं। यतः शक्तिमतां स्वपराहाबलात् ग्रहणं न दूषितं किंतु भूषणमेव वीराणामिति भावः॥२०॥ एवं पूर्वम
राजयोगि वेत्यादिनोपदिष्टं सख्यं प्रत्याचष्टे। सखेति। स तपः कथं त्वया युक्तो योग्यः सखा कथितः। न कथं चित्कथनीय इत्यर्थः। कुतः यो ऽन्यः तप
स्यते तपश्चरते॥ अनपराधिनेत्यर्थः। कुधक्रुहेत्यादिना संप्रदानत्वा चतुर्थी। यदृच्छया स्वैरवृत्या। यदृच्छा स्वैरित्यमरः। अपस्मरूपां करोति।

असिः शरा वर्म्म धनुश्च नोच्चकै र्विविच्य किं प्रार्थितमीश्वरेणते॥ अथास्तिशक्तिः कृतमेव याच[illegible]यानदूषितः शक्तिमतां स्वयंग्रहः॥२०॥
सखा स युक्तः कथितः कथं त्वया यदृच्छया सूयति यस्तपस्यते। गुणार्जनोच्छ्राय विरुद्धबुद्धयः प्रकृत्यमित्राहि सतामसाधवः॥२१॥
वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीनामृगजीवितच्छिदः॥ सहायकृष्टैर्महतां न संगतं भवंति गोमायुसखा न दंतिनः॥२२॥

असूयति ईर्ष्यति सूयालु दोषारोपो गुणेष्वपीत्यमरः। प्रस्तुतशत्रुरेवायमित्याह। हि यस्माद्गुणार्जनेन यच्छ्रायः उत्कर्षः तस्य विरुद्धा विमुखी बुद्धिर्येषां
ते ऽसाधवः सखलाः सतां प्रकृत्या अमित्राः शत्रवः॥२१॥ हीनजातीव नित्यान्न वैरम्यामहः स्वसित्याह। वयमिति॥ वर्णाश्रमरक्षणोचिताः विशुद्धव
न्तयोवयं राजानः क्व जातिहीनाम्रगजीवितछिदा हिंसाजीविनो व्याधाः क्व। पलितमाह। अपकृष्टैः खलुरीत्या जात्या चानिकृष्टैः सह महतां नान्यामेवो
त्कृष्टानां संगतं सख्यं न घटते। तथा हि दंतिनो गजाः गोमायूनां शृगालानां सखायो गोमा[illegible]न भवंति। स्त्रियां शिवा भूरिमायुगोमायुमृ
गधूर्तका इत्यमरः। अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थांतरन्यासः॥२२॥ २२॥ २२॥ २२॥

त

नैव संरंभं कथमधिक्षिप्यत इति चेत्तत्राह। पर इति॥ अज्ञता जडो मोहांधः परोऽवजानाति तिरस्करोति यत् तदुन्नतानां महतां धीरतां न निहंति। न विकारं जनयतीत्यर्थः। क्रोष्टेव सिंहस्येति भावः। किंतु समानानि वीर्यान्वयपौरुषाणि शक्तिकुलविक्रमाः येषां तेषु मध्ये निर्धारणे सप्तमी यो यः कश्चिदित्यर्थः। अतिक्रांतिमतिक्रमं करोति इति चेत् असौ तिरस्क्रिया यथा सिंहस्य सिंहस्येति भावः॥ २३॥ तर्हि नीचे कीदृशी व्यवस्थिरित्याशंक्य सापेक्ष्यतिक्रमा ह। यदेति॥ यदा विगृह्णाति विरुणद्धि पृथग्जनेन नेति शेषः। तदा यशो हतं नाशितं भवेत्। अथ यदा मैत्रीं करोति तदा गुणा दूषिता भवेयुरिति उभयथापि तत्कर्यं विमृश्य विमृश्य परीक्षकोऽविवेचकः पृथग्जनं नीचजनं अवज्ञया नादरेणापहतं तिरस्कृतं करोति उपेक्षेतेत्यर्थः॥ २४॥ उपसंहरन्नाह। मयेति॥ अनेन हेतुना संधिविग्रहानर्हत्वेन कारणेन मया मृगान् हंतुर्व्याधस्य संबंधि हेतं तत्स्वरूपं सेयः। अत एव न लोकेत्यादिना षष्ठीप्रतिषेधः। विरु

परोऽवजानाति यदज्ञताजडस्तदुन्नतानां न विहंति धीरतां॥ समानवीर्यान्वयपौरुषेषु यः करोत्यतिक्रांतिमसौ तिरस्क्रिया॥ २३॥

यदा विगृह्णाति हतं तदा यशः करोति मैत्रीमथ दूषिता गुणाः॥ स्थितिं प्रेक्ष्योभयथा परीक्षकः करोत्यवज्ञोपहतं पृथग्जनं॥ २४॥

शाः मया मृगान्हंतुरनेन हेतुना विरुद्धमाक्षेपवचस्तितिक्षितं॥ शरार्थमेष्यन्नथ लप्स्यते गतिं शिरोमणिं दृष्टिविषाज्जिघृक्षतः॥ २५॥

इतीरिताकूतमनीलवाजिनं जयाय दूतः प्रतितर्ज्य तेजसा॥ ययौ समीपं ध्वजिनीमुपेयुषः प्रसन्नरूपस्य विरूपचक्षुषः॥ २६॥

ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्रादवती महाचमूः॥ युगांतवाताभिहतेव कुर्वती निनादमंभोनिधिवीचिसंहतिः॥ २७॥

द्धमतिपरुषं आक्षेपवचः तिरस्कारवचनं तितिक्षितं सोढं न तु सख्यानंगीकारे बलात्स्वरं ग्रहीष्यतीत्याशंक्याह। शरेति॥ अथ शरार्थमेष्यन् दृष्टिविषयस्य तस्माद् दृष्टिविषात्सर्पविशेषात् शिरोमणिं जिघृक्षतेऽग्रहीतुमिच्छतो या गतिस्तां लप्स्यते प्राप्स्यते॥ २५॥ इतीति॥ इतीत्थं मीरिताकूतमुक्ताभिप्रायं अनीलवाजिनं श्वेताश्वं अर्जुनं दूतो जयाय तेजसा प्रतापेन प्रतितर्ज्य अस्मान् अतिलाघ गमिष्यसीति भीषयित्वा इत्यर्थः। ध्वजिनीमुपेयुषः सेनासंगतस्य प्रसन्नरूपस्यार्जुनं प्रति शेषः। विरूपचक्षुषः त्र्यंबकस्य समीपं ययौ॥ २६॥ ततइति॥ ततः पताकिनीपतेः सेनापतेः अपवादेन सेनाऽपवादो ध्वाद्रेश इति सज्जनः। निर्ह्रादवती महाचमूः सेना युगांतवातैरभिहता आंदोलिता अत एव निनादं कुर्वती अंभोनिधिवीचिसंहतिरिव चचाल॥ २७॥ २७॥ २७॥ २७॥

रणायेति॥ जेतेव जैत्रः जयनशीलः अनुकूल इत्यर्थः। जयतेस्तृन्‌ तत्प्रज्ञादित्वात्स्वार्थे ऽण्प्रत्ययः। त्वरं गितं संजातं त्वरं गं यथा तथा आलंबिता आ
स्थिताः केतुसंततयो येन सः घनैः सान्द्रैः बुशीकरैः सह सघनांबुशीकरः सुरभिः समीरणो रणाय त्वरां दिशन्निव बलानां पुरः शनैः प्रतस्थे॥२८॥ज
यपतीति॥ जयारवैर्बंदी जनैः जयजयेति शब्दैः क्ष्वेडितनादैः सिंहनादैश्च आमूर्च्छितः शरासनज्यानां धनुर्गुणानां तलवारणानां च ध्वनिः भूध
रराजकुक्षिषु गिरिगुहास्व संभवन्‌ अमान्‌ भुवं कंपयन्निव दिशां वततस्तरे व्याप्नोत् अत्र च तच्च संयोगाद्गुणः। अथ त्वमूर्त्तपदार्थस्य विशेषणतयास्य
5 संभवहेतुत्वोक्त्या व्यलिंगरूपं गिरिकुक्षिरूपापेक्षया ध्वनेराधेयस्याधिक्योक्तेरधिकालंकारः। ते भ्यश्चायमसंभवतीति निसव्यंजकं विनो
त्पाद्यमानोऽपितमूर्त्तगुणनिमित्ता प्रतीयमाना क्रियोत्प्रेक्षा अंगांगीभावेन संकीर्यत इति संक्षेपः॥२९॥ निशातेति॥ निशितास्तीक्ष्णा रौद्री

रणाय जैत्रः प्रदिशन्निव त्वरां तरंगितालंबितकेतुसंततिः॥ पुरो बलानां सघनांबुशीकरः शनैः प्रतस्थे सुरभिः समीरणः॥२८॥
जयारवक्ष्वेडितनादमूर्च्छितः शरासनज्यातलवारणध्वनिः॥ असंभवन्‌ भूधरराजकुक्षिषु प्रकंपयन्‌ गामिव तस्तरे दिशः॥२९॥
निशातरौद्रेषु विकासतां गतैः प्रदीपयद्भिः ककुभामिवांतरं॥ वनेसदां हेतिषु भिन्नविग्रहैर्विपुस्फुरे रश्मिवतां मरीचिभिः॥३०॥

भीषणाश्च येषु निशातरौद्रेषु विशेषणयोरन्यतरविशेष्यत्वविवक्षायां मिद्दत्वाद्विशेषणसमासः वनेसीदंतीति वने सदां वनेचराणां स
त्सूद्विषेत्यादिना क्विप्‌। तत्पुरुषे कृति बहुलमित्यलुक्‌ हेतिष्वायुधेषु हेतिशब्दोऽत्र पुंस्त्रियोरिति केशवः। भिन्नविग्रहैः संक्रांतमूर्त्तिभिः
अत एव विकाशतां विस्तरतां गतैः रत एव ककुभां दिशां अंतरमवकाशं प्रदीपयद्भिः स्थितैरित्युत्प्रेक्षा। अंशुमतः सूर्यस्यमोऽनुप
धाया श्च मतोर्वोऽयवादिभ्यः इति मतुपो मकारस्य वकारः। मरीचिभिः करैः भानुः करो मरीचिर्विस्त्रीपुंसयोरित्यमरः। विपुस्फुरे
वभासे। स्फुरतेर्भावे लिट्‌॥३०॥ ३॥ ॥ ५ ५ ८ ८ ६॥

उदूढेति॥ उदूढेन उन्नतेन वक्षसा स्थगितमाच्छादितमेकमन्यानन्तरं दिङ्मुखं येन सः। विकृष्टमाकृष्टं अत एव विस्फारितं निर्घोषितं चापमण्डलं येन सः। विभुः शिवः आयतं प्रसृतं पक्षद्वयं पार्श्वद्वयं वितत्य सर्वमहिम्ना व्याप्य पक्षः साध्यगरुत्पार्श्वसहायबलभित्तिषु इति वैजयन्ती। गणानां मध्यगो मध्यस्थो ऽपि उपरीव परिस्थित इव बभौ सर्वोन्नतत्वात्तथा लक्षित इत्यर्थः॥३१॥ सुखेष्विति। सुखेन न दुःखेन वा गच्छतीति एषु सुखेषु दुःखेषु च सम विषमदेशेषु अपि इत्यर्थः। सुदुरोरधिकरणार्थे टच्प्रत्ययः अत एव टिलोपः। तुल्यविक्रमैः लाघवात्समसंचारैः जवादहंपूर्विकया अहमहमिकया अहंपूर्वमहंपूर्वमित्यहंपूर्विका क्रियेत्यमरः। पिपासुभिः पातुमिच्छुभिः। पालैः समन्तादुपसर्पः। मनोज्ञादिसाद्धुञ्प्रत्ययः। पृषोदरादित्वाद्धकारलोपः। ग

उदूढवक्षःस्थगितैकदिङ्मुखो विकृष्टविस्फारितचापमण्डलः॥ वितत्य पक्षद्वयमायतं बभौ विभुर्गणानामुपरीव मध्यगः॥३१॥
सुखेषु दुःखेषु च तुल्यविक्रमैर्जवादहंपूर्विकया पिपासुभिः॥ गणैरविच्छेदनिरुद्धमाबभौ वनं निरुच्छ्वासमिवाकुलाकुलम्॥३२॥
तिरोहितश्वभ्रनिकुञ्जरोधसः समश्नुवानाः सहसातिरिक्तताम्॥ किरातसैन्यैरपिधाय रेचिता भुवः क्षणं निम्नतयेव भेजिरे॥३३॥
पृथूरुपर्यस्तबृहल्लताततिर्जवानिलाघूर्णितशालचन्दना॥ गणाधिपानां परितः प्रसारिणी वनान्यवाञ्चीव चकार संहतिः॥३४॥

न

णैः प्रमथैः अविच्छेदेन निरुद्धमतएवाकुलाकुलं आकुलप्रकारं प्रकारे गुणवचनस्येति द्विर्भावः। वनं निरुच्छ्वासं निरुद्धप्राणमिवाबभौ इत्युत्प्रेक्षा॥३२॥ तिरोहितेति। किरातसैन्यैस्तिरोहितानि लुप्तानि श्वभ्राणि निकुञ्जाः रोधांसि च यासां ताः। अत एव सहसातिरिक्ततां समत्वं अश्नुवानाः प्राप्नुवत्यः अपिधाय आच्छाद्य रेचिता रिक्तीकृताः भुवः क्षणं निम्नतया गाम्भीर्येण भेजिरे इव प्राप्ता इवेत्युत्प्रेक्षा। सैन्ये भुवो व्याप्तास्तावत्तासां न प्रतीयन्ते तैर्मुक्तास्ता एव निम्नाः प्रतीयन्त इत्यर्थः॥३३॥ पृथ्विति॥ पृथुभिर्विशालैरूरुभिः पुरोभागैः पर्यस्ताः क्षिप्ताः बृहत्यो लतास्तासां ततयो यया सा जवानिलेन वेगमारुतेनाघूर्णिता भ्रामिताः शालाः सर्जतरवश्चन्दनानि च यया सा प्रकारा वह्न्याः शालाः शालः सर्जतरुः स्यात् तरुविशेषे च। परितः सर्वत्र प्रसारिणी प्रसरणशीला गणाधिपानां संहतिः समूहः वनानि अवाञ्चीव चकारेत्युत्प्रेक्षा॥३४॥

अथाष्टभिः श्लोकैरर्जुनं विशेषयन् नांतरमभियोगमाह । तत इति ॥ ततः तदनंतरं सदर्पं सगर्वं सारं तपस्यया तपश्चर्यया तपस्यतेः क्विबंतात् स्त्रियाम
पस्येटापू । प्रतनुं कृशमत एव मदस्रुतिक्षामं कृशं क्षायो म इति निष्ठातकारस्य मकारः एकवारणमेकाकिनं गजमिव स्थितमित्युपमा । पुनः [illegible]
राह्वो निधनाय नाशाय परिज्वलंतं तेजस्विनं अत एव दिशो दहंतं जातवेदसमिवाग्निमिव स्थितमित्युपमैव ॥२५॥ अनादरेणेति । पुनश्च अनादरेणावग
णनया उपात्तो निषंगादुद्धृतः करेणेति शेषः एकः अद्वितीयः सायको येन तं तथा अनुकूले सुहृदीव जये सस्पृहं जयमभिवांछतमित्यर्थः । पुनरपूर्णः
न्यूनः प्रतीकारो बाणाहरणप्रसर्पणरूपो यस्य सः अत एव पेलवो लघुस्तस्मिन् अपूर्णप्रतीकारपेलवे बलोदधौ सैन्यसमुद्रे शनैरसंभ्र
मेण नयने दृष्टी निवेशयंतं इति वीरस्वभावोक्तिः बलमुदधिरिवेत्युपमितसमासः येषां वा सवाहनधिषु चेति उदकस्योदादेशः ॥२६॥

ततः सदर्पं प्रतनुं तपस्यया मदस्रुतिक्षाममिवैकवारणं । परिज्वलंतं निधनाय विद्विषां दहंतमाशा इव जातवेदसं ॥२५॥
अनादरोपात्तधृतैकसायकं जयेनुकूले सुहृदीव सस्पृहं ॥ शनैरपूर्णप्रतिकारपेलवे निवेशयंतं नयने बलोदधौ ॥२६॥
निषण्णमापत्प्रतिकारकारणे शरासने धैर्य इवानपायिनि ॥ अलंघनीयं प्रकृतावपि स्थितं निवातनिष्कंपमिवापगापतिं ॥२७॥
उपेयुषो बिभ्रतमंतकद्युतिं वधाददूरे पतितस्य दंष्ट्रिणः ॥ पुरः समावेशितसत्पशुं द्विजैः पतिं पशूनामिव हूतमध्वरे ॥२८॥

निषण्णमिति ॥ पुनश्च आपदां प्रतीकारस्य कारणे साधने अनपायिनि दृढे शरासने एवंभूते धैर्य इव निषण्णं स्थितं प्रकृतौ स्वभावे स्थितमपि नि
विकारमप्यत एवानतिलंघनीयमनतिक्रमणीयं । अत एव निवातनिष्कंपं वाताभावान्निश्चलं निवाता चाश्रया वाता विस्मरः । आपगापतिं
समुद्रमिव स्थितं ॥२७॥ उपेयुष इति ॥ पुनश्च अदूरे समीपे पतितस्य दंष्ट्रिणो वराहस्य [illegible] वधादुद्धृतो उपेयुषो प्राप्तामंतकस्येव
द्युतिस्तां बिभ्रतं धारयंतं तथा च द्विजैरध्वरे यज्ञे यस्य सः सवो ध्वरो यागः इत्यमरः । हूतमाहूतं तं पुरः समावेशितः सत्पशुर्यस्य तं पशुपतिं तापतिं
रुद्रमिव स्थितं ॥२८॥ ३८॥

निजेनेति॥ पुनश्च निजेन नैसर्गिकेन भूयसा धैर्यगुणेन विजितमन्येषां गौरवं गांभीर्यं यस्मिन्नुद्यथा तथा गांभीरतां दुरवगाहत्वं नीतमत एव घनाः सांद्रा उ
रवो महत्यः वीरुधो लता अस्य यस्मिंस्तेन घनोरुवीरुधा वनेनारण्यप्रादुर्भावेन समंधकारीकृतं दुरवगाही कृतं उत्तमाचलमिव स्थितं। संभ
ततो अंधकारो यस्य स इति विग्रहः॥३९॥ महर्षभेति। पुनश्च महश्च महर्षभस्कंधरवत्स्कंधो अंसो यस्य तं उपमानपूर्वपदत्वात्तदुत्तरपदस्कंधलो
पः। स्कंधो भुजशिरोंऽसो स्त्रियां इत्यमरः। अनूनकंधरं स्थूलग्रीवं। अथ ग्रीवायां शिरोधिः कंधरेत्यपि इत्यमरः। बृहच्छिलावप्रमहच्छिलातटं तद्वत्पृथु
ने कठिनेन वक्षसा उपलक्षितं महाभरां दुर्भारां जगतीं महीं समुज्जिहीर्षुं उद्धर्तुमिच्छुं महार्णवात्समुद्रात् उन्मिमंक्षुं अत एव महतोऽर्णवादुन्मग्नां समु
ज्जिहीर्षुमुक्तविशेषणविशिष्टं वमहावराहमिव स्थितं। ~~सुसंभूतस्याकस्येत्यस्य सह~~ अर्थसाधर्म्यादियमुपमान श्लेषः। शब्दमात्रसाधर्म्येण

निजेन नीतं विजितान्यगौरवं गभीरतां धैर्यगुणेन भूयसा॥ वनोदयेनेव घनोरुवीरुधा समंधकारीकृतमुत्तमाचलं॥३९॥ महर्ष
भस्कंधमनूनकंधरं बृहच्छिलावप्रघनेन वक्षसा॥ समुज्जिहीर्षुं जगतीं महाभरां महावराहं महतोऽर्णवादिव॥४०॥
हरिन्मणीश्यामममुदग्रविग्रहं प्रकाशमानं परिभूय देहिनः॥ मनुष्यभावे पुरुषं पुरातनं स्थितं जलादर्श इवांशुमालिनं॥४१॥
गुरुक्रियारंभफलैरलंकृतं गतिं प्रतापस्य जगत्प्रमाथिनः॥ गणाः समासेदुरनीलवाजिनं महाचलं तोयघना घना इव॥४२॥ कुलकं।

तस्य विधानादितिरहस्यं॥४०॥ हरिदिति॥ पुनश्च हरिन्मणिश्यामं मरकतमणीश्यामलं उदग्रविग्रहं उदारमूर्तिं देहिनः सत्त्वान्परिभूय प्रकाशमा
नं जलमलमिवादर्शस्तस्मिन्नंशुमालिनं सूर्यमिव मनुष्यभावे मनुष्यरूपे स्थितं पुरातनपुरुषं यो बदरीतपोवने निवासी नारायणसहचरो नरो ना
म स एवायं इत्यर्थः॥४१॥ गुरुक्रियेति॥ गुरुभिः क्रियारंभाणां फलैः अलंकृतं सफलकर्मारंभमित्यर्थः। जगत्प्रमाथिनः जगद्विजयिनः प्र
तापस्य तेजसो गतिं स्थानं। अगोस्य बहूनामेकत्वस्य संबद्धस्येते इति संदर्भाभिप्रायः पूर्वोक्तविशेषणविशिष्टं तमनीलवाजिनं अर्जुनं
गणाः प्रमथादयः तपात्यये तोयघनाः तोयभरिताः वार्षिका इत्यर्थः। घना मेघा निहावलमिव समासेदुः खापुरि इत्यर्थः॥४२॥ ॥

यथास्वमिति॥पुरा पूर्वं स्वंस्वमनतिक्रम्य यथास्वमहमेवैनं क्षेप्स्यामीत्याशंकिताः कं क्षिप्ताः कथिता वा विक्रमो यैस्ते परे शत्रवः क्षणान्मुनिप्रभावात् क्षत
तेजसो निर्जितप्रभावाः सन्तोऽप्रतिपत्तिदीनतां मूढतां मोहं धत्ता ययुः तथाहि महानुभावः पौरुषं परत्वे स्थितं प्रतिहन्ति॥४३॥ तत इति॥ ततः एकैक
स्य शक्तो अपेक्षितावांछिता अन्योन्येन लोपयति रन्येभ्यश्च त्यव इंगो येस्तैर्गणैः तत्रार्जुने क्रियाधारत्वात्स तमीसमं युगपदेव प्रतेरे प्रहर्तुं
मावेलिरे॥तथाहि सहायसाध्याः सिद्धयः कार्यसिद्धयः। महोदया नाम महानुभावा नाम स्वैसंघेन वृत्ति व्यापारो येजात्रे वा भावस्तं तां तासंधोत
7 वृत्तितांसंभूय कारितां प्रदिशंति। अतो गणानामपि संभूयकारित्वेन दोषप्रसक्त्याये तिभावः॥४४॥ किरातेति॥ उरभिव्यायैर्नोदिताः क्षिप्ताः
उपान्तरहसः प्राप्तवेगाः प्रवृत्तयत्रध्वनयः संजातपक्षास्वभानोः शिलीमुखाः बाणाः महावनादुन्मनसः। कोपिरिवतुमुत्सुकोऽकविशेष

यथास्वमाशंसितविक्रमाः पुरा मुनिप्रभावक्षततेजसः परे॥ ययुः क्षणादप्रतिपत्तिदीनतां महानुभावः प्रतिहन्ति पौरुषं॥४३॥
ततः प्रजह्रे सममेव तत्र तैरपेक्षितान्योन्यबलोपपत्तिभिः॥ महोदयानामपि संघवृत्तितां सहायसाध्याः प्रदिशन्ति सिद्धयः॥४४॥
किरातसैन्यादुरुचापनोदिताः समं समुत्पेतुरुपात्तरंहसः॥ महावनादुन्मनसः खगा इव प्रवृत्तपत्त्रध्वनयः शिलीमुखाः॥४५॥
गभीररंध्रेषु भृशं महीभृतः प्रतिस्वनैरुन्नमितेषु सानुषु॥ धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनुर्दिशः॥४६॥

णविशिष्टाः खगा इव किराततसैन्यात्समं ततः समुत्पेतुः॥४५॥ गभीरेति॥ गभीररंध्रेषु गंभीरगह्वरेषु महीभृतः सानुषु ये प्रति
स्वनाः तैर्भृशमुन्नमितेनोत्थापितेन दीर्घीकृतेन जवादुपेयुषा निनादेन दिशो विभिद्यमाना विदीर्यमाणा इव दध्वनुः॥४६॥

विधूनयंतीति॥भूरुहां गहनानि विधूनयंती कंपयंती तिरोहितानि आच्छादितानि उपांताः प्रांताः नभोंतरिक्षं दिगंतराणि च यया सा गणमार्गणावलिः प्र
थमशरसंहतिः अनिलेनेरिता ईरिता महीयसी वृष्टिरिव रवं वितेने। विस्तारयामास॥४७॥ त्रयीमिति॥ त्र मां त्रयी षण्मासान् कालाध्वनोर
त्यंतसंयोगे इति द्वितीया॥ अनिलाशिनो वायुभक्षकस्य इतः शोषस्येत्यर्थः। तथापि रणाय प्रहृष्यतः रणं कर्तुमुत्साहमानस्य क्रियार्थत्यादिना च
तुर्थीति॥ अर्जुनस्य वपुषि योधमुपवयः प्रयाति॥ गछति सति शिथिले न प्रागिति शेषः। वर्मणा कवचेन विदुषा वानंतरकरणीयं ज्ञानेति वस्तु
त्प्रेक्षा सत्वरं शीघ्रं घनत्वं दृढत्वमीये प्राप अन्यथानुपयोगादिति भावः। इण कर्मणि लिट्॥४८॥ तपस्विवति॥ शरस्त्रेषु शरोदसी द्यावापृथिव्योः स

विधूनयंती गहनानि भूरुहां तिरोहितोपांतनभोदिगंतरा। महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणमार्गणावलिः॥४७॥
त्रयीमितत्नाम निलाशिनः सतः प्रयाति योधं वपुषि प्रहृष्यतः। रणाय जिष्णोः सुहृदेव सत्वरं घनत्वमीये शिथिलेन वर्मणा॥४८॥
पतत्सु शस्त्रेषु वितत्य रोदसी समंततस्तस्य धनुर्दुधूषतः। सरोषमुल्केव पपात भीषणा बलेषु दृष्टिर्विनिपातशंसिनी॥४९॥
दिशः समूहन्निव संहरन्निव प्रभा रवेराकुलयन्निवानिलं॥ मुनिश्चचाल क्षयकालदारुणः क्षितिं सशैलां चलयन्निवेषुभिः॥५०॥

मंतताे वितत्य व्याप्य पतत्सु सत्सु धनुर्दुधूषतः कंपितुमिच्छतः आस्फालयत इत्यर्थः। धूञः सनंतात् छत्र प्रत्ययः। स्वरतिसूतिसूयतिधू
ञूदितो वेति विकल्पात् इड्भावः। तस्यार्जुनस्य संबंधिनी भीषयतीति भीषणा नंद्यादित्वाल्ल्युः विनिपातशंसिनी विनाशसूचिका दृष्टिर
तः विशेषणा उल्केव बलेषु सरोषं पपात॥४९॥ दिश इति॥ क्षयकालः कल्पांतकालः स इव दारुणो रौद्रः मुनिरर्जुनः इषुभिर्दिशः समू
हयन्निव एकत्र समाहारयन्निव अन्यथा तासां परदर्शनादिति भावः। रवेः प्रभां विक्षिपन्निव अधः क्षिपन्निव यथा सा कथं न दृश्य
त इति भावः। तथानिलं व्याकुलयन्निव इषुगोलैरालोडयन्निव तस्य तथा गतिविघातादिति भावः। सशैलां क्षितिं चा
लयन् कंपयन्निव संक्षोभादिति भावः। चचाल सर्वथा दुर्वशब्दस्त्प्रेक्षा[illegible]॥५०॥ ५०

विमुक्त इति ॥ आशंसित: आकांक्षित: शत्रुविजयो यैस्तै: अहमहमिकया शत्रुविजिगीषद्भिरित्यर्थ: वनेचरैरेकावसरं समकालं अस्त: संयोगद्विती
या विमुक्तं प्रमुक्तं अनेकधायुधं जातायैकच वचनं सोऽर्जुन: क्रियाफलं अलिपातित: अतिक्रांत: कालइवातितकालस्य कर्मणो नि:फलत्वादिति
भाव: । अंतरा मध्य एव शरैर्निर्जघान ॥५१॥ गतैरिति ॥ पांडुनंदन: परेषां अविभावनीयतां लघुप्रयोगात् अन्यत्र गूढप्रयोगाच्चादृश्यतामप्रका
8 श्यत्वं तां च गतै: विपदमनर्थं निवारयद्भि: विदूरगै: दूरलक्ष्यै: परमंडलप्रविष्टैश्च बहुस्फलैरायताग्रैर्महालाभैश्चापफलं बाणाग्रला
भयोरिति शिष्टाभ्यत: । शरैरुपायै: सामादिभिरिव भृशमुपेचित: प्रवृद्धो बभूव । अत्र शरानुमानेषु साधर्म्यात् प्रस्तुताप्रस्तुतश्लेष: उपमेति केचित् ॥

विमुक्तमाशंसितशत्रुनिर्जयैरनेकमेकावसरं वनेचरैः ॥ मुक्तिर्जघानायुधमंतराशरैः क्रियाफलं कालइवातिपातितः ॥५१॥
गतैः परेषामविभावनीयतां निवारयद्भिर्विपदं विदूरगैः ॥ भृशं बभूवोपचितो बृहत्फलैः शरैरुपायैरिव पांडुनंदनः ॥५२॥
दिवः पृथिव्याः ककुभां नु मंडलात्पतंति बिंबादुत तिग्मतेजसः ॥ सकृद्विकृष्टादथ कार्मुकान्मुनेः शराः शरीरादिति तेऽभिमेनिरे ॥५३॥
गणाधिपानामविधाय निर्गतैः परासुतां मर्मविदारणैरपि ॥ जवादतीये हिमवानधोमुखैः कृतापराधैरिव तस्य पत्रिभिः ॥५४॥

॥५२॥ दिव इति ॥ शरा: दिवोंतरिक्षात् पृथिव्या: भूगोलाद्वा ककुभां मंडलान्नु दिङ्मुखाद्वा । उत तिग्मतेजसोऽर्कस्य बिंबाद्वा अथवा सकृद्वि
कृष्टात् कार्मुकाद्वा मुने: शरीराद्वा पतंतीति ते गणा अभिमेनिरे । अन्यथा कथममी विश्वमंतर्धापयेयु: शरा: संभाविता इति भाव: । अत्र सर्वत:
शरसंपातदर्शनात् संभावनया पृथिव्यादीनां अन्यतरस्यापादानत्वोत्प्रेक्षा सा चाप्रतीयमानाव्यंजकप्रयोगात् भूयसां द्वा इयस्तु संशू
ये ॥५३॥ गणेति ॥ मर्मविदारणैरपि मर्मस्थानान्यपि विदारयद्भिरित्यर्थ: । गणाधिपानां किराताना परासुतां मरणमविधायाकृत्वा निर्गतै:
तेषामसत्त्वादिति भाव: । तस्य मुने: पत्रिभि: शरै: कृतापराधैरिव स्वामिकार्याकरणात् सापराधैरिवेत्युत्प्रेक्षा अधोमुखै: सद्भिर्जवाद्धिमवानती
ये ऽतिचक्रमे प्रविष्ट इत्यर्थ: । लज्जितस्य कश्चिन्निलयमनुविशतीति भाव: ॥५४॥

द्विषामिति ॥ प्रथमे प्रथममुमुक्ता इत्यर्थः । शिलीमुखाः मुनीशराः द्विषां देहावरणानि वर्माणि विभिद्य याः क्षतीः प्रहारान् चक्रिरे तासु क्षतीषु पुनः आविश्य प्रयुक्तैः
मुनिविशिखैः न पेते न पतितं । पिष्टपेषणे दोषादिति भावः । तथा हि अरुंतुदत्वं पीडितपीडनं सतां मनसोऽगोचरः । अविषय इति । सतः पीडितपीडां न कुर्वन्तीत्य
र्थः । महत्या स्वसनं प्राप्तं नार्तेनातिपरिक्षतमिति निषेधवचनस्मरणादिति भावः । अरुंतुदमिति अरुंतुदः अरुर्मोऽस्त्रियां मर्म मरुच्चेत्यमरः । विध
रुषोस्तुद इति खच् प्रत्ययः । अरुर्द्विषदजन्तस्य मुम् इति मुमागमः ॥ ५५ ॥ समुज्झितेति ॥ यावंतो । रातयो याश्च इत्यादि । यावदवधारणे इत्यव्ययीभावः ।
यावदराति यथा तथा समुज्झिता अरातिसंख्यया मुनिचापात्सहैव संभ्रमेणेव निर्यतीनि क्रामती तादृक्तस्य कौशलमिति भावः । यन्तेः शतरि ङीप् नुम्नि

द्विषां क्षतीर्याः प्रथमे शिलीमुखा विभिद्य देहावरणानि चक्रिरे । न तासु पेते विशिखैः पुनर्मुनेररुंतुदत्वं हि सतामगोचरः ॥ ५५ ॥
समुज्झिता यावदराति निर्यती सहैव चापान्मुनिबाणसंहतिः । प्रभा हिमांशोरिव पंकजावलीं निनाय संकोचमुमापतेश्चमूम् ॥ ५६ ॥
अजिह्ममोजिष्ठममोघमक्लमं क्रियासु बह्वीषु पृथङ्नियोजितं । प्रसेहिरे सादयितुं न सादिताः शरौघमुत्साहमिवास्य विद्विषः ॥ ५७ ॥

बाणसंहतिरुमापतेश्चमूं हिमांशोः प्रभा पंकजावलिमिव संकोचं निनाय ॥ ५६ ॥ अजिह्ममिति ॥ अजिह्मं स्वरूपे तोऽगत्यां चावक्रं मौ अन्य
त्र कुटिलस्थाननिवृत्तो न भवतीत्यजिह्मः तमोजिष्ठमोजस्विनं सारवत्तमं ते जिष्ठं वा मयत्नोऽपि ओजस्विशब्दादिष्ठन् तादिषु विन्मतो
लुगिति लुक् । टिलोपश्च । अमोघं अवंध्यं अक्लमं निरंतरव्यापारेऽप्यश्रांतं बह्वीषु क्रियासु छेदनभेदनपातनादिकर्मसु पृथग्भेदेन नियो
जितं कर्मानुगुण्येन नियुक्तमित्यर्थः । अस्य मुनेः शरौघं उत्साहमौत्सुक्यमिव वीरस्थायिभूतप्रयत्नविशेषमिवेत्यर्थः समादिताः
विकर्षिताः विद्विषः सादयितुं प्रतिकर्तुं न प्रसेहिरे । न शेकुः तस्योत्साहवदेव शरवर्षं दुर्धर्षमभूदिति भावः ॥ ५७ ॥ । ॥ ५७ ॥

शिवेति॥ अनेकदेशगा नानादेशस्थाः शिवध्वजिन्यो हरसेनाः उग्रेषव एव मयूखास्तद्वत्सु उपमितिसमासः अन्यत्र तु उग्रेषव इव मयूखा इति मयूरव्यंसकादित्वात्स
मासः तेषां मालास्यास्तीति तमुग्रेषुमयूखमालिनं व्रीह्यादित्वादिनिः एकदेशस्थमेकत्रैवस्थितं मुनिं अर्कं प्रजा इव युगपत्प्रतियोधं योधं योधं प्रति योधस्य
अव्ययं विभक्तीत्यादिना यथार्थे वीप्सायामव्ययीभावः अग्रतः स्फुरन्तं निदध्युर्ददृशुः यथैकोऽर्कः एकत्रस्थितोऽपि नानादेशस्थानामपि प्रतिपुरु
षमपि प्रतिपूरुषमेवाग्रे वर्तत इति युगपत्प्रतीयते तद्वद्गाणपर्षो मुनिरपि प्रतियोधं तथैव प्रत्यभादित्यर्थः॥५८॥ मुनेरिति॥ प्रकोपादमर्षाद्विव
षयस्समन्ततः आगच्छता दुस्सहं रहसा तिवेगेन मुनेः शरीरोष्मणा उक्तविशेषणेन महानिलेन वात्यया निदाघजं ग्रीष्मोत्थं रज इव विधूनितं व्याहतं
तद्बलं प्रमथसैन्यं संगिनीमनुबन्धिनीं आविलितां ग्लानिमिति यावत् भ्रान्तिमनवस्थां अनवस्थानमियाय प्राप॥५९॥ अथ त्रिभिर्विशेषकमाह॥ तपर

शिवध्वजिन्यः प्रतियोधमग्रतः स्फुरन्तमुग्रेषुमयूखमालिनं॥ तमेकदेशस्थमनेकदेशगा निदध्युरर्कं युगपत्प्रजा इव॥५८॥
मुनेः शरीरोष्मणतदुग्ररंहसा बलं प्रकोपादिव विष्वगायता॥ विधूनितं भ्रान्तिमियाय संगिनीं महानिलेनेव निदाघजं रजः॥५९॥
तपोबलेनैष विधाय भूयसीस्तनूरदृश्यास्स्विदिषून्निमुञ्चति॥ अमुष्य मायाविहितं निहन्ति नः प्रतीपमागत्य किमुस्विदायुधं॥६०॥
हृता गुणैरस्य भयेन वा मुनेस्तिरोहिताः स्विप्रहरन्ति देवताः॥ कथं न्वमी सन्ततमस्य सायका भवन्त्यनेके जलधेरिवोर्मयः॥६१॥
भर

ति॥ एषः मुनिः तपोबलेन तपःसामर्थ्येन भूयसीरदृश्यास्तनूः आत्मनः शरीराणि विधाय सृष्ट्वा इषून्निरस्यतीति प्रेरयतीति स्वित् क्षि
पति वा किं वाऽस्य मुनेर्मायया विहितं प्रतिहतं सत् तं वासवकीयमेवायुधं प्रतीपं प्रतिकूलं आगत्य प्रत्यावृत्य नोऽस्माकं वा निहन्ति किमुता
स्ति निप्रहणभाटे ति सूत्रेण निपातः विगृहीतवीर्यस्मरणात् शेषषष्ठी। कर्मत्वविवक्षायां तु द्वितीया॥६०॥ हृता इति॥ यद्वाऽस्य मुनेः
गणैः शान्त्यादिभिः हृता आकृष्टा वशीकृता इति यावत्। भयेन दूरेण भवाद्विभ्यतो वेत्यर्थः देवतास्तिरोहिताः स्वयं प्रहरन्ति स्वित्। तत्कुतः
अन्यथाऽस्य मुनेः अभिसायकाजलधेरूर्मय इव कथमनेकसंख्या भवति॥ एतत्त्रयोक्तान्नतमपस्संभवेन संभवतीत्यर्थः॥६१॥

जयेनेति। पताकिनी सेना किरातपतेरिति शेषः। तपायकिंदिति प्रतर्क्यो कुलिता इति पूर्वोक्तकाये प्रतर्को वितर्कः सेराकुलितातता पइ सत्रस हेतुकं विशेषणमाह। हरिसूनुर्मा
गैर्भ्रमः पुनस्तानेव वितर्कोन्दर्शयति। विद्य अर्जुनः जयेन विरमेत् कस्मात् कर्णाद समान्वि जिताप्यि अर्थाद्युद्धमुपसंहरत् किं चिदित्यर्थः। अपि वरा वरायस्वस्ति भवेदपि
अपि शब्दः संभावनायां प्रार्थनायां लिङ्। स्वस्ति वर अगामजगच्छिनच्छेदित्यर्थः॥ ६२॥ अमर्षिणेति॥ जिष्णुना धृतेन निरस्तो क्षिप्तं बलं सैन्यं नरराजनशोभनेस्मः नरा
णां राजा इति नरराजः। तत्पुरुष बासोलिङ्ग श्वेतकपदे। तत् निरस्तमिति वा किं न किंमिव। अमर्षिणा क्रोधवति क्षमा क्षयं क्षान्ति सा घ्वंकृत्यकार्यमिव। क्षमायाप्यं कृत्यं सामर्षे
णा निरस्यते इत्यर्थः यथा मदोद्धतेन पुंसा हितं प्रियं वचो निरस्तं न परा अतेमदः पौरुषादीनां धर्मः तेजोद्धतः। बलीयसा दैवेन पौरुषं निरस्तं सम्मत जने। बलीयसा दैवेन
प्रहतपुरुषव्यापारस्य निष्फलत्वात् इति अत्र असौ जिष्णुरपि बलीयान् मा लोपमा॥ ६३॥ प्रतिदिशमिति॥ प्लवगलक्ष्मणा वानरचिह्नेन। कपिप्लवगवानरोऽस्मरः। वि
तेलक्ष्म बललक्ष्मण मित्यमरः। अर्जुनेन विशिखानां सहसा सम्पहेन स्त्रियां तु संहतिर्वृद मित्यमरः। तोपविलाः पीडिताः न्नतापादहाय जां तैस्त्वद्यान्तकेः। शरनिकर्तित

जयनवृष्टिविद्धिरमेदयं रणाङ्गवेदपि स्वस्ति वरावराय वा॥ ततायकीर्णा हरिसूनुमार्गणैरितिप्रतर्काकुलिता पताकिनी॥ ६२॥ विशेषकं॥ अमर्षिणा
क्षमेव क्षमा अयं मदोद्धतेनेव हितं प्रियं वचः। बलीयसा तद्विधिनेव पौरुषं बलं निरस्तं नरराज जिष्णुना॥ ६३॥ प्रतिदिशं प्लवगाधिपलक्ष्म
णा विशिखसंहतितापितमूर्तिभिः॥ रविकरग्लपितैरिव वारिभिः शिवबलैः परिमंडलता दधे॥ ६४॥ प्रविततशरजालछन्नविश्वान्तराले विधुवति ध
नुराविर्मंडलं पांडुसूनौ॥ कथमपि जयलक्ष्मीर्भीतभीता विहातुं विषमनयनसेनापक्षपातं विषेहे॥ [redacted]॥ ६५॥ ५ ६५॥ ५५॥

कलेवरैरित्यर्थः शिवबलैः प्रमथसैन्यैः रविकरग्लपितैः सूर्यकिरणशोषितैः वारिभिर्जलैरिव प्रतिदिशं दिक्षु परिमंडलता परितश्चक्राकारमंडलीभिरित्या वृत्
आददे प्रतिदिशं मंडलाकारेण स्थितमित्यर्थः। उपमायं। आतपक्लिष्टहिमीरंपरिभ्रमतीं। तद्वन्नु निपीडितैर्हि सैन्यं विभ्राम इत्यर्थः॥ द्रुतविलंबितमाह॥ नभो
मरा विलिलक्षणात्॥ ६४॥ प्रविततेति। पांडुसूनौ प्रविततानि विस्तृतानि शरजालानि तैः छन्नाछन्नमाच्छादितं विश्वान्तरालं येन तस्मिन् नतएवाविर्मंडलं
आविर्भूतमंडलं आविर्भूतमिति प्रवृत्तौ भूतार्थस्यानुप्रवेशाद्भूतार्थस्याप्रयोगः। धनुर्विधुवति सति कंपयति। सति भीतभीतवत्भीतप्रकारा इव
जयलक्ष्मीर्जयश्रीः। विषमनयनसेनापक्षपातं शिवसैन्यानुरागं केपमपि केनापि प्रकारेण महता कष्टेन वा विहातुं सत्यक्तुं विषेहे सेहे। शाकमा
लिनीवृत्तं। तल्लक्षणं तूक्तं॥ ६५॥ इति श्रीकिरातार्जुनीये महाकाव्ये भारवीकृतौ धनंजययुद्धाभिगमनो नाम चतुर्दशः सर्गः॥
इति श्रीमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां धनंजयाभिगमनो नाम चतुर्दशः सर्गः॥ १४ समाप्तः।

10 90

॥ ।।किरातस्यचतुर्दशस्सर्गः समाप्तः॥ ।।



।। किरातपंचदशसर्गप्रारंभो यंमगमत् ।।

श्रीगणाधिपतये नमः॥ अथेति॥ अथानन्तरं तत्र रणे भूतानि सर्वे प्राणिनः वृत्रं हतवानिति वृत्रहा इन्द्रः सर्गः १५ तस्मात्सूनुर्वृत्रघ्नपुत्रस्तस्यापि संयुगान्तरे वार्त्रघ्नः अर्जुनः। तस्यापि सन्निस्यण् तस्य शरेभ्यस्तत्र सुविभ्युः नद्वहन्मपुत्रत्रासामिति विकल्पादेत्वाभ्यासलोपाभावः। सा च चमूः अश्वे इष्वोऽस्यति त्रिरिति धामाः अकर्त्तरि च कारके संज्ञायामिति करणे घञ् उपरि स्वाः त्रामहान्तः इष्वासा यया सापरित्यक्ता युधे स्वर्थः दिशो भेजे पलायांचक्रे इत्यर्थः। अत्र भूतत्रासे सेनापलायनयोः समुच्चय इति सामान्यविशेषः। क्रियासमुच्चयोलङ्कारः। गुणक्रियायोगपद्यं समुच्चय इति सामान्यलक्षणं तस्ययमर्केनसंसृष्टिः॥१॥
अपश्यद्भिरिति॥ गणैः प्रमथैरीशानं स्वामिनं शिवं पुरोवर्तिनमपीति भावः। अपश्यद्भिरिव रणान्निववृते निवृत्तं भावे लिट् तथाहि कृच्छ्रेष्वापत्सु सं

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः॥ भेजे दिशः परित्यक्तमहेष्वासो च सा चमूः॥१॥ अपश्यद्भिरिवेशानं रणान्निववृते गणैः॥ मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः॥२॥ खण्डिताशंसया तेषां पराङ्मुखतया तया॥ आविवेश कृपा केतौ कृतोच्चैर्वानरं नरं॥३॥
आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु॥ व्यक्तिमायाति महतां माहात्म्यमनुकम्पया॥४॥ ॥ ४॥ ४॥

भ्रमेण स्वाध्वसेन ज्वलितं संतप्तं। संभ्रमः स्वाध्वसेपि स्यादिति विश्वः। मनो मुह्यत्येव अतः पुरोवर्तिनोप्यदर्शनमुपपद्यत इति भावः॥२॥
खण्डितेति॥ खण्डिता ध्वस्ता आशंसा जयस्य आशा यस्यां तया तेषां गणानां संबन्धिन्या तथा तिकल्पये सर्थः पराङ्मुखतया रणवैमुख्येन पलायनेनेत्यर्थः केतौ ध्वजे कृतः ध्वजीकृतः आरोपितः उच्चैर्महाननुष्ठितो वानरो हनुमान्येन तं नरावतारं पुरुषं कपिध्वजमर्जुनं कृपा विवेश प्रविवेश तदीयां दुर्दशां दृष्ट्वा कृपाविष्टोभूदित्यर्थः। यमकालङ्कारः॥३॥ ननु शत्रुषु कथं करुणा तत्राह॥ आस्थामिति।
आस्थां प्रयत्नं आलम्ब्य आश्रित्य आस्था वालम्बना स्थान यत्नापेक्षेषु कथ्यत इति विश्वः। वशं नीतेषु क्षुद्रेषु दुष्टेषु अरातिषु विषये ऽनुकम्पया कृपया महतां धीराणां माहात्म्यं महानुभावत्वं व्यक्तिं स्फुटतां आयाति प्राप्नोति ततः स्वपौरुषनिर्जिते
ष्वपि अरातिषु करुणा भूषणं महतां भवतीति भावः॥४॥ राम ४॥ राम ४॥ ४॥ ४॥

ससासिरिति।। असिना सह वर्तत इति ससासिः सखड्गः। असून् प्राणान् सुवंति प्रेरयंतीत्यसुसुवः बाणाः षू प्रेरणे इति धातोः सत्सूद्विषेत्यादिना क्विप्
असुसूभिः सह वर्तत इति सासुसूः सबाणः। अस्यंते शत्रवो अनेनेत्यासः सो धनुः। अकर्तरि च कारके संज्ञायामिति घञ्। आसेन सह वर्तत इति सासः सचा
पः सर्वत्र तेन सहेति तुल्ययोग इति बहुव्रीहिः। येयायात्याः यानसाध्याः अयेयाः अयात्याः यानं विनैव साध्याः। अत्रोपयदि तिय[illegible]यः। येयाश्च अ
येयाश्च तान् अयेयान् गच्छतीति असौ येयायेयायः ड। दशराजमंडले उदासीनो ब
लाधिक इत्यर्थः। अयः शुभावहो विधिः। अयं शुभावहं दैवं याती सयपः। येयायेयायय[illegible]श्चासौ अयपश्च येयायेयायो ययायययः। अथ वा तेषां द्वया
नां अयपस्ववर्गगजादिलाभं यातिप्राप्नोतीति येयायेयाययः अयं शुभावहं दैवं याती सयपः उभयत्रापि आतोनुपसर्गे क इति कप्रत्ययः अतेकर्मे

ससासिः सासुसूः सासो येयायेयाययायययः।। ललौ लीलां ललोऽलोलः शशीशशिशुशीः शशन्।।५।। एकाक्षरपादः।। त्रासजि
ह्मं यतश्चैतान्मंदमेवान्वियाय सः।। नातिपीडयितुं भग्नानिच्छंति हि महौजसः।। ६।। अथाग्रे हसता साचिस्थितेन स्थिरकीर्तिना।। से
नान्यो ते जगदिरे किंचिदायस्तचेतसा।।७।। निरोष्ठ्यः

पाररपः। ललेति। विलसतीति ललः लल विलासे पचाद्यच्। अलोलः अचपलः कार्ये स्थिरः शशिनश्चंद्रमसः ईशः शिवः तस्य शिशुः स्कंदः तं श्य
णाति हिनस्तीति शशीशशिशुशीः। शृ हिंसायां क्विप्। शशन् प्लुतगतिं कुर्वन्। शश प्लुतगताविति धातोः शतृप्रत्ययः। स अर्जुनो लीलां शोभां ललौ प्राप्तः।
ला आदाने। एकाक्षरपादः।।५।। त्रासेति।। सोऽर्जुनो त्रासजिह्मं भयकुटिलं यथा तथा यतो गच्छतः पलायमानानित्यर्थः। एतान् गणान् मंदमेवान्वि
याय अनुजगाम तथाहि महौजसो महानुभावाः भग्नानतिपीडयितुं नेच्छंति।।६।। अथेति। अथानंतरं हसता तदंगदर्शनात् स्मयमानेनाग्रे साचिस्थि
स्थितेन तन्निवारणार्थं तिर्यग्गामिना स्थिरकीर्तिना स्वयमभंगादिति भावः। किंचिदायस्तचेतसा स्वकीयगणभंगाद्दीषत्खिन्नचित्तेन सेनान्या
स्कंदेन। पार्वतीनंदनः स्कंदः सेनानीरग्निभूर्गुहः इत्यमरः। ते गणाः जगदिरे उक्ताः। ओष्ठ्यवर्णाभावान्निरोष्ठ्यमेतत्।।७।। ।।७।। ।।७।।

अथैकविंशतिश्लोकैः स्कंदवाक्यमेवाह ॥ माविहासिष्टेति ॥ रंतव्यं रमणं क्रीडा बहुलग्रहणाद्भावे तव्यप्रत्ययः । संयच्छुंदुसमुदायः स्त्रीयसंपत्समनिस्वा
जिसमिद्युधन्यु समरः । समरं तव्यसंयतौ येषां ते समरंतव्यसंयताः ॥ तुल्यक्रीडासंग रा इति तेषां संबोधनं समरं विहासिष्टमा त्यजत । जहाते र्मो लुङि
लुङ् मध्यमबहुवचनं क्षुण्णाः असुरगणा गणा यैस्तैर्भवद्भिर्वितिशेषः । अगणैरीवागणेभ्यो ऽन्यैरिव किं किमर्थं यशः क्षतं पराकृतं नैनैतद्युक्त
मित्यर्थः ॥८॥ विवस्वदिति ॥ विवस्वतः अंशवः तेषां संश्लेषणं तेन विवस्वदंशुसंश्लेषेण तरणिकिरणसंपर्केण द्विगुणीकृतानि तेजांसि येषां
ते तथो मोघं व्यर्थमुद्गीर्णा उपमिताः गुरङ्घमनेति धातोः कर्मणि क्तः वो युष्माकममी महासयः हसंतीव सुलक्षा किंपलायमानानां खड्गा इ

मा विहासिष्ट समरं समरंतव्यसंयतः ॥ क्षतं क्षुण्णासुरगणैरगणैरिव किं यशः ॥८॥ अंत्यादियमकं ॥ विवस्व
दंशुसंश्लेषद्विगुणीकृततेजसः ॥ अमी वो मोघमुद्गूर्णा हसंतीव महासयः ॥९॥
वनेऽवने वनसदां मार्गं मार्गमुपेयुषां ॥ बाणैर्बाणैः समासक्तं शंकेऽशंकेन शाम्यति ॥१०॥ पादादियमकं

तिहासः ॥९॥ वन इति ॥ वनसदां वनेचराणां अवने रक्षके च वने मार्गं मृगसंबंधिनं मार्गं पंथानं उपेयुषां पलायमानानामित्यर्थः । यु
ष्माकमिति शेषः । बाणो ध्वनिरेषामस्तीति बाणैर्ध्वनिमद्भिः बाण शब्द इति धातोर्घञ्प्रत्ययात् अर्शआद्यच्प्रत्ययः । एकत्वाद्बवयोरभे
दः उक्तं च लडयोर्डयो रलयोस्तद्वद्बचयोर्बवयोरपि नमयोर्णयोर्नयोश्चांते मविसर्गयोः सबिंदुकाबिंदुकयोः स्याद्भेदनकल्प
नमिति बाणैः शरैः समासक्तं समासंजितं अशं दुःखं तत्केन शाम्यति इति शंके केनोपायेन शाम्येदिति विचार्यामित्यर्थः ॥१०॥

पातितेति ॥ पातितं भ्रंशितं तुंगं उन्नतं माहात्म्यं अनुभावो यैस्तैः संहृता आहृता आयता कीर्तिर्यैस्तैः युष्माभिरिति शेषः कां गुर्वीं आपदं हंतुं न
कां वि[illegible]र्थः आवृत्तिर्युद्धान्निवृत्तिः सैव साहसं कर्म कृतं नातः पापात् किंचिदन्यत्फलमस्तीति भावः। तदुक्तं मनुना यस्तु भीतः परावृत्तः
संग्रामे हन्यते परैः। भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भर्ता तत्सर्वमाप्नोति परावृ
त्तहतस्य चेति ॥११॥ नासुरेति ॥ किं वायं असुरो दैत्यो न नागो वायं भोगो वायं न गो गजः अश्वः न धरा संस्थः धरा इव संस्थाय स्य सः प

पातितोत्तुंगमाहात्म्यैः संहृतायतकीर्तिभिः ॥ गुर्वीं कामापदं हंतुं कृतमावृत्तिसाहसं ॥११॥
नासुरोऽयं न वा नागो धरसंस्थो न राक्षसः ॥ नासुखोऽयं नवाभोगो धरणिस्थो हि राजसः ॥१२॥ गोमूत्रि
काबंधः। मंदमस्यन्निषुलतां घृणया मुनिरेष वः ॥ प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥१३॥

र्वताकारः अहार्यधरपर्वता इत्यमरः संस्था व्यवस्थाप्रणिधिसमाप्तिसादृश्याकारवृत्तिषु इति वैजयन्ती। राक्षसो न किं त्वयं सुखयतीति सु
खः सुखसाध्यः न वः आभोगो यस्य सः नवाभोगः इभिनवप्रपलो महोत्साह इत्यर्थः। आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपीति विश्वः। धरणि
स्थो भूतलवर्ती राजसः रजोगुणप्रधानः नापुरुषो हि कश्चिन्मानुष इत्यर्थः मनुष्या मानुषा मर्त्या मनुजा मानवा नरा इत्यमरः। अलोमपलायन
मुचितमिति भावः। वर्णानामेकरूपत्वं यद्येकान्तरमर्द्धयोः। गोमूत्रिकेति तत्प्राहुर्दुष्करं तद्विदो विदुरिति लक्षणात् षोडशाक्षरो घकद्वये द्वद्वि
यक्रमेण विलिख्यैकान्तरविनिमयेन वाचनेऽश्लोकनिष्पत्तिरिसुद्धारः ॥१२॥ मंदमस्यन्निति। एष मुनिः घृणया कृपया इषुलतां शरखानिव मंदं
स्यन् क्षिपन् वो युष्मान् पशूनिवागतावज्ञं यथा तथा जघनेषु प्रणुदति। चोदयति। किमतः परं कष्टमस्तीति भावः ॥१३॥ ॥१३॥

नेति॥पदच्छेदस्तावत् न नोनऽनुन्नः नुन्नोनः नो अनो नाना नाननाः ननु नुन्नः अनुन्नः ननुन्नेनः न अनेनाः नुन्ननुन्ननुत्। अथप्रयोजनमाह हे नानाननाः नाना विधास्यो नुन्नेन निकृष्टेन नुन्नो विद्धः नुन्ननुन्नो यः स ना पुरुषो न तथा नुन्नः विद्धः ऊनो येन सः नुन्नोनः ना पुरुषः अना नानुनिश्च ये अपुरुषः खलु ऊनाक्षीतः पलायमानस्तु किं वक्तव्य इति भावः किं चेनुन्नेनः स्वामीयस्य सः नुन्नेनः स न भवतीति ननुन्नेनः न अर्थस्य न शब्दस्य सुप्सुपेति समासः स नुन्नो विद्धोप्यनुन्नः अविद्ध एव यस्य चानुन्नः स्वामी कनात् नुन्नाय एवेति भावः नुन्नानुन्नान् नुदतीति नुन्ननुन्ननुत्
अतिपीडितपीडकः अनेना नाति दोषो भवति नालं नातिपरीक्षतमिति निषेधात् इत्यर्थः। अयं चेता दृशो लिन पलायितव्यमिति भावः अयमे
कव्यंजनः अ सः तकारस्तु न दोषावहः नासवर्णस्तु भेदकरः सम्यनुज्ञानात्॥१४॥ वरमिति कृताः पूर्वमुत्पादिताः ध्वस्ताः पश्चान्नष्टास्ते कृ

ननोननुन्नो नुन्नोनो नानाना नाननानो ननु॥ नुन्नोऽनुन्नो ननुन्नेनो नानेनानुन्ननुन्ननुत्॥१४॥ एकव्यंजनः॥
वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान्॥ प्रकृत्या ह्यमणिः श्रेयान्नालंकारश्च्युतोपलः॥१५॥ ७७
स्यंदना नो चतुरगाः सुरेभा वा विपत्तयः॥ स्यंदना नो च तुरगाः सुरेभा वाविपत्तयः॥१६॥

तध्वस्ताः पूर्वकालेत्यादिना समासः कृतध्वस्ताः गुणाः यस्य तस्मात्पुंसो। अत्यंतमतिशयेन अगुणो निर्गुणः पुमान् वरं मनाक् प्रियः वरं
क्लीबं मनाक् प्रियमिति विश्वः तथाहि प्रकृत्या स्वभावेन अमणिः मणिरहितो अलंकारः श्रेयान् च्युतोपलः च्युतरत्नो न श्रेयान् उपलः प्रस्त
रे रत्ने इत्यमरः पलो पिलुः सुरा इत्सुर एव वरमिति भावः अत्र समासे विशेषयोः प्रतिबिंबकरणात् दृष्टान्तालंकारः।१५। स्यंदना इति॥ स्यंद
ते प्रद्रवंतीति स्यंदनाः नवनाः स्यंदनाः रथाः नो संतति इति नंद्यादित्वात् ल्युट् प्रत्ययः चतुरं गच्छंतीति चतुरगाः तुरगाः अश्वा अश्वनो संतति सु
रेभाः शोभनवृंहिणाः सुरेभाः सुरगजाश्च नो संति अविपत्तयो विपत्तिरहिताः विपत्तयो विशिष्टाः पदातयो न संति अतो न भेतव्यमिति भा
वः अत्र पूर्वोत्तरार्द्धगतानां विशेषणानां विशेष्याणां चोद्देश्योद्देशीभूतानां यथासंख्यसंबंधानुक्रमात् यथासंख्यालंकारो यमकेन संसृष्टिः॥१६॥

भवद्भिरिति॥ अधुना अरातिभिः परिहापितानि साज्यानि पौरुषाणि येषां तैर्भवद्भिः अर्कनिष्पीतैरर्कणसंशोषितैर्ह्रदैरिव दुरुत्तरः दुस्तरः पंकः इव पंको
दुष्कीर्त्तिः पंकोऽस्त्री शाद कर्दमावपि समरे प्राप्तः॥१७॥ वेत्रेति॥ वेत्राणि वंशाः फलिन्यो वा शाका बर्बराश्च कुंजाः वृक्षा यस्मिन्स्तस्मिन् वेत्रशाककुंजे दुः
प्रवेश इत्यर्थः। वेत्रं वंशः फलिन्यश्च शाक बर्बर इत्यमरः [illegible]ति विश्वामरौ॥ लेशेन स्तोकेनाप्यजतेऽकंपते इति लेट् अशोन इति अलेशैजे तो श
असंतापकपन इत्यर्थः। एत कंपने पचाद्यच्॥ न कुवले ना दत्ते इति अकुकः ग्रहणसमर्थः शात्रवो शत्रुर्यस्मिन्नकुकशात्रवैः कुक आदाने प
चाद्यच्। शैले पर्वते कर्णाभावः। किं ताकुलितात्पोपलक्षिताः संतः। कुत्साप्रश्नवितर्केषु क्षेपे च किं शब्द इष्यते इति शाश्वतः। विदिशो जेतुं

भवद्भिरधुनारातिपरिहापितपौरुषैः॥ ह्रदैरिवार्कनिष्पीतैः प्राप्तः पंको दुरुत्तरः॥१७॥ ७ ८
वेत्रशाककुजे शैले लेशैजेऽकुकशात्रवे। यात किं विदिशो जेतुं तुंजेशो दिवि किं तया॥१८॥ प्रतिलोमा
नुलोमपदं॥ अयं वः क्लैब्यमापन्नान् दृष्टपृष्ठानरातिना। वांछतीशश्च्युताचारान्दारानिव निगोपितुं॥१९॥

यात गच्छत किं। यातेः संप्रश्ने लोट्। मध्यमपुरुषबहुवचनं दिवि स्वर्गेऽपि हे तुंजेशः इति तेषां संबोधनं। तुंजंतीति तुंजाः हिंसाः तुंजिर्हिंसायां
पचाद्यच्। तेभ्य ईष्टे ईशाः शक्ताः क्षिप्रास्त्वं प्यसुर विजयिनां युष्माकं अत्र क्षुद्रस्थलेऽक्षुद्रशत्रोपलायनं निकृष्टमिति भावः। अनुलोमप्रति
लोमपादः॥१८॥ अथास नाथाः पलायध्वमिति तत्र्वनयुक्तमित्याह॥ अयमिति॥ अयमीशः स्वामी शिवः क्लैब्यं निःपौरुषत्वं आपन्नान् प्राप्ता
न् तथा अरातिना दृष्टपृष्ठान् पलायमानानित्यर्थः। वो युष्मान्। च्युताचारान् स्खलितव्रतान् दारानिव कलत्राणीव। अथ पुंभूम्नि च दा
रा इत्यमरः। गोपायितुं गोप्तुं दुर्दितत्वात् इट्। उकल्पः। दारदोषं भर्तेव स्वमहिम्ना युष्मद्दोषं संवरितुमिच्छति। अतः कुतो वा युष्माकमनाथत्वमि
त्यर्थः॥१९॥

नन्विति॥ नन्विसामंत्रणे हा इत्याह्वाने हा हो मस्तोसमस्तो चहहे संबोधनार्थयोः हाहैहैवैवंविधो ह्लेयोसंबुध्याह्वानयोरपिद्रुतिविश्वः॥ मथ्नंतीतिमथनाः कर्त्तरिल्युट्॥ राध्नंतीतिराघः॥ राधसामर्थ्ये क्विप् घोराः क्रूराः नाथंमहयंतिपूजयंतीतिनाथमहः॥ दशिरग्रहणात् कर्मण्युपपदेऽशे क्विप् तयंतिरक्षंतीतितयाः पचाद्यच्॥ दीयंतीतिदाता शुद्धाः दैप् शोधने कर्त्तरिक्तः वदंतीतिवदाः वक्तारः तेषां द्वंद्वः॥ तयदाः तवदाः भीमाः भयंकराः माभिरभीः माशब्दस्यनञर्थस्यसुप्सुपेतिसमासः तांददतीतिमाभीदाः अभयप्रदाइत्यर्थः॥ एवंविधायूयमितिविशेषः वत खेदे व वचोरभेदः नन्नुदायतनशुद्धाः किंनुपृच्छायां किंनशुध्यतेत्यर्थः॥ काकुरत्रानुसंधेया दैप् शोधने लोट् मध्यमपुरुषबहुवचनं अनुलोमप्रतिलोमपादः॥ २०॥ अथवा इयंव्याख्या ननुहा इति॥ अमर्षेण आमंत्रणं अपनेवेरिदलने अराघः असमर्थाः मथनाराधाः अघोराः युधिष्ठिरः प्रेक्षाः नभवंति अनाथमहः ना

ननुहोमथनोराघोघोरोनाथमहोनुने॥ तयदातवदोभीमामाभीदोवतदायते॥ २०॥ प्रतिलोमकं॥
किंस्यकोपास्त्यदेवत्वमानुष्यकपरिग्रहैः॥ ज्वलितान्यगुणैर्गुर्वीस्थितातेजसिमानिता॥ २१॥ ६

थंनमहयंतिनपूजयंतिस्वामिपूजकानभवंतीत्यर्थः अतएवयूयंतयदातवदायेतेनुदातंवदंतीतिस्वरक्षणमेवशुद्धंप्रार्थयितारः यदभीमाः घोरतराः भवथः वत आश्चर्येत हि दायतशुद्धाः भवथ॥ अथवा इयंव्याख्या ननुहा इत्यामंत्रणे घोराः हे रौद्राः भवतां मथने बाधने अयंअराघः असमर्थः अतो अस्मात् भयेनेन पलायितव्यं नु वितर्के नाथस्य स्वस्वामिनः महापूजा न भवति अर्थात् पलायनादिति अगंतव्यं॥ हे तयदातवदाः भवतो रक्षकाः शुद्धाः वदस्थैर्यं बवयुः स्थिराश्च अतः पलायनमयुक्तमिति भावः भीमाः भयंकराः माभीदाः अभयप्रदाः दायतशुद्धाः भवथः॥ २१॥ किंस्यकाइति॥ आयास्त्वो वधीरिनो देवत्वमानुष्यकयोः परिग्रहः स्वीकारो येस्ते आतिदेवमानुषेरित्यर्थः॥ मनुष्याणां भावो मानुष्यकं योपधाद्गुरूपोत्तमाद्वुञ् ज्वलिताः उज्वलिताः प्रकाशिता इति यावत् अन्यगुणाः असदृशगुणा येस्ते॥ अन्योविभिन्नासदृशा इति वैजयंती दृढशोर्भवज्ञिरिलिश्लेषः तेजसिप्रतापे [redacted] स्थितापप्रतापेकशरणा गुर्वीमहत्तीमानिता श्वरत्वाभिमानिता किमितिसपत्नानिलज्जैः पलाय

निशितेति ॥ हे [blot] अमरणाः मरणरहिताः निशितासिरतः तीक्ष्णखड्गरतः अभीको निर्भीकः रुचा तेजसा उपलक्षितः सुष्ठु आभासत इति स्वाभासो
रमणीयः पञ्चायन्नूत उतास्यर्थे भरवान् रणभरसहिष्णुरित्यर्थः उतास्यर्थविकल्पयोरिति विश्वः ईदृशो नोऽस्माकं विरोधी शत्रुः सारतो बल
तो नन्येजते न कंपते नैव चलतीत्यर्थः एज कंपने लट् अतो भवद्भिरपि स्थातव्यमेव न चलितव्यमिति भावः ॥२२॥ नन्वयं न चलतीति कु
थं विज्ञायते तत्राह ॥ तनुवारभसइति ॥ तनुं व्रणोतीति तनुवारं वर्मकर्मण्यण् तेन वभस्ति भासत इति तनुवारभसः कवचेन भास्वान् तेजस्वी वार
णा भास्वता अविनतेनोन्नतेन उरसा उपलक्षितः एवंविधोऽप्यधीरो धैर्यरहितो रसितेन श[blot] विलेनैवा आतीतिगासतो तिरसिताशिनि तस्मि

निशितासिरतोऽभीको न्येजतेऽमरणा रुचा ॥ सारतो न विरोधी नः स्वाभासो भरवानुत ॥२२॥ ५१ ॥
तनुवारभसो भास्वानधीरोऽविनतोरसा ॥ चारुणा रमते जन्ये को भीतो रसिताशिनि ॥२३॥ श्लोकद्वयं प्र
तिलोमकं ॥ निर्भिन्नापातिताश्वीय निरुद्धरथवर्त्मनि ॥ हतद्विरदनिष्ठ्यूतरुधिराम्बुनदाकुले ॥२४॥

नृ विरवे नैव विश्वप्राणहारिणीत्यर्थः । आभीक्ष्ण्ये णिनिः जन्ये युद्धे युद्धमायोधनं जन्यमिति समरः । भीतः सन् कः रमते क्रीडते न कोऽपीत्यर्थः निर्भयसं
चारादेवास्य निश्चलत्वं निश्चीयतेत्यर्थः । पूर्वश्लोकस्यायं प्रतिलोमः ॥२३॥ अथ पंचभिः श्लोकैः कुलकमाह । निर्भिन्नेति ॥ तत्र महाहवं विशिन
ष्टि विभिन्नाः विदारिताः अत एव पातिताः अश्वाः ते आभीया अश्वपूर्वकालेति समासः तैः अश्वीयैः अश्वसमूहैः निरुद्धो निरथानां वर्त्मानि यत्र तस्मिन्न
थोक्तेः चं हेत्वश्वीयमाश्वदिसमरः । किंशारुभ्यां यज्ञ्याश्वन्यतरस्यामिति पूर्वसपः । हताः ताडिताः द्विपा गजा ऐरावतोल्लाः । शैलवृक्षौ नगावगा
वित्समरः तैर्निष्ठ्यूतानि उद्गिरितानि ष्ठीवलेः कर्मणि क्तः । ष्ठोः ऊठ् अनुनासिके चेति ऊठ् देशः तानि रुधिराण्येवाम्बूनि तेषां नद्यैः प्रवाहैराकुले
व्यासे ॥२५॥ ।।।

कि०पं०२०स०

॥५॥

पुनश्च देवानां कानयत्युत्साहयति देवाकानीतस्मिं देवाकानिनी॥ कनतेर्ण्यन्तात् णिनिः यद्वा कै शब्दे इत्यस्य धातोः आङ्पूर्वात् भावे ल्युटि आकानं आश
ब्दनं युद्धेऽह्वानमिति यावत् देवानामाकानं देवाकानं तद्विद्यतेऽस्मिन् संग्रामे स देवाकानी तस्मिन् देवाकानिनि। कावादे ईषद्वादो वा कोः कद् ईषदर्थे
चेति कुशब्दस्य कादेशः। तद्वति कावादे। अर्शआद्यच् वाहिकया पुर्यायेण भासे द्वन्द्वं चूहः पर्यायेधातवर्थ निर्देशण्वुलन्त व्यः। वायिकयास्तु इन्द्र
स्वकान् परान् आजिं हीते अभियुङ्क्ते इति वाहिकास्वस्वकोहाः तस्मिन् वाहिकास्वकोहियोद्धुं धर्मादि युद्धे उपचर्यते। ओहाङ् गतौ विति धातोः क्विप्
प्रत्ययः। सोमपाशब्दवत् आक्रिया वा शब्दश्चार्थे कं मदोदकमोक्किरतीति काकाराः मदस्त्राविणः किरतेराङ्पूर्वात् कर्मण्यण्। काकाराः भभरा
गजघटा यत्रास्मिन् काकारे भभरे हे काकोः काकाइव काका गर्हा इति लक्षणया तेषामामन्त्रणं निःस्वाः निरुत्साहाः भव्याः सोत्साहाः तानुभया

देवाकानिनि कावादे वाहिकास्वस्वकाहिवा॥ काकारे भभरे काको निस्वभव्यव्यभस्वनि॥२५॥ सर्वतोभद्रः॥
प्रन्नत्तशववित्रस्ततुरगाक्षिप्तसारथौ॥ मारुतापूर्णतूणीरविसृष्टहतसादिनि॥२६॥
ससत्वरतिदे नित्यं सदराममर्षनाशिनि॥ त्वराधिककसन्नादे रमकत्वमकर्षति॥२७॥ २७ अर्धभ्रमकः

न्मयंतिसं वर्णवं ति इति निस्वभव्यव्या आतोनुपसर्गे कः। तैर्वभस्ति भासते यः स तस्मिन्निस्वभव्यव्यभस्वनि। अन्येभ्योपि दृश्यंत इति क्वनिप्। सर्वतो
भद्रः॥२५॥ प्रन्नत्तेति। प्रन्नत्तशवेभ्यो नत्सकबंधेभ्यो वित्रस्तैः क्षुभितैः तुरगैराक्षिप्ताः। अवधूताः सारथयो यत्र तस्मिन्। मारुतेनापूर्णैः व्याप्तैः
स्तूणीरैः निषंगैर्विसृष्टाः शब्दायमानाः हतास्ताडिताः सादिनस्तुरंगिकाः अश्वारोहाः यत्र तस्मिन्। पाठांतरे मारुतापूर्णतूणीरैः विसृष्टा आ
र्कर्षिता अत एव मारिताः सादिनो अश्वारोहा यत्र तस्मिन्॥२६॥ ससत्वेति॥ ससत्वानां सत्ववतां रतिदे। रागप्रदे नित्यं सदरा प्राणा सभया नो
अमर्षनाशिनि। क्रोधहारिणि। त्वरयोत्साहेनाधिकं कसंतो विकसंतो नादा यत्र तस्मिन्। रमयतीति रमकस्त्वं भो रमक त्वं रण कर्मणा परं जन
कत्वं आकर्षति अपनुदति। धी[illegible]णोपरे प्रसरमुत्साहरणकर्मत्वे स्फोटयतीत्यर्थः॥ अर्धभ्रमकं॥१२७॥ २७॥ २७॥२७॥२७॥

॥५॥

आसुरइति॥ एवंविधे आसुरे ऽसुरसंबंधिनि लोकत्रासविधायिनि। लोकभयंकरे महाहवे महायुद्धे युष्माभिरत्नतिंव ढिं। नीतंप्रापितं मिहि हसंग्रामेषु
दूरणांगणे पौरुषं पौरुषकर्म निरस्तेनाशितं॥२८॥ इतिति॥ इति इत्थं सेनान्या स्कंदे शासति आज्ञापयति सति। अनेके अधागच्छतः पलायमाना
तान्गणान् निषिध्य निवार्य धिकारिणा हरेण किं विदुसता तत्र तस्थौ स्थितं भावे लिट्॥ निरोध्य॥२९॥ मुनीति॥ मुनेरिष[illegible]पदं हनस्तेन त
प्तान्ताडितान् तथापि लज्जया रणांगणे शालित्वेन विनिवर्त्स्यतः निवर्त्तिमाणान्। वञ्चः स्यसनोरिति विकल्पात् परस्मैपदं॥ तान् गणान् शि
वः निषेधो मा भैष्ट मा पलायतेति निवारणवचनं तदेव हिमांबु शीतोदकं तेन प्रह्लादयामास रूपकालंकारः॥३०॥ दूना इति॥ दूनाः शरतप्ताः ल्वा

आसुरे लोकवित्रासविधायिनि महाहवे॥ युष्माभिरत्नतिंनीतं निरस्तं मिहि पौरुषं॥२८॥ पंचभिः कुलकं॥ इति शासति सेनान्यां
गच्छतस्तानेनकधा॥ निषिध्य हसता किं विन्तस्थे तत्राधिकारिणा॥२९॥ निरोध्यः॥ मुनिनेषुदहना तप्तान् लज्जया विनिवर्त्स्यतः॥
शिवः प्रसादयामास तान्निषेध हिमांबुना॥३०॥ दूनास्ते पिबलादूना निरेभा यदुमेनिर॥ भीताः [illegible] शितशरा भीता शंकरं तत्र शंकरं॥३१॥
महेषु जलधौ शात्रोर्वर्त्तमाना दुरुत्तरे॥ प्राप्य पारमिवेशानमाशश्वास पताकिनी॥३२॥ ३२॥ ३२॥ ॥

दिप्य इति निधानत्वं अरिबलाद् ना पुनबलाः पञ्चमी विभक्त इति पंचमी। निरेभाः निःशब्दाः कुतः यतः भीतास्त्रस्ताः कुतः यतः शितशरैः
अभीताः अभिव्याप्ताः इणः कर्मणि क्तः तेगणाः तत्र रणे शंकरम भयवचनेन सुखकरं शंकरं शिवं बहुमेनिरे बहु इति क्रियाविशेषणं॥३१॥
महेष्वेति॥ दुरुत्तरे दुस्तरे शात्रोः शत्रुसंबंधिनि महेषुजलधौ महाबाणसागरे वर्त्तमाना पताकिनी सेना ईशानं शिवं पारं
परतीरमिव पारावारे परार्वाचितीरे पात्रे यदंतरमित्यमरः॥ प्राप्य आशश्वास प्राणितिस्म॥३२॥ ॥३२॥ ॥

सइति॥ सशिवो रणापेतां रणाद्यपावृत्तां परां उत्कृष्टां भूमिमिति यावत्। अत एव पश्चाद्‌ पृष्ठभागेऽवस्थितां चमूं पुरोऽग्रे अवस्थितः सूर्यरणोपमान
मेव तस्माद्यपावृत्तां परावृत्तां छायां महातरुरिव बभार छायां महातरुरिवामैकुशरणां तां तमुमोन्यर्थः॥३३॥ मुंचतीति॥ ईशे हरे क
र्तरि जिह्मावर्जुने विषये शरान्मुंचति सति पिनाकस्येशकार्मुकस्य स्वनो ध्वनिस्तेन पूरितो धराधरः इंद्रकीलः स्फुटन्निव विदीर्यमाण
इवेत्युत्प्रेक्षा। आशा दिशो ध्वनयन् शब्दयुक्ताः कुर्वन् दध्वान शब्दमकरोत्॥३४॥ तदिति॥ भीमं तयोर्द्वयोः हरपांडवयोः तद्युद्धं गणाः
प्रमथाः चित्रसंस्थाश्चित्राकारा अनेकप्रकाराः। अचलाः शैला इव तथा चित्रे आलेख्ये संस्थिये येषां ते चित्रसंस्थाश्चित्रालिखिता इव अव

6 सबभार रणापेतां चमूं पश्चादवस्थितां॥ पुरः सूर्यादपावृत्तां छायामिव महातरुः॥३३॥५८
मुंचतीशे शराञ्जिह्मे पिनाकस्वनपूरितः॥ दध्वान ध्वनयन्नाशाः स्फुटन्निव महाचलः॥३४॥
तद्गणा ददृशुर्भीमं चित्रसंस्था इवाचलाः॥ विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलाः॥३५॥ द्वितुर्थ
यमकं॥ परिमोहयमानेन शिक्षालाघवलीलया॥ जेतुर्वीर्विशिखश्रेणीरपि रिजरे पिनोकिना॥३६॥
अवघ्नपत्रिणः शंभोः सायकैरवसायकैः॥ पांडवः परिचक्राम शिक्षया रणशिक्षया॥३७॥ अंतयमकं॥

ला आश्चर्यवशात् निश्चलाः सन्तः विस्मयेन ददृशुः॥३५॥ परि इति॥ शिक्षालाघवलीलया अभ्यासपाटवातिशयेन हेलुनापरिमोह
यमानेन व्यामोहयता अणावकर्मीका च्चित बकर्तृका त्क्तिपरस्मैपदं प्राप्तेन यादमिस्यादिना प्रतिषेधादात्मनेपदं शोने अत्यायेणे
र्विभाषेति णत्वं पिनाकिना हरेण जिह्मोऽर्जुनस्यैयं जेतुर्वी विशिखश्रेणिः बाणसंघातः परिजहेनिरस्ता॥३६॥ अवघ्नेति॥ पांडवोऽ
र्जुनः अवसायकैरवसायं नकुर्वन्ति तं स्यतेर्ण्यंतात् ण्वुल्प्रत्ययः। सायकैर्बाणैः शंभोः पत्रिणः शरान् अवघ्नन् घ्नतेः शतृप्रत्ययः ओतः श्यनीति
ति ओकारलोपः शिक्षया शक्तुमभवितुमिच्छया उत्साहेनेत्यर्थः रणशिक्षया अभ्यासेन च परिचक्राम उत्साहनैपुण्याभ्यां व चारेत्यर्थः॥
८॥३७॥ ८

चारेति॥ चारैर्गतिविशेषैर्विनः स्नातः चारुवंचुः। तेन वित्तश्चुंचुपू चणपौ इति वंचुप्रत्ययः॥ विरमोरव्व यतिरिक्ती कृणोति शन्दूनहं तिद्धरिकरोति इति विरारे
चीवंचत ललसत चीरस्य वल्कलस्य रुचा प्रभया वंचञ्चीररुचारो वर्तते इति रुचः शोभमानः इगुपधज्ञाप्रीकिरः कः। रुचिरः सुंदरः वंचूर्यते भृशं चरती
ति वंचुरः चर तेयङ् तास चायानू चरफलो श्चेति नुमागमः। यङोचिवेतियङो लुक्॥ स्मा चारस्य युद्धसमयस्य वंचुरः भृशंमा चरिता स मुनिः चारस्य
था तथा चारैः वक्रादिबंधैः ववार चारु प्रियालुर्वृक्षस्या द्रुतो वंधोपसर्पयोरिति विश्वः॥ द्व्यक्षरः॥ ३८॥ स्फुरदिति॥ स मुनिः स्फुरती विश्वंगी
मौर्वीयस्य तत्तथोक्तं नद्यृतश्चेति कप्प्रत्ययः बहुरुद्धनुः धुन्वानः कंपयन् धनुः उल्का एवानलः तेन योगो येन तेनां शुमतार्केण सर्येण तुल्यं बभौ उप

चारवंचुश्चिरारेचीचंचच्चीररुचारुचः॥ ववार रुचिरश्चारु चारैरावारवंचुरः॥ ३८॥ द्व्यक्षरः॥ स्फुरत्सिंशृंगमौर्वी
कं धुन्वानः सद्यहृद्धनुः॥ धृतोल्कानलयोगेन तुल्यमंशुमता बभौ॥ ३९॥ पार्थबाणाः पशुपतेरावब्रुर्विशिखावलिं॥ प
योमुच इवारंध्राः सावित्रीमंशुसंहतिं॥ ४०॥ शरवृष्टिमुदस्यार्विमुदस्तां सव्यसाचिना॥ रुरोध मार्गणैर्मार्गं तपनस्य
त्रिलोचनः॥ ४१॥ तेन व्यातेनिरे भिन्नभीमा भीमार्जनफलाननाः॥ न नानुकंप्य विशिखाः शिखाधरजवाससः॥ ४२॥ मेखलायमकं

मा॥ ३९॥ पार्थेति॥ पार्थबाणाः पशुपतेर्विशिखावलिं शरसंघातं सवितुरियं सावित्री तामंशुसंहतिं किरणसमूहं अरंध्राः घनाः पयोमुचा इ
वावब्रुस्तिरोदधुः॥ ४०॥ शरेति॥ त्रिलोचनः शिवः सव्येन संवर्तते समर्थेति सव्यसाचिः तेन सव्यसाचिना अर्जुनेनोदस्तां क्षिप्तां उर्वीं महतीं शरवृष्टिं
मार्गणैः शरैर्विधूय निरस्य तपनस्य रवेर्मार्गं रुरोध आववे॥ ४१॥ तेनेति॥ तेन शिवेन भीमाः भयंकराः तथा भियोमार्जनं निरसनं तदेव फ
लं प्रयोजनं येषां ते॥ निश्चानूनानि अग्राणि येषां ते भीमार्जनफलाननाः॥ शिखाधराः मयूराः तेषु जातानि शिखाधरजानि बर्हाणि तानि
वासांसि इव वासांसि पक्षाः येषां ते शिखाधरजवाससो मयूरपक्षिण इत्यर्थः॥ विशिखा बाणाः अनुकंप्य कृपां लब्ध्वा न व्यातेनिरे इति न
किं त्वनुकंप्येति अननुकंप्येत्यर्थः॥ अनुविधक्षता द्रिति भावः॥ संभाव्य निषेधो द्वौ प्रतिषेधाविति सुलक्ष्ये त्स्वलायमकं॥ ४२॥ ४२॥ ४२॥

द्युवीयदिति॥ द्यौस्वर्गवियदंतरिक्षं स्वगच्छतीति द्युवियद्गामिनी द्वितीयाप्रकरणे गम्यादीनामुपसंख्यानात्समासः। तारेण गंभीरेण संरावेण उच्चनादे
न विहता स्ताडिताः विद्धा श्रुतयो यया सा तथोक्ता हैमी हेममयी इषुमाला शिववश्यया पालिर्विद्युतां संहतिरिवोक्तविशेषणा विद्युन्मालेव शुशुभे। च
तुर्थपाद वर्णानां त्रिपाद्यां समवाक्कृत्वं चतुर्थमाद्यः॥४३॥ विलंघ्येति॥ शिवशिलीमुखैः पत्रिणां पंक्तीः निजशरावलीर्विलंघ्य अतिक्रम्य भिन्नो वि
द्धः कपिध्वजः त्यायः प्रशस्तां वृद्धप्रशस्तयो र्ज्यायस्य समर ॥ वीर्यसत्वं समाश्रित्यापाश्रित्यास्थायनत्र्यकं पेनच वाल किंतु सेहेऽव तस्थाविसर्थः॥
॥४४॥ जगतीति॥ तत्राद्यो ऽगराज इतिपदच्छेदमाश्रित्य प्रथमो र्थो भिधीयते ईशस्य रणे युक्तः शक्तः अन्यत्र तु जगतीशरणे भूरक्षणे युक्तः स्थि
तः हरिः सिंह इव कांतो मनोहरः। अन्यत्र हरिणां सिंहानां कांतः आवासदानान्निश्रियः सुष्ठु दधातीति प्रजाः प्रालयतीति सुधा किप्ः न सित अ
सितः कृष्णवर्णः ततो विशेषणसमासः अन्यत्र तु सुधालेपद्रव्यविशेषस्तद्वत्सितो धवलः। दानं वर्षी बहुप्रदः हृताशंसः हृततयाभिलाषः अन्यत्र

द्युवियद्गामिनी तारसंरावविहतश्रुतिः॥ हैमीषुमाला शुशुभे विद्युतामिव संहतिः॥४३॥ गरूढ चतु
र्थयमकं॥ विलंघ्य पत्रिणां पंक्तीभिन्नः शिवशिलीमुखैः॥ ज्यायो वीर्यसमाश्रित्य न चकंपे कपिध्वजः॥४४॥
जगतीशरणे युक्तो हरिकांतः सुधासितः। दानवर्षी कृताशंसो नागराज इवाबभौ॥४५॥ अर्थत्रयवाची।

दानवैर्दैत्यैः अभिः हृता आशंसा नानाफलविशेषो यस्मिन्सः नागराजः ऽर्जुनः अगराजो हिमवानिव तगसामान्ये बभावित्येकोऽर्थः। ऐरावतसा
म्य मुच्यते। जगतीं भुवं श्यंति तनूकुर्वंतीति जगतीशाराक्षसास्तेषां रणः संग्रामः तत्र युक्तो विहितः समर्थः हरिकांतः इंद्रप्रियः उभयत्रापि समा
नमेतत्। सुधासितो ऽमृतवत्स्वच्छः एकत्र शीतलः अन्यत्र वर्णनेति विवेकः। दानवर्षी धनप्रदो मदस्रावी जन कृताशंसः हृत जिगीषः। पार्थः नागराज
वाबभाविति द्वितीयोऽर्थः। अथ शेषो [illegible]म्यमुच्यते जगतीशरणे भूरक्षणे युक्तः नियुक्तः देवेन तिशेषः। शरणं रक्षणे गृह इति विश्वः। हरिकांतः विष्णुप्रि
यः उभयत्रापि तुल्यमेतत्। सुधावसुधेति केचित्। नामैकदेशे नामग्रहणादिति॥ तत्र सितो बद्धो न्यत्र तु सुधया मृतेन सितो बद्धः॥ अमृतप्रिय इत्य
र्थः। दानवा असुरस्तेषां यः श्वर्ई लक्ष्मीश्च ताभिः हृताशंसो विहितप्रशंसः उभयत्रापि तुल्यमेतत्। सोऽर्जुनो नागराज इव शेष इवाबभौ इति तृती
योऽर्थः॥ अर्थत्रयवाचि॥४५॥ ४५॥ ४५॥ ४५॥ ४५॥ ४५॥ ४५॥ ४५॥

विफलीति॥ शंभुनाक्षतबाणस्य। तत एव विफलीकृतयत्नस्य गांडीवं धनुर्यस्य तस्य गांडीवधन्विनोऽर्जुनस्य बाणसंतायामिति। अनद्देशः। खेभ्यः इंद्रियरंध्रे
भ्यः स्वमिंद्रिये सुखं स्वर्ग इति विश्वः। हुताशनो निः निश्चक्राम निःक्रांतः क्रोधादिभावः॥ ४६॥ स इति॥ पिशंगजटावलिः पिशंगा जटा यस्य तूटः परमे
णोत्कृष्टेन मन्युना क्रोधेनोरुमहत्तेजः किरन् क्षिपन् सोऽर्जुनः ज्वलिता ओषधयः तृणज्योतींषि जातवेदा दवाग्निश्च यस्मिन् तेन हिमशै
लेन समं तुल्यं विदिद्युते हिमाद्रिवत् शुशुभे इति बिंबप्रतिबिंबभावेनोपमा॥ ४७॥ शतश इति॥ शिवः शतशो विशिखान् अवद्यते

विफलीकृतयत्नस्य क्षतबाणस्य शंभुना। गांडीवधनुषः खेभ्यो निश्चचार हुताशनः॥ ४६॥
स पिशंगजटावलिः किरन्नुरुतेजः परमेण मन्युना॥ ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते॥ ४७॥
शतशो विशिखानवद्यते भृशमस्मै रणवेगशालिने॥ प्रथयन्ननिवार्यवीर्यतां प्रजिघायेषुमघातुकं शिवः॥ ४८॥
शंभोर्धनुर्मंडलतः प्रवृत्तं तं मंडलादंशुमिवांशुभर्तुः॥ निवारयिष्यन् विदधे सिताश्वः शिलीमुखच्छायवृतां धरित्रीं॥ ४९॥

खंडयते रणवेगशालिने रणसंरंभशोभिने अस्मै पार्थाय भृशमनिवार्यवीर्यतां निजामिति शेषः प्रथयन् तस्मै दर्शयन् किंत्वघातुकं अ
मारकं रूपयतेत्यादिना हंतेरुकञ् इषुं जातावेकवचनं प्रजिघाय प्रयुयुजे हि गतौ वृद्धि इति धातोर्लिट्॥ हेरचङीति कुत्वं॥ ४८॥ शंभोरिति॥
सिताश्वोऽर्जुनः शंभोर्धनुर्मंडलतः धनुर्वलयात् प्रवृत्तं निःक्रांतं तं इषुं अंशुभर्तुः अर्कमंडलात् प्रवृत्तं अंशुमिव अत्रापि इषुवज्जा
तावेकवचनं निवारयिष्यन् निवारयितुकाम इत्यर्थः। क्रियार्थक्रियायां लृट् इति लृट्। शिलीमुखानां छाया इति शिलीमुखच्छायं। छाया
बाहुल्येन नपुंसकत्वं पूर्वपदार्थधर्मो बाहुल्यमिति काशिकायां तेन वृत्तां व्याप्तां धरित्रीं विदधे कृतवान्॥ ४९॥ ॥ ४९॥ ॥

घनमिति। अयुगलोचनस्य त्रिनेत्रस्य ईशस्य बाणो जातावेकवचनं घनं सांद्रं अर्जुनस्य बाणयुगं शरजालं विदार्य विभिद्य ससार वव्रा
जत दानीमेव युगलोचनस्यार्जुनस्य बाणेन विदार्या छलाविशेषेण घनं सांद्रं अर्जुनाः ककुभवृक्षाः बाणाः नीलसैरेयकाः
पूगाः क्रमुकवृक्षाः तेषां विभाषा वृक्षमृगेत्यादिना द्वंद्वैकवद्भावः। अर्जुनबाणपूगं विदार्य विभिद्य ससार (विवेशेत्यर्थः।)
स्तगलोहं द्रुद्रुः ककुभोर्जुनः पूगः क्रमुकवृन्दयोः यद्वा ससारबाणः अयुक् अलोचनस्येति पदच्छेदः। लोचनतः ससलोच

४

घनं विदार्यार्जुनबाणपूगं ससारबाणोऽयुगलोचनस्य। घनं विदार्यार्जुनबाणपूगं ससा
रबाणोऽयुगलोचनस्य॥५०॥ रुजन्महेषून्बहुधाशुपातिनो मुहुः शरौघैः परवारयन्दिशः॥ चलाचलो
नेक इव क्रियावशान्महर्षिसंघैर्बुबुधे धनंजयः॥५१॥

नस्याप्रमेयस्य कर्मणि ल्यप्। अयुगलोचनस्य विषमनेत्रस्य संबंधि सारो बलं बाणः शब्दः ताभ्यां सह वर्तत इति ससारबाणः
वबयोरैक्यमित्युक्तं। न युज्यते कुत्रापि स्खलु क संगररहितः। क्विप् बाणः जातावेकवचनं। शरः सांद्रार्जुनशरजातं विभिद्य विदार्य घनं
अर्जुनबाण ससार विवेशेति योजना॥५०॥ रुजन्निति॥ बहुधा आशुपातिनः शीघ्रमापततो महेषून्मुहुः शरौघैः रुजन् भंजयन्नून
था दिशश्च परवारयन् आच्छादयन् क्रियावशात् तत्कालवशात् चलाचलो चलो धनंजयः महर्षिसंघैरनेको बहुरिव बुबुधे ददृशे॥५१॥

विकाशमिति॥ जगतीशस्यार्जुनस्य मार्गणा बाणाः विकाशं विस्तारमीयुः तदा जगती लोक ईश मार्गणाः शंभुशराः विकाशं विषमगतिं ईयुः अ
गमीयुरित्यर्थः। तथा जगतीं भुवं श्यति शोतनूकरणे तनूकर्वतीति जगतीशाः दैत्याः आलो नुप सर्गकः। तान्मारयंतीध्नंतीति जगतीशमारः ते
चते गणाश्च जगतीश गणाः विकाशं उल्लासं ईयुः अहो देवप्यस्यपराक्रमप्रसर इति विस्मयादिति भावः तदानीं मार्गयंतीति मार्गणाः क
रित्युक्तः। जगतीशस्य मार्गणाः अन्वेषकाः शिवद्रष्टारो देवर्षयो वियः वीतां पक्षिणां काश्तेगतिः अत्रेति पिकाशंश्च आकाशमीयुः॥

विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः॥ विकाशमीयुर्जगतीशमार्गणा वि
९ काशमीयुर्जगतीशमार्गणाः॥५२॥ पादयमकं॥ संपश्यतामिति शिवेन वितायमानं लक्ष्मीवतः क्षिति
पतेस्तनयस्य वीर्यं॥ अंगान्यभिन्नमपि तत्त्वविदां मुनीनां रोमांचमंचिततरं विभरांबभूवुः॥५३॥ इति श्री॰

दिदृक्षयेति भावः॥५२॥ संपश्यतामिति॥ इतीत्थं शिवेन वितायमानं वितस्यमानं तनोतेर्यकि तिवैकल्पिक आकारादेशः। लक्ष्मीवतो
जयश्रीमतः मादुपधाया इत्यादिना वकारः। क्षितिपतेस्तनयस्यार्जुनस्य वीर्यं शौर्यं संपश्यतां तत्त्वविदामपि हरेरंशावतारोयमिति विदु
षामपि किमुतान्येषामिति भावः। मुनीनां अंगानि गात्राणि अभिन्नमविरलं अंचिततरं अतिरूढ़ं रोमांचं रोमहर्षं विभरांबभूवुः। भी
ह्रीत्यादिना विकल्पादाम् प्रत्ययः॥५३॥ इति श्रीमहोपाध्याय कोलाचलमल्लिनाथ विरचितायां किरातार्जुनीये व्याख्यायां घंटापथस
माख्यायां पंचदशः सर्गः॥ ॥१५॥ हेमराज ॥ गंगाविष्णु

१

॥ किरातनवमसर्गप्रारंभोयं ॥ श्रीगणेश ॥

कि० नं०
॥१॥

श्रीगणेशाय नमः॥ वीक्ष्येति॥ अथ जलक्रीडानंतरं भानुमान्सूर्यः आत्तचित्रपरिधानविभूषाः आत्ताः स्वीकृताः चित्राणि विविधानि
परिधानानि वस्त्राणि विभूषाः आभरणानि च याभिस्ताः स्वीकृतविविधवस्त्राभरणाः सुरतसन्नाहवहंतीरित्यर्थः। अत एव रंतु
मनसः सुरतक्रीडां कर्तुं मनांसि यासां ताः समानकर्तृकेषु तुमुन्लृ त्वेदवश्यमः इ से तं काममनसोरपीति मकारलोपः सुर
नारी वीक्ष्य तासां प्रियार्थं तत्प्रियार्थमिवावसरदानरूपं प्रियं कर्तुमिवेत्यर्थः। किंलोकैस्सेय अस्तमदर्शनमगमत् अंतमव्य

वीक्ष्य रंतुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः॥ तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि ललंबे॥१॥
मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ॥ द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीं॥२॥

यमेनतूपातुं प्राप्तुं उपपयोधिसमीपे ललंबे स्त्रंसे। अस्मिन्सर्गेस्वागतावृत्तं स्वागतेति रनभात्गुरुयुग्ममितिल
क्षणात्॥१॥ मध्यमेति॥ मध्यमोपलनिभे नायकमणिसदृशे शाकटायाद्रूपन्नेवास्यश्मन्युपलो मणा विति वैज
यंती। लसदंशोप्रसरद्रश्मो भानोएकत एकस्मिन्भागे च्युतिमस्तमुपेयुषि प्राप्ते सति द्यौः परिवृत्त्या मध्यान्हा
तिक्रमेण विलोलां गत्वरीं अन्यत्र गात्रस्य तिर्यगाबन्धामुहुश्चलतीं वासरलक्ष्मीं हारयष्टिं मुक्तावलिमिवो वाह वहतिस्म॥२॥
स१

॥१॥

अंशुभिरिति ॥ पतंगः सूर्यः पतंगः पक्षिसूर्ययोरिति समरः ॥ अतीव निर्भरं स्यात्तथातीवै निर्भरमित्यमरः । पातुमिच्छुः पिपासुः तृषितः सन्नापिबते:
सन्नंतादुप्रत्ययः ॥ अंशव एव पाणयः तैः पद्मेषु जातं पद्मजं मध्वेव मध्विति मकरन्दरूपं कंमकरंदमित्यर्थः मधु मद्ये पुष्परसे इत्य-
पि३ मरः ॥ भृशं रसयित्वा पीत्वा क्षीबतां मत्ततां गत इवेत्युत्प्रेक्षा मत्तः शौंडोत्कटः क्षीब इत्यमरः ॥ क्षितिमेष्यन् गमिष्यन् लोहितं वपुर
वाहयथा मत्तः क्षीबः क्षितौ लुठन् तिरज्यते तद्वदिति भावः सूर्यस्य क्षितिनिलयनं अस्तमय इत्यागमः ॥ अत्र रूपकोत्प्रेक्षयोः
सापेक्षत्वादंगांगिभावेन संकरः ॥३॥ २ । ३ । ॥ २ ॥ ३ ॥ ३ ॥ ४ ॥

अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ॥ क्षीबतामिव गतः क्षितिमेष्यन् लोहितं वपुरुवाह पतंगः ॥३॥
गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ ॥ आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥४॥

गम्यतामिति ॥ सहस्रमरीचौ सूर्ये लोहितो भवतीति लोहितायति लोहितादिडाज्भ्यः क्यष् ॥ इति परस्मैपदं शतृप्र-
त्ययः ॥ अत एव नयनानां गम्यतामुपगते दर्शनीयत्वं प्राप्ते सति अभितापः धरित्रीं विरहय्य विहाय तस्य ल्यपु-
वो ल्यपीत्ययादेशः चक्रवाकहृदयान्यासमाद अत्र धरित्र्यां तादृशः तीव्रोर्ककरसंपर्कः कृतः संतापस्तादृक् च-
क्रवाकहृदयेषु विरहः संतापः संजात इति परार्थः ॥ परं तु लब्धुपशमनानंतरमेतस्याविर्भावात्स एवात्र संताप तर
इत्यभेदाध्यवसायेनोपदेशः अत एव भेदे अभेदरूपातिशयोक्तिरलंकारः ॥४॥

मुक्तेति॥ रवौ सात्मिमज्जति अधोस्तमिते सति अर्धे जुगुप्समाने सामीत्यमरः॥ मुक्तं त्यक्तप्रायं मूलमाद्यं मूलं तोरविम्बं यत्र स्वामी येन २१
सः॥ अत एव लघुरल्पकस्त्वदुज्झितपूर्वस्त्यक्तपूर्वो दिक् अन्यत्र सक्तपूर्वजनः पश्चिमेन भसिन भेजागोन्यत्र केचिन्नीचस्थले सं
भ्रतः॥ अत एव सांद्रश्च रश्मिसमूहैः॥ आश्रितजनश्चेव धन्यते दुःखेन जिह्मोदीन इव न विरेजे अत्र मुक्तमूलत्वादिप्रस्तुत
विशेषणसाम्यादप्रस्तुताश्रितजनस्य प्रतीतेः समासोक्तौ तत्र वाच्यस्य रश्मिसमूहस्यापि प्रतीयमानेन चेतनाभेदाद
भिमानादुःखितत्वादुत्प्रेक्षेति तयोरंगांगिभावेन संकरः॥५॥ कांतेति॥ कांतस्य भर्तुः सइवं कुंकुमवत्कुंकुमेन चाता २३
म्राः सायं सायं प्रगे प्रातरित्यमरः सायं यन्मंडनं तदभितदुद्दिश्य त्वरयंत्यः त्वरां कारयंत्यः सौधानां जालेः गवाक्षैः

मुक्तमूललघुरुज्झितपूर्वः पश्चिमेन भसि संभ्रतसांद्रः॥ सात्मिमज्जति रवौ न विरेजे खेदजिह्म इव रश्मिसमूहः॥५॥ कां
तदूत इव कुंकुमताम्राः सायमंडनमभित्वरयंत्यः॥ सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः॥६॥ अग्र
सानुषु नितांतपिशंगैर्भूरुहान्मृदुकरैरवलंब्य॥ अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु॥७॥

पतिताः प्रविष्टाः जालं गवाक्ष आनाय इत्यमरः॥ विभासः कांतानां प्रेयसां स इव वनिताभिः सादरं ददृशिरे दृष्टाः सायं
तनार्कभासां प्रियसमागमसूचकत्वाद्दूतीवद्भासु स्त्रीणामादरो भवदित्यर्थः॥६॥ अग्रेति॥ विवस्वान् अग्रे अस्तशैल
शिखरे ये सानवस्तेषु ये भूरुहास्तानि नितांतपिशंगैः अत्यंतारुणैः मृदुभिः करैरीव करैः अंशुहस्तैरिति श्लिष्टरूपकं बलिहस्तां
शवः कर इत्यमरः॥ यद्वा करैर्मृदुस्कंधमवलंब्यास्त इति शैलोस्तशैलेस्तु वरमक्ष्माभृदित्यमरः॥ तस्य गहनं नु काननं नु जलधि
महीं नु आविवेश तपनस्य तपसन्नाह एव दृष्टः तपनेतु कवास्य तं नष्टाय तेशीघ्रगमनादित्यर्थः अत्र तपनस्याशारोपणमाप्यमा
नस्य गहनाद्यनेकविषयत्वेन संदेहात्संदेहालंकारः उत्प्रेक्षेति केचित्॥७॥ ॥
दे२

आकुल इति॥ बलानां कुलाय प्रतिबलतां पतत्रिकुलानां मारवैः शब्दैः आकु[illegible]ऽनुदितशब्देनाभावमात्रमुक्तः शब्देन संध्या
मात्रं च विवक्षितं तु घोषस्तिमितः आघोषसः संधि[illegible]लेत्यादिना योगविभागाद्दण् प्रत्ययः। अन्यथा कोलादि ठञ्स्यात्। तथा चानुदि
तो घोषस्य राग इत्स विद्यमानं संध्यारागः इत्यर्थः। एकत्रासमया दृश्यत्रानुदया श्चेति भावः। अहरिदश्वो विद्यमानस्य सूर्यः एकत्रानुदयो
दृश्यत्रास्तमयाश्चेति भावः। अत एव विपाण्डुः तिमिरोदयाश्चेति भावः। दिनान्तः सायंकालो दिनमुखेन प्रातःकालेन तुल्यता मा
ययौ तद्वद्बभूवेत्यर्थः। अत एवोपमालंकारः॥८॥ आस्थित इति॥ स्थगितवारिदपंक्त्या विहितमेघवृन्दया संध्यया आस्थितः
आ[illegible]क्रान्तो गगनपश्चिमभागः सोर्मिसंक्रान्तेत्यर्थः। या विद्रुमवितानविभाः प्रवालप्रकरकान्तिलयारंजितस्य सस्य सावर्ण्यं

आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः॥ आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः॥८॥ आस्थि
तस्थगितवारिदपंक्त्या संध्यया गगनपश्चिमभागः॥ सोर्मिविद्रुमवितानविभासा रंजितस्य जलधेः श्रियमूहे॥९॥
प्रांजलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा॥ संध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री॥१०॥

प्रापितस्य जलधेः श्रियमूहे संध्यया रक्तवर्णत्वादिति भावः। वहतेः कर्तरि लिट् तत्सदृशीं श्रियमूहे दुवाहेत्यर्थः। अत एव निदर्शनालंका
रः॥९॥ प्रांजलाविति॥ प्रबद्धः अंजलिर्येन तस्मिन्प्रांजलौ बद्धांजलौ प्रादिभ्यो धातुजस्य बहुव्रीहिर्वा उत्तरपदलोपश्च नतमू
र्ध्नि नमस्कुर्वाणे तत्प्रवणं संध्यायामेवाहितं चेतो यस्य एवंविधेपि जने विषये प्रेम हित्वा विहाय विरमन्त्या विवर्तमानया व्याङ्परिपरि
भ्यो रम इति परस्मैपदं संध्यया चापलेनास्थैर्येण युवादित्वादण्प्रत्ययः। सुजनादितरो दुर्जनस्तस्य मैत्री सख्यं अनुविदधे अनुच
क्रे कर्मणि लिट्। यथा दुर्जनमैत्री संतमपि जहाति। तद्वत्संध्यापि सेवकं जनमजहा[illegible]दित्यर्थः। मित्रस्य कर्म मैत्री प्राणला
तङीपू। अत्र संध्यादुर्जनमैत्र्योश्चापलसमानधर्मेणानुविधानेऽत एवार्थरूपेणोपमा॥१०॥

औषसेति॥ औषसात् उषाभातिकादातपाद्भयं तस्मादिव [blot]लीनं कुत्रचिद्गूढं वासरछ्वेरातपस्य विरामाद्धेतोः पटीयः प्रभविष्णु मं
धकारं ध्वांतं अंधकारोऽस्त्रियां ध्वांतं तमिस्रं तमः इत्यमरः अथ संध्यागमनानंतरं शनैः निम्नात् संनिपत्यागत्य समानि समस्थलानि उद
वाप व्याप्नोत् अत्र प्रस्तुतांधकारविशेषणसाम्यादप्रस्तुतवारार्थप्रतीतेः समासोक्तिरलंकारः उत्प्रेक्षा गतस्य॥११॥ एक
तामिति॥ एकताम् अभेदं गतस्येव तिमिरव्याप्त्या तथा प्रतीतेरियमुत्प्रेक्षा महतः शैलादेरपि कस्यचित्कस्यापि पदार्थस्य
विवेको भेदो नोपलेभे न गृहीतः अत एवोत्प्रेक्ष्यते पतितेनास्तमितेन भास्वता सूर्येण भुवनानां भुवनस्थलपदार्था

3

औषसातपभयादिव लीनं वासरछ्वि विरामपटीयः॥ संनिपत्य शनकैरथ निम्नादंधकारमुदवाप समानि॥११॥
एकतामिव गतस्य विवेकः कस्यचिन्न महतोप्युपलेभे॥ भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः॥१२॥
इछतां सह वधूभिरभेदं यामिनीविरहिणां विहगानां॥ आपुरेव मिथुनानि वियोगं लंघ्यते न खलु कालनियोगः॥१३॥

नानामित्यर्थः विशेषाः भूधरादिभेदाः आत्मनि स्वस्मिन्नेव निदधिरे इव निहिता इव कथमन्यथा नोपलेभ इत्यर्थः अत्रोत्प्रे
क्षयोः सजातीययोः सापेक्षत्वादंगांगीभावेन संकरः॥१२॥ इछतामिति॥ वधूभिः स्वकामिनीभिः सहाभेदमवि
वियोगं इछतां तथा संकल्पवतामपीत्यर्थः यामिनीषु विरहिणां नियतवियोगानां रहयतेराभीक्ष्ण्यार्थे णिनिः यद्वानिं
द्यायां इनिः तेषां विहगानां चक्रवाकानामित्यर्थः मिथुनानि वियोगमापुरेव खलु नापुरित्ययोगव्यवछेदः तथा हि का
लनियोगो दैवाज्ञा न लंघ्यते खलु दुर्वार इत्यर्थः॥१३॥

यच्छतीति॥ शकुंते चक्रवाकपक्षिणि सामान्यस्य प्राकारिणि क विशेषपर्यवसानात् शकुंतिपक्षिशकुनिशकुंतशकुनद्विजा इत्यमरः॥
अंतिकगते समीपस्थेऽपि दयितायै [redacted] चक्रवाक्ये प्रतिमुखेमभिमुखं यथा तथा वा न यच्छति सति वा चमेव दृष्टान्तेन न तु संगच्छमानेस
ती सर्थ॥ गाम्रा ध्येयादिना दाणाय गादेशः॥ अंबुरुहिण्या नलिन्या उल्लसित हर्षे चक्रवाक दुर्दशा दर्शनादिव सच्च विकासं पंकजं
मुखमिव नतिं नीयते स्म नीतं प्रधानकर्मण्याख्येयेलादिना [redacted] नाहुर्द्विकर्मणमिति॥ नयतर्द्विकर्मकत्वात्प्रधाने कर्मणि लिट् प्रायशो दुः
खदर्शनाद्धि न्यः खिद्यते विशेषेण विरहिदर्शनादिति भावः॥ अत्र पंकजावनतेश्चक्रवाकविक्रोशानंतर्याच्च हेतूत्प्रेक्षा सैव

यच्छति प्रति मुखं दयितायै वाचमंतिकगतेऽपि शकुंतौ॥ नीयते स्म नतिमुज्झितहर्षं पंकजं मुखमिवांबुरुहिण्या॥१४॥
रंजिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु॥ पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण॥१५॥

तत्र मुखोपमेयं अंबुरुहिण्याः कामिनीसाम्यं गलयंत्यानिरूढस्य स्तुत्प्रेक्षयोरंगांगीभावेन संकरः॥ व्यंतकत्वाद्यप्रयोगात्प्र
तीयमानोत्प्रेक्षा॥१४॥ रंजिता इति॥ तिमिरेण विविधास्तरवः शैलाश्च रंजिताः स्वसावर्ण्यमापादिता नु अन्यथा कथमेषां नील
त्वमिति भावः॥ गगनं नामितं नु आभूतलादिति शेषः स्थितो ह्रस्व इस्तत्र वा शब्दानुवृत्त्या केषांचिद्विकल्पाद्ध्रस्वः॥ यद्वा गगनं स्थ
५४ गितं नु छन्नं किंतु भयत्रापि तमसावृतत्वान्न दृश्यत इति भावः॥ तथा [redacted] धरित्री विषमेनिम्नोन्नतेषु पूरिता सा समीकृता अन्य
था तद्विवेकः कथं न स्यादिति भावः॥ ककुभो दिशश्च संहृता नु लुप्ताः किं दिशस्तु ककुभः काष्ठाश्चाशाश्च हरितश्च ता इत्यमरः॥ कथम
न्यथा न दृश्यंत इति भावः॥ अत्र तिमिरस्य तरुशैलाद्यनेकविषयं रंजकत्वादिकमारोप्यं संदिग्धं इति संदेहालंकारः॥१५॥

रात्रीति॥ श्रीः शोभा कुत्र रात्रेः रागेण स्वच्छायोपरंजनेन मलिनानि अत एव विकासं रहयंतीत्यस्यंति रहयते समागार्थी ष्यत् प्रत्ययः॥
पंकजानि विहायस्य स्पष्टतारकं नभः खमियाय तथा हि सर्वो निरापदि स्थले वस्तु स्थातुं एकाचत्पदे शेनुदात्तादिती इ प्रतिषेधः॥
श्रेयसां तेषु च प्रसारिणीति क्वचनातूद्गच्छ ति॥१६॥ ध्यानशे इति पूर [redacted] शराधोरणा विमुक्तः क्षिप्तः केतकी कुसुमकेसरं इव
पांडुः लंभिता [redacted] प्रापिता कांतिर्येस्य स्वरश्मिसमूहश्चूर्णस्य कर्पूरस्य मुष्टिरिव मुष्टिः शब्दस्य द्विलिंगत्वेप्यत्र पुल्लिं

रात्रिरागमलिनानि विकासं पंकजानि रहयंति विहाय॥ स्पष्टतारकमियाय नभः श्रीर्वस्तुमिच्छति निरापदि सर्वः॥१६॥
ध्यानशेशराधोरणविमुक्तः केतकीकुसुमकेसरपांडुः॥ चूर्णमुष्टिरिव लंभितकांतिर्वासवस्य दिशमंशुसमूहः॥१७॥
उज्झती शुचमिवाथ तमिस्रामंतिकं व्रजति तारकनाथे॥ दिक्प्रसादगुणमंडनमूहे रश्मिहासविशदं मुखमैंद्री॥१८॥
शु

गतैवगनाद्युपमेयानुसाराद्वासवस्येंद्रस्य दिशं ध्यानशे व्याप अनेन दिशा निशाकरयोर्नायिकोपम्यं गम्यते॥१७॥
उज्झतीति॥ इंद्रस्येयमैंद्री दिक् प्राची तारकनाथे नक्षत्रनाथे कनीनिकायां नक्षत्रनाथे कनीनिकायां नक्षत्रे तारकं
तारकं पिच्चेति विश्वः॥ अंतिकं व्रजति सति आशु तमिस्रामंधतमसं तमिस्रा ध्वांत निशि निशा श्यंधतमसे पिच्चेति
वैजयंती शुचमिव विरहदुःखमिवेत्यर्थः॥ उज्झती विजहती प्रसादो नैर्मल्यमेव गुणः स एव मंडनं यस्य तत्तः रश्मयो हास
उवतेन विशदं मुखमिव मुखमग्रभागं मिह लोपमेयं दुहेवहति स्म अत्र दिकचंद्रयोर्नायिकोपम्यं गम्यते॥१८॥ ॥

नीलेति॥ शैलरुद्धवपुषः उदयगिरितिरोहितमंडलस्य सितरश्मेरिंदोः संबंधीनि लिनीरजनिभे श्यामकमलतुल्ये रवे [redacted] नियतत् हिमगौरं
शुभ्रं करजालं वारिधेः पयसि निपततु गांगमंभ इव राराजतु उपमानेपि विशेषणान्योज्यं॥१९॥ द्यामिति॥ द्यां निरुंधदाकाशं विरुंधत्
अतिनीलघनांधतमसं उद्यता करा अंशवो हस्ताश्च यस्य तेन असितांभ्यस्तरां शुभ्रा भासो यस्य तेन चंद्रेण पुरस्तात् प्राच्यां अग्रे च क्षि
प्यमाणं नुद्यमानं ध्वांतं शंभुना क्षिप्यमाणं गजचर्मेव चकासे उपमाने विशेषणानि योज्यानि॥२०॥ अंतिकेति॥ अंतिकं अंति
कं समीपं प्रकारगुणवचनस्येति द्विर्भावः कर्मधारयवद्भावात्सुपो लुक्। गतेनेंदुना विसृष्टे मुक्ते दीधितिजाले जिहासतां संकोचं

नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः॥ खे रराज निपतत्करजालं वारिधेः पयसि गांगमिवांभः॥१९॥ द्यां
निरुंधदतिनीलघनाभं ध्वांतमुद्यतकरेण पुरस्तात्। क्षिप्यमाणमसितेतरभासा शंभुनेव गजचर्म चकासे॥२०॥ अं
तिकांतिकगतेंदुविसृष्टे जिह्मतां जहति दीधितिजाले॥ निर्गतं तिमिरभारनिरोधादुच्छ्वसंनिव रराज दिगंतः॥२१॥
लखयाविमलविद्रुमभासा संततं तिमिरमिंदुरुदास॥ दंष्ट्रयाकनकटंकपिशंग्या मंडलं भुव इवादिवराहः॥२२॥ ॥

जहति त्यजति सति तिमिरभारैस्तमस्तोमैनिरोधान्निस्सृतो निर्गतः दिगंतः उच्छ्वसन्प्राणयन्निव रराजे उत्प्रेक्षालंकारः॥२१॥
लखयेति॥ इंदुर्विमलविद्रुमभासा स्वच्छप्रवालसवर्णया लखया संततं संतं सांद्रं तिमिरं आदिवराहः केनकस्य टंकः शिला
भेदकं शस्त्रं टंकः पाषाणभेदक इत्यमरः तद्वत्पिशंग्या लोहितवर्णया पिशंगा श्वेतिवक्तव्य इति ङीप् दंष्ट्रया भुवां मं
डलमिव उदास उच्चिक्षेप अस्यतेः कर्तरि लिट् सोपसर्गो दस्यतेरात्मनेपदं विकल्पात्॥२२॥ ॥ लृ श्री लृ

दीपयन्निति ॥ अथोदयानंतरं किरणौघैः नभो दीपयन् अथवा शायन् कुंकुमेनारुणाः पयोधराः कुचाः स च गौरोऽरुणः उदयरागादिति
भावः तुहिनांशुरिंदुः शनकैः पूर्वपयोधेः पूर्वसागरात् हेमकुंभो हेमकुंभ इवोन्ममज्ज उदगात् इत्युत्प्रेक्षा ॥२३॥
उद्धृतेति ॥ लोकाजनः लोकस्तु भुवने जन इत्यमरः उद्धृतेंदुमुदितचंद्रां अविभिन्नतमिस्रां अनिःशेषितध्वांतां र
जनीं व्यंशुकमयनीलावगुंठनमत एव स्फुटदृश्यमानं मुखं यस्यास्तां तथापि व्रीडया जिह्मां वक्रां नवोढां प्रियामि

दीपयन्नथ नभः किरणौघैः कुंकुमारुणपयोधरगौरः ॥ हेमकुंभ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः ॥२३॥
उद्धृतेंदुमविभिन्नतमिस्रां पश्यतिस्म रजनीमवितृष्णः ॥ व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः ॥२४
न प्रसादमुचितं गमिता द्यौर्नोद्धृतं तिमिरमद्रिवनेभ्यः ॥ दिङ्मुखेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा ॥२५॥

वातितृष्णः सन् पश्यतिस्म ॥२४॥ नेति ॥ हिमभासा चंद्रेण द्यौराकाशमुचितं योग्यं प्रसादं न गमिता अद्रयो वनानि च
तेभ्यस्तिमिरं नोद्धृतं नोत्सारितं दिशां मुखेषु धाम तेजश्च न विकीर्णं न पर्यस्तं तथापि रजनी भूषितैव किमु कैर्गु
णैः संपन्ना किमिति भावः अत्र प्रसाधनकारणाभावेऽपि तत्कार्यभूषणोक्त्या विभावनालंकारः ॥ १५ ॥२५॥

मानिनीति ॥ उदितः शीतमयूखः पुरुहूतेन विरहितत्वेन बाष्पेण कलुषा मानिनी विलाना मानिनीजनस्य कलहांतरिता नायिका जन
स्य विलोकयता नामा निजनितरोषेण भीषणा नितिभावः कोपात् क्रांतया पश्चात्तापसमन्विता कलहांतरिता वेति द
शारूपके प्रतिगृह्णन् रवी कुर्वन् अपराधस्य दुःप्रतिहार्य्यता दितिभावः अत एव भीतभीतः भीतप्रकार इव सुमेक्षा मंदं मंदं प्र
कारं उभयत्रापि प्रकारे गुणवचनस्येति द्विर्भावे कर्मधारयवद्भावात् सुलोपः खमाकाशं प्रपेदे ॥ २६ ॥ श्लिष्यत इति ॥ ततः
प्रसारिताकराएव करोः अंशुहस्तायतनत्वकरस्य सतः तारकाएव प्रियवधूः उपकंठं अंतिके असंतसंयोगे द्वितीया विभ

मानिनीजनविलोकनयातानुषधबाष्पकलुषान्प्रतिगृह्णन् ॥ मंदमंदमुदितः प्रययौ खंभीतभीत इव शीतमयूखः ॥ २६ ॥
श्लिष्यतः प्रियवधूरुपकंठं तारकास्ततकरस्य हिमांशोः ॥ उद्धमन्नभिररजसमेतादंगरागइवलोहितरागः ॥ २७ ॥
प्रेरितः शशधरेण करोघः संहतान्यपि नुनोद तमांसि ॥ क्षीरसिंधुरिव मंदरभिन्नः काननान्यविरलोच्चतरूणि ॥ २८

त्यर्थेव्ययीभावः श्लिष्यतः प्रसासेदतः आलिंगतश्च हिमांशोः संबंधी सन्नंतादुद्गमनुत्सर्येन अर्थांतरत्वादकर्म
कत्वं धातोरर्थांतरे वृत्तेरिति वचनाद्वैन लोहितरागोऽरुणप्रभा अंगरागइवाभिररजः आलिंगनादंगरागगलनमिति
प्रसिद्धरूपकोपमेदरा चयोरंगांगीभावेन संकरः ॥ २७ ॥ प्रेरित इति ॥ शशधरेण चंद्रेण प्रेरितो विसृष्टः करौघः
संहतानि सांद्राण्यपि तमांसि मंदरेण मंदराचलेन भिन्नो नुन्नः क्षीरपयःसिंधुरे विरलाः सांद्रा उच्चा उन्नताश्च तरवो
येषु तानि काननानि वननुनोदधिक्षेप ॥ २८ ॥

शारतामिति॥शशिपादैश्चंद्ररश्मिभिः पादरश्मि[illegible]॥शारः स्यमरः शारतां शबलतां शबलतां गमितया शबलः शबलयीतयोरि
ति विश्वः विटपिनां तरूणां छायया न्यस्तैः शुक्लबल्लिभिः श्वेतपुष्पाद्युपहारैः चित्राणि तलानि उपरिभागा यासां ताभिः कु
रोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियामित्यमरः वसतिवेश्ममहीभिस्तुल्यता साम्यं प्रतिपेदे कर्मणि लिट् इयमुपमा॥२९॥
आतपइति॥आतपे दुःखकरपीतिभावः बध्वा वक्रवाक्या सह आतपए वधृतिमतां संतोषवतां यामिनीषु विरहिणा नियतविर
हेण अतएव विहगेन चक्रवाकेन हिमरश्मेः चंद्रस्य किरणान सेहिरे तथाहि दुःखितेन संजातदुःखेन मनसि सर्वमसह्यमनोहरम

शारतां गमितया शशिपादैः छायया विटपिनां प्रतिपेदे॥न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः॥२९॥
आतपे धृतिमता सह बध्वा यामिनीविरहिणा विहगेन॥सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यं॥३०॥
गंधमुद्धतरजः कणवाही विक्षिपन्विकसतां कुमुदानां॥आदुधाव परिलीनविहंगा यामिनीमरुदपां वनराजीः॥३१॥

पीतिभावः असह्यं सोढुमशक्यं शकि सहेत्यस्य तियत्प्रत्ययः॥पूर्वं आतपाइति यदुक्तं वध्वा सह आतपा अपि सेहिरे न तु विरहिणा तु
शशिकिरणा अपि न सेहिरे इतियोज्यं फलंतु समानं॥३०॥गंधमिति॥अपां कणवाही योग्या न्वयेपि व्यवधाने सोढव्ये विकसतां
कुमुदानां गंधं सौरभं उद्धतरजः पराग्रोयस्मिन्कर्मणि तद्यथा शेषा द्विभाषितिविकल्पान्नकप् विक्षिपन् विकिरन् इत्थं शिशि
रसुरभिर्यामिनीमरुत्सर्यरितो लीनाः शयिता विहंगा यासु ता वनराजीरादुधाव ईषत्कंपयामास विहंगशयनाविरोधेन
सर्वथः आङीषदर्थेभिव्याप्ताविस्यमरः यथा कश्चित्कामिनीगेधोदकादिना सिंचन्नाकर्षतीति तद्वदितिभावः॥३१॥ ॥

संविधातुमिति ॥ यामिनीवनितारूपतया मन्मथस्याभिषेकं [illegible] त्रिभुवनजैत्रयात्राभिषेकं संविधातुं सम्यक् कर्तुं । अंशवो जलानीव तेषामो
यः पूरः लसन्यस्मिन्नसः ततविन्दुः स्फुरन्मेघो बुनः इंदुः सोस्य कोरजतकुंभ इव बभार सुप्रतिष्ठितः । अस्य तैः कर्मणि लिट् । अं संविधातुमि
तिनुमुनाप्रतीयमानयोः लेक्षणयानुप्राणितयमुपमोत्प्रेक्षयोः संकरः ॥ ३२ ॥ तेजसेति ॥ तेजसा अन्नेन संपूर्णमपि असहायं सहा
यरहितं पुरुषमिति शेषः जयश्रीर्नोपयाति खलु नूनं कुतोयं यस्माद्विभुः समर्थोपि अनंगः शशिमयूखानां सखा सहचरस्तथो
क्तः सत्सहायः सन्निसर्थः विजयी विजयशीलं जिदक्षी सादिनाद्दनिप्रत्ययः चापमाददे विशेषेण सामान्यसमर्थनरूपोर्थान्तरन्यासः ॥ ३३

संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः ॥ यामिनीवनितया ततविन्दुः सोसकोरजलकुंभइवेंदुः ॥ ३२ ॥
तेजसापि खलु नूनमनूनं नासहायमुपयाति जयश्रीः ॥ यद्विभुः शशिमयूखसखः सन्नाददे विजयि चापमनंगः ॥ ३३ ॥
सद्मनां विरचनाहितशोभैरागतप्रियकथैरपिहसं ॥ सन्निकृष्टरतिभिः सुरदारैर्भूषितैरपि [illegible] भूषणमीषे ॥ ३४ ॥

इत्थमुद्दीपनसामग्रीमुपवर्ण्य संप्रति तत्कार्यभूतं रतिवर्णनमारभते । सद्मनामित्यादि सन्निकृष्टरतिभिरासन्नरतोत्सवैः
अत एव सुरदारैः सुरवधूभिः आहितशोभैः प्रागेव विहितकेलिगृहमंडनैः अपि पुनः सद्मनां केलिगृहाणां विरचनामंडन
मीषे अभिलषितं ईषः कर्मणि लिट् आगतप्रियकथैः प्राप्तप्रियसनबन्धोतैरपि हृत तस्य कर्म हृसंहृती व्यापार ईषे हृत
स्य भाव कर्मणोर्यत्प्रत्ययः । तथा भूषितैरपि भूषणं प्रधानमीषे औत्सुक्यातिरेकादिति भावः ॥ ३४ ॥ ॥ ॥

नेति॥ विरहे वियोगावस्थायां स्त्रजो माल्यानि चंदनानि गंधाः मदिरा वा मद्यानि च रमणीभ्यः रुच्यर्थानां प्रीयमाणः इति संप्रदानत्वा
च्चतुर्थी न रुरुचे न तरोचन्ते स्म प्रियसमागम एव रतेः साधनेषु स्त्रगादिषु रम्यतां मनोहरत्वं रुरुचिरे कत्वमिति यावत् उपधत्ते आध
त्ते तदभावादरुचिर्युक्तैवेत्यर्थः अत एव वै धर्म्यात्कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः रमेतरण्यिति रम्याणि योरहुपधा
दिति यत्प्रत्ययः कृत्यल्युटो बहुलमिति अधिकरणार्थः॥३५॥ प्रस्थिताभिरिति॥ अधिनाथनिवासं प्रियगृहं प्रति प्रस्थिता
भिः प्रचलिताभिः ध्वंसितानि खंडितानि प्रियसखीवचनानि स्वयं प्रस्थानं लंघयित्वा ये एवं रूपाणि याभिस्ताभिर्मानिनीभिः

नस्त्रजो रुरुचिरे रमणीभ्यश्चंदनानि विरहे मदिरा वा॥ साधनेषु हि रते रुपधत्ते रम्यतां प्रियसमागम एव॥३५॥
प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः॥ मानिनीभिरपहस्तितधैर्यः सादयन्नपि मदोऽवललंबे॥३६॥
कांतवेश्म बहु संदिशतीभिर्यातमेव रतये रमणीभिः॥ मन्मथेन परिलुप्तमतीनां प्रायशः स्खलितमप्युपकारि॥३७॥

कोपमानाभिः स्त्रीणामप्याहुतिः कोपो मानो न्यासंगिनि प्रिय इति लक्षणात् अपहस्तितं निरस्तं धैर्यं येन सः तथा सादयन्नमा
नं शरीरं च कर्षन्नपीत्यर्थः मदो अवललंबे रवीकृतः अज्ञानव्याजेन लाघवापन्हवसौकर्यादिति भावः॥३६॥ कांतेति॥ रतये सुरता
य बहु दिशतीभिः अनेकं वापि कथयंतीभिः संदेशाश्च वक्तव्या हे लब्व्यमिति अजानतीभिरित्यर्थः रमणीभिः कांतवेश्म यातमेव
न तु मध्यमार्गान्निवृत्तमित्यर्थः ज्ञानाभावे कथं प्रियगृहप्राप्तिस्तत्राह तथाहि मन्मथेन परिलुप्तशंकापाभृतं मतिनाप्रथमव
तीनां स्खलितं विरुद्धाचरणमपि प्रायः कारि ज्ञानाभावेपि पूर्ववासनावशात् प्रियगृहगमेरित्यर्थः मन्मथ इति भावः॥३८॥

आश्विति॥ आशुकांतमभिसारितवत्सः अभिगतवत्सः स्वार्थे णिच् योषितः संबंधिपुलकैः रुद्धौ आवृतौ कपोलौ यस्य तत् खंडाग्र
स्रायत्राणां यत्र तिलकानां या। तिलकस्य चाकृतिः सन्निवेशो यस्य तत् तथो चं मुखं कांस्याः खंडं पूर्ण इंदु निर्जिगाय जयप
तिस्मे स्यर्थः इयमुपमास्य ईद्यते ह्ययते द्वे हिद्द् ति दंदु नासा द्रश्यार्थे गणनात् ॥२८॥ अथ युग्मेन सखीसंवादमाह॥ उ
च्यतामिति॥ तत्र नायिका आह सपत्नैः अशेषमखिलं वचनीयं वक्तव्यमुच्यतां निःशंकमुपलभ्यतामित्यर्थः हे ओदुहा

आशुकांतमभिसारितवत्यो योषितः पुलकरुद्धकपोलं॥ निर्जिगाय मुखमिंदुमखंडं खंडयत्रतिलकाकृतिकांस्या ॥२८॥
उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी॥ आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ॥२९॥

दित्वा दप्रधाने कर्मणि लोट्। अथ सख्याह हे सखी नायिके ईश्वरे भर्तृविषये परुषता पारुष्येन साध्वी न हिता। अथ नायिका
हत हिं एनं अनुनीय आनय पुनः सख्याह विप्रियाणि कुर्वन्स कथं वानुनयः आनयनार्हः अनुनयार्हः रतये इति र
स्यर्थः ॥२९॥ लोकोनंदनचंदनद्रुमसखे नास्मिन्वयं स्थीयतां दुर्वर्णैः कठिनैरसादहृदयैराक्रांतमेतद्वनं
तेह्यन्यं निधर्षजातदहनज्वालावलीसंकुलानस्थान्येव कुलानि केवलममी सर्वंदहेयुर्वनं ॥ १ ॥

कि मिति॥पुनर्नायिकाह तर्हि गतेन त्वं प्रतिगमनेन किं कोर्थ इत्यर्थः उपेतुं गंतुं नयुक्तं हि पुनः सख्याह सुभगमात्मानं मन्यते तच्छी
लेति सुभगमानिनी सोद्वेगमामाने स्वश्लाघेति णिनिप्रत्ययः तस्मिन्प्रिये को मानयद्दान हीयात् इति सखीवाक्यं तत्र नहीये
कं वाक्यं हे सखि उपेतुं युक्तं न अयुक्तमेवेत्यर्थः कुतः सुभगमानिनि प्रिये को मानः तादृग्जनस्य दुर्लभत्वादिति भावः इत्येवं रू
४ पा सु योषितां कथया सु विषयेषु मतैः समीयमागस्य श्रृण्वद्भिरित्यर्थः कामिभिः बहुरसाः अनेकस्वादाः स्तुतिः संतोषहेतुरूढः

किं गतेन न हि युक्तमुपेतुं कः प्रिये सुभग मानिनि मानः॥योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृतिरूहे॥५०॥
युग्मं॥योषितः पुलकरोधि दधत्याघर्मवारि नवसंगमजन्म॥कांतवक्षसि बभूव पतंत्या भूषणं लुलितमंडनतैव॥५१॥

अत्रोत्प्रेक्ष्योत्सुक्यनिर्वेदाद्यनेकभाववशाद्बल्यपरिपूर्णकांतावर्णनादुत्तरोत्तरमपूर्वहृदयानिष्यंदमानं संदेहमविंद
न्नित्यर्थः प्रायेणात्र प्रौढाकलहांतरिताश्च नायिकाः॥५०॥योषित इति॥पुलकरोधि रोमांचव्यापि नवसंगमेन न व
८३ जन्म यस्य तत् घर्मवारि स्वेदं दधत्याः इति सात्विकोक्तिः कांतवक्षसि पतंत्याः इत्यौत्सुक्योक्तिः योषितः लुलितमं
डनतां लुलितानि मुक्तानि मृदितानि समर्दवशात् स्रक्चंदनादीनि यस्याः तस्या भावः उत्कृष्टप्रसाधनत्वमेव मंडनं बभूव तद्वत्फला

दसिध्यति॥सीधतेऽनेनेतिसीधुःपक्वेक्षुरसविकारोमद्यविशेषःतस्यपानेनविधुरासुविमूढासुतथादयितैःसंगतासुकामिनीषुआ
शुमानंकोपंनिगृह्णन्निवर्तयन्शिथिलीकृतालज्जायेनसमदनोनुदर्पोनुपदमुपलेभेलक्ष्यंलेभेइत्यर्थःप्रियसमागम
सीधुपानरूपोभयकारणभंगानुमयथामानविग्रहाद्यनुभावसाधारण्यात्संदेहालंकारः॥४२॥द्वारीति॥द्वारि
तद्गमनमार्गएवचक्षुःइत्यौत्सुक्योक्तिःअधिपाणिपाणौकपोलौविन्यस्ताविति चिंतोक्तिःकिंबहुनाजीवितंत्वयित्वद

सीधुपानविधुरासुनिगृह्णन्मानमाशुशिथिलीकृतलज्जः॥संगतासुदयितैरुप
लेभेकामिनीषुमदनोनुपदोनु॥४२॥द्वारिचक्षुरधिपाणिकपोलौजीवितंत्वयि
कुतःकलहोऽस्याः॥कामिनामितिवचःपुनरुक्तंप्रीतयेनवनवत्वमियाय॥४३॥

धीनंत्वांविनानजीवतीत्यर्थःइतिगाढानुरागोक्तिःअतोऽस्याःकलहोविरहःकुतइत्येवंकामिनीनांप्रीतयेपुनरुक्तं
पुनरुक्त्यामानवचोहृतीवाक्यंनवनवत्वंनवप्रकारत्वंअपूर्ववद्भावमियायप्रकारार्थेद्विर्भावःकर्मधारयवद्भावा
त्सुयोलुक्कांतानुरागप्रकटनात्कामिनःप्रहृष्यन्तीतिभावःकलहांतरितेयं॥४३॥

साचीति॥ लोचनयुगं सा विनमयंती प्रिये तिर्यग्भ्रूयातयंतीनुमियेस्यर्थः दयितवक्षसि पातं रुंधती दृष्टमपि प्रतिबध्नोतील ज्जी सुभ्रुवो विभ्रमांशोभां जनयति स्म संगतो सुरतप्रसंगे स सुपरराम चय तस्त्तदा अदूषणमेवेति भावः कर्मक दितिपरस्मैपदं॥४४॥ सव्यलीकमिति॥ सव्यलीकं सापराधं अत एवावधीरितो वस्त्रातः सन् खिन्नाश्चतं पूर्व कालस्यादिना तसुरूपः स यदि कायस्य पदेन व्याजेन प्रस्थितं निर्गछं तं प्राणनाथं योषितः संबंधि अभिबाष्प

सा विलोचनयुगं नमयंती रुंधती दयितवक्षसि पातं॥ सुभ्रुवो जनय[illegible]स्म विभ्रमं संगतावुपरराम चल ज्जा॥४४॥ सव्यलीकमवधीरितखिन्नं प्रस्थितं सयदि कोपपदेन॥ योषितः सुहृदिव स्मरुणद्धि प्राणनाथमभि बाष्पनिपातः॥४५॥ ॥ ४५॥ ॥ ४५॥ ॥

निपातः अभिमुखेनाश्रुमोक्षः सुहृदिव रुणद्धि स्म सापराधं प्रिये प्रियया निर्भत्सिते गंतुमुद्युक्ते सति यथा सु हृत् नगतव्यमिति तं निवारयति तथास्त्रीरोदनामपीति भावः रुरुधबाष्पपातस्य मन्युमोक्षलिंगत्वया प्रस्थानं बं धकत्वात् सुहृदौपम्यं गम्यते इयमधीराखंडिता तालैन्यासंगविह्वतोखंडितेर्ष्याकषायिता अधीरा श्रुविमुंवती ति दृ शारूपके॥४५॥ ४५ ॥ ॥

शंकितायेति॥ शंकितायनायकाया विश्वस्तायदयितायअस्याः स्नेहोस्तिनेवेति ईर्ष्यया विमुखितां अतएवकृतबा
ष्पनिपातांमानिनींघनरोमविभेदः सांद्रपुलकोदयः अभिमुखमाहितंययासातांनिष्कोपामित्यर्थः शंसतिस्मव्य
नक्तिस्मेत्यर्थः अन्यथासात्त्विकानुदयादितिभावः अत्रापिपूर्वोक्ते वनायिकाप्रियः पुलकदर्शनात्तमपिस्निग्धेति
ज्ञातवानितिभावः ॥४६॥ अथसंभोगशृंगारमाह। तत्रापिबाह्यांतरमाह॥ लोलेति॥ प्रियतमेलोलदृष्टिचंचेक्षणंद

शंकितायकृतबाष्पनिपातामीर्ष्ययाविमुखितांदयिताय॥ मानिनीमभिमुखाहितचित्तांशंसतिस्मघनरोमविभेदः॥४६
लोलदृष्टिवदनंदयितायाश्चुंबतिप्रियतमेरभसेन॥ व्रीडयासहविनीविनितांबोदंशुकंशिथिलतामुपपेदे॥४७॥

यितायाः वदनंरभसेनबलात्कारेणचुंबतिसतिविनीविनिर्गतंबंधनं अंशुकं नितंबात्व्रीडयासहशिथिलतामुपपे
देउभयमपिसिथिलमासीदित्यर्थः अत्रव्रीडांशुकसंबंधिमेनानिवृतिशंसतरूपशैथिल्यस्याभेदाध्यवसायिनिर्बंध
तातिशयोक्तिमूलः सहोक्तिविशेषालंकारः अतएवव्रीडांशुकोपम्यंचकल्प्यं अत्रवात्स्यायनः बाह्यमभ्यंतरंचेति
द्विविधंरतमुच्यतेतत्राद्यंचुंबनाश्लेषनखदंतक्षतादिकं द्वितीयंसुरतसाक्षान्नानाकारणकल्पितामिति॥४७॥

ह्रीतयेति ॥ गलितनीविगलितबंधनं तथाप्यवलंबितांकांचीयेन तत् कांचीलग्नमित्यर्थः तदंतरीयमंशुकं अंतरीयोपसं
व्यानपरिधानान्यधोंशुके इत्यमरः निरस्यन्नपहरन् हृदयेशः प्रियः ह्रीतया च स्त्रीयममलज्जितया ह्री धातोः कर्तरि
क्तः दयितया मंडलीकृतः पृथुस्तनभारो यस्मिन्कर्मणि तत् यथा तथा गाढमित्यर्थः सस्वजे आश्लिष्टः प्रियदृष्टेः
प्रतिबंधार्थमित्यर्थः ॥४८॥ आदता इति ॥ परिरंभा आलिंगनानि नखपदैः हेतुभिरादता अभिमता हेताविति

ह्रीतया गलितनीवि निरस्यन्नंतरीयमवलंबितकांचि ॥ मंडलीकृतपृथुस्तन
भारं सस्वजे दयितया हृदयेशः ॥४८॥ आदता नखपदैः परिरंभाश्चुंबनानि घनदंत
निपातैः ॥ सौकुमार्यगुणसंभृतकीर्तिर्वाम एव सुरतेष्वपि कामः ॥४९॥

तृतीया तथा चुंबनानि घनदंतनिपातैः गाढदंतक्षतैः हेतुभिरादृतानीति लिंगपरिणामः सुरतसुखोद्दीपकत्वा
न्नखदंतक्षतपूर्वकेषु आलिंगनचुंबनेषु आदरः संवृत्त इत्यर्थः ननु सुकुमारे कामतंत्रे कथं पीडाकरे आदर इति न
वाच्यमित्याह सौकुमार्येति सौकुमार्यमेव गुणस्तेन संभृतकीर्तिः लब्धयशाः कामः सुरतेषु भोगेषु अपि न केवलं किं प्रलं
भेष्विति भावः वामः क्रूर एव सुमारः कामः इति वादमात्रं वस्तुतस्तु पीडयन्नेव सुखमावहतीति भावः सामान्येन विशेषणरूपार्थांतरं न्या

अथाभ्यंतरमाह। पाणीति॥ रहस्येकांतेति विश्रंभातिशयोक्तिः। गत्वा वासखलच्छिरायोषितां संबंधिनि पाणिपल्लववयोर्विधूननं कंपनमंतः सीत्कृतानि सीत्काराः एतेन कुट्टमिताख्यभावउक्तः अधरपीडनादौ सुखेपि दुःखवदुपचारः कुट्टमितमिति लक्षणात नयनानां अर्धनिमेषाः अर्धनिमीलनानि तथा विशेषणसामर्थ्यात् लब्धमद्यत्वा कंचेत्यतानि मदनस्यास्त्रतामुपययुः अस्त्रवस्तुसंदीपनात्वासन्निस्यर्थः। अत्र सीत्कारार्धनिमेषादीनां सुखयारवश्यं व्यज्यते तदुत्तरतिरहस्यस्त्रस्तता वपुषि मीलनं दशोमच्छेनाचरति लाभलक्षणं श्लेषयेत्स्तखलघ्यनमुहुर्मुहुः सीत्करोति गतलज्जयाकुलेति॥५०॥ अ

पाणिपल्लवविधूननमंतः सीत्कृतानि नयनार्धनिमेषाः॥ योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य॥५०॥
पातुमाहितरतीन्यभिलेषुस्तर्षयंत्यपुनरुक्तरसानि॥ सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः॥५१॥

थ मधुपानवर्णनमारंभे पातुमित्यादिना युवानः आहितरतीनि वद्धितरागाणि अतएवापुनरुक्तरसानि पुनः पुनः पानेप्यपूर्वस्वादिनि अतएव तर्षयंतीति तृष्णां नयंति अत्यभिकराणि स्यर्थः सस्मितानि वधूनां वदनानि सोत्पलानि मधूनि च पातुमभिलेषुः इच्छंतिस्म अत्र प्रस्तुतानामेव वदनानां मधूनां च पानक्रियायोपम्यस्य गम्यत्वात्केवलं प्राकरणिकविषयतयातुल्ययोगितालंकारः प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः औपम्यं गम्यते यत्र सा मता तुल्ययोगितेति लक्षणात्॥५१॥

कांतेति॥ कांतसंगमनेन पराजितमन्यौ त्यक्तरोषे तदवधिकत्वान्नस्यतीति भावः किंच वारुणीरसनेन मध्वास्वादेन शांतो विवादो वाद्धु
लहोदिर्यस्य तस्मिन् कृतउपाहितं संधौ प्रिये सः सदृत क संधाने मानिनीजनविषयअनंगो धनुषीषुं न संदधे सिद्धसाधनवैयर्
थ्यादिति भावः॥५२॥ कुप्यतेति॥ पुनः प्रियानुकुप्यत कोपं कुरुत नात्र क्रुधद्रुहेत्यादिना यूनां संप्रदानत्वं तस्यं प्रप्रेति कोप
इति नियमात्कोपस्तान्वरिवस्यत परिचरत नमोवरिवश्चित्रङः क्यच् वरिवसः परिचर्यायामित्यस्य मर्थः नियमश्चैत्येवमन्त्र को
नेकप्रकारोयमुपदेशः प्रवर्तकवाक्यं सएव मधुवारो मधुपानावृत्तिः मधुवारामधुक्रमा इत्यमरः युवतीभिः स्वाद्यते समधुवा

कांतसंगमपराजितमन्यौ वारुणीरसनशांतविवादे॥ मानिनीजनउपाहितसंधौ संदधे धनुषि नेषुमनंगः॥५२॥ कुप्यता
शु भवतानतचित्ताः कोपिताश्च वरिवस्यत यूनः॥ इत्यनेकउपदेशइवस्मस्वाद्यते युवतिभिर्मधुवारः॥५३॥ भर्तृ
भिः प्रणयसंभ्रमदत्तां वारुणीमतिरसां रसयित्वा॥ ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः॥५४॥ ॥

रस्यकोपाद्यकार्यप्रवर्तकत्वसाम्यात्तदुपदेशइवेत्युत्प्रेक्षा अनियताः खलु मत्ता वेष्टा इति भावः॥५३॥ भर्तृभिरिति॥ भर्तृ
भिः प्रणयसंभ्रमाभ्यां प्रेमादराभ्यां दत्तां संभ्रमः साध्वसेपि स्यात्संयोगादरयोरपीति विश्वः॥ अत एवातिरसामधि
णाइकम्वारांवारुणीं वरूसुरां सुराहालिप्रिया हालापरिसुद्वरुणात्मजाइत्यमरः॥ रसपित्वा स्वाद्य वधूभिः ह्रीविरहाल्लज्जानिमोहस्य
ज्ञानाद्याच्च गमाद्वेतोः पाटवं पटुत्वे नु हृदयं नु इत्यानविशेषं नु उपलेभे ऽतएवहृदयस्य तत्कार्यं ज्ञानसामर्थ्याद् हृदयमेव
प्रागसत्सश्वाल्लाघमितिशेषः संदेहः अन्यथा कथं संप्रसेवकस्यार्थेपुर्वत्वमिति भावः संदेहालंकारः॥५४॥ ॥

स्वादितमइति॥स्वयं स्वादितः स्वयमेवादौ पीतः अथानंतरं प्रियतमे रेधितमानं वर्धितव त्रमानं यथा यथा लंभितो ग्राहितः स्वहेनयायितइत्यर्थः ततः प्रियतमेः सहपीतः युगपदेकपात्रेणपीतइत्यर्थः आसवः प्रमदानां प्रतिक्षणं नेकरूपरसानां अनेकविधस्वादुतां नञर्थस्य नशब्दस्य सुप्सुपेति समासः नञः समासे नलोपः स्यात् भेजे प्रापइवउपमानविशेषाद्द्रव्येषु रसविशेषस्वादितिभावः आस्वादनादिपदार्थानां अनेकरसता प्राप्तिहेतुत्वाकाम्यलिंगतावदेकस्वादनादीनामनेकधर्माणामेकस्मिन्नेवं सर्वक्रमेण संबंधा सर्याय भेदश्चतयोश्च संसृष्टयोरनेकरसत्वादुत्प्रेक्षा वीजत्वात्त

स्वादितः स्वयमथेधितमानं लंभितः प्रियतमैः सहपीतः॥ आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे॥५५॥
अविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानां॥ आददे मृदु विलोलपलाशैरुत्पलैश्च चषकैर्विनिषुकंपः॥५६॥

यासहांगांगीभावेन संकरः॥५५॥ अविलासेति॥ अविलासैः सुभगान् सुंदरान् वधूनयनानां विभ्रमान् अनुकर्तुंमिवेतिफलोत्प्रेक्षार्थत्वात् मृदु विलोलपलाशैरीषच्चलद्दलैश्चषकेषु यावीचयोमधुमयात्तासु यः कंपः सः आददे स्वीकृतः न न स्वयं यस्तस्य विलोलविशेषणे नैवारूत्वातूतस्वीकारश्चतद्योगएवपर्वं नेत्रमात्रसाम्यमाजामुत्पलानां कंपमानवीचियोगात्सम्यग्विलासेनचसाम्यजातइत्यर्थः॥५६॥

ओष्ठेति॥ ओष्ठ एव पल्लवस्तस्य विदंशः शोदंशः स्विरभिलाषो येषां तेषां तेषां मुखसुरापानमिषेण अधरपिपासितानामित्य
र्थः रमणानां फुल्लानि लोचनान्येव विनीलसरोजानि येषु तैः अंगनास्यान्येव चषकाणि पानपात्राणि चषकोऽस्त्री पा
नपात्रमित्यमरः तैर्मधुवारो मधुपानावृत्तिर्हृद्यतां हृदयस्य प्रियत्वं उपपयौ हृदयस्य प्रिय इति यत्प्रत्ययः हृदयस्य हृ
ल्लेखयलेखेत्यादिना हृद्भावः रमणविशेषणार्थे हेतुककाव्यलिंगसंकीर्णरूपकालंकारः॥५६॥ प्राप्यत इति॥ गुण
वतापि आश्रयवशेन गुणानां विशेषः प्रकर्षः प्राप्यते व्यक्तं तत्तथा यदुक्तं तत्तथैवेत्यर्थः हि यस्माद्दयितानाननेन

ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपपयौ रमणानां। फुल्ललोचनविलोलसरोजैरंगनास्यचषकैर्मधुवारः॥५७॥
प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः। तत्तथा हि दयिताननदत्तं व्यानशे मधुरसातिशयेन॥५८॥
वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीं। जज्ञिरे बहुमताः प्रमदानामोष्ठयावकनुदो मधुवाराः॥५९॥

करणेन दत्तं मधु रसातिशयेन स्वादुत्वप्रकर्षेण व्यानशे व्याप्तं विशेषणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥५८
वीक्ष्येति॥ रत्नचषकेषु स्फटिकादिरत्नपात्रेषु अतिरिक्तां यावकापगमागमात् पूर्वाभ्यधिकां तस्य यद्दन्तपदं तदेव मण्ड
नं तस्य लक्ष्मीं शोभां प्रतिबिम्बितामिति शेषः वीक्ष्य ओष्ठयावकनुदो अरलाक्षारागहारिणो मधुवाराः मधुपानाभ्यासाः
प्रमदानां बहुमता अभिमताः वर्तमानेन तः तद्योगात् तत्रपी जज्ञिरे जाता तेषां प्रियानुरागचिह्नप्रकाशकत्वादिति भावः॥५९॥ ॥

मधुपानाद्धि लोचने लोचनेषु रागो संक्रान्तिर धरेभ्यश्च लाक्षारागनिरतिमध्यानन योश्चान्योन्यगंधसंक्रांतिरिति स्थिते समुत्प्रेक्षा। लोचनेति।
लोचनं च अधरश्च लोचनाधरश्च लोचनाधरं समुद्राभ्राद्यः इति सत्रादेव व्यभिचारज्ञापकान्नाधरशब्दस्य पूर्वनिपातश्च सा कृताहृतश्चेति
विशेषणसमासः लोचनाधरस्य कृताहृतो रागो यया सा तथोक्ता। लोचनयोः कृतः अधरस्य हृतो रागो यस्याः इत्यर्थः पक्षाश्चार्थसंबंधात्सा
मान्यस्य योग्यविशेषणपर्यवसाननियमेनाधिकरणापादानार्थयोः आक्षेपात् तथा चाधरलोचनागुणयोः रागतद्विरहयोः स्थानविपरी
तवृत्तिं कृतवतीत्यर्थः तया वासितेन सुरभिसंक्रान्तिसुरभितेनाननेन विशेषितोऽपि शयितो गंधो यस्याः सा यद्वा वासिताननाचासौ अर्थ
दानेनैव विशेषितगंधा चेति कृतबहुव्रीहिविशेषणसमासः उभयथा आनने संक्रांतस्वगंधा स्वसंक्रांताननगंधा चेति अर्थ एवंभूता

लोचनाधरकृताहृतरागा वासिताननविशेषितगंधा॥ वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने॥६०॥

वारुणी मदिरा परगुणात्मगुणात्मगुणानां व्यत्ययं नु विनिमयं नु वितेने विधत्ते ग्रामादिकवस्तुपरिवृत्तिर्व्यत्ययः बुद्धिपूर्वो दिवस्तुप
रिवृत्तिर्विनिमयः अत्र गोत्रादित्वात्परगुणस्य परगुणशब्दस्य साधुत्वम् सा परगुणो वात्मगुणो वस्तु परगुणात्मगुणो चेति विग्रहः कथंचिद्ग
त्यासोढव्यः उपमानपूर्वपदबहुव्रीहिवत् तथा चायमर्थः परगुणात्मगुणयोः अधरलोचनगुणयोः व्यत्ययं नु वितेने तथा परगुणात्मगुणयोराननगंध
योश्च व्यत्ययं विनिमयं नु वितेने अन्यथा कथमन्योन्यस्मिन्नन्योन्यधर्मोपलंभः संभवतः इति भावः। वनेयोगुणयोः व्यत्ययं नु
विनिमय अत्र लोचनाधररागयोः तदभावयोर्भेदाभेदाध्यवसायादेकत्वव्यावृत्तेर्युक्तिः तन्मूला मतश्चायोक्तिः अनुप्राणि
ता च व्यत्ययविनिमययोरन्यतरकरणोत्प्रेक्षेति संक्षेपः सा च प्रतीयमाना व्यंजकप्रयोगात् नु शब्द स्तु संशये॥६०॥

तुल्येति॥ अक्ष्णोस्तुल्यरूपं अक्षिरूपाकृति योषितः कर्णगं कर्णावतंसीकृतमसितोत्पलं निरूपकारि अनुरूपकारकं विदित्वा त
त्कार्यशोभायाः कर्णांतविश्रांतेनाक्ष्णैवेकृतत्वादिति भावः मदरागः सुहृद्विवत्सलस्य वधूरिवानिष्टनिवारकत्वादिति भावः
लंभितेक्षणरुचिराय तनयनकांतिसन्प्रविभेजे कर्णोत्पलापादनम्प्रविभक्तं विलक्षकरणाद्दक्षिणोद्व्यावर्तयामास तत्तेवि
च्छिन्नतिकरत्वादिति भावः॥६१॥ क्षीणेति॥ अतिपानैः क्षीणयावकरसः क्षीणलाक्षारागोपि कांतस्य दंतपदनसंभृता
शोभायस्य सः बध्वा अधरपल्लवरागोतिप्रतिमां तत्र अतिशाय्यत्रपरप्रत्ययः किंमेति उन्नयेत्यादिना आमप्रत्ययः तद्वि
तस्त्र्यासर्वेविभक्तिरिरव्ययसंज्ञा ईतामाययाविवप्रियाय भोगविन्हमंडितानां कामिन्यनयवानां किमन्यैर्मंडनैरिति भावः

तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरूपकारि विदित्वा॥ योषितः सुहृदिव प्रविभेजे लंभितेक्षणरुचिर्मदरागः॥६१॥
क्षीणयावकरसोऽप्यतिपानैः [illegible]तपदसंभृतशोभः॥ आययावतितरामिव बध्वाः सांद्रतामधरपल्लवरागः॥६२॥
रागकांतनयनेषु नितांतं विद्रुमारुणकपोलतलेषु॥ सर्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः॥६३॥

कांतद

तत्र क्षीणस्यापि सांद्रतेति विरोधात् कांतेत्यादि विशेषणागत्या सांद्रत्वहेतूक्त्या काव्यलिंगानुसंकीर्णो चोत्प्रेक्षा॥६२॥
रागेति॥ वनितानां सर्वगापि सर्वांगव्यापिन्यपि श्रेमासंतेत्यादिना उप्रत्ययः मदश्री रागेण कांतानि नयनानि येषु तेषु वि
द्रुमवदरुणानि कपोलतलानि येषु तेषु मुखेषु दर्पणेष्विव नितांतं ददृशे तिषां नयनादीनां नैर्मल्येन रागाभिव्यक्तिसंभवा
दिति नियमादिति भावः अत्र मदश्री सर्वगापि मुखेष्वेव ददृशे इति विरोधः तस्य मुखविशेषणैः समाधानात्काव्यलिंगानुप्रा
णितविधवदाभासोलंकारः सेचोपयासंमस्यते॥६३॥

बद्ध इति॥ बद्धो कोपेन विकृतिर्याभिस्तास्तथाभूता अपि रामाः कर्म चारुतां तासां सौंदर्यं कर्तृ अभिमततां प्रियत्वा त्यभ्यमुपनिन्ये सौंदर्यं हि विकृतिमपि रोचयइति भावः मधुमदो दयितानां वश्यता विधेयत्वमुपनिन्ये तथा हि सर्व आत्मवर्ग हितमिच्छति अतश्चाहृता स्त्रीत्वात् स्त्रीगुणमुपचकार मधुमदस्तु पुंस्त्वात् पुंसामिति युक्तमित्यर्थः अत्र विकृता अपि अभिमता अपि वश्याइति विरोधस्य चारुतामदाभ्यां समाधानादुभयथापि विरोधाभासो भवन्नर्थांतरन्यासेन संसृज्यते॥ ६४॥ वाससामिति॥ उपनाभि नाभिसमीपे वाससां शिथिलतां ह्रीनिरासं लज्जात्यागं अपदे कुपितानि अस्थानकोपांश्च गुणपक्षे विदधती गुणकोटौ निवेशयंती दोषानपि तान्गुणीकुर्वती इत्यर्थः मदिरा योषितां वचनीयं न नाभिदर्शयेदिति शास्त्रनिषि

बद्धकोपविकृतीरपि रामाश्चारुताभिमततामुपनिन्ये॥ वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः॥ ६४॥ वाससां शिथिलतामुपनाभि ह्रीनिरासमपदे कुपितानि॥ योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयं॥ ६५॥ भर्तृषूपसखि निक्षिपतीनामात्मनः स्फुटमदोद्यमितानां॥ व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु॥ ६६

द्धाचरणं निर्ममार्ज तथा दोषाणामपि वस्त्रशैथिल्यादीनां तदानीं गुणत्वान्न कश्चिद्वचनीयावकाश इत्यर्थः॥ ६५॥ भर्तृष्विति॥ उपसखि सखीसमीपे समीपार्थेऽव्ययीभावः आत्मनो देहान् आत्मा देहे धृतौ जीवे स्वभावे परमात्मनीति वैजयंती। भर्तृषु निक्षिपतीनां भर्तृणामुपरि पतंतीनामित्यर्थः आश्लीनद्योर्नुमिति विकल्पान्नुमभावः कुतः मदोद्यमितानां प्रेरितानां न तु स्वयमिति भावः वनितानामनुरक्तस्त्रीणां वनिता जनिता स्यर्थानुरागा या योषिदिति विश्वः हृदयेषु विफलया अनुचितान्वरणादिति भावः। व्रीडया न स्थितं न विगतं वैफल्यात्सम मदरोषादधिकत्वाच्चेति भावः अत एव वोभय निषेध विरोधः॥ ६६॥ ॥ ॥

रुंधतीति॥नयनानांवाक्यानांचविकाशंप्राकट्यंरुंधतीप्रतिबध्नातीतथापरिरंभेआलिंगनेसादितौसत्तंभितौउभौकरौयस्याःसायु
वतीनांसंबंधिनीक्षीवतामत्ततांकर्त्तीरित्नुः अनुपसर्गात्फुल्लक्षीवकृशोल्लाघाइतिनिपातनात्साधुःतस्यभावःक्षीवतातत
श्चगुणवचनस्येतिपुंवद्भावःबहुगुणेद्वित्वसंख्यावादिभिन्नेंजियाभावेक्तः ललितंविलासमनुजन्नेनुचकारकर्तरिललि
तंव्रीडार्थेकारित्वाद्व्रीडानुकारएवेत्युपमालंकारः॥६७॥योबिदिति॥उद्धतउत्कटोमनोभवेनयोरागःप्रीतिर्यस्याःसायोषि
न्मानवत्यपिदयितस्यांकंययोयतोमानाद्रागोबलीयानितिभावः लाघवदोषंपरिहरतिकारयतीति अनिभृतावपलास
कार्यकारिणीत्यर्थः वारुणीमदिरागुणेषुदोषेषुचविषयेसर्वोद्वंद्वोविभाषयैकवद्भावेःरहस्यविभागंकारयतिखलुनिगू

रुंधतीनयनवाक्यविकाशंसादितौभयकरौपरिरंभे॥व्रीडितस्यललितंयुवतीनांक्षीवताबहुगुणैरनुजह्रे॥६७॥
योषिदुद्धतमनोभवरागामानवत्यपिययोदयितांकं॥कारयत्यनिभृतागुणदोषेवारुणीखलुरहस्यविभेदं॥६८॥
आहितेनुमधुनामधुरत्वेचेष्टितस्यगमितेनुविकाशं॥आबभौनवइवोद्धतरागःकामिनीष्ववसरःकुसुमेषोः॥६९॥

ढ्विषेणःअपेक्षःस्वेतावपिगुणदोषौप्रकाशयंतीत्यर्थः अतोनिढरागप्रकटनंमानत्यागश्चप्रमत्तानांनलाघवमावहत
ति अबुद्धिपूर्वकत्वादितिभावः॥६८॥आहितेति॥मधुनामद्येनचेष्टितस्यरतिव्यापारस्यमधुरत्वेआहितेनुप्राकृससेवमतोहर
त्वेसंप्रसुत्पादितेवायद्वाविकाशंगमितेनुद्भावससेवमाधुर्यप्रकर्षंप्रापितेवाउद्धतरागउद्रिक्तरागअतएवकुसुमेषोः
कामस्यकामिनीष्ववसरःप्रवेशोनवइवाबभौनित्यसंसन्निहितोपिमदनःकामिनीषुमदकृततत्कालिकत्वेष्टमाधुर्योद्रा
गोद्रेकेसत्यपूर्वंवदुद्धतइत्यर्थः संशयानुप्राणितेयमुत्प्रेक्षा॥६९॥ ॥ ॥

मागमन्निति ॥ शंकितनाथा अविश्वस्तपुरुषाः रंतुं मदेन विमूढधियः सत्यः अंबुधिर्नौस्मा ओ इत्यविस्ट इत्यप्रपूर्वो दुस्सेतेः समासेन अपूर्वे
तेक्त्यबितित्यपूर्मागमन्नूनगम्य इतितिमनीषयेतिशेषः गमेर्मा ङि लुङ् न माङ्योगे इत्यङागमनिषेधः योषितः मदिरां च शमनतिमात्रं
नेषुर्नेषुर्नेष्ठ तिस्माकिं तु मदविमोह भयादोषदेव ययुरित्यर्थः तथाहि प्रेमस्नेहः अपदे अस्थाने पि भयान्यनिष्टानि पश्यन्त्युत्प्रेक्षन्ते शंकु
ते इति यावत् शंकाहेतो प्रेम्णि वक्तव्यो पचारः ॥७०॥ चित्तेति ॥ चित्तस्य निर्वृति विधायि सुखकरं विविक्तं रहः विवित्तं रहसि स्मरन्निमि
ति विश्वः मन्मथः मधुमदो मधुमदः शशिभास शुभ्रं दुकिरणाः दयितैः प्रियैः सह संगमश्च व द्भूय नेति निपातनात् सह शब्दप्रयो
गेपि सहार्थे तृतीया एतानि प्रमदानां प्रेम तद्वियोगासहत्वावस्थां संभोगं कामपि भुवं कांचिद्दशां नयंति स्मेत्यवस्थामप्यतिशय

मागमन्मदविमूढधियो नः प्रोज्झ्य रंतुमिति शंकितनाथाः ॥ योषितो नु मदिरां च शमीषुः प्रेम पश्यति भयान्यपदे पि ॥७०॥
चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः ॥ संगतिश्च दयितैः स्म नयंति प्रेमकामपि भुवं प्रमदानां ॥७१॥
धार्ष्ट्यलंघितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये ॥ मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥७२॥

शृंगारावस्थां कीलमयी निनयुरित्यर्थः प्रेमाभिलाषरागश्च स्नेहः प्रेमरतिस्तथा शृंगारश्चेति संभोगः सप्तावस्थाः प्रकीर्तिताः इ
त्युक्तं रसरत्नाकरे प्रेमादिदृक्षारम्येषु तच्चिंताप्यभिलाषुकः रागस्तत्संगबुद्धिस्यात् स्नेहस्तत्प्रवणा क्रिया तद्वियोगासहं प्रेमरति
स्तत्सहवर्तनं ॥ शृंगारस्तत्समं क्रीडा संभोगः सप्तधा क्रमादिति ॥७१॥ क्रीडावस्थामेवाह ॥ धार्ष्ट्येति ॥ धार्ष्ट्येन प्रागल्भ्येन लंघितय
थोचिता भूमिर्मर्यादा यस्मिंस्तथोक्ता चुंबनताडनभणितसीत्कारपुरुषायितादौ स्वयमुन्मुखं खलु वर्तितमिति भावः निर्दयं य
था विलुलितानि आकर्षणाकुलीकृतान्यलकमाल्यानि यस्मिंस्तस्मिन्मानिनीरतिविधौ सुरते कुसुमेषुर्मत्तो मत्तः मत्तप्रकार वि
र इति विभ्रमं विजृंभणमाप मत्तः किं न करोतीति भावः कारयितरि कर्तृपचाराद्दुत्प्रेक्षा ॥७२॥

सीधुपानेति॥सीधुपानेनमद्यपानेनविधुरेषुविकलेषुअतएववधूनांवपुःषुअंगेषुनिघ्नतांप्रियपराधीनतामुपगतेषुसत्सु
अधीनोनिघ्नआयत्तइत्यमरः वधूनांसंबंधीरतिरसाहितेषुसुरतस्वादेषु आहितभावंदत्तचित्तंकामिषुईहितंचुंबन
ताडनादिकंचेष्टितंवीतलक्ष्यंनिर्विषयमस्थानकृतमपीत्यर्थः रजनीरागिणांस्खलितमपिशुभत्तोभवत इतिभावः विरो
धालंकारः॥७३॥ अन्योन्येति॥ अथसुरसखवांद्वंद्वसविवागंधर्वाः तेषामप्सरसांच अन्योन्यसक्तमनसांपरस्परा

सीधुपानविधुरेषुवधूनांनिघ्नतामुपगतेषुवपुःषु॥ईहितंरतिरसाहितभावंवीतलक्ष्यमपिकामिषुरेजे॥७३॥
अन्योन्यरक्तमनसामपिबिभ्रतीनांचेतोभुवःसुरसखाप्सरसांनिदेशं॥वैबोधिकध्वनिविभावितपश्चि
माधीसासंहृतैवपरिवृत्तिमियाययात्रिः॥७४॥ ॥ ७४ ॥ ॥

नुरक्तमनसांचचेतोभुवःकामस्यनिदेशमाज्ञांबिभ्रतीनांस्मरविधेयानांतासुसुरतमाणास्वेवेत्यर्थः पश्चीचानादूरे
इतिपश्ची विबोधविबोधनंशीलमेषांवैबोधिकाः वैतालिकाः शीलमितिठक् तेषांध्वनिभिः मंगलरवैः विभावि
तोज्ञापितोपश्चिमोधोवरमभागोयस्याः सातथोक्तासात्रिःसंहृतासंक्षिप्तेवैसुरतेक्षणकृखीनांभूयानपिका
लोलघीयानिभवतीतिभावः परिवृत्तिर्विवृत्तिमियायप्रभातकल्पाभूदित्यर्थः॥७४॥ राम॥ छ छ॥

निद्रेति॥ निद्रया विनोदितोऽपनीतो नितांतो योऽरत्याः श्रमः सेयैस्तेषां आयामिभिः आयामवद्भिः दीर्घैर्मंगलनिनादैर्वैबोधि
कध्वनिभिः विबोधितानां यूनां रामासु भाविविरहेणाकुलितासु सतीषु अतएव रतानि लान्येव पूर्वाण्यिलसूर्वाणि तेषां
भावस्तत्सूर्वता तां समदधिरे प्रापुरित्वित्युत्प्रेक्षा। आद्यसुरतव द्वाद्ययनतृ प्रवर्तंत इति भावः यदुत्तरकालदुत्तरकाल
दुर्लभं तदपि स्त्वष्टुयानुभूयत इत्यर्थः॥७५॥ कांतेति॥ सुरतखेदेन निमीलितान्यक्षिणि येन तं कांताजनं स्त्रीसमू
वि५ हं वाहितुं सेवितुमिव खेदापनोदार्थं अंगमर्दनं कर्तुमिवेत्यर्थः संवाहनेत्यभावादेरंगमर्दनमिति विश्वः बाहुप्रय

निद्राविनोदितनितांतरतिक्लमानामायामि मंगलनिनादविबोधितानां॥ रामासु भाविविरहाकुलितासु यूनां
तत्सूर्वतामिव समादधिरे रतानि॥७५॥ कांताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपयानिव मंदमंदं॥
हर्म्येषु माल्यमदिरापरिभोगगंधानाविश्चकार रजनीपरिवृत्तवायुः॥७६॥

त्न इति धातोरण्यंतात्तुमुन् अन्यथा संवाहयितुमिति णिज्ग्रहणं स्यात् मंदं मंदं मंदप्रकारं प्रकारेण गुणवचनस्ये
ति द्विर्भावः कर्मणि धारयवद्भावात्सुपो लुक् समुपयान् संयान् रजनीपरिवृत्तिवायुर्निशावसानमरुत् हर्म्येषु
माल्यानि मदिरा तत्परिभोगो विमर्दश्च तेषां गंधानाविश्चकार बहिः प्रसर्पयामासेत्यर्थः अत्र संवाहितुमिवेत्यु
त्प्रेक्षायां माघगुणप्रतिमिलित मूलत्वात् गुणनिमित्तक्रियायाः फलोत्प्रेक्षा॥७६॥

दधरपल्लवा

आमोदेति॥ आमोदेन मद्यगंधेन वासितासुरभी[कृता]श्चला ईषन्मुक्तत्वात्स्फुरत्पल्लवा ये तेषु निद्रया कषायिता
न्यपटूकृतानि विपाटलानि लोचनानि येषु तेषु कषायस्तुवरे नस्त्री निर्यासे रञ्जकर्मणि तिसुरभावपटौ रक्ते मधुरे लव

16

आमोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु॥ व्यामृष्टपत्रतिल
केषु विलासिनीनां शोभां बबंध वदनेषु मदस्य शेषः॥७७॥

णपि चेति शैवः॥ व्यामृष्टानि पत्राणि तिलकाश्च येषां तेषु विलासिनीनां वदनेषु मदस्य शेषः शोभां बबंध
मंडनान्तराभावे ऽप्यशेषमंडनं बभूवेत्यर्थः क्षीणो मद एव भूषणमासीदिति भावः॥७७॥

कि॰ नं॰
॥९८॥
17

गतवतीति॥ अंगरागो नखक्षतं वासुनखपदेष्वेव लक्ष्यतां दृश्यतां गतवतिसति विमर्दे तन्मात्रावशेषेसतीत्यर्थः
त किंच विंबं तुल्याधराः शाकपार्थिवादित्वान्मध्यमपदलोपी समानाधिकरणसमासइति वामनः॥ समदेर्दयितैः
पीताः पीडिता अतएवातिपाटना ताम्रा आसमंताद्रक्ता बिंबाधरायासां तासामंगनानां संबंधि विरहेणोद्विके

गतवति नखक्षते खलक्ष्यतां मंगरागे समददयितपीतातात्रबिंबाधराणां॥ विरहविधुरमिष्टा सस
खीवांगनानां हृदयमवललंबे रात्रिसंभोगलक्ष्मीः॥७८॥ ॥इतिश्री किरातार्जुनीये महाका
व्ये लक्ष्म्यंके भारविकृतौ सुरयुवतिसंभोगो नाम नवमः सर्गः॥ ॥ र्गः ॥ ॥

नवियोगेन विधुरं विह्वलं हृदयं रात्रिसंभोगलक्ष्मीर्नखपदादिशोभेत्यर्थः इष्टा आसाससखीव सखीनि
पुणसहचरीवावललंबे धारयामास प्रियोपभोगचिन्हवल्लोकेन कालासाः कथंचिद्विरहमसहंतइत्यर्थः
श्रुतिपूर्णोपमालंकारः मालिनीवृत्तं॥७८॥ ॥ ॥इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचि
तायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां नवमः सर्गः समाप्तः॥ ॥ ॥

१००

समाप्तोनवमः सर्गः ॥ ॥

१८

10

॥ किरातस्य दशमसर्गप्रारंभः ॥

किर॰ टी॰ ॥१॥ मम्रि ५

श्रीगणेशाय नमः ॥ अथागंतुकसहजशोभासंपन्नतया समग्रसाधनाः स्त्रियो मुनेर्यः मुनिमनःप्रलोभनार्थं प्रास्थन्नित्याह ॥
अथेति ॥ अथ प्रभाते परिमलजां संभोगसंभूतां शोभाम् अवाप्य संभोगः स्यात्परिमलो ऽ इति वैजयंती संभोगात् । स्त्रियः शोभंत इति
घंटापथः एतेनागंतुकशोभासंपत्तिरुक्ता ॥ अत एव सुरतादिवर्णनस्य प्रस्तुतोऽपि योगित्वं चोक्तं ॥ अथ सहजशोभासंपत्ति-
मंड्रि॰ माह ॥ अवयवेति । अवयवैस्तनादिभिर्दीपिता मंडनश्रीः प्रसाधनशोभा याभिः स्ताः रम्यहावा मनोहरविलासाः स्त्रियः वसतिं शिबि-
ना॰ रं विहाय सुरपतिसूनोरर्जुनस्य विलोभनाय जग्मुः । अत्रावयवदीपनतया प्रसिद्धस्य मदनस्य दीप्यत्वात् संबंधेपि संबंधोक्त्यभीधाना ५

अथ परिमलजामवाप्य लक्ष्मीमवयवदीपितमंडनश्रियस्ताः ॥ वसतिमभिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः ॥१॥
द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवेन तासां ॥ अवनिषु चरणैः पृथुस्तनीनामलघुनितंबतया चिरं निषेदे ॥२॥

४ लंकार॰ वसौंदर्यातिशयद्योतनार्थं सातिशयोक्तिः ॥ अस्मिन्सर्गे पुष्पिताग्रा वृत्तं अयुजि नयुगरेफतो यकारो युजि च नजौ जर-
गाश्च पुष्पिताग्रा इति लक्षणात् ॥१॥ द्रुतेति ॥ गगनपरिक्रमलाघवेन गगनगमनवेगेन द्रुतपदं यथा अभियातुमिच्छ-
नो॰२ तीनां किं च पृथुस्तनीनां तासामप्सरसां चरणैरलघुनितंबतयाऽवनिषु चिरं निषेदे तस्थे अभ्यासपाटवेन मनसा त्वरमाणा-
नामपि तासां स्तनजघनभाराच्चरणा नोत्तस्थुरित्यर्थः ॥२॥ २॥ २॥

निहितेति ॥ निहिताः सरसयावकाः सांद्रलाक्षारागा येषु तैः वधूनां चरणतलैः कृतपद्धतिः कृतरेखा अत एवारुणीकृताः नीलोत्पलाः नि
दुर्वादानि उत्पलावल्ल भारख्यास्त्रणविशेषाश्च यस्याः सा उत्पलावल्लेश आप्रोक्ताः इति हलायुधः उत्पलपावलीरस्त्रणानि इत्तिर्लिस्वामी । आद्यणावरि
भ्राजक उत्पलनां रथड्डिर्देशः धरित्री शाङ्गोपैरिन्द्रगोपाख्यैः कीटकैरविरलं निविडं यथा तथा तता व्याप्ता वेत्सु स्त्रक्षा अंबभासे ॥ ३ ॥ ध्वनि
रिति ॥ अगविवरेषु नगगंभीरेषु गुहास्वित्यर्थः प्रतिरवैः प्रतिध्वनिभिः विततः संपूरितः पृथुभिः रशनागुणानां सिंजितैः स्वनितैरनुयातो नु
गतो मिलित इति यावत् स्वनितैः कल्पवर्णानां भूषणानां नूपुरसिंजितमिलनसमरः नूपुराणां जनितध्वनिः मुखराः शब्दायमानाः समुत्सुकाः उत्कं

निहितसरसयावकैर्बभासे चरणतलैः कृतपद्धतिर्वधूनां ॥ अविरलविततेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ॥ ३ ॥
ध्वनिरगविवरेषु नूपुराणां पृथुरशनागुणसिंजितानुयातः ॥ प्रतिरवविततो वनानि चक्रे मुखरसमुत्सुकहंससारसानि ॥ ४ ॥
अववयपरिभोगवंति हिंस्रैः सहचरितान्यमृगाणि काननानि ॥ अभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ॥ ५ ॥

ठिताश्च हंसाः सारसाश्च येषां तानि वनानि चक्रे । अत्र हंसादि मुखरसमुत्सुकीकरणवस्तुनां तेषां मयूरादिध्वानैः सादृश्याद्धंस
सारसांतरकूजितभ्रांतिप्रतीतेः भ्रांतिमदलंकारो व्यज्यते ॥ ४ ॥ अववयेति ॥ अववयाः पुष्पादिच्छेदनं परिभोगः उपभोगस्तद्वंति
हिंसंति हिंस्राः घातुकाः व्याघ्रादयः शारारुर्घातुको हिंस्र इत्यमरः तैः सहचरिताः सहचरंतः कर्तरि क्तः मतिबुद्धीत्यादिसूत्रे चकारा
त्तु प्रशसितादिवत् वर्तमानार्थता अन्यहिंसेतरे मृगा हरिणादयो येषु तानि सहचरितान्यमृगाणि काननानि तथा समुदितेन स्वसा
ध्वसेन विक्लवं विवशं चेतश्च वधूभ्यः क्रियाग्रहणमपि कर्तव्यमिति संप्रदानत्वाच्चतुर्थी अभितो मुनिं अभितः आसन्नं समूचया
मासुरित्यर्थः अववयादिलिंगाच्चतुष्टयेनासन्नो मुनिरित्यनुमीयत इत्यर्थः ॥ ५ ॥

नृपतिरिति॥ नृपतिरेव मुनिस्तस्य परिग्रहेण अधिष्ठानरूपेण हेतुना साभ्रूः सुरसरिद्विवानां गंधर्वाणां अप्सरसां च तेजो जहार तदाश्रमप्रदेशा
देव निस्तेजस्काः भुवन्नित्यर्थः कथं मानुषेण मानुषं तेजो निरस्तमिति नवाच्यं हि यस्मादुपहितपरमप्रभावधाम्नी सामर्थ्ये तेजस्वी ये
स्तेषां जयिनां नयाव नशीलानां महतामिति पाठे महतामुच्यते ठानां तपसाम लंघ्यम साध्यं नास्ति॥ ६॥ स च कितमिति॥ विस्मयाकु
लाभिस्ताभिस्त्रीभिः शुचयः सिकताया सु पदेरवाभिव्यक्ता क्रियाग्य स्तित्यर्थः क्षितिषु उपहितानि विन्यस्तानि केतुरथांगलांछि
तानि रेखास्वरूपं ध्वजच क्राण्येव चिन्हानि येषु तानि अत एवातिमानुषाणि तानि जिष्णोः पदानि सचकितमिव ददृशिरे दृष्टानि अ

नृपतिमुनिपरिग्रहेण साभ्रूः सुरसरिद्विवाप्सरसां जहार तेजः॥ उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलंघ्यमस्ति॥ ६
स च कितमिव विस्मयाकुलाभिः शुचिसिकतास्व तिमानुषाणि ताभिः॥ क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथांगलां
छनानि॥ ७॥ अतिशयितवनांतरद्युतीनां फलकुसुमावचयेपि तद्विधानां॥ ऋतुरिव तरुवीरुधां समृध्या युवतिजनैर्जगृहे मुनि १

त अद्भुतवस्तुदर्शनाद्भयविस्मयौ भवत इति भावः॥ ७॥ अतिशयितेति॥ अतिशयिताः अतिक्रांताः वनांतराणां द्युतिर्याभिस्ताः सां कुतः
फलानां कुसुमानां चावचये पि लवनेपि सैव विधा प्रकारो यासां तद्विधानां तथैव समग्राणामित्यर्थः तरूणां वीरुधां च समृध्या लिंगेन
युवतीजनैः मुनिप्रभावो ऋतुरिव जगृहे निश्चितः कारणतयेति शेषः॥ ८॥ ८॥ ८॥

न२

भ्रष्टेति ।। ससलिलमार्द्रं यद्वल्कलं तदेव भारस्तेन भुग्नः शाखो नम्रशाखो । अत एव मर्दितकिसलयो विलुलितपल्लवो कृ।तिचेलिप्रति
षेधान्नम्रदेर्गुणाः अशोको वृक्षविशेषः सुरांगनानामप्सरसां संबंधिनि निमधिकां बहुमतिं सज्जनसेवी धन्यो यमिति यया ये न नुसेववे
३ आह। पुकाश्लाघ्यते सा [illegible] सद्गुणानां परिजनितापि गुणायोत्कर्षाय भवतीति शेषः एतेन तासां मुनेः प्रभावदर्शनाद्देवतत्त्वप्रवश्यं गम्य
ते ।।९।। यमेति ।। यमो देशकालाद्यपेक्षया शुद्धिहेतुरहिंसादिः नियमस्तदपेक्षया शुद्धिहेतुस्तपः स्वाध्यायादिस्ताभ्यां हृष्टीकृता या

मर्दितकिसलयः सुरांगनानां ससलिलवल्कलभारभुग्नशाखः ।। बहुमतिमधिकां यया वशोकः परिजनितापि गुणाय सद्गुणानां ।।९
यमनियमकृशीकृतस्थिरांगः परिददृशे विधृतायुधः सताभिः ।। अनुपमशमदीप्तितागरीयान्कृतपदपंक्तिरथर्वणेव वेदः ।।१०।।
शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः ।। शिखरनिचयमेकसानुसद्मा सकलमिवापि दधन्महीधरस्य ।।११।।

न्यपि स्थिराणि दृढानि अंगानि यस्य सः विधृतायुधः अत एव तपः क्षात्रयुक्तः सोऽर्जुनः शमः शान्तिरभ्युदयको दीप्तिस्ता उग्रता अ
भिचारको दीप्तिस्ताभ्यामनुपमाभ्यां गरीयान्गुरुः अथर्वणा वशिष्ठेन कृता रचिता पदानां पंक्तिरानुपूर्वी यस्य स वेद[illegible]तुर्थेव
इत्यर्थः अथर्वणस्तु सूत्रात्तु रोचवसिष्ठकृत इत्याम्नामः स एव ताभिः स्त्रीभिः परिददृशे दृष्टः ।।१०।। अथ वस्तुभिः स्तमेवविं
शिनष्टि ।। शशधरेत्यादिभिः शशधरश्चन्द्र इव लोचनाभिरामैः गगनविसारिभिरंशुभिः तेजोभिः परितो व्याप्तः अंबरवमूर्द
कं सानुसद्म यस्य स एकदेशस्थोपीत्यर्थः महीधरस्येन्द्रकीलस्य सकलं शिखरनिचयमपि दधदाचरण्वन्निरुपमा वे
सुसेक्षा ।।११।।

सुरेति॥ पुनः सुरसरिति गंगाकूले परं तपोऽधिगच्छन् अर्जुनः फलाभिलाषेणेति शेषः हविरभिलषन्नित्युपमानविशेषणसामर्थ्या
त्तथाविधृतः पिशंगबृहज्जटाकलापो येन सः अत एवोपवेदि वेद्यां विभक्त्यर्थेऽव्ययीभावः शिखासमूहैर्ज्वालाजालैः विततः हविरा
ज्यादिकं समभिलषन् जातवेदा हिरण्यं यस्मादिति जातवेदाः वह्निरिव स्थितः॥१२॥ सदृशमिति॥ पुनराकृतेर्वपुषः आकृतिः
कथिता रूपे सामान्यवपुषोरपीति विश्वः सदृशमतनुं महान्तं प्रयोगं दधत् तदनुगुणां प्रयत्नानुकूलां अपरैरन्यैरलंघ्यां कर्तु
मशक्यां क्रियां व्यापारं दधत् क्रियानुरूपं क्रियानुगुणम् अलघु बहु तपो दधत् तथा विजयवतीं सर्वोत्कर्षवतीं विजयफलां वा त

3

सुरसरिति परं तपोऽधिगच्छन् विधृतपिशंगबृहज्जटाकलापः॥ हविरिव विततः शिखासमूहैः समभिलषन्नुपवेदि जातवेदाः॥१२
सदृशमतनुमाकृतेः प्रयत्नं तदनुगुणामपरैः क्रियामलंघ्यां॥ दधदलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिं॥१३॥
चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या॥ ससचिव इव निर्जनेऽपि तिष्ठन् मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः॥१४॥

पः समां तपोरूपां समृद्धिमैश्वर्यं दधत् अत्र पूर्वं प्रस्तुतस्य विशेषणतया स्थापनात् प्रथमे एकावल्यलंकारः यथापूर्वं परस्परवि
शेषणतया स्थापने एकावलीति सर्वस्वकारात्॥१३॥ चिरनियमेति॥ पुनश्चिरनियमेन दीर्घकालतपसा कृशः क्षीणांगोऽपि शै
लसारः उपमानपूर्वपदो बहुव्रीहिः शमनिरतोऽपि प्रकृत्या स्वभावेन दुरासदो दुर्धर्षः निर्जने विजने देशे तिष्ठन्नपि ससचिवः सपरिवा
र इव किं च मुनिरैश्वर्यरहितोऽपीत्यर्थः त्रयाणां लोकानां भर्तुः त्रिलोकभर्तुरिन्द्रस्य तद्धितार्थेत्यादिना उत्तरपदसमासः तुल्य
रुचिः समतेजाः अपिशब्दः सर्वत्र विरोधद्योतनार्थः स च मुनिरनर्घ्यमहिमत्वेन निरस्त इति विरोधालंकारः विरोधाभासत्ववि
रोधवदिति सर्वस्वात्॥१४॥

तनुमिति॥ अवजितेति। रस्ते त्रैलोक्यानां सारधाम्नीं सखे तं जसि यया तां अनुपश्येत्यादिना श्रीपूज्याणां भुवनानां समाहारस्त्रिभुवनं तद्धि
तार्थे साऽस्मिन्ना समाहारार्थे तत्पुरुषः पात्रादिवा स्त्रीत्वप्रतिषेधः तस्य गुप्तौ रक्षणे सहं समर्थं पश्यायन् तनुं मूर्त्तिं विलोकयंस्यः अ
मरस्त्रियः विजयफले जयार्थे तपोधिकारे तपोनुष्ठाने अस्या तुं नस्यय लं विफलं अवययुः मेनिरे त्रैलोक्याधिपत्यादि महाफलस्सा
धनसमर्थस्य तु तत्फलाभिलाषो मतमातं गामास भाग्योचित तस्य कण्ठीरवस्य जीर्णोलतृणं चर्वणोत्कण्ठवनश्यो भामावहतीति भावः अत्र
विशिष्टतनुविलोकनस्य स्त्रीविशेषणे वैफल्यजनना नहेतुत्वात्पदार्थहेतुकः काव्यलिंगमलंकारः॥१५॥ मुनीति॥ प्रतनुबला
न्युत्कृष्टसाराणि तपांसि अधितिष्ठतो नुतिघतः मुनीन् दनुतनयान्द्रानवीक्ष्य सद्यस्तत्क्षणं प..विविलोभ्याकृष्य विदारानु कुलिशभृ

तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयंस्यः॥ अवययुरमरस्त्रियोऽस्य यत्नं विजयफले विफलं तपोधिकारे॥१५॥
मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि॥ अलघुनि बहु मेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगं॥१६॥
अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन॥ प्रसभमवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः॥१७॥

ताः शक्रेण अलघुनि पदे स्थाने विहितं दत्तं स्वं स्वकीयं नियोगमधिकारं ताः स्त्रियो बहु यथा तथा मेनिरे निकृष्टपदवर्त्तिनां उत्कृष्टपद
लाभो महद्बहुमानमूलमिति भावः विलोभ्य मेनिरे इत्यन्वयः यद्वा विलोभ्य विलोभं कारयित्वा विहितं शक्रेणेत्यन्वयात्समान
कर्तृकत्वनिर्वाहः॥१६॥ अथेति॥ कृतकविलोभनं कृत्रिमरंजनं विधित्सौ विधातुमिच्छौ विधाविति विपूर्वाद्धधातेः सन्नंताद्दुप्रत्य
यः युवतिजने हरिसूनोरर्जुनस्य दर्शनेन विनन्मा कामः प्रसभं बलात् अव[redacted]ततार तदेव तत्परं विषयितुमागतस्य स्वयं
पन्मुनिवचनप्रवृत्ताः स्त्रियः तेन वंचिता इत्यर्थः युक्तं चैतत् हि यस्मान्मधुरा मनोहरा यौवनश्रीर्मनो हरति बलादिति शेषः॥१७॥

सपदीति॥ सपदि द्विवधूनां निदेशात् नियोगात् ध्वनिता नादिता मनोरमा वल्लक्यो वीणाः मृदङ्गाश्च यैस्तैर्हरिसखैर्गन्धर्वैर्वियति व
नेव युगपत्तु गणस्य ऋतुषट्कस्य सन्निधानमाविर्भावो यथाय यथार्थं यथा स्वमसंकरेणेत्यर्थः यथास्वं यथो यथमिति निपातः विते
ने वितस्तेरुद्दीपनसामग्री संपादितेत्यर्थः॥१८॥ वर्षाक्रमेण ऋतून् वर्णयति॥ सजलेत्यादि॥ सजला जलधरा यस्मिन् तत् नभो वि
रेजे तडितो लता इव तासां रविः प्रभा विहृतिं विलसनमियाय तथा व्यवहितरतिविग्रहैः प्रकंपितप्रणयकलहैः जलगुरुभिः जलभा
राद्गंभीरैरित्यर्थः स्वनितैर्गर्जितैर्दिगन्तरेषु वितेने वितनैरभावि भावे लिट् अकर्मकत्वं तु विवक्षितत्वात् अत एव दिगन्तरेष्वि

सपदि हरिसखैर्वधूनिदेशात् ध्वनितमनोहरवल्लकीमृदङ्गैः॥ युगपदृतुगणस्य संनिधानं वियति वने च यथायथं वितेने ॥१८
सजलजलधरं नभो विरेजे विवृतिमियाय रुचिस्तडिल्लतानां॥ व्यवहितरतिविग्रहैर्वितेने जलगुरुभिः स्तनितैर्दिगन्तरेषु॥१९
परिसुरपतिसूनु धाम सद्यः समुपदधन्मुकुलानि मालतीनां॥ विरलमपजहार बद्धबिन्दुः सरजसतामवनेरपां निपातः॥२०॥

त्यधिकरणात् प्रयोगाद्द्वितीयाय द्वा विभक्त्यर्थे व्ययीभावः विवर्जनार्थस्य तस्यार्थे विरोधात् अन्यथा कर्मत्वमेव स्यात् १९॥
परीति॥ परि सुरपतिसूनुधाम अर्जुनाश्रमं प्रति परीति लक्षणार्थे कर्मप्रवचनीययोगात् तथा च सुरपतिसानुधाम्नीत्यर्थः॥ सद्यो मा
लतीनां जातीलतानां सुमनामालती जाती त्यमरः मुकुलानि समुपदधत् जनयन् विरलं यथा तथा बद्धबिन्दुः लघुबिन्दुरूपो निपातो
वृष्टिः अवनेः संबन्धिनीं सरजसतां सरजस्कत्वं अचतुरादिसूत्रेण साकल्यार्थेऽव्ययीभावः समासान्तनिपातः बहुव्रीहिरित्यर्थ
स्तु लक्ष्यते अव्ययीभावदर्शनं प्रायिकमिति केचित् अपजहार [illegible] शमयामासेत्यर्थः॥२०॥ २०॥

सूत्राद्द्वितीया। यद्वा विभक्त्यर्थेऽव्ययीभावो विवर्जनार्थस्य तस्यार्थे वि
रोधात्॥२॥ ॥४॥

प्रतिदिशमिति॥ प्रतिदिशि प्रतिदिशं यथार्थेऽव्ययीभावः शरत्प्रभृतित्वात्समासांतः अभिगच्छतां संबंधाऽकककुभाम्यर्जुनकुसुमानि
३२ इंदुः ककुभोऽर्जुनद्रुम इत्यमरः तेषां वि[illegible]कासेन सुगंधिनाम मोऽर्थः गंधस्येत् तदेकांतग्रहणं प्राथमिकं अनिलेनाभिमृष्टः अत एव
वसविजजन्माकामाक्रांत इत्यर्थः अत एव गलद्धृतिर्गलद्धैर्यः आकुलितः क्षोभितश्च वसतिं प्रति इति भावः ए
वं भूतो जीवलोको नवइवावस्थांतरप्राप्त्या अपूर्व इव विभवो भातीति संभाव्युत्प्रेक्षा॥ २१॥ व्यथितमिति॥

प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाससुगंधिनानिलेन॥ नव इव विभवौ सविजजन्मागतधृतिरा
कुलितश्च जीवलोकः॥ २१॥ व्यथितमपि भृशं मनोहरंती परिणतजंबुफलोपभोगहृष्टा॥ परभृतयुवतिः स्व
नं वितेनेन वनवयो जितकंठरागरम्यं॥ २२॥ ॥ २२ ॥ ॥

व्यथितं दुःखितमपि मनो भृशं हरंती किमुत सुखिनामिति भावः जंब्वा विकारोऽफलं जंबु बार्हतं च फले जंब्वा जंबूस्त्री
च जंबू जांबवं वमित्यमरः जंब्वा वतिलुक् तद्धितलुकि लिङ्ग स्वत्वात् जंबु तत्फलं चेति सामान्यविशेषयोः सहनिर्देशः यद्वा जं
ब्वाः फलमिति विग्रहः इको ह्रस्वोऽङ्यो तस्योपभोगेन हृष्टा अत एव परभृतयुवतिः कोकिलांगनानवनवं नवत्रका
रं यथा तथायोजितेन संपादितेन कंठरागेण कंठमाधुर्येण रम्यं सोभ्यमित्यर्थः स्वनं वितेने चक्रे वर्षाधु स्वपिमधुरः कोकिला
गालवस्येति ह्रस्वः॥ [illegible] तस्य पक्षिणा२ लापाइति प्रसिद्धिः॥ २२॥ ॥

अभीति॥ कदंबवायौ मदमधुरे शिखंडिनां निनादे च मनः अभिभवति सति जिष्णुर्जयनशीलोऽर्जुनः पृथग्जन इव धृतेर्धैर्या
न्न चचाल वर्षे अपितु दृढोपनायनशेऽकुरित्यर्थः हि यस्मान्महतां समाधिभंगः सुकरो न॥२३॥ धृतेति॥ बिसानि वलयानी
व तेषामावलिर्धृता यया सा कुमुदवनमेकं मुख्यं दुकूलमिव तद्वहंती आत्तबाणा धृता झिंटी यया सा आत्तबाणा धृतश
रा च गहृ॥ ण्हीया स्त्रिया शरमिति स्मरणात् बाणो नीलझिंटी चेति वैजयंती नीलझिंटी द्वयो बाणा इत्यमरः॥ शरदधृता
ये वघनेसमयेन वर्षाऋतुनावरेणेति शेषः अमले तले निर्मले तले सरोजं पाणिरिव तस्मिन्नालल्लंबे जगृहे कर्मणि

अभिभवति मनः कदंबवायौ मदमधुरे च शिखंडिनां निनादे॥ जन इव न धृतेश्चचाल जिष्णुर्न हि महतां सुकरः समाधिभंगः॥२३
धृतबिसवलयावलिर्वहंती कुमुदवनैकदुकूलमात्तबाणा॥ शरदमलतले सरोजपाणौ घनसमयेन वधूरिवालल्लंबे॥२४॥
समदशिखिरुतानि हंसनादैः कुमुदवनानि कदंबपुष्पवृष्ट्या॥ श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः॥२५

लिङ्गवधूवरसमागमवत् ऋतुसंधिरशोभतेत्यर्थः आत्तबाणेति झिंटीशरयोर्बाणयोरभेदाध्यवसायात् श्लेषमूलाति
शयोक्तिरूपमा गम्यत इत्यनयोः संकरः॥२४॥ अथ ऋतुसंधिं वर्णयति॥ समदेति॥ समदशिखिरुतानि मत्तमयूरकू
जितानि हंसनिनादैः समेत्य तथा कुमुदवनानि कदंबपुष्पवृष्ट्या समेत्य अतिशयिनीं अतिशयवतीं श्रियं जग्मुः ते
था हि गुणमहतां गुणाधिकानां योगः परस्परसमागमो महते गुणायोत्कर्षाय भवतीति शेषः॥ अत्रापि पद्यां समाल
कारः समालंकृतेति योग्यवस्तुनोरुभयोरिति लक्षणात् सापि च तुर्थैरर्थान्तरन्यासेन स्वसमर्पकेनांगांगीभावेन संकरः॥२५

मधुरस्य

सरजसमिति ॥ प्रियमधुरिह मकरंदः अनित्यत्वात्समासांतः पुल्लिंगोत्तरपदो बहुव्रीहिरिति केचित् नपुंसकलिंगस्यैव मधुशब्दस्य पुरः प्रभृतिपाठात् मकरंदस्यैमाक्षिकस्यापि वाचकः अर्धर्चादिगणपाठात्पुंनपुंसके यो मधुरिति षड्द्रालीमुपांतिके यानि [illegible]या निकरंबकुसुमानि तेषां रेणुभिः कीर्णं व्याप्तं किं च स्वतापि सहरजसा सरजसं नवसरजसक इति भावः साकल्ये अव्ययीभावः अचतुरेत्यादिना निपातः केतकीनां प्रसवं पुष्पं अपहाय विनीलबंधनानि मलिनवृंतानि असनानि प्रियकपुष्पाणि मकरंदभरितानीति शेषः सर्जकासनबंधूकपुष्पप्रियकजीवका इत्यमरः मलिनयति स्म यथा वृंतादन्यत्रापि मालिन्यं स्यात्तथापि मधुलोभा भृ

सरसिजसमपहाय केतकीनां प्रसवमुपांतिकनीपरेणुकीर्णं ॥ प्रियमधुरसनानि षट्पदाली मलिनयति स्म विनीलबंधनानि ॥ २६ ॥
मुकुलितमतिशय्य बंधुजीवं धृतजलबिंदुषु शाद्वलस्थलीषु ॥ अविरलवपुषः सुरेंद्रगोपा विकचपलाशचयः
श्रियं समीयुः ॥ २७ ॥ २७ ॥ ॥ २७ ॥ ॥ २७ ॥

द्यामासेत्यर्थः नहि मध्वासक्तो मधुलोभेति कनिष्ठुष्वासं जतीति भावः ॥ २६ ॥ मुकुलितामिति ॥ धृतजलबिंदवो यासु तासु स्थलीषु शाद्वलप्रदेशेषु अविरलवपुषः स्थूलमूर्तयः सुरेंद्रगोपाः मुकुलितं मुकुलीकृतं बंधुजीवं बंधुजीवं मुकुलमित्यर्थः बंधूको बंधुजीवक इत्यमरः अतिशय्य अतिक्र[illegible]म्य विकचपलाशचयं विकसितकिंशुकराशिं पलाशः किंशुकः पर्ण इत्यमरः तस्य श्रियं तत्सदृशीं श्रियमित्यर्थः अत एव निदर्शनालंकारः समीयुः प्रापुः ॥ २७ ॥

शाद्वल २

कर

अथहेमंतवर्णनमाह। अविरलेति॥ अविरलानि घनानि फलिनीवनानां प्रियंगुवनानां प्रसूनानि यस्मिन्सः। प्रियंगुः फलिनी फली इत्यमरः। कुसुमितैः कुंदैः माघ्यकुसुमैः सुगंधिर्गंधवहो यस्मिन्सः। माघ्यं कुंदे रक्तकस्तूरां धवाहानिलाशुग इत्यमरः। शैशिराणामपि कुंदानां हेमंते प्रादुर्भावाद्विरोधः। विरलतुषारकणः इति प्रारंभोक्तिः। तुषारकालः हेमंतः चिराय असमयजं अकालसंभवं गुणं उत्कर्षं लेभे॥२८॥ निचयिनीति॥ चयिनी उपचयवती लवलीलतानां विकासे पुष्पविजृंभणे तथा लोध्रसमीरणे च हर्षं जनयति स तिपांडुसूनुर्विकृतिं नोपययौ कुतः हि यस्मात् जिगीषूणां तेतु मिच्छूनां चेतः नयान्नीतेर्न चलति न हिक्रोधाक्रांतं चेतसिभ्रंगा

अविरलफलिनीवनप्रसूनः कुसुमितकुंदसुगंधिगंधवाहः॥ गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः॥२८
निचयिनीलवलीलताविकासे जनयति लोध्रसमीरणे वहर्षं॥ विकृतिमुपययौ न पांडुसूनुश्चलति नयान्न जिगीषतां हि चेतः॥२९
कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिंधुवारः॥ सुरभिमुखहिमागमांतशंसी समुपययौ शिशिरः स्मरैकबंधुः॥३०

नं रस्यावकाशः तद्विरोधित्वात् द्रोषस्येति भावः॥२९॥ कतिपयेति॥ कतिपयैरेव सहकारपुष्पैः चूतकुसुमैः रम्यो न तु वसंत वत्समग्रैः नापि हेमंतवत्तद्विरहितैरिति भावः॥ तनुतुहिनः न तु हेमंतवद्बहुतुहिनो नापि वसंतवद्विरलतुहिन इति भावः अल्पा नि कतिपयानि विनिद्राणि कतिपयानि सिंधुवाराणि निर्गुंडीकुसुमानि यस्मिन्सः अत्रापि सहकारवदभिप्रायो द्रष्टव्यः सिंधुवारे द्रसुरसो निर्गुंडीन्द्राणिके सपि च्यूत्यमरः इत्यसुरभिमुखं वसंतप्रारंभं हिमागमांतं हेमंतावसानं च शंसति सतथोक्तः स्मरस्यैकबंधुः उपकारिउभयत्र तु घर्मसंपत्तियेति भावः शिशिरः समुपाययौ॥३०॥ ॥

अथ वसंतप्रारंभमाह। कुसुमेति॥ कुसुमानां नगा वृक्षाः तेषां वनान्युपेतुमारोढुं कामो यस्याः सा लुंपेत्तुं चश्यमनः तुं काममनसोरपीति मकारलोपः वसंतलक्ष्मीः किसलयिनीं पल्लविनीं चूतशाखामिवेति भावः अवलंब्यावष्टभ्यारोढुमशक्यात्वादिति भावः क्वण
त्सिंजितमानमलिकुलं नूपुरमिव यस्याः सा तथोक्तावती अलिकुलवन्नूपुरमन्यजनलिनीवनेषु पदं निरासेद धेनेषु प्रथमं प्रादु
रासीदित्यर्थः उपसर्गाद्दस्यतीति वचनादात्मनेपदं अत्र वसंतलक्ष्मी विशेषणसाम्यादप्रस्तुतनायिकाव्यवहारसमारोपात्समा
सोक्तिरलंकारः॥३२॥ विकसितेति॥ विकसितो विश्लिष्टः कुसुममेवाधरो यस्मिन्कर्मणि तद्यथा तथा हसंती स्मयमानां कुरव

विकसितकुसुमाधरं हसंती कुरवकराजिवधूं विलोकयंतं। ददृशुरिव सुरांगना निषण्णं सशरमनंगमशोकपल्लवेषु॥३२॥
कुसुमनगवनान्युपेतुकामा किसलयिनीमवलंब्य चूतयष्टिं। क्वणदलिकुलनूपुरं निरासे नलिनवनेषु पदं वसंतलक्ष्मीः॥३१॥
मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन। अलिकुलमलकाकृतिं प्रपेदे नलिनमुखांतविसर्पि पंकजिन्याः॥३२॥

करकाजिरिव वधूस्तां विलोकयंतं कामुकतयेति भावः अत एवाशोकपल्लवेषु निषण्णमपल्लवसंस्तरे स्थितमित्ति यावत् शरं सयति
शेषः सशरं नित्यविजयित्वादिति भावः इत्थं शृंगारयोरेकार्थभूतमनंगं सुरांगनाददृशुरिवेत्युत्प्रेक्षा अशोकाद्यवलोक
नान्मदनसाक्षात्कारादिव महात्मनः क्षोभस्तासामासीदित्यर्थः अत्र रूपकोत्प्रेक्षयोः संसृष्टिः॥३१॥ मुहुरिति॥ अ
नुपतता अनुधावता दक्षिणानिलेन मलयमारुतेन मुहुर्विधूयमानमेव विरचिता संहतिर्येन तत्संभूतमित्यर्थः पंक
जिन्याः नलिनं मुखमिवत [redacted] स्यांतर्विसर्पि प्रांतचारि अलिकुलं कर्तृ अलकाकृतिमलकसादृश्यं प्रपेदे॥३२॥ ॥

श्वसनेति॥षट्पदे नालिना शालललतासर्जतरु शाखावावधूरिव शालललतावधूः प्राकारो वरणः शालः शालः सर्जतरुः स्मृत इत्यमरः श्वसनेन वायुना श्वासेन च चलितः पल्लवो ऽधरोष्ठ इव पल्लवाधरो यस्मिन् ओलोष्ठयोः समासे वा पररूपं वक्तव्यम् मधुनामकरंदेन मद्येन च सुरभिणि पुष्पमुख इव नवं यथा तथा विहितेर्ष्याकृतकोपमिव लिङ्ग्या विशेषणं तथा वधूर्नयंती कंपयंती धूञ् प्रीणोर्नुक् च वक्तव्य इति नुगागमः चुचुंबे चुंबिता अत्र श्वसनशब्दार्थयोर्मधुशब्दार्थयोश्च भेदाध्यवसायश्लेषमूलातिशयोक्तिः सा चोपमांगमिति तयोः संकरः॥३४॥ प्रभवतीति॥ परः शत्रुस्तदा तस्मिन् काले विजेतुं न प्रभवति न शक्नोति यदा जितेंद्रियत्व त्वेंद्रियजयः
याख्या आत्मरक्षा भवति विद्यते तथा हि अवजितभुवनः त्रैलोक्यविजयी पुष्पमासो वसंतः सिततुरगे ऽर्जुने विषये विजयं न

श्वसनचलितपल्लवाधरोष्ठे नवविहितेर्ष्यमिवावधूर्नयंती॥ मधुसुरभिणि षट्पदेन पुष्पे मुख इव शालललतावधूश्चुचुंबे॥३४॥
प्रभवति न तदा परो विजेतुं भवति जितेंद्रियता यदात्मरक्षा॥ अवजितभुवनस्तथा हि लेभे सिततुरगे विजयं न पुष्पमासः॥३५॥
कथमिव तव संमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य॥ इति विरचितमल्लिकाविकासः स्मयत इव स्म मधुं निदाघकालः॥३६॥

लेभे अतो जितेंद्रिया दुर्जया इत्यर्थः विशेषणसामान्यसमर्थनरूपोर्थांतरन्यासः॥३५॥ अथ ग्रीष्मं वर्णयति॥ कथमिति॥ विरचितमल्लिकाविकासो निदाघकालो ग्रीष्मः ऋतुभिर्वर्षादिभिः समं मुनिनावधीरितस्य तिरस्कृतस्य तव संमतिः लोके योग्यत्वेनानुमतिः कथमिव कथं वा भवित्री न भविष्यतीति भावः इति इत्थं मधुं वसंतं चैत्रे दैत्ये च वसंते च जीवे शोके मधु स्मृत इति विश्वः स्मयते
२ स्म च जहास किमु इत्यु त्प्रेक्षा लट् स्मे इति भूतार्थे लट् प्रहासस्य शुभ्रत्वेन कविप्रसिद्धिः मल्लिकाविकासहासत्वाध्यवसायः अत्र ऋतुभिः सममवधीरितस्येत्यत्रा भेदाध्यवसायमूला सहोक्तिरलंकारः संबंधभेद भिन्नस्यावधीरणस्याभेद तयाध्यवसायात्तदेवावधीरणं सस्संमतिह्रासस्य योत्प्रेक्षायां चोरं गांगीभावेन संकरः॥३६॥

बलवदिति॥ बलवत्सबलमपि मिथो विरोधि परस्परस्पर्धि बलं सैन्यं वरूथिनी बलं सैन्यमित्यमरः विपक्षनिर्जयाय शत्रुपराजयाय शत्रून्जे
तुमित्यर्थः नप्रभवति न शक्नोति स एव तुमर्थयोगे चतुर्थी किं तेन यस्मात्कारणाद्भुवनानां परिभवी जेतापि जिघत्सीत्यादिना इनिप्रत्ययः ऋतु
गणः तदानीं तमर्जुनं क्षणमपि नो न मनीचकार उन्मनसमुत्सुकमित्यर्थः नञ्चकार अभूतमनश्चक्षुरित्यादि च्वौ अभूततद्भावे च्विप्रत्ययः॥ स
लपश्च विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः अलंकारः॥३७॥ एवं तटस्थोद्दीपनसामग्री विफला जातेत्युक्त्वा संप्रति विपरीता चेत्या
ह। श्रुतीति। सहायैस्तासां सहचरैर्गन्धर्वैः कृतमिति शेषः न लोकेत्यादिना षष्ठीप्रतिषेधः कर्तरि तृतीया श्रुतिसुखं श्रोत्रमधुरं उपवीणितं
वीणाया उपगानं सत्यापपाशेत्यादिना वीणाशब्दाद्णिच् ततः अविरलैर्भूयोभिः लाञ्छनैः पूर्वोक्तैः फलकुसुमादिभिश्चिह्नैः हारिणो मनोह

बलवदपि बलं मिथो विरोधि प्रभवति नैव विपक्षनिर्जयाय॥ भुवनपरिभवी न यत्तदानीं तमृतुगणः क्षणमुन्मनीचकार॥३७॥
श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः॥ अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः॥३८॥
न दलति निचये तथोत्पलानां न च विषमच्छदगुच्छयूथिकासु॥ अभिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि॥३९॥

राः कालाः वसन्तादय ऋतवः अविहिता अकृता हरिसूनोरर्जुनस्य विक्रिया मनोविकृतिर्यैस्तानि तथाभूतानि सन्ति नपुंसकमनपुंसके
नेत्यादिना नपुंसकैकशेषः त्रिदशवधूषु मनोभवं वितेनुः सोऽयं परप्रहारार्थमुद्यतमायुधं स्वात्मानमेव प्रहरतीति न्यायवज्जातं इत्यर्थः भावः
अत्र अनुत्पन्नविक्रियार्थे स्त्रीणां विक्रियारूपानर्थोत्पत्तिकथनाद्विरूपकार्योत्पत्ती यो विषमालंकारः तथा च सूत्रं विरूपकार्यानर्थयोरुत्पत्तिरूप
संघटना विषमालंकार इति॥३८॥ तटस्थवदालंबनगुणोऽपि विपरीतोऽभूदिति श्लोकद्वयेनाह॥ नेत्यादि॥ आसां लोचनानि ह
तथा रितनयावयवेषु यथा दलति विकसति उत्पलानां निचये रतिं नैवेलेभिरे न प्रापुः तथा विषमच्छदगुच्छाः सप्तपर्णस्तबकाः यूथिकाः
मल्लिकास्तासु चाभिरतिं नोपलेभिरे सप्तपर्णो विशालत्वक् शारदो विषमच्छद इत्यमरः तथा रमणीया आसां तदवयवानामित्यर्थः रतिब
हुप्रीतिरुक्ता॥३९॥

अपि २ प७

अथैमनःसंगं सूचयति॥मुनिमिति प्या:स्त्रियःकमनीयता सौंदर्यं सैव गुणस्तेन मुनिम स्मितं अभिमुखतां वश्यतां निनीषवोनेतुमिच्छवो समययुः तासां समुनिरेवमदनमुपदधे जनयामास तथाहि प्रयोजनानामुद्दिश्यानां गतिः परिणतिः दुरधिगमा हि दुर्ज्ञेया खलु अतः कचिदङ्गवंत्तं क्वचिन्न भवंतीति भावः॥४०॥अथासां मनुरागमेव कार्यत्वप्रपंचयति॥प्रकृतमिति॥विलासिस विलासंनर्तकीनां संबंधि शिल्पिनिधुनमस्त्ययःन्नत्तिर वनिरेजिभ्यण्वेति नियमः चक्षुः कर्तृ प्रकृतं प्रक्रांतं अभिनेयं अभिनेतव्यं रसभावादिव्यंजकं नानुससार तद्दृष्टमणंयतः तदानुगुण्येनैव दृष्टिप्रयोगनियमादिति भावः तथा प्रविकसदंगुलि वल्लपोज्यहस्तानुसारेण प्रवलदं

मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन॥मदनमुपदधे स एव ताभ्यो दुरधिगमा हि गतिः प्रयोजनानां॥४०॥
प्रकृतमभिससार नाभिनेयं प्रविकसदंगुलिपाणिपल्लवं वा॥प्रथममुपहितं विलासिचक्षुः सिततुरगे न चचाल नर्तकीनां॥४१
अभिनयमनसः सुरांगनाया निहितमलक्तककरं तनाभिताम्रं॥चरणमभिपपात षट्पदाली धृतनवलोहितपंकजाभिशंका॥४२॥

गुलिकं तस्या णिपल्लवं वा नानुससार सर्व दोषः यतो हस्ततस्ततो दृष्टिरिति नियमात् इति भावः पल्लवोस्त्रीत्यमरः वास्यादिकल्पोपमेयोरे वार्थेपि समुच्चय इति विश्वः किंतु प्रथमं प्रवेश एव शितेनतुरगे एवोपहिते सन्न चचाल तत्रैव लग्नं तस्थौ रागातिरेकेण किं विलकरणेयं अनुसंधेयमिति भावः ॥अभिनयतीति॥अभिनयोरसभावादिव्यंजकचेष्टाविशेषः व्यंजकाभिनयो समौ इत्यमरः तस्मिन्मनो यस्याः सायाः संगतस्य मागापातमजानत्याः सुरांगनायाः संबंधि अलक्तकवर्तनया लाक्षारंजनेन समंताभिताम्रं निहितं न्यस्तं चरणं षट्पदालीं चकिता धृतो नवलोहितपंकजशंका प्रत्यग्रकोकनदभ्रमो ययासा अभिपपात धावतिस्म अत्र षट्पदावल्याः स्त्रीचरणे पंकजभ्रमाभि

अविरलमिति॥ नमितशिखानि नर्तकीनां पादपीडनान्नमिताग्राणि कदंबकेसराणि रंगभूमौ आदलानीति शेषः। अविरलं सांद्रं द्रुतः रागोष्म
णा विलीनः अत एव परिषिक्तः अस्तः तत्संद्रुतपरिषिक्तं नर्तकीनामलसेषु पदेषु पदन्यासेषु अलक्तकं लाक्षारागं सवपुषं मूर्तिमंत
चित्तरागं उत्कंठकार्याहृदि निःसृतं मुनि विवृणोति अनुरागाभिव्यक्तिस्य संश्लिष्टा ऊहुः वहंति स्म॥४३॥ अथ सांप्रतं गारचेष्टां कथयति। नृपे
ति॥ नृपसुतमनुनमभितः परितः जनस्य सखीजनस्य गात्रेण तिरोहिता लज्जया स्वीकारगोपनायां तत् हेला अंगयष्टिः यया तस्याः स
मन्मथायाः वध्वा अभिलषितं प्रीतिरनुरागः स्फुटं बभूव नवसंश्रीयमानस्यापि ... विसृष्ट्वा अपि साहयतः संवृत्तिः सम्य
गोपनमेव कामितान्यनुरागान्कामयते भावेकः वदति प्रकटयतीत्यर्थः। अयमनुरागस्य स्वभाव उक्तः यथा चेष्टया संश्रीयते से

अविरलमलसेषु नर्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु। सवपुषमिव चित्तरागमूहुर्नमितशिखानि कदंबकेसराणि॥४३॥ नृप
सुतमभितः समन्मथायाः परिजनगात्रतिरोहितांगयष्टेः। स्फुटमभिलषितं बभूव वध्वा वदति हि संवृतिरेव कामितानि॥४४॥ अभिमु
नि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे। चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय॥४५॥ धृतबिसव
लये निधाय पाणौ मुखमधिरूषितपाण्डुगण्डलेखं। नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ॥४६॥

वास्य प्रकाशिकेति भावः॥४४॥ अभिमुनीति॥ अभिमुनि समक्षं घनेन मरुता जघनांशुकस्यैकदेशे सहसा हृते सति सत्रपायाः प
रस्याः संबंधि अवसनो निरावरणो ऊरुः यस्मिन् तत् यथा स्यात् तथा चकितं भयं प्रतियुवतीः सपत्नीरपि विस्मयं निनाय किमुतान्यजनमित्यपिशब्दा
र्थः। न तं मुनिमिति भावः॥४५॥ धृतेति॥ अपरा स्त्री स्मराभितापाद्धेतोः धृतानि बिसानि वलयानि येन तस्मिन् पाणौ अधिरूषि
ते चंदनादिचर्चिते पाण्डुगण्डलेखे यस्य तत् मुखं निधाय आरोप्य अमधुमदे मधुमदरहिते तथाप्यलसे लोचने यस्मिन्कर्मणि य
था तथा तं नृपसुतं निदध्यौ पश्यति स्म निर्वाणनं तु निध्यानं दर्शनालोकनेक्षणानि इत्यमरः॥४६॥

अथ पंचभिर्मुनिं प्रति हरती वाक्यमाह॥ सखीति। हे मुने त्वदुपकंठं त्वत्समीपं सा सखी मां प्रहितवती नि भणित्वेति शेषः किं लक्ष
णा कुसुमेषुणा कामेनाभितप्ता पीडिता सा नायिका हे सखि दयितं मुनिमिहानयेति मां प्रहितवती किं त्वविमृश्यकारिणी य
मित्याह हृदयमिति अहृदया अमनस्का तस्य त्वद्गतत्वादिति भावः अत एव सा पूर्वं प्रागेव भवदुपकंठं त्वत्समीपमुपागतं हृ
दयं मनो नानुविवेद नाम अलोमत्वेषणं व्यर्थं अंतोरंगत्वाद्बहिरंगस्य दुर्बलत्वादिति भावः एतेन मनःसंगरुक्तः चक्षुःप्रीतिस्तु
प्रागेव सर्वासामुक्तेति न पृथगुच्यते॥४७॥ दृङ्मनःसंगसंकल्पा जागरः कृशता रतिः ह्रीत्यागोन्मादमूर्छान्त इत्यनंगदशा

सखि दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता॥ हृदयमहृदया न नाम पूर्वं भवदुपकंठमुपागतं विवे
द॥४७॥ चिरमपि कलितान्यपारयंत्या परिगदितुं परिशुष्यता मुखेन गगनधन गतानि तानि सख्या नयनयुगेः सममार्द्रतां मनांसि॥४८॥ ॥ ४८ ॥ ॥४८॥ ॥

दशेति। तत्राद्यमवस्थाद्वयमप्यभाणि अथ काङ्क्षितमनिरपेक्षेपेण सूचयति। चिरमित्यादि चिरं कलितान्यपि संदेशार्थं बुध्यायोजि
तान्यपि वचनानीति शेषः परिशुष्यता मुखेनेति जागरोक्तिः परिगदितुं मपारयंत्या अशक्नुवंत्या तया हे गगनधन अर्पितानां
नुकंपसे इति भावः सख्या नाममनांसि नयनयुगेः सममार्द्रतां गमितानि दुःखार्द्रतामुपचयं गमितानीत्यर्थः शोकबाष्पैरिति
भावः अथ सखीशोकोत्पत्ति वस्थीत्यच्यते अत्र शोकबाष्परूपकरणाभेदस्य मतियोगिभेदाद्द्वैत्वभेदेप्यभेदाध्यवसा
यतः तन्मूलाचेयं नयनयुगेः सममिति सहोक्तिरलंकारः॥४८॥

अचकमतेति॥मृद्वी सुरभिश्च शय्या तां मृदुसुरभिं पुष्पशय्यां विरहय्य विहाय ससपल्लवां धरित्रीं अचकमत ऐसुखतस्या
स्ततोपि शीतलत्वादिति भावः कमेर्ण्यंताल्लुङि। णिश्रिद्रुस्रुभ्यः कर्तरि चङ् चङीति द्विर्भावः इति तत्र अचीकमतेति प्रसंगात् अतो
णिङ् भावपक्षे। कमेश्च्लेश्चङ् इत्यनेन च ङित्वात्र वृद्धिरूपमेतत् अस्याः नायिकायाः तत्रधरित्र्यामपि मरशामरतिं दुःखमवाप्य
सुखयतीति सुखः शीतः शीतले च ययस्त्वं तत्वं तकमुत्तंगमुपेतुमिच्छावर्तत इति शेषः अस्याश्चौत्सुक्यं कथितं॥ अयारतिं नागरो सुख्य
काविति अस्या नायिकायाः क्रमेण पुष्पशय्याद्येनेकाधारसंबंधकथनात्प्रथमः पर्यायालंकारः तदुक्तं क्रमेणैकमनेकस्मि

अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्यां॥ मरशामरतिमवाप्य तत्र नास्यास्त्वमसुखशीतमुपेतुमंकमिच्छुः॥४९॥
तदनघतनुरस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे॥ पुनरपि सुलभं तपोनुरागी युवतिजनः खलु नाप्यतेनुरूपः॥५०॥

न्याधारे वर्तते यदि एकस्मिन्नथवानेकपर्यायालंकृतिर्द्विधेति लक्षणात्॥४९॥ तदिति॥ तत्तस्मात्कारणात्तस्याः दुःखस्य त्वाद्धे
तोरनघ निष्पापतनु कृशेति काश्यावस्थाकथनं सा नायिका सकामा सफलमनोरथास्तु हि यस्मात्तव मेवार्थे त्वयोजनं वस्तु
कतस्मिंस्त्वदर्थे निमित्तं सतीति शेषः त्वामुद्दिश्येत्यर्थः परासुतां निष्प्राणत्वं पुरा व्रजति व्रजिष्यति मरिष्यतीत्यर्थः तथा च ते
निमित्त सहत्या अनघत्वव्याघातः स्यादिति भावः यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् इदं च दशमावस्थाप्रदर्शनेन
यतयोनिष्टत्वाद्वेतव्यमित्याह।पुनरपीति।पुनरपि पश्चादपि पुनः प्रथमे भेदे इति विश्वः तपः सुलभम् अनुरागी अनुरूपो योग्यश्च
युवतिजनस्तु नाप्यते खलु॥ ५०॥

एवंमलोभितस्यापिमुनेर्मनिनं न भग्नमित्याह॥ जहीहीति॥ कठिणतां निस्पृहत्वं जहीहि त्यजेत्यर्थः जहातेएवहावितीकारः वाचं प्रयच्छ संघ मुनीनां मानसं करुणामृदु ननु दयार्द्रं खलु॥ किंच अभव्या निर्भाग्या उपगतं प्राप्तमवधीरयंत्यवमन्यंते एवमुक्तप्रकारेणासावर्जुनः कयाचिद्दूत्या समीपमागत्य निपुणं यथा तथा चेदमूचे॥ अत्र पंचश्लोक्यां विप्रलंभशृंगारस्यौत्सुक्यनाम्नो व्यभिचारभावस्य चापुनरुक्तिः अनौचित्ये न नायिकायाः प्रवृत्तेः समासत्वमनुसंधेयं एकत्वेनानुरागाभ्यतिशये दूत्ये लघुगलापिवायोषितां बहुशक्ति श्वेदूत्साभासस्त्रिधामत इति। तन्निबंधनात्प्रमेयस्य च मलंकारः तथा च सजातीयरसभेदतदाभासतत्प्रशमानिबंधने तत्प्रेयस्व

जहिहि कठिणतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनां॥ उपनतमवधीरयंत्यभव्याः स निपुणमेत्य कयाचिदेवमूचे॥५१
सललितं चलितत्रिकाभिरामा शिरसिजसंयमनाकुलैकपाणिः॥ सुरपतितनयेपरा निरासे मनसिजजैत्रशरं विलोचनार्धं॥५२

लालंकारः तत्प्रशमनिबंधने समाहितालंकार इति सर्वत्रार्थः॥५१॥ सललितमिति॥ सललितं सविलासं यथा तथा चलितेन विवर्तितेन त्रिकेण कटिभागेनाभिरामाः शिरसिजाता शिरसिजाः सप्तम्या जनेर्डः अमूर्द्धमस्तकात्स्वांगादकाम इत्यलुक् उपपदमतिङ् इति ङः समासः एतेन मनसिजो व्याख्यातः तेषां संयमने बंधने आकुलो व्यग्र एकः पाणिर्यस्याः सा अपरा स्त्री सुरपतितनयेर्जुने जैत्रे जेता जैत्रः जेतृशब्दात् प्रज्ञादिभ्यश्चेत्यण् प्रत्ययः मनसिजस्य जैत्रः शरस्तं तथाभूतं विलोचनस्यार्धमेकदे

सकुसुममिति॥ इभकुंभवत्पृथुभ्यां स्तनाभ्यां आनतमंगं यस्याः सा अंगगात्रकं तेभ्यश्चेति ङीप् काचित्तनुः तन्वी वेतेगुणवचनादिति विक
ल्पात् ङीप् कुसुमानिजातानियस्य सः कुसुमितम् उच्चैरुन्नतं चूतमवलंब्य अत एव चूतलतायोमात विसृतेगुणेन्यायस्याः
विसृतगुणा मौर्वी ज्या सिंजिनी गुणाःस्युसमरः अनंगचापयष्टिरिवाचूतमुक्तेतिभावः तदभिमुखंसमुन्नमनामसमुन्नजमे
अंतंभागांचकारेत्यर्थः॥५३॥ सरभसमिति॥ अन्याविलिंगितनीविश्लिष्टंथबंधनमतएवविलोलंस्यानचलितनी

सकुसुममवलंब्य चूतमुच्चैस्तनुरिभकुंभपृथुस्तनानतांगी॥ तदभिमुखमनंगचापयष्टिर्विसृतगुणेवसमुन्ननाम
काचित्॥५३॥ सरभसमवलंब्यनीलमन्या विगलितनीवि[redacted]लोलांत,विलोलमंतरीयं॥ अभिपतितुमनाःससाध्व
सेवच्युतरशनागुणसंयतावतस्थे॥५४॥

ल्या अन्यत्तत्व्यद्स्यन् प्रत्ययः अंतरीयं परीधानमवलंब्य हस्तेन गृहीत्वा सरभसं सत्वरं अभिपतितुं मनो यस्याः
सा तथोक्ता गंतुमुत्सुकेत्यर्थः तथापि ससाध्वसेवनतुवस्तुतः ससाध्वसा किंतु च्युतेन गलितेन रशनागुणेन संयमिता
बद्धपादा अवतस्थे स्थिता बंधे संधानि नेमत्तमुद्रितेस धिलंयतमित्यमरः कर्मणि क्तः घतिस्यतिमास्थामिति त्कि ति
इकारः॥५४॥

काचिद्युक्तमेनाह ॥ यदीति ॥ तव मनसि शमः शांतिर्यदि अस्तीति शेषः भो अंग अप्त चापं किं किमर्थमित्यर्थः किंतु श
ठवव कस्य विषयाः शब्दादयः वल्लभाः प्रियाः न तु मुक्तिः तदेव दृढयितुमाह भवतु केदो षइति शेषः यद्यप्यहं रागी
तर्हि किमिति भवतीं न गणयामीति शंकां निवारयति दिशतीति तव हृदये मनसि हृदये श्वरी काचित्तव
प्रेयसी अन्यकामिनीभ्यः स्त्र्यंतरेभ्यो वकाशं न दिशति न प्रयच्छति स्वं तत्र स नयो नास्मानृगाये

यदि मनसि शमः किंमंग चापं शठ विषयास्तव वल्लभा न मुक्तिः ॥ भवतु दिशति नान्यकामिनीभ्यस्तव हृदये श्व
रावकाशं ॥ ५५ ॥ इति विषमितचक्षुषाभिधाय स्फुरदधरोष्ठमसूयया कयाचित् ॥ अगणितगुरुमानल
ज्जयासौ स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ ॥

सि मन वैराग्यात् तदर्थं च चापं ते सकलप्रयासोपी त्यर्थः ॥ ५५ ॥ इतीति ॥ इतीत्थं अस्यया मत्सरेण
स्फुरन्नधरोष्ठो यस्मिन्कर्मणि तद्यथा तथा विषमितचक्षु कुटिलं नदृष्ट्वा अगणिता गुरवः
आचार्यादयः मानमनोभिमानो लज्जा च यया तया कयाचिदसौ मुनिः उरसि स्वयं स्व
हस्तेनैव श्रवणोत्पलेनैव जघ्ने हतः ॥ ५६ ॥

सविनयमिति॥ अपरा सविनयमनोद्धसंसाचितिर्यगभिसृत्य समीपं गत्वा स्मितेन हासेन सुभगाएकस्य लसंतः कपोलस्य लक्ष्म्यः
यस्याः सेति बहुवचनपरोत्तरो बहुव्रीहिः। अन्यथा कप्रसेयय इत्युक्तं प्राक् श्रवणे नियमितेन लोचनेन तं मुनिं सकल
मिव समग्रप्राप्यं यथा तथा निदध्यो पश्यति स्म कटाक्षेणैव गाढमद्राक्षीदित्यर्थः एतेषु श्लोकेषु भावाभासनिबंधनादू
र्जस्वलालंकारः औत्सुक्यमात्रभावः आभासत्वं चास्य विरक्ते मुनाव नौचित्यादित्युक्तं प्राक्॥५७॥ अथासां मुनिविलो

सविनयमपराभिसृत्य साचिस्मितसुभगैकलसत्कपोललक्ष्मीः॥ श्रवणनियमितेन तं निदध्यौ सक
लमिवासकलेन लोचनेन॥५७॥ करुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमश्रुताभिः॥ प्रकुपि
तमभिसारणेनुनेतुं प्रियमियती ह्यबलाजनस्य भूमिः॥५८॥

भनमुपसंहरति॥ करुणमिति॥ ताभिः स्त्रीभिः तदभिमुखं मुनिसमक्षं करुणं दीनमभिहितमुक्तं। त्रपा निर
स्ता त्यक्ता किं बहुना अश्रु विमुक्तं अतः परं न किंचिदवशिष्टमस्तीत्यर्थः कुतः हि यस्मादबलाजनस्याभिसार
णे सततागमविषये प्रकुपितमननुकूलं प्रियमनुनेतुं अनुकूलयितुं इयती भूमिः स्थैतावती सीमा साधनानां
परमावधिरिति यावत् अर्थान्तरन्यासालंकारः॥५८॥

अथास्यामनुरागदार्ढ्यं दर्शयन्ति॥ असकलेति॥ असकलनयनेक्षितानि नयनार्धविलोकितानि लज्जा अलसंगमनं परिपांडुता वर्णेत्वं विषादः दुःखानेवाप्तिनिमित्तश्चेतोभंगः इत्येवं प्रकारं विविधं नानाविधं चेष्टितं नपुंसकमनपुंसकेत्यादिना नपुंसकैकत्वता सुभ्रूणामियायेति भावप्रधानेनयोऽयं तथाहि अनंगः वपूर्मंडयितुं प्रभवतिसर्वास्वेवस्यास्थितिशेषः अत स्तासामनंगभूषितानां अखिलं भूषणमेवेति भावः॥५९॥ इदानीं तासां त्रिभिर्मुनिविलोभनप्रयासवैफल्यमाह॥ अलसेति॥ व धूनां संबंधीप्रहे स्या अलसैः पदैः मनोरमं अतएव जितानि कलहंसवधूनां गतानि येन तत्प्रयातं गमनं तथा उरुणा विपुल स्य जघनस्थलस्य अतिभारात् दतिगौरवादुदितपरिश्रमेण जिमितं पूर्णितं ईक्षणं यस्मिन् तत् स्थितं स्थितिश्च सर्वत्रवाशब्दः५८

असकलनयनेक्षितानि लज्जा गतमलसं परिपांडुता विषादः॥ इति विविधमियाय तासु भूषां प्रभवति मंडयितुं वधूरनंगः॥५९
अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगतिप्रयातं॥ स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणं वा॥६०
नशाकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोभिलापः॥ अधिकविततलोचनं वधूनामयुगपदुन्नमितभ्रुवीक्षितं वा॥६१

सुभ्रुवां॥६०॥ नशेति॥ तथा नशे न गाढेन कुसुमशरस्येषोर्निपातेन यो मोहो मूर्छा तस्माद्धेतोरनवसितार्थैः अस्फुटोच्चारणालसः संकीर्णः अभिलाषो वाक्यप्रयोगः अधिकं विततं अधिकं विस्तृतं लोचनं यस्मिन् तत् अयुगपत् पर्यायेण उन्नमिते भ्रुवौ यस्मिन् तत्तथोक्तं ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः वीक्षितं वीक्षणं च॥६१॥

रविकरमिति॥ पूर्वोक्तं रविकरं स्पृहाकरमिपि हविः कांचनं चिर्मस्मिति त्रीणि केस्पृहार्थयोरिति वैजयंती स्त्विति तेन स्थिरेण समाधिना तपोयोगेन शुवां शुद्धं निर्विकारं चेतसी यथा पृथातनूजे अर्जुने विषये अर्थवत् प्रयोजनवन्न बभूव तथाहि महतां मनांसि अमर्षक्रोधे ज्वलयति सति सुखाभिलाषः वसनमेव काशं न लभते किंतु रौद्रस्य शृंगार विरोधित्वादिति भावः अत्रैकुलके अर्थांतरन्यासोलंकारः॥८२॥ स्वयमिति॥ एवं हरिसुतेऽर्जुने स्वयमखंडेनाविलुप्तेन तपसा शान्तमखमिदं संराध्यप्रीणायित्वा परो स्थिसाशत्रुवधेन लभ्यां साध्यां लक्ष्मीं राज्यलक्ष्मीं अभिलषति सा दूरोः कार्यसिध्यभावात् सनिर्वेदैः मनोभिरुपलक्षिताः

रविकरमपि [redacted] नार्थवद्बभूवस्तिमितसमाधिशुचौ पृथातनूजे॥ ज्वलयति महतां मनांस्यमर्षे न हि लभतेवसरं सुखाभिलाषः॥८२॥ स्वयं संराध्यैवं शतमखमखंडेन तपसा परोक्षित्या लभ्यामभिलषति लक्ष्मीं हरिसुते॥ मनोभिः सोद्वेगैः प्रणयविहतिध्वस्तरुचयः सगंधर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः॥८३॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारवीकृतौ अर्जुनविलोभनागताप्सरसांस्वर्गारोहणं नाम दशमः सर्गः समाप्तः॥१०॥

किंच प्रणयविहत्या प्रार्थनाभंगेन ध्वस्तरुचयो नष्टकांतयः सगंधर्वाः त्रिदशवनिताः स्वं धाम स्वस्थानं प्रतिययुः शिखरिणी वृत्तमेतत् रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणीति लक्षणात्॥८३॥ ॥ ८३॥ ॥८३॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां अर्जुनविलोभनागताप्सरसां यथागतं स्वर्गारोहणं नाम दशमः सर्गः समाप्तो यं मंगमलम्॥

॥ दशमसर्गोयं किरातस्य समाप्तः॥

॥ किरातस्यायंसर्गैकादशः प्रारंभः॥ ॥

श्रीगणेशायनमः॥ अथाप्सरसां प्रयाणानंतरं पाको नाम कश्चिद्राक्षसस्तस्य शासनः पाकशासनः इंद्रः नंद्यादित्वाल्ल्युप्रत्ययः। तया अप्सरोमुखेभ्यः श्रुतया अमर्षात् रोषान्निसर्गात् स्वभावाच्च जितेंद्रियतया तया आगंतुकानागंतुकरूपभयविधहेतुकया प्रीतो हृष्टः सन् ख्यातेर्हृष्टप्रतीत इत्यमरः। जिष्णोरर्जुनस्य जिष्णुः शक्रे धनंजयइत्यमरः। आश्रममाजगाम अमर्षनिसर्गयोर्जितेंद्रियता हेतुकं कत्वलिंगश्लोकेनुगम्यते॥१॥ इंद्रो मुनिरूपेणैवाजगामेत्याह। मुनिरूपेति॥ मुनेः रूपमिव रूपं यस्य स मुनिरूपो मुनिवेषधारी सन्नर्थः सइंद्रः अनुरूपेणादर्शनप्रदानयोग्येनेत्यर्थः। सूनुना पुत्रेणार्जुनेन पुरोग्रे ददृशे दृष्टः कथंभूतः वयो यौवनादिक्रमतीतो वृद्धः द्वितीया श्रितेत्यादिना द्वितीयासमासः। द्राघीयसा अतिदीर्घेण प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघादेशः। अध्वनाध्वगमनेनेत्यर्थः। परिश्रां

अथामर्षान्निसर्गाच्च जितेंद्रियतया तया॥ आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः॥१॥ मुनिरूपोनुरूपेण सूनुना ददृशे पुरः॥ द्राघीयसा वयोतीतः परिश्रांतः किलाध्वना॥ जटानां कीर्णया केशैः संहत्या परितः सितैः॥ पृक्तयेंदुकरैरह्नः पर्यंत इव संध्यया॥३॥ विशदभ्रूयुगछन्नवलितापांगलोचनः॥ प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः॥४॥

तः किल किलेत्यलीके। वृद्ध इव दूराध्वश्रांत इवस्थित इत्यर्थः॥२॥ अथ च तुभिर्मुनिविशिनष्टि। जटानामिति॥ परितः सितैः केशैः कीर्णया व्याप्तया जटानां संहत्या उपलक्षितः अत एवेंदुकरैः पृक्तया संपृक्तया संध्ययोपलक्षितः अह्नः पर्यंतो दिनांत इव स्थितः अस्यापि परिणतिरूपत्वात् वृद्धोपमानत्वं जटानां संहत्या संपृक्तया संध्यासाम्यं॥३॥ विशदेति॥ पुनश्चाविशदेन पलितपांडुरेण भ्रूयुगेन छन्ने वलितापांगे वलिमत्प्रांते लोचने यस्य स तथोक्तः। अपांगो नेत्रयोरंतौ इत्यमरः। पामादित्वाल्लोमादिसूत्रेणेतच्प्रत्ययः। प्राले यावतत्याहि समंतत्साम्लाननपलाशानि क्लांतदलानि अब्जानि कमलानि यस्मिन्सः ह्रद इव स्थितः॥४॥

आसन्नेति। पुनश्च परिकृशैः परिक्षीणैरपि आसन्नभरनीकाशैः भाराक्रान्तसदृशैः भारवद्गुरुभिरङ्गैः रित्यर्थः। इद्धः कृश इति दीर्घः। अंगे
रुपलक्षितः कार्श्यो लघुष्वपि स्वाङ्गानि स्वयं वोढुमसमर्थः। अत एवाधूनश्च दरिद्रः। आधूनः स्यादौदरिके विजिगीषाविवर्जिते इ
त्यमरः। आङ्पूर्वाद्धूञ्व्यतेः सुः धान्नुनुनासिके चेति ढादेशः। दिवो विजिगीषायामिति निपातत्वं। सद्गृहिण्या अनुकूलकु
लत्रेणेव प्रायः प्रायुपेण यष्ट्यावलंबनदंडेन अवलंबितो धीरितो न तु स्ववशस्येति भावः। ५। गूढ इति। वपुषा गूढोपि प्रच्छन्नरूपो
पि सर्वैः। प्रच्छन्नास्यादिष्वुपसंख्यानात् तृतीया। तन्वभ्रपटलच्छन्नविग्रहः स्तोकाभ्रवृन्दान्तरितमूर्तिः अंशुमानिव लोकाभिभावि
ना लोकातिशयेन धाम्ना तेजसा राजन् दीप्यमानः ६ इति पूर्वेण संबंधः। ६। जरतीमिति। जरतीं जीर्णां जीनो जीर्णो जरन्नपीत्य

आसन्नभरनीकाशैरंगैः परिकृशैरपि ॥ आधूनः सद्गृहिण्येव प्रायो यष्ट्यावलंबितः ॥५॥ गूढोपि वपुषा राजन् धाम्ना लोकाभिभावि
ना ॥ अंशुमानिव तन्वभ्रपटलच्छन्नविग्रहः ॥६॥ पं. कुलं. जरतीमपि बिभ्राणस्तनुमप्राकृताकृतिः ॥ चकाराक्रान्तलक्ष्मीकः ससा
ध्वसमिवाश्रमं ॥७॥ अभितस्तं पृथासूनुः स्नेहेन परितस्तरे ॥ अविज्ञातेपि बंधौ हि बलात्प्रह्लादते मनः ॥८॥

मरः। जीर्यतेरतृन्निति वा तृन्प्रत्ययः। उगितश्चेति ङीप्। तनुं शरीरं बिभ्राणो दधदपि अप्राकृता अलोकसामान्या आकृतिर्मूर्तिर्यस्य स तदुक्तः।
आक्रान्तलक्ष्मीराश्रमशोभा येन स आक्रान्तलक्ष्मीकः। अत्र निस्समुरःप्रभृतिभ्यः कबिति नित्यकबाश्रयेण एकवचनोत्तरपदस्य लक्ष्मी
शब्दस्यैवोरःप्रभृतिषु पाठात् शेषाद्विभाषेति विकल्पाश्रयेण बहुवचनोत्तरपद इति विवेकः। आश्रमं ससाध्वसमिव सभयमिव चकार तेजस्विदर्श
नाद्भयं भवति। तत्तु न दुःखजनकं तेषाममानुषत्वादिति सत्त्ववित्तुमिव शङ्कः। ७। अभित इति। पृथासूनुरर्जुनः तमिंद्रमभितः तं प्रति
स्नेहेन कर्त्रा परितस्तरे। तद्धेतुवैरेण प्रेम्णा पर्यावृतः। स्तृणातेः कर्मणि लिट्। ऋतश्च संयोगादेर्गुणः। नन्वज्ञातसंबंधविशेषस्य तस्य
इंद्रे कथं [illegible] स्नेहोदय इत्यत आह। अविज्ञातेति। बंधावविज्ञातेपि बंधुरयमिति अज्ञातेपि बलात् बांधवसत्तावशात् एव मनः प्रह्ला
दते स्निह्यतीत्यर्थः। ८।

आतिथेयीमिति॥ अथ हरिरिंद्रः सुतादर्जुनादातिथेयीमतिथिषु साध्वीं पथ्यतिथिवसतिस्वपतेर्ढञ्॥ अपचितिं पूजामासाद्य प्राप्य पूजा नमस्यापचि
तिरित्यमरः॥ विष्टरे आसने ऽस्त्र देरविति स्फुणातेर प्रत्ययः॥ रक्षासनयोर्विष्टरः इतिषत्वं विश्रम्य नाम विश्रम्य किल श्रममपनीय शपि स्वे
सर्थः॥ इति वक्ष्यमाणप्रकारां भारतीं व्याजहार उक्तवान्॥ व्याहार उक्तिर्लपितं भाषितमित्यमरः॥९॥ अयं तावन्मुनिवेदेनं मुमुक्षुं स्तौति॥ त्वयेति॥
त्वया साधु समारंभि सम्यगुपक्रांतं रभेः कर्मणि लुङ्॥ कुतः यद्यस्मान्नवे वयसि यौवने तपश्चर्येति शेषः॥ तथाहि॥ अहमिव दृश्यते मा
दृशो वर्षीयानतिवृद्धोपि प्रियस्थिरेत्यादिना वृद्धस्य वर्षादेशः॥ प्रायो विषयैः सक्चंदनवनितारूपैः ह्रियते आकृष्यते किमुत
वादृशो युवेति भावः॥१०॥ अथैवमनारंभितस्याकारलाभोपि विफलः स्यादित्याशयेनाह॥ श्रेयसीति॥ तवाकृतिर्मूर्तिरम्यतिशे

आतिथेयीसमासाद्य सुतादपचितिं हरिः॥ विश्रम्य विष्टरे नाम व्याजहारेति भारतीं॥९॥ त्वया साधु समारंभि नवे वयसि यत्तपः॥
ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः॥१०॥ श्रेयसीं तव संप्राप्ता गुणसंपदमाकृतिः॥ सुलभा रम्यता लोके दुर्लभं हि गुणा
र्जनं॥११॥ शरदंबुधरच्छायागत्वर्यो यौवनश्रियः॥ आपातरम्या विषयाः पर्यंतपरितापिनः॥१२॥

यः॥ श्रेयसीं श्रेष्ठां गुणसंपदं तपःसमारंभरूपां प्राप्ता अतो न निःफलेति भावः॥ न च स्वाकारगुणाभ्यां किं यतो न संतीति वाच्य
मित्याह॥ सुलभेति॥ लोके रम्यता रम्याकारता सुलभा गुणार्जनं गुणसंपादनं दुर्लभं त्वयि तु तदुभयं संपन्नमिति हेतोर्मनः परमामोद
यतीति भावः॥११॥ यदुक्तं त्वया साधु समारंभीति तदेव साधुत्वं संसारनिःसारताख्यापनयोर्युग्मेनोपपादयति॥ यौवनस्ता वत्
शरदंबुधरच्छाया इव शरत्कालीनांबुपटलमिव गत्वर्यः॥ गत्वरश्चेति क्वरप्संतो निपातः॥ टिड्ढाणञित्यादिना ङीप्॥ विषयाः श दो
ब्दादयस्तु आपातरम्यास्तत्काले रमणीयाः॥ तदापात्यैव आपात इति ये मयंतीपर्यंते अवसाने परितापयंति॥ दुःखं कुर्वंतीति तथोक्ताः॥
॥१२॥

अंतकमिति।किंच संतता अनवाच्छिन्ना आपदः क्लेशा यस्य तस्य जन्मिनः।प्राणी तु येन तनो जन्मी स मरः धीत्याद्दित्वादिति निअंतको मृत्युः सु
पर्यवस्थाना पर्यवरोद्धा प्रथमं तावज्जन्मिनो जन्म दुःखमेव दुस्तरं ततो जातस्य जीवनमपि सततं दुःखसेविन्नं तथा विषयुक्तान्नप्राप्तं
तदपि मरणयुगस्य मिति सोयं काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभमिति न्यायादिति भावः।इत्युक्ते हेतोस्त्याज्य भवसंसारे भव
तीति भव्यो योग्यो जनः।।भवाद्द्दशादितिशेषः।।भव्यस्तु स्त्वेशुभेवाथ भव्यवद्योग्यभाविनोरिति विश्वः।भव्यगेयेत्यादिना कर्तरि निपातः।
मुक्तो मोक्षेतु निषेतुप्युक्तः।।गुदान्ध्येकर्माणी सा द्वैतामपदं।।१३।।संप्रतिप्रशंसापूर्वकं स्वाभिसंधिं दर्शयति।वित्तवानिति।।वित्तवान्
प्रशस्तवित्तोसिप्रशंसायां मतुप्। यथा तमसो कल्याणीसाध्वीबुद्धिरिदम्प्रत्यय इति ।पू।मतिबुद्धिः पस्थिता।संगतानां किं तु केवलं मे

अंतकः पर्यवस्थाताजन्मिनः संततापदः।।इतिसाज्येभवे भव्यो मुक्तावुत्तिष्ठते जनः।।१३।।युग्मं।।वित्तवानसि कल्याणी यत्तां मतिरु
पस्थिता।।विरुद्धः केवलं वेषः संदेहयति मे मनः।।१४।।युयुत्सुनेव कवचं किमामुक्तमिदं त्वया।।तपस्विनो हि वसते केवलाजिनवल्कले।।१५।।

कं यथा सत्या विरुद्धवेषो मा ज्जीवधारणं। किं मेमन संदेहयति संशययुक्तं करोति यद्वा वेषः केवलं वेष एव संदेहः।केवलः कृत्स्न एकेच
केवलं त्वावधीति।विरुद्धतिउभयत्रापि शाश्वतः।।१४।।वेषविरोधमाह।युयुत्सुनेति।।युयुत्सुनेव योद्धुमिच्छुनेव युयुत्सुः सनंता युत्सयः।
त्वयाक्रियत्केवलं कवचं वर्म आमुक्तं अर्पितं को विरोध इत्यत आह।।हि यस्मात्तपस्विनः तपश्चर्यां कुर्वतः केवलमेकं कवचमायसह
चरितं तद्विसियाचत।तेच ते अजिनवल्कले च निर्णिलेकेवलमिति त्रिलिंगत्वेक इत्यमरः।वसते आच्छादयंति अतस्तप
स्विनस्ते कवचधारणं विरुद्धमित्यर्थः।।१५।।

११.६।।
१६८

3

युष्मेनाह॥ प्रपित्सोरिति॥ किं वा मुक्तिं मोक्षं प्रपित्सोः प्राप्तुमिच्छोः सनि मीमेत्यादिना ह्रस्वादेशः॥ अत्र लोपोऽभ्यासस्येत्यभ्या
सलोपः॥ अत एव मुमुक्षुत्वादेव कलेवरे शरीरे निस्पृहस्य॥ तस्य स्पृहयालोर्नाम रक्षार्थं धनुर्धारणमित्यर्थः॥ नापि परहिंसा
र्थमित्याह॥ [illegible] भूतानां जन्तूनां क्षमादेर्जन्तुषु भूतानि तिवैजयन्ती॥ क्रुधद्रुहोरुपसृष्टयोः कर्मेति कर्मसंज्ञायां कर्तृकर्मणोः कृ
तीति षष्ठी॥ अनभिद्रुहः॥ अहिंसकस्य सतः [illegible] किं प्रयोजनं महेषुधी महानिषंगौ भीमं त्रासजनकं धनुः श
[illegible] समर्थयते शममित्युत्तरेणान्वयः॥ समर्थयत इति वचनपरिणामः कार्यः॥१६॥ भयंकर इति। तथा मृत्योर्यमस्याप
रो भुज इव द्वितीयो बाहुरिव प्राणभृतां प्राणिनां भयं करोतीति भयंकरः॥ मेघर्त्तिभयेषु कृञ इति खश्प्रत्ययः॥ अरुर्द्विषदित्या

प्रपित्सोः किं वा ते मुक्तिं निस्पृहस्य कलेवरे॥ महेषुधी धनुर्भीमं भूतानामनभिद्रुहः॥१६॥ भयंकरः प्राणभृतां मृत्योर्भुज इवाप
रः॥ असिस्तव तपस्थस्य न समर्थयते शमम्॥१७॥ जयमत्रभवान्नूनमरातिष्वभिलाषुकः॥ क्रोधलक्ष्म क्षमावंतः क्वा
युधं क्व तपोधनाः॥१८॥

दिना मुमागमः॥ असिः खड्गः तपसि तिष्ठतीति तपस्थः तपश्चरन्नित्यर्थः॥ सुपि स्थ इति कप्रत्ययः॥ तस्य ते तव शमं शान्तिं न समर्थयते न सं
भावयति। किं तु तस्य शत्रून्क्षिणोतीति भावः॥१७॥ ननु शान्तस्य किं तपसेत्याह॥ शत्रुजयार्थमित्याह॥ जयमिति॥ अत्रभवान्पूज्य इत्यर्थः॥ इत
राभ्योऽपि दृश्यन्त इति प्रथमार्थप्रातिपदिकात् शिय स्त्रल्प्रत्ययः॥ सुप्सुपेति समासः॥ त्रिषु तत्र भवान्पूज्यस्तथैव भगवानपीति यादवः॥ अ
रातिषु शत्रुषु विषये जयमभिलाषुको जयमिच्छुः॥ लषपतेत्यादिना उकञ्प्रत्ययः॥ न लोकेत्यादिना षष्ठीप्रतिषेधः॥ नूनमिति निश्चयः॥
नूनं तर्केऽर्थनिश्चय इत्यमरः॥ क्रोधस्य लक्ष्म लिंगं आयुधं। क्व क्षमावन्तः शान्तास्तपोधनाः क्व। क्रोधशान्त्योर्विरोधात्कार्ययोः श त्र
स्त्रतपसोरप्येकत्रासंगतेः शस्त्रिणस्ते तपो जयार्थं न तु मोक्षार्थमिति निश्चय इत्यर्थः॥१८॥

तपसोऽर्थार्थत्वदोषमाह ॥ य इति ॥ यः पुमान्नु निश्चितं श्रेयो निःश्रेयसं मुक्तिः श्रवत्वरेत्यादिना समासान्तो निपातः ॥ मुक्तिः कैवल्यनिर्वाणश्रे
यो निःश्रेयसामृतमित्यमरः ॥ निःश्रेयसं कुर्वन्तीति निःश्रेयसकरीः निःश्रेयसहेतुरित्यर्थः ॥ कृञो हेतुताच्छील्यानुलोम्येष्विति हेतावर्थे णमट
प्रत्ययः ॥ टित्वात् ङीप् ॥ क्रियास्तपोदानादिकर्माणि वधोदर्काः हिंसादिपुलकाः ॥ करो निष्टुरके पुलेमुत्तरमित्यमरः ॥ अत एवमूढः स पुमा
न्ग्लानिरेव दोषस्तं छिन्दन्तीति ग्लानिदोषच्छिदः पिपासाहारिणीः क्षिप्रं स्वच्छाः अपः पंकवतीः करोति ॥ पाविरेवज्ञावविज्ञमतो लु
किति मतुपो लुक् महाफलसाधनस्य तपसः तुच्छफले विनियोगः स्वच्छाम्भः पंकसंकरवत्प्रेक्षावद्भिर्गर्हितमित्यर्थः ॥ अन्नयत्तप

यः करोति वधोदर्काः निःश्रेयसकरीः क्रियाः ॥ ग्लानिदोषच्छिदः स्वच्छाः स मूढः पंकयत्यपः ॥१९॥
मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः ॥ तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ ॥२०॥

सो वधोदर्कीकरणं तन्निर्मलस्य पयसः पंकसंकुलीकरणमिति वाक्यार्थान्तरमारोप्य प्रतिबिम्बकरणाक्षेपात् असंभववस्तुसं
बधात् वाक्यार्थवृत्तिनिदर्शनालंकारः ॥१९॥ नन्वर्थकामयोरपि मोक्षवत्पुरुषार्थत्वात्तपसस्तदर्थत्वे को दोषस्तत्राह ॥ मूलमिति ॥
हिंसादेरिति तद्गुणसंविज्ञानो बहुव्रीहिः ॥ आदिशब्दादनृतस्तेयादीनां संग्रहः दोषस्याघस्य मूलं ॥ कारणभूतौ स्त्रीकामाध
नकामाश्च किं न कुर्वन्ति पातकमिति भावः ॥ अर्थकामौ मा स्म पुषः नोपचिनु पुष्णातेर्लुङ् ॥ तिङ् पुषादित्वादङ् ... दृशः
हीयस्मात्तावर्थकामौ तत्त्वावबोधस्य तत्त्वज्ञानस्य मोक्षसाधनस्य विशेषः ॥ दुरुच्छेदौ दुर्वारौ उपप्लवौ हिंसादिप्रवर्तकत्वादं
तकौ अतः पुरुषार्थपरिपन्थिनावेतौ न पुरुषार्थावित्यर्थः ॥२०॥

मुक्तिप्रबंधकत्वादपुरुषार्थौ कामो इत्युक्तं तत्रार्थस्य दुःखैकनिदानत्वादपुरुषार्थत्वमिति पंचभिः समर्थयति ॥ अभिद्रोहेणेति ॥ भू
५ तानामभिद्रोहेण हिंसया गत्वरीरस्थिराः श्रियः संपदोऽर्जयन्नर्जनं कुर्वन्मस्यास्तीत्युदन्वानुदधिः उदन्वानुदधिः सिंधुरिति स्वमरः ।
उदन्वानुदधौ चेति निपातनात्साधुः । सिन्धूनां नदीनामिव आपदां पात्रतां स्थानत्वमेवेति ॥ २१ ॥ आपत्सा यमभिव्यनक्ति ॥ या इ
ति । याः संपदः सत्सहायानां विद्यमानसाधनानामपि नपुंसां गम्याः साध्याः विपद्यपि गमयितव्याः निस्तीर्या इत्यर्थः । तस्या नाकुलैरि
वेति षष्ठी । यासु संपत्सु खेदो रक्षणादिक्लेशः विपत्सु सत्स्वेवेति शेषः । यतो याभ्यः संपद्भ्यो भयं अन्नेकानर्थमूलत्वादिति भावः । वि
पद्भ्यः स्तु स्वरूपतो भयमेवेत्यर्थः । किं बहुना विपदामिव तासां संपदां संबंधि तत्किमस्तीति शेषः । यत्दुःखाय न भवतीति तत्सर्वं

अभिद्रोहेण भूतानामर्जयन्गत्वरीः श्रियः ॥ उदन्वानिव सिंधूनामापदामेति पात्रतां ॥ २१ ॥ या गम्याः सत्सहायानां यासु खे
दो भयं यतः ॥ तासां किं यन्न दुःखाय विपदामिव संपदां ॥ २२ ॥ दुरासदानरीनुग्रान्धृतेर्विश्वासजन्मनः ॥ भोगान्भोगानिवाहे
यानध्यास्यापन्न दुर्लभा ॥ २३ ॥

दुःखावहमेवेत्यर्थः । यदाह । अर्थानामर्जने दुःखमर्जितानां च रक्षणे । नाशे दुःखं व्यये दुःखं धिगर्थो दुःखभाजनमिति । अतो हेतोर्हे
यायमिति भावः । अत्र यद्दुःखाय तत्सुतरां वा कथं न्वित्यर्थसामर्थ्यात्तासां किमिति पूर्ववाक्यतत्तदर्थशब्दोपादानं । नापेक्षते तद्देवकाव्यप्र
काशस्य स्पष्टं ॥ २२ ॥ दुरासदानिति ॥ किं च दुरासदान्दुःप्रायानुग्रान्विश्वासात्सन्नमयस्याः सत्स्याः विश्वासजन्मनः जन्मोत्तरपदत्वाद्व्यधिकर
णो बहुव्रीहिः धृतेः संतोषस्य योग्यानरीनुद्धनिकस्य सर्वत्र चासंभवात्त विश्रंभसुखभंजकानित्यर्थः । नृपसेवन इति भोगाः धनानि च आ
हेयानहीषु भवानूदतिकुक्षीत्यादिना ठञ्प्रत्ययः । भोगान्फणानिव भोगाः सुखे धने चाहेः शरीरफणयोरपीति विश्वः । अध्यास्या
धिष्ठायापन्न दुर्लभा आश्रितविषमुष्टिमिव नेष्टमेव भोगिनं पुंसां संबलादिवस्कं इतीत्यर्थः ॥ ५ ॥ २३ ॥

इतीपि श्रियो हेयाइत्याह। नेति। श्रियः संपदो ज्ञातृकरा विलक्षणांतरज्ञानीवानीव विशेषज्ञा न भवंति। अत एवासां श्रियां प्रियैर्न भूयते न कुत्रा
प्यनुरज्यतीत्यर्थः। ननु यं स्त्रीदोषो पुरुषदोषे वेति चेत्तत्राह। मूढा आसमीजनासक्ता स्वनुरक्ता स्वप्रियस्त्रीषासक्ताः स्त्रीषु विवस्त्रीषप्यनुर
क्ता स्वनुरागाः पुंसामेवायं दोष इत्यर्थः। किमर्थं न हिंसा स्वेव सर्वेषामासक्तिरित्यर्थं तां न्यस्यति। वामेति। जंतवो वामशीला वक्रस्वभा
वा हि स्वभावस्य दुर्वारत्वादिति भावः॥२४॥ यदुक्तं नांतरज्ञाः श्रिय इति तदेव भंग्यंतरेणाह। क इति॥ संपदः श्रियः आर्यशीलेषु दुःशील
षु विषयेन तद्विरुद्धमुच्यते चंचला इति यत्। स्तुतिपदे स्तुतिविषये तत्र कोपवादः का निंदा किंतु क्षुद्राः संपदः साधुवृत्तानपि विक्षि

नांतरज्ञाः श्रियो जातु प्रियैरासां न भूयते। आसक्तास्तास्वमी मूढा वामशीला हि जंतवः॥२४॥ कोपवादस्तुतिपदे
यद्दुःशीलेषु चंचलाः। साधुवृत्तानपि क्षुद्रा विक्षिपंत्येव संपदः॥२५॥ कृतवानन्यदेहेषु कर्त्ता च विधुरं मनः। अप्रियैरिव
संयोगो विप्रयोगः प्रियैः सह॥२६॥

पंत्येव तदेतासां निंदापदमित्यर्थः। तस्मादर्थो न पुरुषार्थ इति संदर्भार्थः॥२५॥ ननु नार्थमहमर्थये किंतु विरुद्धधर्ममनुपा
लयन् यानि यातनानि मित्यादि शंक्यो तदपि परपीडासकलादयुक्तमिति श्लोकचतुष्टयेनाचष्टे। कृतवानिति। तत्रांतदृष्टांतेनैव प
रपीडांतो निवर्त्तितयमित्यभिप्रायेनाह। अप्रियैरनिष्टवस्तुभिः संयोग इव प्रियैरिष्टवस्तुभिः सह विप्रयोगो विरहोऽन्यदेहेषु स्वस्यैव दे
हांतरेषु अतीतानागतेष्विति शेषः। मनो विधुरं दुःखितं कृतवान् कर्त्ता करिष्यति च लड्वर्तमाने वा वभ्रूयत इति शेषः। इत्थं नात्रो
दुःखहेतुरपि सर्वस्यापि त्रैकालिकसिद्धमिति कृतवानिति श्लोकार्थः॥२६॥

संप्रतीष्टसमागमस्य सुखहेतुत्वमाह। शून्यमिति॥ प्रियसमागमे इष्टजनसंयोगे सति शून्यं रिक्तं भव्याकीर्णतां संपूर्णतामेति सम्बुद्धे वप्रतीयत इत्यर्थः। व्यसनं विपद् पुत्सवैस्तुल्यं व्यसनं विपदित्यमरः। विप्रलंभो वंचनाप्रतारणामितियादवः। सो पिलाभाय किं बहुना प्रियसंगतस्य सर्वावस्था स्वपि सुखमेवेत्यर्थः॥२७॥ पुनरर्थान्तरेण प्रियवियोगस्य दुःखहेतुत्वमाह। तदिति॥ तदारम्याण्यपि अरम्याण्यमनोहराणि भवंति किं बहुना प्रिया असवः प्राणाः अल्पं शल्यवदसह्या भवंतीत्यर्थः। किंच तत्र सबंधुः सन्नपि एकाकी असहाय इव। एकादाकिनिश्चासहाय इत्याकिनिच्प्रत्ययः। यदा इष्टेन रहितो भवति॥२८॥ युक्त इति॥ किंच युक्तो हितेनेति शेषः। हितेनेष्टेन युक्तः सन्न प्रमाद्यसि हृष्यसि हितादिष्टेनलः परितप्यसे परितप्तो भवसि तत्पदे वादिकालकर्तरि लट्। सत्यमेवं ततः किमत आह यदीति पीडा आत्मन इस

शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः। विप्रलंभोपि लाभाय सति प्रियसमागमे॥२७॥ तदारम्याण्यरम्याणि प्रियाः शल्यं तदासवः। तदेकाकी सबंधुः स्यादिष्टेन रहितो यदा॥२८॥ कालापकं॥ युक्तः प्रमाद्यसि हितादपेतः परितप्यसे। यदि नेष्टात्मनः पीडा मा संजि भवता जने॥२९॥ जन्मिनोस्य स्थितिं विद्वाँल्लक्ष्मीमिव चलाचलां। भवान्मास्म वधीन्न्याय्यं न्यायाधारा हि साधवः॥३०॥ ॥

स्यनेष्टाय दि तर्हि भवता जने परस्मिन्नपि मा संजि न संजिनसंज्यताम्। तासंज्यते र्णपेता कर्मणि लुङ्। आत्मन इष्टा ते न परपीडा तां प्रियतीति न्यमित्यर्थः पीडायायाः परात्मनोः समत्वात्॥२९॥ अथ देहस्थैर्य एव धर्मं याव परं दानकार्यमाह॥ जन्मिन इति॥ अस्य जन्मिनः उत्पत्तिधार्मिकस्य शरीरिणः श्रीहयादितादिनिः स्थितिं लक्ष्मीमिव चलाचलां चलतः पचाद्यच्। चलिपतिपद्यादीनामभ्यासस्येति द्विर्भावाभ्यासस्यागमश्चा विद्वान् विदन् जानन् वाक्स्थित्यर्थः जन्मिधर्मत्वादेवं चलामनित्यामित्यर्थः। विदः शतुर्वसुरिति वैकल्पिको वसुरादेशः। भवान् न्यायादनपेतं न्याय्यं साधुकर्म धर्मपथ्यार्थन्यायादनपेत इति यत्प्रत्ययः। मास्मवधीत् न नाशयदित्यर्थः। स्मोत्तरे लङ् चेति लङ्। हनो वध लुङीति हनो वधादेशः। शेषे प्रथम इति प्रथमपुरुषः। हि यस्मात् साधवो न्यायाधारा न्यायावलंबा बहुव्रीहिः सत्पुरुषा वा न्यायत्यागे साधुत्वमेव न स्यादिति भावः। न्यायाचारा इति पाठे न्यायमाचरंतीति तथोक्ताः। कर्मण्यण्॥३०॥ ॥ ॥ ॥

तर्हि किं कर्तव्यं तत्राह ॥ विजिहीहि इति ॥ हे तपोधन रणोत्साहं रणोद्योगं । लोको तेषु कार्येषु स्थेयान्नियमेन ः उत्साहं स्त्वं विजहीहि त्यज आ व
हा ॥ विजिति ईकारः साधु सम्यक् चीर्णं निःश्रेयसकरत्वादिति भावः तपो धुनीनशः ॥ नाशय नश्यते एर्ण्यन्तान्माङ्योगात् । शिषि लुङ् आडागमनिषे
धश्च किंतु जन्मन उच्छेदं कर्तुं मोक्षं साधयितुमित्यर्थः । एधि ः शान्तो भवेति विजिगीषानिवृत्तो भवेत्यर्थः । एधीत्यस्तेर्लोट् मध्यमैकवचनं
हुत्वं ल्वो हेर्धिः । ध्वसोरेद्धावभ्यासलोपश्चेति इकारलोपः ॥ ३१ ॥ अथ सर्वथा मे विजयकं दूरस्ति न निवर्तत इत्याशंक्यत अन्तः शत्रुवि
जयेन विधीयतामित्याह ॥ जीयंत इति । दुर्जया अजय्याश्चक्षुरादयो देहवर्तमानाः रिपवो जीयंतां पराः यस्मात्तेषु अंतःशत्रुषु जितेषु सत्सु

विजहीहि रणोत्साहं मा तपः साधु नीनशः ॥ उच्छेदं जन्मनः कर्तुमेधि शान्तस्तपोधन ॥ ३१ ॥ जीयंतां दुर्जया देहे रिपवश्च
क्षुरादयः ॥ जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ ३२ ॥ परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः ॥ अविधेयेन्द्रियः पुंसां गौरि
वैति विधेयतां ॥ ३३ ॥

त्वयाऽयं कृत्स्नः लोको जितो ननु किं तत्तान्य शत्रवः तदन्तर्गतत्वादित्यर्थः । जितेन्द्रियस्यैन्द्रियार्थे निःस्पृहस्य जितवैरानु
दयाद्विजयस्य व्यपदेशः ॥ ३२ ॥ अजितेन्द्रियस्यानर्थ ● शुमावहेः परवानिति ॥ अर्थसंसिद्धौ अन्यव्यवहारादि स्वार्थसाधने । परवान्नृप
राधीनः परतन्त्रः पराधीनः परवान्नाथवानपीत्यमरः । नीचवृत्तिः कर्षणवहनादिनिकृष्टकर्मा । अपत्रपो निर्लज्जः । अविधेये
न्द्रियः अजितेन्द्रियः पुमान् गौर्बलिवर्द इव पुंसां विधेयतां यथोक्तकारितां प्रेष्यतामेति विधेयो विनयग्राही वचनेस्थित आश्र
व इत्यमरः ॥ उपमालंकारोऽयं प्रकृतयोरर्थसाधर्म्यात् श्लेषे तु शब्दमात्रसाधर्म्यादिति ॥ ३३ ॥

प्रकृता १

नकेवलं हिंसादोषयाद्विषयाणांहेयत्वंकिंत्वपारमार्थिकत्वादपीत्याह॥ अथइति॥ अधुनाभावा अधुनाभवा अधुनातनी इदानींतनीसा
पंचिरमित्यादिनात्युप्रत्ययः॥ सुखसंविभिः सुखानुभूतिः श्वःपरेहनि त्वयास्मरणीयानचानुभवनीयाइति हेलोः काम्यंतइतिकामाः
विषयास्तोन्स्वप्नोपमान् स्वप्नतुल्यान्मत्वा अतात्विकान्निश्चित्य तदंगतांतद्धेषत्वंकामपरत्वंत्रतांमागाः नगच्छ इयोगात्लुङीति
गादेशः॥३४॥ इतोपिहेयाः कामाइत्याह॥ श्रद्धेयाइति॥ श्रद्धांतुयोग्याः श्रद्धेयाः विश्वसनीयाः॥ तथाविप्रलंभकाः प्रतारकाः वि
श्वासघातकाइत्यर्थः॥ तथाप्रीणंतीतिप्रियाः प्रीतिजनकाः इगुपधलक्षणादिनाकप्रत्ययः॥ तथाविप्रियकारिणोदुःखजननशीलाः
किंबहुनात्यजंतोपिपुरुषंविहायगच्छंतोपिसुदुस्त्यजाः स्वयंत्वलेनसत्कुमशक्याः कामाः विषयाः कष्टाः कुत्सिताः॥ शत्रवोहि॥ प्रसिद्धश

श्वस्त्वयासुखसंवित्तिः स्मरणीयाधुनातनी इतिस्वप्नोपमवान्कामीन्मत्वामागास्तदंगतां॥३४॥ श्रद्धेयाविप्रलंभारः
प्रियाविप्रियकारिणः॥ सुदुस्त्यजाः स्त्यजंतोपिकामाः कष्टाहिशत्रवः॥३५॥ विविक्तेस्मिन्नगे नद्याः प्लावितेसानुकंन्य
या॥ प्रत्यासीदतिमुक्तिस्त्वांपुरामामूढधीमुधः॥३६॥ ॥ ॥३६॥

तुवैधर्म्यादितिभावः॥ अत्रश्रद्धेयत्वादीनांविप्रलंभकत्वादीनांचैकत्रविरोधेपिविषयस्वाभाव्येनसमाधीयतइतिविरोधा
भासालंकारः॥ तेनचकामानांप्रसिद्धशत्रुवैधर्म्यव्यतिरेकः॥ काव्येजलइत्यलंकारेणालंकारध्वनिः॥३५॥ तर्हिकिंकर्तव्यमि
त्याशंक्योपसंहरन्नाह॥ विविक्तइति॥ विविक्तेविजनेजह्नुकन्ययागंगायान्नद्यानद्याःपुनःपुनर्वानद्यःपुनःपुनःख्यातभूतार्थ
त्वेनवाव्यपदिशतिविविक्तः॥ प्लावितसिक्तेप्लावितइतिपाठेपवित्रीकृतेइत्यर्थः॥ अस्मिन्नगेइंद्रकीलेत्वांमुक्तिःपुरानिकटेप्रत्यासीदति
सन्निकृष्यतीत्यर्थः॥ पुरापुरागतोनिकटेप्रबंधात्रीतवस्तुष्वित्यमरः॥ उरापुपरुदुपुरायुधोमामन्नः शस्त्रंविमुंचेत्यर्थः॥३६॥

व्याहरत्येति॥मरुत्तांपसोदेवेंद्र इतिवाचं व्याहृत्योक्तावस्थितेसति॥ तस्मिन्स्थिते सति॥ अथ कपिध्वजोऽर्जुनः प्रश्रयगंभीरं विनयमधुरं॥ विनयप्रश्र
योसमौ विस्मरः॥ वाचमुवाच॥३७॥ किमुवाचेत्यपेक्षायामाह चतुर्भिः इदं वाक्यमुपश्लोकयन्नाह॥ प्रसादेत्यादि॥ प्रसादोऽत्र प्रसिद्धार्थपदत्वं
तेन रम्यं प्रसिद्धार्थपदत्वं प्रसादो क्षिप्रार्थगत इति लक्षणात्॥ ओजस्वि समासभूयिष्ठं ओजः समासभूयस्त्वमिति शासनात् गरीयः॥ अर्थप[redacted]
रिगतं न नु शब्दाडंबरमात्रमित्यर्थः॥ लाघवान्वितं विस्तरदोषरहितं साकांक्षमाकांक्षावत्पदकं वाक्यं न तु दशडिमादिवाक्यवच्छलकं पु
त्तमित्यर्थः॥ अनुपस्कारमनध्याहारदोषरहितं विघ्नगातिरहस्तनार्थप्रतिपादकं न तु सावशेषार्थोक्तं एवं निराकुलमसंकीर्णार्थं॥३८॥ न्याये
ति॥ पुनः न्यायेन युक्त्या निर्णीतसारत्वान्निश्चितार्थत्वाद्धेतोः आगमे शास्त्रविषये निरपेक्षं स्वतंत्रमिव युक्तिदार्ढ्यादेव प्रतीयते वस्तुतस्तु शास्त्र

व्याहृत्य मरुत्तां पत्यावितिवाचमवस्थिते॥ वचः प्रश्रयगंभीरमथोवाच कपिध्वजः॥३७॥ प्रसादरम्यमोजस्वि गरीयो लाघवान्वितं॥ साकांक्षमनु
पस्कारं विष्वग्गति निराकुलं॥३८॥ न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे॥ अप्रकंप्यतयान्येषामाम्नायवचनोपमं॥३९॥ अलंघ्यत्वाज्जनैर
न्यैः क्षुभितोदन्वदूर्जितं॥ औदार्यादर्थसंपत्तेः शांतं चित्तमृषेरिव॥४०॥ इदमीदृग्गुणोपेतं लब्धावसरसाधनं॥ व्याकुर्यात्कः प्रियं वाक्यं यो वक्ता नी

सिद्धार्थमेवेति इवशब्दार्थः॥ अन्येषां प्रतिवादिनामप्रकंपितया अप्रसाक्ष्येयतया आम्नायवचनोपमं वेदवाक्यतुल्यमित्यर्थः॥३९॥ अलंघ्यत्वादि
ति॥ अन्यैर्जनैरलंघ्यत्वादनुल्लंघनीयत्वात् क्षुभितोदन्वदूर्जितं तद्वल्लंघ्यं गंभीरं औदार्यादुक्तिविशेषत्वात् श्लाघ्यविशेषणाद्वा तदुक्तं दण्डिना
उत्कर्षवान्गुणः कश्चिद्युक्ते यस्मिन्प्रतीयते तदुदाराह्वयं तेन सनाथ्या काव्यपद्धतिरिति श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते इति॥
अग्राम्यार्थत्वादिति केचित्॥ अन्यत्र युक्तियोगित्वादित्यर्थः॥ अर्थसंपत्त्या प्रयोजनसंपत्त्या अन्यत्राणिमादिसिध्या मुनिश्चित्तमिव शांतं
सौम्यं॥४०॥ इदमिति॥ इदमीदृग्गुणोपेतं यथोक्तगुणयुक्तं लब्धावसरसाधने कालोपायो येन तत् प्रियं प्रीतिकरं इदं वाक्यं
को वा व्याकुर्यात् व्याहरेत् यो वक्ता सोऽनीदृगाशयः ईदृग्विवक्षायां न भवति अबुद्धस्तस्यार्थस्य वक्तुमशक्यत्वादिति
भावः॥४१॥

एवमिदं वाक्यमुपश्लोकयन्नात्मनस्योपदेशस्याधिकारीतिपरिहरति ॥ नेति ॥ हे तात अमुष्य यज्वस्य यतोरूपस्य मदीयो योगस्य पूर्वापरेण वैपो
र्वापर्यं कारणफले चानुवर्ण्यादिलात् स्वार्थेष्य प्रत्ययः । तत्त्वन ज्ञातं त्वया न ज्ञातमित्यर्थः । मतिबुद्धीत्यादिना वर्तमाने क्तः । तद्योगादेव
षष्ठी कुतः येन कारणेन मां मुनिभिस्तुल्यं धर्मे शास्सि त्वमुपदेक्षुमिच्छुसि शासिरयं दुहादित्वाद्द्विकर्मकः ॥ ४२ ॥ अथ पौर्वापर्यमज्ञा
त्वाप्युपदेशे दोषमाह ॥ अविज्ञातेति ॥ अविज्ञातः प्रबन्धः पूर्वापरसंगतिर्येन तस्य वाचस्पतिरपि कस्कादित्वादलुक् । अथ वाच
स्पत्याः पतिपुत्रपरश्वयारपदयस्योषप्तितिसकारः एतस्मादेव ज्ञापकादलुक् इति केचित् तद्वचः उपदेशः न पद्दुहानीति विर

चतुर्भिः कालापकं । न ज्ञातं तात यज्वस्य पौर्वापर्यमनुष्य मे ॥ शासितुं येन मां धर्मे मुनिभिस्तुल्यमिच्छसि ॥ ४२ ॥
अविज्ञातप्रबंधस्य वचो वाचस्पतेरपि ॥ व्रजत्यफलतामेव नयद्रुहइवेहितं ॥ ४३ ॥ श्रेयसे प्यस्य ते तात
तव चसो नास्मि भाजनं ॥ नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥ ४४ ॥ छ्म

द्रकारिणः पुरुषस्य दुहितं उद्योग इव अफलतां व्रजसेव ॥ ४३ ॥ ननु सदुपदेशस्य नैष्फल्यं कुतो हन्त्याशंक्य सोपि स्थाने प्रयु
क्तश्चेत् सुखरक्षेत्रोप्त शालिबीजवद्धिफल एवेत्याशयेनाह ॥ श्रेयस इति ॥ हे तात श्रेयसोपि हितार्थयोगात् प्रशस्ततरस्याप्य
स्य तेत नवचसो हितोपदेशरूपस्य तत्रैर्विपर्ययः दिवसः स्फुटतारस्य व्यक्ततारस्य नभस इव भाजनं पात्रं नास्मि अनधिकारि
त्वादिति भावः । अत्रोन्हो नभसो मात्रसंबंधसंभवे पि तारासंबंधासंभवात्तद्दिशिष्टनभः संबंधविरोधाद्युक्तं तारकितस्य नभसो न पात्रमिति स्मह
रति ॥ ४४ ॥

कुतस्ते मोक्षोपदेशानधिकारित्वं किं च तेन तपसः पौर्वापर्यमित्यपेक्षायां तत्सर्वं स्वजात्यादिकथनपूर्वकं कथयति ॥ क्षत्रिय इति । अहं क्षत्रियः क्ष-
त्रियकुले जातस्तत्रापि महाकुले प्रसूतः वीरसंतानश्चेत्याह पांडोस्तनय इति तत्रापि कोऽसौ नयोस्मिन्नामधेय इति आह पार्थ इति पृथायाः कुन्तीत-
नुजः पार्थस्तस्यापत्यमित्यण्प्रत्ययः अर्जुनोऽहं महावीरश्चेत्याह धनंजय इति उत्तरकुरून् विजित्य धनाहरणाद्धनंजय इत्यर्थः एवंविधं मामवग-
च्छतु त्वं प्राक् अथैवं चेत्किमर्थं तर्हि तपस्यति मोक्षार्थं वा किं न तपस्यतीत्यत्राह स्थित इति । दायं पैतृकधनमाददत इति दायादाः ज्ञातयः
दायादो ज्ञातिपुत्रयोः विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः इति विश्वः स्वामीश्वराधिपतेत्यत्र सोपसर्गादिदायादेति कप्रत्ययान्तो निपातः पि-
न्नाधुः तेः प्रास्तस्य राज्यान्निरस्तस्य वैरनिर्यातनार्थिन इत्यर्थः ज्येष्ठस्य भ्रातुर्युधिष्ठिरस्य परश्चेशासनादादिष्टव्रतस्य येन एवं स्याज्ञा देवत्राशासने निवद-

क्षत्रियस्तनयः पांडोरहं पार्थो धनंजयः ॥ स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥४५॥
कृष्णद्वैपायनादेशाद्बिभर्मि व्रतमीदृशं ॥ भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥४६॥

निदेशे स्थितः तदाज्ञया तपस्यामीत्यर्थः अन्यथा मानहानिः सौभ्रात्रभंगः पूज्यपूजाव्यतिक्रम इत्यादिदोषश्च स्यादिति भावः ।
अत एव बहिःसेकरसिकस्य रागद्वेषकषायितचेतसः कुतो मोक्षाधिकार इति तात्पर्यं स्वार्थविशेषणत्वात्परिकरालंकारः ॥४५॥ वि-
यदुक्तं विरुद्धः केवलं वेष इति तत्रोत्तरमाह । कृष्णेति । द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः स एव द्वैपायनो व्यासः प्रज्ञादित्वा-
त्स्वार्थे अण्प्रत्ययः । स एव कृष्णवर्णत्वात्कृष्णद्वैपायनश्चेत्तस्य देशादीदृशं विरुद्धवेषं बिभर्मीत्यर्थः । व्रतं तपो नियमं बिभर्मि धारयामि न तु
स्वबुद्ध्येति भावः । अथोपास्यां देवतामाह ॥ भृशमिति ॥ स्वाराध्यस्य सुखमाराध्यस्य प्रादिसमासः स्वाराध्यस्येति पाठे उपसर्गात्खलु-
प्रत्ययः मरुत्वत इंद्रस्य भृशं सम्यगाराधने यत्तः तस्य क्षत्रियदेवतत्वादिति भावः ॥४६॥

क्रि० ९०
॥८॥

ननु भवादृशभ्रातृसहायस्य महावीरस्य युधिष्ठिरस्य कथं शत्रुपरिभवप्राप्तिरित्यत आह। दुरक्षानिति। दुरक्षान् कपटपाशकानित्यर्थः। दिवः कर्मे
वेति करणे कर्मसंज्ञा दीव्यता। अक्रीडता दत्तेन न निवर्त्तते द्यूतात्तपरम्परा दर्पीत्तिशास्त्रात्तन्न तु मम सनितयेति भावः। राज्ञा युधिष्ठिरेण रा
ज्यं राष्ट्रं आत्मा स्वयं वयं चत्वारोऽनुजा वधूर्जाया द्रौपदी च पणतां ग्लहत्वं। पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते इत्यमरः। नी
तानि। सर्वं द्यूते न हारितमित्यर्थः। नीतानीति नपुंसकैकशेषः। नयतेर्द्विकर्मकत्वादप्रधाने कर्मणि क्तः। ननु सर्वज्ञस्य राज्ञः कथ
मियमविमृश्यकारिता तत्राह। भवितव्यता अनर्थो नाम वश्यंभाविता ईदृशी नूनं नात्र संशय इत्यर्थः। बुद्धिरपि भवितव्यतामनु

दुरक्षान्दीव्यता राज्ञा राज्यमात्मा वयं वधूः। नीतानि पणतां नूनमीदृशी भवितव्यता॥४७॥
तेनानुजसहायेन द्रौपद्या च विना मया। भृशमायामियामासु यामिनीष्वनुतप्यते॥४८॥
हृतोत्तरीयां प्रसभं सभायामागतह्रियः। मर्मच्छिदा नो वचसा निरतक्षन्नरातयः॥४९॥

सरत्येवानस्वतन्त्रे इत्यर्थः॥४७॥ ननु तथापि तत्र वनेषु आसंगो न तेषां त्वयीत्यत्राह। तेनेति। अनुजाः सहाया यस्य तेनानुजयुक्तेनेत्य
र्थः। तुल्ययोगः समासार्थः। तेन युधिष्ठिरेण द्रौपद्या च मया विना मद्विरहादित्यर्थः। आयामिनो दीर्घाः यामाः प्रहरा यासां तासु दुःखितस्य
तथा भावादिति भावः। यामिनीष्वभितप्यते परितप्यते भावे लट्। भ्रातृषु मद्विरहे तेषामपि मय्यासंगात् मम वैराग्याच्च काश इत्यर्थः॥४८॥ अथ वै
रनिर्यातनस्यावश्यंभावद्योतनाय चतुर्भिः परनिकारान्वर्णयति। हृतेत्यादि। अरातयः सभायां प्रसभं बलात्कारेण हृतोत्तरीया
न्नः अत एवागतह्रियः संप्राप्तलज्जान्नोऽस्मान् मर्मच्छिदा मर्मच्छेदिना वचसा निरतक्षन् अशातयन् वस्त्रापहारवाक्याभ्यामभ्यात
थान्यथयामासुरित्यर्थः। तक्षणपदसामर्थ्याद्वचसो वाश्योपम्यं गम्यत इति वस्तुतेनालंकारध्वनिः॥४९॥

अथातिदुःसहं निकारांतरमाह। उपाधत्तेति॥ अंतको मृत्युः गुरुसन्निधौ भीष्मद्रोणादिसमक्षमेव सत्याः पतिव्रतायाः कृष्णायाः आनयने केशां
बरादिकर्षणे भावं इच्छां सत्यंकारमिव सपत्नेषु उपाधत्त निहितवान्। तेषां विनाशकाले विपरीतबुद्धिमुत्पादितवानित्यर्थः। क्रिय
तेनेति कारः करणे घञ् प्रत्ययः। सत्यस्य कारः। सत्यकारः। कारे सत्यापनं क्रियादौ स सदा हृणीयप्रादीयमानोऽल्पैकदेशः। कु
वे सत्यापनं सत्यकारः सत्याकृतिः स्त्रियामित्यमरः। कारे सत्यागदस्येति मुमागमः॥५०॥ केनयमानां कृष्णां सभ्यैर्वा किं कृतमित्याह
तामिति। दुःशासनः पुरःसरो यस्यास्तां तथोक्तां दुःशासनेन सभायां कृष्यमाणामित्यर्थः। अनुसर्जनादिति नङीप्। सभायां साधवः
सभ्याः। सभायायदिति यत्प्रत्ययः। अभिसायां दिनांतसमये अभिमुखस्थितस्येति शेषः। सायो नाशो दिनांतयोरिति विश्वः। लक्ष्मणेना

उपाधत्त सपत्नेषु कृष्णाया गुरुसन्निधौ॥ भावमानयने सत्याः सत्यंकारमिवांतकः॥५०॥ तामैक्षंत क्षणं सभ्या दुःशासनपुरः
सरां॥ अभिसायार्कमावर्त्तां छायामिव महातरोः॥५१॥ अयथार्थक्रियारंभैः पतिभिः किं तवेक्षितैः॥ अरुध्येतामितीवास्या न
यने बाष्पवारिणा॥५२॥

भिप्रालीचाभिमुख्येऽव्ययीभावः। महातरोः संबंधिनीमावर्त्तां परिवर्त्तां छायामिव क्षणमैक्षंत न तु चिरं जुगुप्सितत्वात् नापि
किंचिद्व्याप्रियंत माध्यस्थ्यात् भयात्। ते तत्र केवलं साक्षिमात्रमासन्नित्यर्थः। अत्राकृष्यमाणायाः कृष्णायाः आकृ
ष्टारं प्रति पराङ्मुखत्वादावर्त्तच्छायोपम्यं। तथापि तामनुवर्त्तीति। दुःशासनस्य तरुसाम्यं॥५१॥ अथास्यास्तादात्मिकमानर्थं
वर्णयति। अयथार्थेति॥ अयथार्था मिथ्याभूताः क्रियारंभाः पतिशब्दप्रवृत्तिनिमित्तकर्मोद्योगाः येषां तैः तामरक्षद्भिरित्यर्थः।
तत्संबंधिभिः पातिरक्षतीति पतयो भर्त्तारः। पातेर्डतिरित्यौणादिको डतिप्रत्ययः। निरीक्षितैरवेक्षितैः पतिभिः किं न किमपि फल
मस्तीत्यर्थः इतीवेत्थं विचार्येव सुलक्ष्मा। बाष्पवारिणा अस्याः कृष्णायाः नयने अरुध्येतां आवृते। रुधेः कर्मणि लङ्। अशरणा रोदीदित्यर्थः।
॥५२॥

ननुभवद्भिः किमेर्थेयमसमर्थैरिवोपेक्षितंतत्राह। सोढवानिति॥ गुणाः प्रियायस्यसगुणप्रियः प्रियगुणोवाप्रियस्येतिपरनिपातः। ज्यायान
ग्रजोयुधिष्ठिरएववृद्धस्य श्रोदीयमुनिम्पादेशोज्यायादीयसइत्सकारादेशः। नोस्माकंमंतेभवामंसानिकृष्णांदेशंसोढवान्नतुवयंकिं
तुतदवरुद्धाइतिभावः। ननुशत्रूपेक्षामहानर्थकारिणी साशंक्याह। विद्विषांभंगाः सुलभः कालांतरेपीतिशेषः। सत्सुसज्जनेषुग्रवा
प्यताअनिंघतादुर्लभाननुशत्रुपेक्षाः अतोलोकापवादएवेवबलवान्। तस्यासन्नुस्यपुनरप्रतिविधेयत्वात्सस्वसमयोल्लंघने
स्या[redacted]दवेतिभावः॥५३॥॥ ननुशत्रुवधेराज्ञांकोनामापवादः प्रसुतकीर्तिरेवेत्याशंक्यसत्यंएवसमयोल्लंघनकलंकि
तकीर्तिर्महानिंदीनमित्याशयेनाह॥ स्थित्येति॥ नोपराशीनांतोयानिमनस्विनांमनांसिवस्थितिंसतिक्रांतमर्यादोल्लंघनादुतोः

सोढवान्नोदशामेंत्यांज्यायानेवगुणप्रियः॥ सुलभोहिद्विषांभंगो दुर्लभासत्स्ववाच्यता॥५३॥ स्थित्यतिक्रांतिभीरूणि
स्वच्छान्याकुलितान्यपि॥ तोयानितोयराशीनां मनांसिचमनस्विनां॥५४॥ धार्तराष्ट्रैःसहप्रीतिर्वैरमस्मास्वसू
यत॥ असन्मैत्रीहिदोषाय कूलच्छायेवसेविता॥५५॥

भीरूणि अतएवाकुलानिसंक्षोभितान्यपिस्वच्छान्यकलुषाणितत्वरंतीत्यर्थः। मनस्वी अयंयुधिष्ठिरइतिभावः। अत्रतोयानांसामा
न्यतोमनस्विनांवाचयरूतानां [illegible]गुणकार्यीदौपम्यगम्यतायांतुल्ययोगितालंकारःपूर्णा गंभीरत्वंस्वच्छत्वंचा॥५४॥ नन्वजातश
त्रोःस्वजनवैरंकिंकारणमित्याशंक्यासत्सौहार्दमेवसाहः॥ धतेयाशेति॥ धार्तराष्ट्रैर्नरराजपुत्रैःसहप्रीतिः सौहार्दमेवअस्मासुवि
षयेवैरंअसूयत। सूयतेर्दैवादिकात्कर्तरिलङ्। ननुसौहार्दंवे[illegible]रजनकं चवदिप्रतिषिद्धं। तत्राह॥ असदिति॥ हियस्मात
असन्मैत्रीदुर्जनसंगतिःकूलस्यासन्नपातस्यनदीतटस्यच्छायेवसेवितासतिदोषायानर्थायभवति। नखलुदुर्जनः सुजन
वन्मित्रद्रोहपाकंपश्यतीतिभावः। उपमाप्राणितोयमर्थोलंकारन्यासः॥५५॥ ॥ ॥ ५५॥ ॥ ६

नन्वादावेव वतेषां व त्तं अविज्ञाय कथं मैत्री कृतेत्याशंक्य किं कुर्मो दुर्जनवृत्तं दुर्विज्ञेयमित्याह। अपवादादिति। अपवादात् जनापवादात् अभीतस्या
जुगुप्समानस्येत्यर्थः। गुणदोषयोः समस्य तुल्यबुद्धेः निग्रहानुग्रहे गुणदोषावननुरूपत इत्यर्थः। विधावप्येतद्धि प्रोषणं योज्यं। असद्वृत्तेर्दुरा
चारस्य धूर्तस्य वृत्तं विधेर्दैवस्य वृत्तमिव दुर्विभाव्यं विभावयितुमशक्यं। किं तु कार्यैकसमधिगम्य हि तमित्यर्थः। न वेतं प्यता दित्वार्थे वलेप्र
त्ययः।५६। नन्वेवं मानी कथं परिभूतो जीवतीत्यत्राह। ध्वंसेतेति। परैः शत्रुभिः परिभूतस्य मे हृदयं सद्यो ध्वंसेत नश्येद् दीर्येत। अमर्षः
कर्ता प्रतीकारं प्रतिक्रियारूपं भुजालंबं हस्तावलंबनं न लंभयेत् न ग्राहयेत्। यदि हृदयेन विशेषः। सत्यं जीवामि प्रतिविधित्सया न तु
निर्लज्जतयेति भावः।५७। नन्वेवं कोपमभिमानस्तत्राह। अवधूयेति। अरिभिः अवधूय परिभूय हरिणैर्मृगैस्तुल्यवृत्तितां

अपवादादभीतस्य समस्य गुणदोषयोः॥ असद्वृत्तेरहो वृत्तं दुर्विभाव्यं विधेरिव॥५६॥ ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः।
यद्यमर्षः प्रतीकारं भुजालंबं न लंभयेत्॥५७॥ अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तितां॥ अन्योन्यस्यापि जिह्रीमः किं पुनः
सहवासिनां॥५८॥ शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः॥ जन्मिनो मानहीनस्य तृणस्य च समा गतिः॥५९॥

तुल्यवृत्तिजीवनं वन्याहार[illegible]मित्यर्थः। नीताः प्रापिताः वयं यं वेति शेषः। अन्योन्यस्यापि जिह्रीमो लज्जामहे सहवासिनां सहवा
रिणां किं पुनः प्रागेव जिह्रीमह इति किमु वक्तव्यमित्यर्थः। क्रियायोगे संबंधसामान्ये षष्ठी। अत्र वयं पञ्चापि तुल्याभिमाना एव इदं
नुमदेकसाध्यं कर्मेति मुनिशासनात् मयानुष्ठीयत इति भावः।५८। तर्हि दुःखैकनिदानमतः शत्रुमानमेव त्यज्यतामित्याशं
क्य तत्त्यागे दोषमाह। शक्तीति। शक्तिवैकल्येन उत्साहादिशक्तिवैधुर्येण अवष्टंभसामर्थ्यविरहेण च नम्रस्य विधेय
भूतस्य च निःसारत्वात् दुर्बलत्वात् स्थिरांशरहितत्वाच्च। सारो बले स्थिरांशे चेत्यमरः। लघीयसो गौरवहीनस्य तृणस्य अभीरस्येस
र्थे। मानहीनस्य जन्मिनो जन्तोः। प्रीत्यादिभिः तृणस्य च गतिः अवस्था समेति मानहीनस्य तृणादपि निकृष्टत्वात् न साम्यो
मान इति भावः। मूले घालंकारोयं तदनुप्राणितयमुपमेत्यन्योर्थदीपकं चेत्युच्यते॥५९॥

ति१।

मानस्यागे दोषमुक्त्वा तत्सद्भावेषड्गुणमाह ॥ अलंघ्यमित्यादि ॥ महीभृतां संबंधियद्यत् शृंगादिकमुच्चैरुन्नतं तत्तदलंघ्यमुद्वीक्ष्योत्प्रेक्ष
तर्कयितेति यावत् महतां तुंगतामानोन्नसंज्ञायसी प्रियतामतिप्रियत्वं केन हेतुना मामात न केनापि प्रियत्वं गच्छेत्येव स्यर्थः॥ तुंगतेनेय
र्थः॥ आशिषिमाङि लुङ्॥ अट् अपवादः देवनिषु तोपि इङ्यामुत्सादयत्सेवोषयवदित्यर्थः॥ उद्यबाधवदस्मिन्नर्थे द्वलितत्वश सायोत
नामा श्रीप्रयोगमुद्वीक्ष्य तत्समानकर्तृकेवा... शः क्वचित्प्रयोग दर्शनात्सोढव्यः केचिदुद्वीक्ष्य मिति पठंतितत्रयदुच्चैस्तदलंघ्यं
उद्वीक्ष्य च अतो महतामित्यादियोजयंति ॥६०॥ तावदिति ॥ किं च तावद्देवासो लक्ष्म्याः श्रीपते तावदस्य पुंसो यशः स्थिरं तावद्देवासो
पुरुषः पुरुषत्वेन गण्यं ते इत्यर्थः॥ यावन्मानान्न हीयते न भ्रश्यति॥ मानहीनस्य नाकिंचित्तेजमस्तीत्यर्थः॥६१॥ स इति॥ स पुमा

10

अलंघ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृतां॥ प्रियतां ज्यायसीमागान्महतां केन तुंगता॥६०॥ तावदाश्रियते लक्ष्म्या तावदस्य
स्थिरं यशः॥ पुरुषस्तावदेवासौ यावन्मानान्न हीयते॥६१॥ स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते॥ नान्यामंगुलिमभ्ये
ति संख्यायामुद्यतांगुलिः॥६२॥ दुरासदवनज्यायान् गम्यस्तुंगोपि भूधरः॥ न जहाति महौजस्कं मानप्रांशुमलंघ्यता॥६३॥

नर्थवज्जन्मा सार्थकजन्मा यस्य पुंसः नाम्नि पुरोऽग्रे स्थिते सति संख्यायां पुरुषगणनाप्रस्तावे उद्यतामधिरूढोऽभिमतोऽंगुलिरन्यां द्वि
तीयां अंगुलिमुद्यतामिति शेषः॥ नाभ्येति अद्वितीयत्वादस्येत्यर्थः॥ एतन्मान रहितनसंभवतीति भावः॥६२॥ दुरासदेति॥ दुरासदैर्दुः
प्रवेशैः वनैर्ज्यायान् प्रवृद्धः तथा तुंगोपि भूधरो गम्योगंतुं शक्य एव प्रसिद्धचैतदिति भावः॥ महौजस्कं प्रतापवन्तं मानप्रांशुं मानो
न्नतं पुरुषमिति शेषः॥ अलंघ्यता न जहाति न कदाचिन्मानी लंघयितुं शक्यत इत्यर्थः॥ गिरेरपि गरीयान्मानाधिक इति भावः॥ अत्र
त्रोपमानाद्भूधरादुपमेयस्य मानिनो मधोतरसाम्येप्यलंघ्यत्वेनाधिक्यकथनाद्व्यतिरेकालंकारः॥६३॥

गुरून् इति ॥ तेन राः वंश्याः न च्वये भवान् गुरुस्तत् कुर्वंति प्रथयंति स्विवेन नाम्नाख्यपरे श्यंति रघु दिलीपादिवदित्यर्थः तैर्नरैर्वसुनि यनानि धारयन्तीति वसुं
धरा संज्ञा याभूः तत्र तोत्याद्विनारव ममयं वित्रह्रस्वं मदृलिन्फ्रस्वः यं अन्वर्थामनुगतत्वार्थां तेषां वसुभूनानां धारणादिति भावः येषां शुभ्राणि
यशांसि इन्दुमंडलं ह्रेपयंति लज्जयंति निष्फलं कलादिति भावः दृष्टशुभ्रं हि यशो मानमहत एव संभवतीति तात्पर्यं ह्रीधातोर्ण्यंतालल्ट् अर्ति ह्री सा
निनायुगागमः अत्र ह्रेयणस्य सादृश्य पर्यवसानात् उपमालंकारः ॥ ६४ ॥ उदाहरणम् इति ॥ येऽमर्षः क्रोधः शुष्कः अशनीरिव अरातिषु पा
त्यन्ते प्रक्षिप्यन्ते मनस्विनां मानिनां प्रथमे अग्रेसराः स्तु आशीः शुचिनयेस्व स्यादिः आशीर्वादे धुदाहरणं निदर्शनं भवतीति शेषः रामादिवदु
न पमानं भवतीत्यर्थः अतो ग्रंसान्मानमानदृतिसंदर्भार्थः ॥ ६५ ॥ यदुक्तं अपिद्रोहणभूतानामित्यादि तत्र युक्तमेनोत्तरमाह ॥ नेत्यादि उक्त्व

गुरून् कुर्वंतिते वंश्या नन्वर्था तैर्वसुंधरा ॥ येषां यशांसि शुभ्राणि ह्रेपयंतीन्दुमण्डलं ॥ ६४ ॥ उदाहरणमाशीः शुप्रथमे ते मनस्विनां ॥
शुष्काशनिरिवामर्षो यैरराति पात्यते ॥ ६५ ॥ नसुखं प्रार्थये नार्थमुदन्वद्वीचिचंचलं ॥ नानित्यता शनेस्त्रस्यं विविक्तं ब्रह्मणः पदं ॥
६६ ॥ प्रमादुक्तमपय शूः पं क मिदं यं अनागतं ॥ वैधव्यतापिता राति वनिताल्लोचनां बुभिः ॥ ६७ ॥ ॥ ॥ ६८ ॥ ॥ ॥

हि विरिवचंचलं अस्थिरं सुखं कामं न प्रार्थये नेच्छामि तथा चंचलमर्थं वन प्रार्थये किं च अनित्यता विनाशिता सैवाशनिस्तत्स्यास्त्रस्य
न विभ्रन रावान्भाशेत्यादिना शनप्रसवः ॥ विविक्तं निर्बाधं ब्रह्मणः वेधसः आत्मनः पयतद्वृति पदं स्थानं ऐक्यलक्षणां मुक्तिं न प्रार्थये एतेन
यदुक्तं मुक्तिं देहं अन्मनः कर्तुमित्यादि तत्समाहितं ॥ ६६ ॥ प्रमादमिति ॥ किं तु यं ह्रनाक पटेन हृतं शत्रुभिरिति शेषः ॥ अपरस्पं वर्धकत्व
मितिरूपकालंकारः वैधव्येन तापिताएनां दुःखितानां मराति वनितानां लोचनांबुभिः प्रमार्ष्टुं क्षालयितुमभिलषेयं इच्छामि
तो लिङ् रूपं वैरिनिर्यातनातिरिक्तं न किंचिदिच्छामीत्यर्थः ॥ ६७ ॥ ६८ ॥ ॥ ॥ ॥ ॥ ६९ ॥ ६९ ॥ ॥ ॥

एवं तर्हि यः करोति स धीरोदर्का इत्याद्युक्तदोषः स्यादित्याशंक्याङ्गीकृत्यापि निर्दोषोऽयमिति न्यायमाश्रित्य युग्मेनोत्तरमाह। अपहस्येदित्यादि। अ-
थवा सद्भिः पण्डितैरपहस्येय अपहसिष्ये इत्यर्थः वर्तमानसामीप्ये वर्तमानवद्वेति लट्। हसतेर्ण्यन्तात्कर्मणि लिङ्। एयान्तस्तु भ्रान्तपाठः। मे धि-
यः प्रमादोऽनवधानत्वं वास्तु भवानपि अस्थाने अयोग्यविषये विहितः आयासो हितोपदेशप्रयासो येन तथोक्तो विपुलप्रयत्नः सन्
इत्यर्थः। कामं जिह्रेतु लज्जतु ॥६८॥ वंशेति॥ अहं तु विद्विषां समुच्छेदेन वंशलक्ष्मीमनुद्धृत्य निर्वाणं मोक्षमपि जयश्रियोऽन्तरायं मन्ये न तु
पुरुषार्थमित्यर्थः। किमुतान्यत्स्वर्गादिकमिति भावः॥६९॥ ननु यं दुराग्रह इत्यत आह। अजन्मेति॥ पुरुषो यावदरिभिर्विलुप्तं हृतं य-
शः इषुभिर्नोद्दत्ते अरिवधेन न प्रत्याहरतीत्यर्थः तावदजन्मा अजातप्राय इत्यर्थः। नन्वतो जननानन्तरमुपयुक्त एवेत्यत आपक्षान्तरमा

॥

युग्मं। अपहस्येयथवा सद्भिः प्रमादो वास्तु मे धियः ॥ अस्थानविहितायासः कामं जिह्रेतु वा भवान् ॥६८॥ वंशलक्ष्मीमनुद्धृत्य
समुच्छेदेन विद्विषां ॥ निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥६९॥ अजन्मा पुरुषस्तावद्गतासुस्तृणमेव वा ॥ यावन्नेषुभिरादत्ते वि-
लुप्तमरिभिर्यशः ॥७०॥ अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति ॥ पुरुषोक्तिः कथं तस्मिन्ब्रूहि त्वं हि तपोधन ॥७१॥

ह गतासुः मृतो मृतकतुल्य इत्यर्थः। मृतोऽपि प्रागुपयुक्तवानित्यत आह तृणमेवेति। अकिंचित्करस्य तृणकाल्पानुपयोगात् जीवन्मृत
इत्यर्थः अतो नाहमार्गं हे ब्रवीमि किंतु वीरधर्ममनुपालयामीति भावः ॥७०॥ सर्वथा वैरानिर्यातनं कर्तव्यमित्युक्तं तदकरणे पुरुष
गुणानां हानिदोषमाह। अनिर्जयेनेति॥ यस्यामर्षो द्विषतामनिर्जयेन निर्जयं विनैव प्रशाम्यति उपलक्षणे तृतीया। तस्मिन्पुरुष
इत्युक्तिः पुरुषशब्दः कथं चिदित्यर्थः प्रवर्तत इति शेषः। प्रवृत्तिनिमित्तस्य पुरुषाकारस्याभावादिति भावः। हे तपोधन त्वं ब्रू-
हि। न चैतत्किंचिदनधिगतमस्तीति भावः। हि हेतावधारणे इत्यमरः ॥७१॥ ७१ ॥७१॥

ननु पुरुषत्वं त्वय्यास्येव पुरुषोसि किमवज्ञया किंपुरुषाकारेणेत्यत आह॥ कृतमित्यादि द्वयेन॥ जातिमात्रावलंबिना जातिमात्राभिधायिना पुरुषशब्देन कृत मलं न तेन किंचित्साध्यमस्तीत्यर्थः॥ अत्र गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीयेत्युक्तं प्राक्‌कृतमिति निषेधार्थमव्ययं वादिषूप यतेसत्यं जातिमात्रेपि पुरुषशब्दः प्रवर्तते परं तु नासौ पुंसामाशास्यः पश्वादिसाधारणत्वादिति तात्पर्यार्थः। तर्हि किं दृक्‌शलाघ्य इत्या शंक्याह यदित्यादिना अर्थत्रयेण। यः पुमान् आगीकृतगुणैः गुणपक्षपातिभिः श्लाघ्यः स्तुत्यः सन् सविस्मयमुदाहृतः पुंसामीदृशो न भ वितव्यमितिनिदर्शितः॥७२॥ असमानमिति॥ किंच सदसा सभया गौरवेणेरितं कथाप्रसंगेषु गौरवपूर्वकमुच्चारितं सतत आजांसि श्रण्वतां तेजांसि असमानं गिलदिव स्थितं यस्य पुंसो नाम द्विषोप्यभिनंदंति अनुमोदंति किमुत सुहृद इति भावः स पुमान् न तु पुमान् रः

कृतं पुरुषशब्देन जातिमात्रावलंबिना। योगी कृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः॥७२॥ असमानमिवौजांसि सभायां गौरवेरितं॥ नाम यस्याभिनंदंति द्विषोपि स पुमान् पुमान्॥७३॥ युग्मं॥ यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया॥ ममै वाध्येति नृपतिस्तृष्यन्निव जलांजलिम्॥७४॥

पुरुषत्वेन गण्य इत्यर्थः। प्रथमः पुरुषशब्दो जातिवचनः द्वितीयो गुणवचनः स एव श्लाघ्य इत्यर्थः। अत्र पुमान्पुमानिति तात्प र्यभेदभिन्नशब्दार्थपौनरुक्त्यलक्षणो लाटानुप्रासोलंकारः। तथा च सूत्रं तात्पर्यभेदयुक्तं लाटानुप्रास इति॥७३॥ ननु सत्सु भीष्मादिषु तवैवायं कोभिनिवेश इत्याह। यथेति॥ नृपतिर्युधिष्ठिरः। यथाप्रतिज्ञं युधि द्विषतां प्रतिचिकीर्षया द्विषतः प्रति कर्तुमिच्छया प्रतिज्ञामनुसृत्यैवाजिघांसयेत्यर्थः। तृष्यन् पिपासुर्जलांजलिमिव। ममैवाध्येति। कार्पण्ये स्मरति। मदायत्तत्वात्त मामेव स्मरति॥ अत एव ममापमभिनिवेश इत्यर्थः। अधीगर्थदयेषां कर्मणि इति शेषः। कर्मणि षष्ठी॥७४॥ ॥७४॥

ननु युधिष्ठिरः स्वार्थपरस्तत्कथं स्वार्थमात्रमनुसंधीनामि सत्याह ॥ स इति ॥ स नरोऽवदातस्य स्वच्छस्य वंशस्य शशांकस्येव लांछनं कलंकः यत्र यस्मिन् पुरुषे कष्टेषु व्यसनेषु भर्तुः स्वामिनः आज्ञया व्यर्थया भूयते भावे लट् आपदि स्वामिनमपेक्षकः तत्कथं स्वार्थनिष्ठ कार्ये युक्तमित्यर्थः ॥ ७५ ॥ यदुक्तं विशिष्टाहिरण्यकोत्साहमित्यादि तत्रोत्तरमाह ॥ कथं वेति ॥ धर्मविरोधिनी अर्वाग्गार्हस्थ्यपालने प्राग्वमुनिता वानप्रस्थत्वं चतुर्थाश्रमो वर्णप्रक्रमेण तस्य विधानात्तत्र या वर्णानां वेदमधीत्य चत्वार आश्रमा इति सूत्रकारवचनाद्यो क्षत्रियस्यापि केचिदिच्छन्ति सा च थैव साम्यग्विवेचितमस्माभिः रघुवंशे संजीविन्यां स किलाश्रमसमाश्रितं इत्यत्र कथं वादीयतां संप्रश्ने लोट् तथा हि पूर्वैर्मन्वादिभिराश्रमानुक्रमः ब्रह्मचारी भूत्वा गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेदिति श्रुत्यनुसारादित्यर्थः एतस्यादपि च

स वंशस्यावदातस्य शशांकस्येव लांछनं ॥ कृच्छ्रेषु व्यर्थया यत्र भूते यर्भर्तुराज्ञया ॥ ७५ ॥ कथं वादीयतामर्वाक् मुनिता धर्मरोधिनी ॥ आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥ ७६ ॥ आसक्ताधूरियं रूढा जननी दूरगा च मे ॥ तिरस्करोति स्वातंत्र्यं ज्यायांश्चाचारवान्नृपः ॥ ७७ ॥ ॥

त्वार आश्रमस्य क्षत्रिये णोक्तं यदि वेत्तथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति व्युत्क्रमपक्षस्यापि श्रवणात्सामान्येन विशेषणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ७६ ॥ ननु भवान्गृहस्थ एव तत्कथमर्वाक् मुनित्वविरोध इत्याशंक्य सत्यं गृहस्थोऽस्मि तथापि कृतनिखिलकृत्यगृहस्थकर्तव्यस्य वानप्रस्थाधिकारो न गृहस्थमात्रस्य न चाहं तथापि कृतकृत्य इत्याह ॥ आसक्तेति ॥ आसक्ता लग्ना अवश्यं कर्तव्य इत्यर्थः रूढा प्रसिद्धा महतीत्यर्थः इयं पूर्वोक्ता धूर्वैरनिर्यातनभारः दूरवर्तिनी जननी वत्तथा आचारवान् तपोधिक इत्यर्थः तथापि ज्यायान् ज्येष्ठो नृपो युधिष्ठिरश्च मे स्वातंत्र्यं स्वाधिपतित्वं तिरस्करोति ॥ आश्रमान्तरं प्रतिबध्नातीत्यर्थः ॥ तिरस्करोतीति प्रत्येकमभिसंबध्यते अन्यथा बहुवचनप्रसंगात् ॥ ७७ ॥ ७७ ॥ ॥

उक्तमर्थमनुपसंहरति स्वधर्ममिति ॥ मानशालिनः स्वधर्मं क्षात्रं धर्मं अनुरुन्धन्ते अनुवर्तन्ते अतिक्रमं स्वधर्मातिक्रमं स्वनाशुरुन्धन्ते किमत आह । अ
रातिभिरिति अरातिभिः कृतध्वंसाः कृतापकाराः सन्तः आहवान्न पलायन्ते अयमेव स्वधर्मानुरोध इत्यर्थः । उपसर्गस्यायतौ इति रेफल
त्वं अत्र मनुः न निवर्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन्निति । अत्रोत्तरवाक्यं प्रतिवाक्यं पूर्ववाक्यार्थस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिं
गमलंकारः ॥७८॥ किं बहुनामायं निश्चयः आयतामित्याह विच्छिन्नेति । विच्छिन्नं वातां हतं यदभ्रं तद्वद्विलीयेति विच्छिन्नाभ्रविलायं उपमा
नेकर्मणि चेत्युपमानकर्तर्युपपदे णमुल् नगमूर्धन्यस्मिन्निति शृंगे विलीय विशीर्य वा कषादिषु यथाविध्यनुप्रयोगः । पद्मासु हस्त्यक्षमा
राध्य अ[illegible] यशः एव शल्यं तदुद्धरेयुद्धरिष्यामि । न लुगसन्तरं शक्यं इत्यर्थः वा शब्दो विकल्पे ॥७९॥ इति इति ॥ मघवा इत्युक्तवन्तं तनूजं सु

स्वधर्ममनुरुन्धन्ते नातिक्रममरातिभिः ॥ पलायन्ते कृतध्वंसा नाहवान्मानशालिनः ॥७८॥ विच्छिन्नाभ्रविलायं वा विलीये नगमूर्धनि ॥ आ
राध्य वा सहस्राक्षमयशःशल्यमुद्धरे ॥७९॥ इत्युक्तवन्तं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्तिः ॥ अघोपघातं मघवा विभूत्यै तस्मै
भवोद्भवाराधनमादिदेश ॥८०॥ प्रीते पिनाकिनि मया सह लोकपालैर्लोकत्रयेऽपि विहिताप्रतिवार्यवीर्यः ॥ लक्ष्मीं समुत्सुकयितासि भृशं परेषा
मुच्चार्य वाचमिति तेन तिरोबभूवे ॥८१॥ ॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारवीकृतौ इन्द्रप्रसादो नामैकादशः सर्गः ॥ समाप्तः ॥

तमर्जुनं आविष्कृता दिव्यमूर्तिर्निजरूपं येन स तथोक्तः सन् दोर्भ्यां परिरभ्य विभूत्यै श्रेयसे उपहन्यतेऽनेनेति उपघात करणे घ अस्य पः
अघानां दुःखानां उपघातं भवः संसारस्तस्योद्भवः कारणमिति भवोद्भवः शिवस्तस्याराधनमुपासनमादिदेश । शिवमुद्दिश्य तपश्चरे
त्साश्राययामासेत्यर्थः ॥८०॥ प्रीत इति ॥ पिनाकिनि शिवे प्रीते सति लोकपालैः सह मया लोकत्रयेऽपि विहितं रक्तं अप्रतिवार्यं आनिवारित
वीर्यं यस्य स तथोक्तः सन् परेषां शत्रूणां लक्ष्मीं भृशं समुत्सुकयितासि समुत्सुकां त्वय्यनुरक्तां कर्तासि पुनराहरिष्यसीत्यर्थः । वीरभो
ग्याः सम्पद इति भावः । समुत्सुकशब्दात् करोतीति णिच् तात्कर्तरि लुट् । इति वाचमुच्चार्य तेनेन्द्रेण तिरोबभूवे अन्तर्दधे भावे लिट् ॥८१॥
इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायामेकादशः सर्गः समाप्तः ॥

13

॥ किरातस्यायंसर्गैकादशः समाप्तः ॥ ॥

१३

किरातस्य षोडशसर्गप्रारंभोयं ॥

नमो भैरवनाथाय नमो भगवते वासुदेवाय नमः॥ तत इति॥ किराताधिपतेः संबंधिनीं अलघ्वीं गुर्वीं आजिक्रियां वीक्ष्य विरूढमन्युः प्ररूढकोपः विवि
क्तानि कलंकः तर्कयांबुभूवान् वृषस्य सोऽर्जुनः कारणानि रणजप्रकाराणि विविक्तानि विमृशन् इतीत्थं वक्ष्यमाणप्रकारेण तर्कयामास अभ्यूहितवान्॥१॥
अथ त्रयोविंशतिश्लोकैर्वितर्कमेवाह। मद इति॥ इह युधि मदस्रुतिभिर्मदप्रवाहैः श्यामीकृताः श्यामिता गंडलेखाः कपोलभागा येषां ते विक्रांताः
पराक्रमं कुर्वंतः कृतविक्रमाः तैर्नरैरधिरूढाः सहिष्णवो रणभरक्षमाः युधां युद्धानां अभिज्ञाः शिक्षिता इत्यर्थः॥ इत्थंभूता कर्मणि षष्ठी किं च नगानां
पर्वतानां उच्छ्रायमौन्नत्यं चलतो नोपसर्गस्य समासो नोपसृष्टात् घञ् प्रत्ययः॥ श्रिणीभुवोनुपसर्गे इति [redacted] निषेधात्॥ आक्षिपंतः प्रतिविध्यंत

ततः किराताधिपतेरलघ्वीमाजिक्रियां वीक्ष्य विरूढमन्युः॥ स तर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निति कारणानि॥१॥
मदस्रुतिश्यामितगंडलेखाः क्रामंति विक्रांतनराधिरूढाः॥ सहिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवाक्षिपंतः॥२॥
विचित्रया चित्रयतेव भिन्नां रुचिं रवेः केतनरत्नभासा॥ महारथौघेन न संनिरुद्धा पयोदमंद्रध्वनिना धरित्री॥३॥
समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपंक्ति॥ विभिन्नमर्यादमिहातनोति नाश्वीयमाशा जलधेरिवांभः॥४॥

इव स्थिताः तथा नेता इत्यर्थः नागाः गजाः नगा इव पर्वता इव संग्रामे नाक्रमंति न चरंति यथायुद्धांतरेष्विति शेषः॥ एवमुत्तरत्रापि सर्वत्र द्रष्टव्यं त
थापि कथं मे शक्तिह्रासो येनेति सर्वत्रापि तात्पर्यार्थश्च॥२॥ विचित्रेति॥ विचित्रया नानाचर्पयाकेतनानां रत्नानि तेषां भासा प्रभया भिन्नां संवलि
तां रवेः रुचं कांतिं चित्रवर्णां कुर्वतेव स्थितेन केतनभासेत्यमुना पयोदमंद्रध्वनिना मेघगंभीरघोषेण महारथौघेन समूहेन धरित्री
न संनिरुद्धा नावृता॥३॥ समुल्लसदिति॥ इह युधि प्रासाः कुंताः प्रासः कुंत इत्यमरः॥ ते महोर्मय इव तेषां माला उल्लसंती यत्र तत्समुल्लसत्प्रास
प्रासमहोर्मिमालं चामराणि फेनाइव तेषां पंक्तयः स्फुरंत्यश्चामरफेनपंक्तयो यत्र तत्तथोक्तं आश्वीयं अश्वसमूहो वंदेत्याश्वीयमाश्व
वदिसमरः॥ जलधेरंभ इव विभिन्नमर्यादमुच्छृंखलं यथा तथा आशा दिशो नातनोति नावृणोति॥४॥ ५५ ५५ ५५

हताहतेति ॥ हतप्राहरत आहतविध्यत हतेत्ति लोट् हि मध्यमपुरुषबहुवचनं । अनुदात्तोपदेशेत्यादिनाऽनुनासिकलोपः । आहतेस्यत्र
कर्मणोऽप्रियोगे पि स्वाभाविकसकर्मकत्वस्यानपायात् । अकर्मकत्वस्य चात्राविवक्षितत्वात् । तस्मिन्नेव निवृत्ते राज्ञोऽयमहननेऽनुसा
लनेपुङ् इत्येवमुद्धताः प्रगल्भाः भीमाश्च घोषाः शब्दा येषां तैश्च योद्धृभिः योधैः अभ्यमित्रं अमित्रानभि समुच्छ्रितायुधाः विवे
स्वतो शुभिः प्रतिफलितेरिति भावः ज्वलिता दीपिता अत एव प्राप्ताः तडितां त्विष इव त्विषो येषां तया भिस्त्वा वाहेतयः शस्त्राणि रणे
नपतन्ति । हेतिः स्त्रीपुंसयोरिति विश्वः ॥५॥ अभीति ॥ अभ्यायतो वीरान् हन्तुं अभ्यागच्छतः इणः शतृप्रत्ययः । अंतकस्य कालस्य संबं

हताहते सुद्धतभीमघोषैः समुच्छ्रितायोद्धृभिरभ्यमित्रं ॥ न हेतयः प्राप्ततडित्त्विषः खे विवस्वदंशुज्वलिताः पतन्ति ॥५॥
अभ्यायतः संततधूमधूम्रं व्यापि प्रभाजालमिवांतकस्य ॥ रजः प्रतूर्णाश्वरथांगनुन्नं तनोति न व्योमनि मातरिश्वा ॥६॥
भ्रेरेणुना रासभधूसरेण तिरोहिते वर्त्मनि लोचनानां ॥ नास्यत्र तेजस्विभिरुत्सुकानामह्नि प्रदोषः सुरसुंदरीणां ॥७॥

बंधिसंततधूमवद्धूम्रं कालस्य व्यापि व्यापकं प्रभाजालमिव स्थितं प्रतूर्णैर्वेगवद्भिः रथैः रथांगैश्चक्रैश्च अनुन्नं प्रेरितं रजो मातरिश्वा
मरुत् अत्राहवे व्योमनि आकाशे न तनोति न विस्तारयति ॥६॥ भ्रेरेणुनेति ॥ अत्राहवे रासभो गर्दभः तद्वद्धूसरेण ईषत्पांडुरेण इव
पांडुस्तु धूसरः इत्यमरः रासभो गर्दभः खर इत्यमरः । भ्रेरेणुना रजसा लोचनानां वर्त्मनि चक्षुर्मार्गे तिरोहिते सति तेजस्विभिः ते
जस्विषु वीरेषु उत्सुकानां वीरवरणार्थमागतानामिति सार्थः । प्रसितोत्सुकाभ्यां तृतीया चेति विकल्पात् तृतीया सुरसुंदरीणामह्नि
दिवस एव प्रदोषो रात्रिर्भीस्ति । अंधकारवशाद् दृष्टिरोधानाद्रात्रिभ्रमः स्यादिति भावः ॥७॥ ॥७॥ ॥८॥

रथांगेति॥ रथांगानां विक्रीडितं रथचक्रकूजितं अश्वानां हेषाहेषितानि शब्दितानि। कण्ठ्यंतु मध्यमश्वानां हेषा ह्रेषा च निस्वन इत्यमरः। बृं
हितमत्तद्विपानां बृंहितानि करिबृंहितानि। बृंहितं करिगर्जितमित्यमरः। संघर्षयोगादिव परस्परस्पर्द्धया संबद्धादिव मूर्छितानि वृद्धि
गतानि। नपुंसकमनपुंसकेनेत्यादिना नपुंसकैकशेषः। दुंदुभीनां ह्रादं निर्घोषं स्वान निर्घोष निर्ह्राद इत्यमरः। न निगृह्णन्ति। न तिरस्कु
र्वंति॥८॥ अस्मिन्निति॥ अस्मिन् रणे यशःपुरुषयोर्लोलुपानां गृध्नूनां अतएव शरासारैः प्रसृमरसंतुरसि प्रशस्तरुरसः सप्तमीस्थादिति समासो
तः क्षतानां विद्धानां संबंधिनं मूर्छायां तन्द्रायोरणविघ्नं असां आसारशीतलं वर्षधाराशीतलं धारासंपात आसार इत्यमरः। करिणां सीकर एवा
भः कर्तुं मुहुर्न्नो छिनत्तिन नाशयति॥९॥ असृगिति॥ असृङ्नदीनां तटानि उपचीयमानैः पुष्यमानैः तथा ध्वजिन्याः पदवीं वि

सं० रथांगसंक्रीडितमश्वहेषा बृंहितमत्तद्विपबृंहितानि॥ संघर्षयोगादिव मूर्छितानि ह्रादं निगृह्णन्तिन दुंदुभीनां॥८॥ अस्मिन्यं
शःपौरुषलोलुपानामरातिभिः प्रसृमरसंक्षतानां॥ मूर्छान्तरायं मुहुराछिनत्ति नासारशीतं करिशीकरांभः॥९॥ असृङ्नदीना
मुपचीयमानैर्विदूरयद्भिः पदवीं ध्वजिन्याः॥ उच्छ्रायमायांति न शोणितौघैः पंकेरिवाश्यानघनैस्तयानि॥१०॥ परिक्षते वक्षसि
दंतिदंतैः प्रियांकशीतानभसः पतंति॥ नेह प्रमोहं प्रियसाहसानां मंदारमाला विरलीकरोति॥११॥

दूषयद्भिः दुःसंचारां कुर्वद्भिः आश्यानाइव शुष्का संयोगादेरातो धातोर्यण्वत इति श्यायतेः निष्ठान त्वं घनाः सांद्राः तैराश्यानघनैः
शोणितौघैः पंकैरिवोछ्रायं वृद्धिं न यांति न गच्छंति॥१०॥ परीति॥ इह रणे दंतिदंतैर्गजदंतैः परिक्षते ताडिते ताडिते वक्षसि नभसः प
तंती प्रियायाः अंकइव उरसि वशीतला सुखकरा मंदारमाला सुरैर्विमुक्तेति शेषः। प्रियसाहसं येषां ते प्रियसाहसानां यतो
गता भियापि नाम्नि तिभावः प्रमोहं प्रहारे मूर्छितं विरलीकरोति न मंदीकरोति॥११॥ ११ ११२

निषादीति ॥ करिणां शीकरेण पुष्करैस्तुषारेण परीयमाणे व्याप्यमाने निषादिनो हस्त्यारोहाः हस्त्यारोहा निषादिन इत्यमरः । तेषां सन्नाहाः कवचा
नि तेषां मणिप्रभौघे रत्नौघे शुआलेऽर्क त्विषा रवेस्तु उन्मीलितमुल्लासितं आखंडलकार्मुकस्येंद्रधनुषः खंडं नाभ्युदेति ॥१२॥ महीति ॥ पक्ष
वता सपक्षेन महीभृता मेनाकेन वपरवारयो नशत्रुगजेन मध्यं विगाह्य प्रविश्य भिन्ना क्षोभिताः ध्वजिन्यः सेनाः अपां निधेः सागरस्यौघ इव वि
वर्तमानाः भ्रमंत्यः संस्यः स्याद्रावर्तोंभसां भ्रम इत्यमरः । भीमं ननंदुरिति ॥१३॥ महारथेति ॥ प्रतिदंत्यनीकं दंतिसैन्यं प्रति अनीकं तुरणे सैन्ये इति वि
श्वः । अधधिस्यंदाः अधिकं शब्दायमानाः स्यंदना रथा यत्र तत्तथा । तरसी तुरयस्यंद इत्यमरः । उत्थितानां प्रोत्थितानां महारथानां रथिक

निषादिसन्नाहमणिप्रभौघे परीयमाणे करशीकरेण ॥ अर्के त्विषोन्मीलितमभ्युदेति न खंडमाखंडलकार्मुकस्य ॥१२॥
महीभृता पक्षवतेव भिन्ना विगाह्य मध्यं परवारणेन ॥ व्यावर्तमाना ननदुर्तिभीममपांनिधेरोघ इव ध्वजिन्यः ॥१३॥
महारथानां प्रतिदंत्यनीकमधिस्यदस्यंदनमुत्थितानां ॥ आमूललूनैरतिमन्युनेव मातंगहस्तैर्व्रियते न पंथाः ॥१४॥
ध्वतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः ॥ न वर्हभारः पतितस्य शंकोर्निषादिवक्षस्थलमातनोति ॥१५॥

विशेषणं । आलानं सारथिं वाश्वान्रक्षन्युद्धेत यो नरः । समहारथसंज्ञः स्यादित्याहुर्नीतिशारदा इति लक्षणात् । पंथाः मार्गः । आमूलं
लूनैः छिन्नैः मातंगानां गजानां हस्तैः तैर्मातंगहस्तैरतिमन्युनाऽतिक्रोधेनेव नाव्रियते नावरुध्यते ॥१४॥ ध्वतेति ॥ पतितस्य वध्यस्य सि
मग्नस्य शंकोस्तोमरस्य संबंधी । वपुंसि शल्यं शंकुर्नो सर्वलौ ना तोमरोऽस्त्रियामित्यमरः । बर्हभारः तन्मूलमूलबद्धो लांछनविद्धपिच्छ
कलापः ध्वतउत्पलापीडः कुवलयशेखरो यस्मिन्सः प्रियायाः संबंधी शिथिलः स्रस्तशिरोरुहाणां कलापः केशपाशइव नि
षादिनो हस्त्यारोहस्य वक्षस्थलं न आतनोति । न व्याप्नोति ॥१५॥ २५ ॥ १५ ॥ १५ १६

उत्क्षिप्तत्वमिति ॥ अत्राहवे संहारे कल्पांत इव तेजस्विषु वीरेषु अस्तसंख्यं असंख्यं यथा तथा अन्हाय झटितीति । द्राग्झटित्यंजसाऽन्हायेति विश्वः ।
जीवितान्युत्सृष्टवत्सु त्यक्तवत्सु सत्सु मृत्युः लोकत्रयास्वादने भक्षणे लोलं लंपटं धनुः जिह्वा यस्मिन् तदाननं न व्याददाति न विवृणोति । अहो दैन्यमस्य
विहरणादिति निषेधान्नात्मनेपदं ॥१६॥ सत्यमेवं तथापि किं तेन कुशलं तत्राह ॥ इयमिति ॥ इयं मम शक्तिश्च दुर्वाराः परा क्रमिणो महारथा
येषु तेषां महतां बलानां वीर्यमाक्षिप्य निरस्य तारापधिपधाम्नि चंद्रे तेजसि सैव स्वयं सौरी । सूर्यस्येयमिति प्राग्दीव्यतीत्यण् ततो ङीप् इति हि
यायकारलोपः । दीप्तिरिव हीनयुद्धे किरातरणे अवस्यति । अवसीदति । एतत्त्वविरुद्धमसदृशं चेति भावः । षोऽन्तकर्मणि इति धातोर्लट् ॥१७॥

उत्सृष्टवत्सु संहार इवास्तसंख्यमन्हाय तेजस्विषु जीवितानि ॥ लोकत्रयास्वादनलोलजिह्वं न व्याददात्याननमत्र मृत्युः ॥१६॥
शक्तिर्ममावस्यति हीनयुद्धे सौरीव तारापतिधाम्नि दीप्तिः ॥१७॥
3 इयं च दुर्वारमहारथानामाक्षिप्य वीर्यं महतां बलानां ॥ गांडीवमुक्ता हि यथा पुरा मे पराक्रमंते न शराः किराते ॥१८॥
कुलकं ॥ मायो स्विदेषा मतिविभ्रमः स्विद्ध्वस्तं नु मे वीर्यमुताहमन्यः ॥ नूनं तथा नैष यथास्य वेषः प्रच्छन्नमप्यूहयते च चेष्टा ॥१९॥
पुंसः परं मध्यममुत्तमस्य द्विधेव कुर्वन्धनुषः प्रणादैः ॥

मायेति ॥ एषा शक्तिर्ह्रासरूपा माया स्वित् दैवताक्षेपो न मतिविभ्रमो बुद्धिविपर्यासो वा । अथवा मे वीर्यं ध्वस्तं नष्टं नु उतो अहमन्योऽर्जुनो वा
कुतः । हि यस्मात् गांडीवमुक्ताः मे शराः पुरा यथा पूर्वं परिपंथिषु इत्यर्थः । किराते न पराक्रमंते । अप्रतिबंधेन प्रवर्तंते । उपपराभ्यामिति आत्मनेपदं ।
प्रतिबंधः ॥१८॥ पुंस इति ॥ किं चोत्तमस्य पुंसः पुरुषोत्तमस्य मध्यमं पदं आकाशं धनुषः प्रणादैः उपसर्गादसमासेऽपि णोपदेशस्येति
णत्वं द्विधाकुर्वन् विदारयन्निव स्थितः एषः किरातः नूनं तथा न भवति न अस्य पुरुषस्य वेषो यथा भवतः वेषतः एवायं किरातो न स्वरूप
तः इत्यर्थः । हि यस्मात् चेष्टाव्यापारः प्रच्छन्नं निगूढमपि स्वरूपमूहयते तस्यास्वभावाद्यभिचारादिति भावः ॥१९॥ ॥१९॥

अथचतुर्भिश्चेष्टामेवाचष्टे॥धनुरिति॥धनुरुषेवप्रबंधेनाविच्छेदेनध्वनितंध्वनतेः कर्तरिक्तः मौर्वीसकृद्विकृष्टावितत्तेवएकवाराकर्षणादेववि
ततेवस्थिता।संधानंबाणसंधानंउत्कर्षत्ग्णादुद्धरणंव्युदस्यविसर्ज्यस्थिताकिंकृतमितिशेषः।अपवर्गोबाणमोक्षपिमुष्टेरसंभेदोऽसंघट्टनमि
वमुष्टिबंधनंविनैवबाणमोक्षकृतइतिहस्तलाघवोक्तिः॥२०॥असाविति॥किंचास्यकिरातस्येतिशेषः।असौस्कंधोऽवष्टब्धोस्थिरावस्था
पितोऽवनतोधावष्टब्धोनतो।शिरोधरायाः कंधरायाः समाधिः संस्थानविशेषरहितः प्रयासोयस्यसतथोक्तो निरायासइत्यर्थः।तथाविकारं
त्यजता।अमर्षेत्वेपि।निर्विकारेणमुखेनशशलांछनस्येंदोः प्रसादलक्ष्मीः धृता।असंभवसंबंधो निदर्शनालंकारः॥२१॥प्रहीयतइति॥

मू॰ धनुःप्रबंधध्वनितंरुषेवसकृद्विकृष्टावितत्तेवमौर्वी।संधानमाकर्षमिवव्युदस्यमुष्टेरसंभेदइवापवर्गः॥२०॥
असावचष्टब्धनतोसमाधिः शिरोधरायारहितप्रयासः॥धृताविकारांस्त्यजतामुखेनप्रसादलक्ष्मीः शशलांछनस्य॥२१॥
प्रहीयतेकार्यवशागतेषु स्थानेषुविष्टब्धतयानदेहः॥स्थितप्रयातेषुससौष्टवश्चलक्ष्येषुपातः सदृशः शराणां॥२२॥
परस्यभूयान्विवरेऽभियोगः प्रसह्यसंरक्षणमात्मरंध्रे॥भीष्मेप्यसंभाव्यमिदंगुरौवानसंभवत्येववनेचरेषु॥२३॥ ॥

कार्यवशेनतत्तत्प्रयोजनवशेनागतेषुस्थानेषु आलीढादिषुस्थानकेषुदेहोविष्टब्धतयास्थिरतयावष्टंभोनप्रहीयतेनत्यज्यतेकिंतु
स्थिरएवतिष्ठतीत्यर्थः।सुष्ठुभावः सौष्ठवंलाघवंउक्तीत्रादिपाठात्‌अण्प्रत्ययः।तेनसहवर्तमानः ससौष्टवः।शराणांपाताश्चस्थि
तान्यचलानिप्रयातानिचलानितेषुस्थितप्रयातेषुयेसदृशाएकरूपाः॥२२॥परस्येति॥किंचपरस्यविवरेऽल्पेपीतिशेषः रंध्रेभू
यानत्यर्थमभिसंधानं।आत्मरंध्रेस्वविवरेप्रसह्यप्रसह्येतिवक्ष्यमाणंगोपनंचभयिष्ठमितिशेषः।इदंद्वयंभीष्मेपिगुरौवाद्रोणे
पि।असंभाव्यंवनेचरेषुनसंभवत्येवअतोनायंकिरातः किंत्वेतद्रूपरहितःकोप्यमानुषःपुरुषइतिभावः॥२३॥ ॥२३॥

अप्राकृतस्येति ॥ अप्राकृतस्योत्कृष्टस्य ऽसाधारणस्यानिर्वार्यसत्वस्येति भावः । आहवदुर्मदस्य रणमत्तस्य मयाऽस्य किरातस्यापि वीर्यं ते
जोऽस्त्रबलेन दिव्यास्त्रमहिम्ना निवार्यं दूरीकरणीयं अन्यथानिर्वीर्यसत्वस्य नेति भावः । तथा हि । अल्पीयसोऽप्यल्पस्यापि आमयतु
ल्यवृत्तेः रोगसमानक्रियस्य रिपोर्विवृद्धिः महापकाराय महापराधाय कल्पते किंच यं महानुभावः कल्पत इति भावः ॥२४॥ स इति ॥
अहार्यसारः अनिवार्यवीर्यः सोऽर्जुनः एवं प्रधार्य निश्चित्य सगणस्य सानुगस्य शत्रोः सारं सत्वं द्रुतं सत्वरं विनेष्यन् स्वापयन्ते शय्यंते अने
नेति प्रस्वापनं देवास्त्रं ध्वांतं घनानद्धं मेघावरुद्धं अर्धरात्रो निशीथः अर्धनपुंसकमिति समासः । अहः सर्वैकदेशेत्यादिना स

अप्राकृतस्याहवदुर्मदस्य निवार्यमस्यास्त्रबलेन वीर्यं ॥ अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय हि रिपोर्विवृद्धिः ॥२४॥
स संप्रधार्यैवमहार्यसारः सारं विनेष्यन्सगणस्य शत्रोः ॥ प्रस्वापनास्त्रं द्रुतमाजहार ध्वांतं घनानद्धमिवार्धरात्रः ॥२५॥
प्रसक्तदावानलधूमधूम्रा निरुंधती धाम सहस्ररश्मेः ॥ महावनानीव महातमिस्रा छाया ततानेशबलानि काली ॥२६॥
आसादिता तत्प्रथमं प्रसह्य प्रगल्भतायाः पदवीं हरंती ॥ सभेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य ॥२७॥

मासांतः रात्रान्हाहाः पुंसीति पुल्लिंगता ध्वांतमिवाजहार आचकर्ष ॥२५॥ प्रसक्तेति ॥ प्रसक्तः संततो यो दावानलधूमः स इव धूम्रा धू
सरा सहस्ररश्मेर्धाम तेजो निरुंधती आवरणवती काली कृष्णवर्णा जानपदेत्यादिना ङीप् । छाया कांतिः ईशबलानि महातमिस्रा मह
ती तमः संहतिः तमिस्रा तु रिति विश्वः । महावनानीव ततान व्यानशे ॥२६॥ आसादितेति ॥ तदेवासादनं तत्प्रथमं यथा तथा प्रस
ह्यासादिता प्राप्ता प्रगल्भतायाः व्यवहारधार्ष्ट्यस्य पदं विहरंती भीमा भयंकरी निद्रा उक्तविशेषेण सभा संसदिव गणानां प्रतिभा
प्रतिभाशक्तिः सैव गुणस्तस्य निरासं प्रतिभाक्षयं विदधे चक्रे ॥२७॥ २७॥ २७॥ २७॥

नि

गुर्विति॥ केचिदुत्तमवंशजत्वात् वंशो वेणुः कुलं च वंशो वेणौ कुले वर्गेऽपि इति विश्वः गुरूणि महान्ति स्थिराणि दृढानि च गुरुस्थिराणि॥ अनुशील
नेन पतिव्रतयवत्त्वेन विज्ञातः सारो बलं येषां तानि गुणैर्मौर्वीभिः शौर्यादिभिश्चान्वितानि धनूंषि सुहृत्कुलानि मित्रकुलानि इव समाश्रि
त्य तस्थुः धनुष्यवष्टभ्य निर्द्वन्द्वस्थिता इत्यर्थः॥२८॥ कृतान्तेति॥ कृतान्तदुर्वृत्ते दैवदुश्चेष्टिते इव पांडवास्त्रे पुरः प्रतिद्वन्द्विनि प्रतिकूलवर्तिनि सति तद्दा
तस्मिन्काले परेषामायुधानि क्रियाफलानि कृष्यादिफलानीव अतर्कितमविचारितमेव पाणितलान्निपेतुः॥२९॥ अंसेति॥ अभि
न्नधैर्यास्तदानीमप्यक्षतधैर्याः केचिदंसस्थलैः सभागैः सत्वसंश्लेषवतां संगच्छतां तरूणां स्कन्धेषु प्रकाण्डेषु मदेन मीलितानि नयनानि येषां

गुरूस्थिराण्युत्तमवंशजत्वाद्विज्ञातसाराण्यनुशीलनेन। केचित्समाश्रित्य गुणान्वितानि सुहृत्कुलानीव धनूंषि तस्थुः॥२८॥
कृतान्तदुर्वृत्त इवापरेषां पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे। अतर्कितं पाणितलान्निपेतुः क्रियाफलानीव तदायुधानि॥२९॥
अंसस्थलैः केचिदभिन्नधैर्याः स्कन्धेषु संश्लेषवतां तरूणाम्। मदेनमीलन्नयनाः सलीलं नागा इव स्रस्तकरा निषेदुः॥३०॥
तिरोहितेन्दोरथ शंभुमूर्ध्नः प्रणम्यमानं तपसां निवासैः। सुमेरुवप्रादिव बिम्बमार्कं पिशंगमुच्चैरुदियाय तेजः॥३१॥
छायां विनिर्धूय तमोमयीं तां तत्त्वस्य संवित्तिरिवापविद्याम्। ययौ विकाशं द्युतिरिन्दुमौलेरालोकमभ्यादिशती गणेभ्यः॥३२॥

तेनागा गजा इव स्रस्तकराः स्रस्तहस्ताः सन्तः सलीलं निषेदुः निषण्णाः॥३०॥ तिरोहितेति॥ अथ तिरोहितेन्दोः किरातमायया छन्नचन्द्रात्
शंभुमूर्ध्नः सकाशात्सुमेरुशृंगात् दार्कं बिम्बमिव तपसां निवासैः तापसैः प्रणम्यमानमभिवाद्यमानं पिशंगतेजउच्चैरूर्ध्वमुदिया
यत्तन्त्रेन चान्द्रमिति भावः॥३१॥ छायामिति॥ इन्दुमौलेः द्युतिः कान्तिः तत्त्वस्य संवित्तिः तत्त्वज्ञानमविद्यामिव तां तमोमयी
छायां निद्रिं विनिर्धूय गणेभ्यः आलोकं वस्तु विकाशमभ्यादिशती सती विकाशं विस्तारं ययौ॥३२॥ ॥ ॥३॥

त्विषामिति॥ सर्वतः पाटलिताः पाटलीकृताः अंबुवाहा यया सा तथोक्ता॥ त्विषां ततिः पूर्वसरतीति पूर्वसरी पूर्वे कर्तरि टिट्प्रत्यये ङीप्। सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पूर्वशब्दस्य पुंवद्भावः। संध्या प्रातःसंध्या चोल्लसंती प्रसरंती तेषां गणानां विलोचनपंकजानि विनिद्रतां विकाशं निनाय॥३३॥
पृथगिति॥ अस्त्रविरामेण प्रस्वापनास्त्रोपशमेन बुद्धाः विनिद्रास्ते गणाः बलाहकानां वितानेन मेघपटलेन मुक्ताः अतएव वरज्या दिग्विभागा दिगंताः ज्योतींषि नक्षत्राणि ज्योतिस्तारा ग्निभाज्वालाः हकृपुत्रार्थाध्वरात्मस्वितिवैजयंती॥ पृथग्विधानि नानाविधानि शस्त्राणि भूयः प्रतिपेदिरे॥३४॥ द्यौरिति॥ तदा यामवत्यां रात्रौ क्षपं गतायां विरतायामिवे घोरं तरि क्षुंतुन्ननाम उर्ध्वमुसपातेव सुस्वक्षा। दिशः प्रसेदुः सवितुर्मयूखैः स्फुटं विससे विस्रतं भावालिङ्ग्य दिनश्रीः पुनः दिनसमीयाय जगाम अत्र वैयधिकरण्येन गुणक्रियासमुच्चयेन समुच्चयः।

त्विषां ततिः पाटलितांबुवाहा सा सर्वतः पूर्वसरीव संध्या॥ निनाय तेषां द्रुतमुल्लसंती विनिद्रतां लोचनपंकजानि॥३३॥
पृथग्विधान्यस्त्रविरामबुद्धाः शस्त्राणि भूयः प्रतिपेदिरे ते॥ मुक्ता वितानेन बलाहकानां ज्योतींषि रम्या इव दिग्विभागाः॥३४॥
द्यौरुन्ननामेव दिशः प्रसेदुः स्फुटं विससे सवितुर्मयूखैः॥ क्षयं गतायामिव यामवत्यां पुनः समीयाय दिनं दिनश्रीः॥३५॥
महास्त्रदुर्गे शिथिलप्रयत्नं दिग्वारणेनेव परेण भग्ने॥ भुजंगपाशान्भुजवीर्यशाली निबंधनाय प्रतिघाय जिष्णुः॥३६॥
जिह्माशतान्युल्लसयंत्यसक्तं लसत्तडिल्लोलविषानलानि॥ त्रासान्निरस्ता भुजगेंद्रसेना नभश्चरैस्तत्पदवीं विवव्रे॥३७॥

लेकारः तस्य नास्मुन्नमनो सेक्षयैक वाच्यानुप्रवेशलक्षणः संकरः दिक्प्रसादो गुणः शेषाः क्रियाः॥३५॥ महास्त्रेति॥ भुजवीर्यशाली जिष्णुः रजुनः महास्त्रं प्रस्वापनास्त्रं तदेव दुर्गमिव तस्मिन् महास्त्रदुर्गे दिग्वारणेन दिग्गजेनेव परेण शत्रुणा शिथिलप्रयत्नं अल्पप्रयासं यथा तथा रुग्णे भग्ने सति रुजो भंगे कर्मणि क्तः उदित श्वेति निष्ठानत्वं प्रबंधनाय भुजंगमा एव पाशाः तान् प्रति घायप्रहितवान्॥३६॥ जिह्मेति॥ लसतः तडिल्लोला विद्युदिव चला विषानला विषाग्नयो येषु तानि जिह्माशतान्यजस्रं उल्लसयंती चालयंती भुजगेंद्रसेना त्रासात् भयात् नभश्चरैः निरस्तां सक्तं तेषां नभश्चराणां पदवीं मार्गं विवव्रे विशेषजणरुरोध॥३७॥ ॥ ३॥ ॥ ३॥ ॥ ३॥ ॥

दि॰ङि॰ लि॥ दिग्नागहस्ताकृतिमुद्वहद्भिः दिक्करिकराकारैस्तथा प्रशस्तानि असितरत्नानि इंद्रनीलमणयस्तद्वन्नीलैर्भोगैः कायैरुपलक्षिता सर्पाव
लिः उल्लसंती प्रक्षुभ्यंती नभएवार्णवः तस्य तरंगमालेव रराज। रूपकोत्थापितेयमुत्प्रेक्षा॥३८॥ निश्वासेति। उष्णरश्मिरस्तंग बुल्लिवनुन्नमि
तानि फणमण्डलानि येषां तेषां फणवतां सर्पाणां निश्वासेषु ये धूमाः तैः स्थगितं अंशुजालं यस्य तथोक्तः अत एव विलोचनानां सुखं सुखकरं
वपुरभ्युवाह॥३९॥ प्रतप्तेति॥ प्राणहराणि ईक्षणानि येषां तेषां प्राणहरेक्षणानां दृष्टिविषाणां सर्पाणां लोचनेभ्यः प्रतप्तचामीकरसु
वर्णतद्वद्भासुरेण भंजभासमिदोघुरनूप्रसयः। प्रकाशेन तेजसा दिशः पिशंगयंत्यः ज्वालामहोल्का इव निश्चक्रमुर्निर्जग्मुः॥४०॥ आक्षिप्तेति॥

दिङ्नागहस्ताकृतिमुद्वहद्भिर्भोगैः प्रशस्तासितरत्ननीलैः॥ रराज सर्पावलिरुल्लसंती तरंगमालेव नभोर्णवस्य॥३८॥
निश्वासधूमस्थगितांशुजालः फणावतामुत्फणमण्डलानां॥ गाढुं निवासत्वं वपुरभ्युवाह विलोचनानां सुखमुष्णरश्मिः॥३९॥
प्रतप्तचामीकरभासुरेण दिशः प्रकाशेन पिशंगयंत्यः॥ निश्चक्रमुः प्राणहरेक्षणानां ज्वालामहोल्का इव लोचनेभ्यः॥४०॥
आक्षिप्तसंपातमपेतशोभमुद्वह्निधूमाकुलदिग्विभागं॥ वृत्तं नभो भोगिकुलैरवस्थां परोपरुद्धस्य पुरस्य भेजे॥४१॥
तमाशु चक्षुःश्रवसां समूहं मंत्रेण तार्क्ष्योदयकारणेन॥ नेतानयेनेव परोपतापं निवारयामास पतिः पशूनां॥४२॥

आक्षिप्तः प्रतिषिद्धः संपातः संचारो यस्मिन् तत् उद्गतः प्रदीप्तो वह्निर्यस्मिन् धूमेनाकुला व्याप्ता दिग्विभागा यस्य तत् भोगीकुलैर्वृत्तं न
भः परोपरुद्धस्य शत्रुवेष्टितस्य पुरस्यावस्थामिवावस्थां दशां भेजे उत्करीसाते साधर्म्यप्राप्तमित्यर्थः॥ निदर्शनालंकारः॥४१॥ तमि
ति॥ पशूनां पतिः शिवः तं चक्षुश्रवसां सर्पाणां समूहं तार्क्ष्योदयकारणेन गरुडाविर्भावहेतुना मंत्रेण नेता नायकोनयेन नीत्या
परेषां उपतापं परोपद्रुतेस्व मंडलभेदं मे दोषजापाधुपधा विसमरः। निवारयामास॥४२॥ ४२ ४२ ॥ ॥

प्रतीति॥ द्युलोकभाजामपि अनिमिषाणामपि कृतंमीलनं निमेषो येषां तानि लोचनानी दृष्टीः प्रतिघ्नतीभिः प्रतिबध्नतीभिः हंतेः शतृप्रत्ययः॥
उगितश्चातिङीप् गरुत्मतां तार्क्ष्याणां संहतिभिः समूहैः क्षणप्रकाशाभिर्विद्युद्भिरिव तासां सौवर्णत्वादितिभावः विहायोऽन्तरिक्ष[redacted]मवृतेन व्या
प्तं॥४३॥ ततइति॥ ततः सुपर्णव्रातानां तार्क्ष्यकुलानां पक्षेभ्यो जन्म यस्य स नानागतिः विचित्रगतिर्वायुः वनस्पतीनां वृक्षाणां गहनानि
जरत्तृणानि जीर्णतृणानीवजवेनमंडलयन् भ्रामयन् समूह् वियदंतरिक्षं निनाय॥४४॥ मन इति॥ मनः शिला धातुविशेषः तस्याः भंगः छेदः
तन्निभेन तत्सदृशेन भासां निकरेण कांतिपुंजेन पश्चाद्भागे निरुध्यमानं मा श्रीयमाणं व्यूढे विशाले उरो भित्त्वा विनुद्यमानं प्रेर्यमाणं नभः
खगानां पुरः ससर्प वसलात्पुरे वत्तरोत्तरदेशेति रोधानेनगरुत्मतां खगानामपूर्वो विपुलो भोगः सादृश्यात्पूर्वंवदुपलभ्यमानतया नभ एव

प्रतिघ्नतीभिः कृतमीलितानि द्युलोकभाजामपि लोचनानि॥ गरुत्मतां संहतिभिर्विहायः क्षणप्रकाशाभिरिवावृतेन॥४३॥
ततः सुपर्णव्रजपत्त्रजन्मा नानागतिर्मंडलयन् जवेन॥ जरत्तृणानीव वियन्निनाय वनस्पतीनां गहनानि वायुः॥४४॥
मनःशिलाभंगमयेन पश्चात् निरुध्यमानं निकरेण भासां॥ व्यूढे उरो भित्त्व विनुद्यमानं नभः ससर्प पुरः खगानां॥४५॥
दरीमुखे रासवराग ताम्रं विकाशि रुक्मच्छदधाम पीत्वा॥ जवानिलाघूर्णितसानुजालो हिमाचलः क्षीव इवाचकंपे॥४६॥
प्रवृत्तनक्तंदिवसंधिदीप्तैर्नभस्थलं गां च पिशंगयद्भिः॥ अंतर्हितार्कैः परितः पतद्भिश्छायासमाक्षिक्षिपिरे वनानां॥४७॥

छेदना तत्पुरः ससर्प॥ येत्युत्प्रेक्षा॥४५॥ दरीति॥ जवानिलेनाघूर्णितानि भ्रामितानि सानुजालानि यस्य स हिमाचलः यः आसवस्य रागो रक्तता
तद्वत्ताम्रं गुणयोरेवोपमानोपमेयभावः विकाशि विकस्वरं रुक्मच्छदः सुवर्णपक्षाः तार्क्ष्यास्तेषां धाम तेजो दरीमुखैः पीत्वा क्षीवो मत्त इव आचकं
पे आचचाल उपमाव्यापितेयमुत्प्रेक्षा॥४६॥ प्रवृत्तेति॥ नक्तं च दिवा च नक्तंदिवं अचतुरेत्यादिना समस्तस्यार्थेद्वयोरप्यव्यययोः द्वंद्वे कृते द्व
निपात्ते समासांतः लक्षणया त्वहोरात्रवाची प्रवृत्तः प्रादुर्भूतो यो नक्तंदिवस्य संधिः संध्या तद्वद्दीप्तैः शोभितैः नभस्थलं च गां भुवं च पि
शंगयद्भिः पिशंगीकुर्वद्भिः अंतर्हितश्छादितोऽर्को यैस्तैः पतद्भिः पक्षिभिः परितः सर्वतो वनानां छाया समाचिक्षिपिरे समाक्षिप्ताः अंतर्व
हिश्च तेजः प्रवेशात् कांप्यंत[redacted]हितेत्यर्थः॥४७॥

सद्गति ॥ स भोगिसंघः सर्पसमूहः उग्रधाम्नां विनतासुतानां तार्क्ष्याणां सैन्यैर्न महाध्वरे महाक्रतौ विधायचारदोषः कर्मस्खलनदोषः महोदयेन महो
हासामर्थ्येन । अथवा महाफलेन तन्मूलेन प्रस्खलक्रियासिद्धिरिति कर्मांतरेण प्रायश्चित्तेनेव क्षयं शांतिं निन्ये प्रापितः ॥ ४८ ॥ साफल्यमिति ॥
अत्रैव सर्पास्त्रे भाग्ये प्राग्भवीये शुभे कर्मणीव रिपुपौरुषस्य पराक्रमस्य साफल्यं कृत्वा अपवर्गे अवसानं समाप्तिं गते प्राप्ते सति स्वनि
र्वृत्या परस्य साफल्यात् साफल्यीकरणोपचारः समन्युः सक्रोधो जिष्णुरर्जुनः अनिंधनस्य इंधनं विनोत्साहितस्य ज्वलनस्य प्रभवं प्रदीप
कमस्त्रमाग्नेयास्त्रं प्रसभं शीघ्रं समाददे जग्राह ॥ ४९ ॥ ऊर्ध्वमिति ॥ ऊर्ध्वं तिरश्चीनं तिर्यक् विभाषा वेरदिक्स्त्रियामिति सूत्र प्रत्ययः ।

स भोगिसंघः शममुग्रधाम्नां सैन्येन निन्ये विनतासुतानां ॥ महाध्वरे विध्यय चारदोषः कर्मान्तरेणेव महोदयेन ॥ ४८ ॥
साफल्यमस्त्रे रिपुपौरुषस्य कृत्वा गते भाग्य इवापवर्गं ॥ अनिंधनस्य प्रसभं समन्युः समाददे स्त्रं ज्वलनस्य जिष्णुः ॥ ४९ ॥
ऊर्ध्वं तिरश्चीनमधश्च कीर्णैर्ज्वालासटैर्लंघितमेघपंक्तिः ॥ आयस्तसिंहाकृतिरुत्पपात प्राण्यन्तजिघृक्षुन्निव जातवेदाः ॥ ५० ॥
भित्त्वेव भाभिः सवितुर्मयूखान् जज्वाल विष्वग्विसृतस्फुलिंगः ॥ विशीर्यमाणाश्मनिनादभीमं ध्वनिं वितन्वन्नकृशः कृशानुः ॥ ५१ ॥

अधश्च विक्षिप्तकीर्णैर्विसृतैर्ज्वाला एव सटा केसराः जटा सटा केसरयोरिति विश्वः । तैर्लंघिता मेघानां पंक्तिर्येन आक्रांत जलदावलिः । आयस्तस्य
लंघनोद्यतस्य सिंहस्येवाकृतिर्यस्य सः जातवेदा अग्निः प्राण्यंतं प्राणिनां संहारं जिघृक्षुन्निवोत्पपात ॥ ५० ॥ भित्त्वेति ॥ भाभिस्तेजोभिः सवि
तुर्मयूखान् भित्त्वेव विष्वक् विसृताः स्फुलिंगा अग्निकणा यस्य सः स्फुलिंगोऽस्य मयूखानामभिघातहेतुत्वमुत्प्रेक्षते । त्रिषु स्फु
लिंगोऽग्निकणः इत्यमरः । अकृशोऽतनुः कृशानुः वह्निः विशीर्यमाणस्य विदलितस्याश्मनो निनाद इव धीरं उद्धतं ध्वनिं वितन्वन्
जज्वाल ॥ ५१ ॥ ५१ ॥ ॥ ५१ ॥ ॥ ५१ ॥ ॥

चयानिवेति॥ वह्निः पवनानुवृत्त्यापायुवशेन चयानिव हिरण्मयान् प्राकारानिव चयः समूहे प्राकारे इति विश्वः। तुंगशृंगा नद्रीनिव कुर्वन्ति हिरण्मयानिदं दिनाय
नेत्यादिना निपातनात् साधुः पुराणि नगराणीव तथा किंशुकानां पलाशतरूणां पलाशे किंशुकः पर्णे इत्यमरः महावनानीव पुष्पितानीति शेषः। ततानेचितस्ता
स्तदाकारेणातत्वानलेत्यर्थः॥५२॥ मुहुरिति॥ सान्द्राञ्जनश्यामरुचः पयोदाः मुहुश्चलत्पल्लवताः पल्लवलोहितवर्णाश्चलाभिश्चलत्पल्लवलोहिताभिः व
वर्णा इत्युदात्तानोपधात्तोन इति ङीप् तकारस्य नकारः। शिखिनोऽग्नेरुच्चैः उज्ज्वलाभिः शिखाभिः ज्वालाभिः अवलीढा दग्धा इत्यर्थः। अत एव वत्त
लेषु धीमागेषु मुक्ता विशदा मौक्तिकधवला बभूवुः जलसंशोषणादिति भावः। अधः स्वरूपयोरस्त्री तलमित्यमरः॥५३॥ लिलिक्षतीति॥ क्ष

चयानिवाद्रीनिव तुंगशृंगान्कुर्वन्ति पुराणीव हिरण्मयानि॥ महावनानीव च किंशुकानां ततान वह्निः पवनानुवृत्त्या॥५२॥
मुहुश्चलत्पल्लवलोहिताभिरुच्चैः शिखाभिः शिखिनोऽवलीढाः॥ तलेषु मुक्ता विशदा बभूवुः सान्द्राञ्जनश्यामरुचः पयोदाः॥५३॥
लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि रोहिताश्वे॥ पिनाकिनाहूतमहाम्बुवाहमस्त्रं पुनः पाशभृतः प्रणिन्ये॥५४॥
ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिंगितनीलमूर्तयः॥ अधोमुखाकाशसरिन्निपातिनीरपः प्रसक्तं मुमुचुः पयोमुचः॥५५॥

यकालरौद्रे कल्पान्तकालभयवहे विलोलार्चिषि चलज्ज्वाले ज्वाले रोहिताश्वे ज्वलने लोकं लिलिक्षति लेढुमिच्छति जिघत्सघति सति। वलिहे:
यकालरौद्रे कल्पान्तकालभयविहे विलोलार्चिषि चलज्ज्वाले रोहिताश्वे ज्वलने लोके लिलिक्षति लेढुमिच्छति। ततो चरे
सन्नतात् शतृप्रत्ययः। पिनाकिना पुनः आहूताः महाम्बुवाहा येन तत् पाशभृतो वरुणस्य अस्त्रं प्रणिन्ये प्रयुक्तम्॥५४॥ तत इति॥ ततो चर
सन्नतात् शतृप्रत्ययः। पिनाकिना पुनः आहूताः महाम्बुवाहा येन तत् पाशभृतो वरुणस्य अस्त्रं प्रणिन्ये प्रयुक्तम्॥५४॥ तत इति॥ ततो चर
णास्त्रप्रयोगानन्तरं धरित्रीधरतुल्यरोधसः पर्वतसमेनप्रास्तडिल्लताभिः आलिंगिताः नीलाः मूर्तयो नीलांगा नियेषां ते पयो
मुचो मेघाः अधोमुखी आकाशसरिदिव निपतत्यधोमुखाकाशसरिन्निपातिनीः कर्तर्युपमाने इति णिनिप्रत्ययः। अपो जला
निप्रसक्तं अनुबन्धं अविच्छिन्नं यथा भवति तथा मुमुचुः। इतः प्रभृति वंशस्थं वृत्तम्॥५५॥

पराहतेति॥ पराहता अभिहता अतो ध्वस्ता विनिर्वापिताः शिखा ज्वाला यस्य तस्मिन् पराहतध्वस्तशिखे अधिक्षिप्तं प्रहारितं नाशितं ताडित मितियावत् अतः समिद्धं ज्वलितं दीप्तं तेजो यस्य तस्मिन् शिखावतोऽग्नेर्वपुषि स्वरूपे प्रतप्ते। अथ सलिलौघ इव कृतास्पदः कृतस्थितिर्यस्य आश्रस्पदं प्रतिष्ठायामिति निपातः प्रथमं पयसो निपातो जलपातः ध्वनिं वितेनिरे। विस्तारयामासुः॥५६॥ महानिलैरिति॥ महद्भिरनिलै र्नोभिन्ना निरवंडिता निसिता आणि विपतन्तीति भिन्नसिताभ्रपातिभिः कर्तर्युपमान इति णिनिप्रत्ययः। अत एव सघैः कथनेन नपाके न फेनतां समेत्य प्राप्य परिक्षयं नाशं व्रजद्भिः जलैराईंधनवदार्द्रकाष्ठैस्तुल्यं तेनतुल्यं क्रियाचेद्वतिः दिक्षु विगमनेन धूमसंहतिर्वितेने

परा हत ध्वस्तशिखे शिखावतो वपुष्यधिक्षिप्तसमिद्धतेजसि॥ कृतास्पदास्तप्त इवायसि ध्वनिं पयोनिपाताः प्रथमे वितेनिरे॥५६॥
महानिलैर्भिन्नसिताभ्रपातिभिः समेत्य सद्यः क्वथनेन फेनतां॥ व्रजद्भिरार्द्रेंधनवत्परिक्षयं जलैर्वितेने दिवि धूमसंहतिः॥५७॥
स्वकेतुभिः पांडुविनीलपाटलैः समागताः शक्रधनुःप्रभाभिदः॥ असंस्थितामादधिरे विभावसोर्विचित्रचीनांशुकचारुतां त्विषः॥५८॥
जलौघसंमूर्छनमूर्छितस्वनः प्रसक्तविद्युल्लसितैधितद्युतिः॥ प्रशांतिमेष्यन्धृतधूममंडलो बभूव भूयानिव तत्र पावकः॥५९॥

विस्तारिता फेनादिक मार्द्रैंधनेपि तुल्यं॥५७॥ स्वेति॥ पांडुरैर्नीलैः पाटलैश्च पांडुरनीलपाटलैः विचित्रैः स्वकेतुभिः धूमैः समागताः संगताः अत एव शक्रधनुषः प्रभाभिदस्तत्तिभाजः विभावसोरग्नेस्त्विषः असंस्थितामस्थिरां विचित्रस्य चीनांशुकस्य पट्टवस्त्रविशेषस्य चारुतामाद धिरे दधुः॥५८॥ जलौघेति॥ जलौघानामुदकप्रवाहानां संमूर्छनेन भीलनेन मूर्छितो वर्द्धितः स्वनो ध्वनिर्यस्य सः प्रवृद्धघोषः मूर्छा नेम लनं प्रोक्तं प्रवृद्धौ मूर्छमेव चेति सज्जनः। अत एव धृतधूममंडलः जलौघाताद्धृतधूमपटलः प्रसक्तैरविच्छिन्नैः संततैः विद्युतां तडि ल्लतानां लसितैः स्फुरणैरेधिता वर्द्धिता द्युतिर्यस्य स पावकः प्रशांतिं शमं एष्यन् गमिष्यन्सन् तत्र देशे भूयानिव अतिशयेन बहुर्भू या बहो वो भूश्च बहोः भूव भूयस्त्वया स्थापित इत्युक्तं॥५९॥ ॥ ॥ ५९॥ ॥ ॥

प्रवृद्धेति ॥ प्रवृद्धानां सिंधोः समुद्रस्योर्मीणां चयाः राशयस्तस्य वीयसां स्थूलतराणां पयसां चयैः पूरैर्विभिन्नाः विश्लेषिताः कृशानवो ऽग्नयः
उपात्तसंध्यारुचिभिः प्राप्तसंध्यारागैः पयोदानां विच्छेदांत इति विच्छेदाः विच्छिन्ना विक्षिप्ताः पलवाः शकलाः तैः सरूपतां प्रपेदिरे ॥ उपमा ॥ ६० ॥
उपैतीति ॥ अनलद्युतिर्महातेजाः अविविभिन्नमूलो ऽसंशयं यथा ऽनुदयाय पुनरनुत्थानाय संक्षयं नाशं उपैति ॥ तथा हि ॥ तोयौघैर्विभि
न्नसंहतिः संघातो यस्य स तथोक्तः सहव्यवाहः ॥ पराभवं नाशं ययौ विशेषेण सामान्यसमर्थनरूपो ऽर्थांतरन्यासः ॥ ६१ ॥ अथेति ॥

१ प्रवृद्धसिंधूर्मिचयस्थवीयसां चयैर्विभिन्नाः पयसां प्रपेदिरे ॥ उपात्तसंध्यारुचिभिः
सरूपतां पयोदविच्छेदलवैः कृशानवः ॥ ६० ॥ उपेत्यनंतद्युतिरप्यसंशयं विभिन्नमू
लो ऽनुदयाय संक्षयं ॥ तथा हि तोयौघविभिन्नसंहतिः सहव्यवाहः प्रययौ पराभ
वं ॥ ६१ ॥ अथ विहितविधेयैराशु मुक्ता वितानैरसितनगनितंबश्यामभासां घना
नां ॥ विकसदमलधाम्नां प्राप नीलोत्पलानां श्रियमधिकविशुद्धां वह्निदाहाद्दिवो ऽगोः ॥ ६२ ॥

अथाग्निनिर्वापणानंतरं विहितविधेयैः कृतकृत्यैः असितनगस्यांजनाद्रेर्नितंबः कटकः तद्वत् श्यामभासां घनानां वितानैः
पटलैर्मुक्ता द्यौराकाशं वह्निदाहाद् विस्पष्टा ॥ विकसंतीव तान्यमलधामानि स्वच्छकांतीनि च तेषां नीलोत्पलानाम
धिकविशुद्धामत्युज्वलां श्रियं प्राप प्राप्ता ॥ अधिजगाम ॥ निदर्शनालंकारः ॥ ॥ ६२ ॥ ६२ ॥ ६२

इतीति॥ वहुसमरनयज्ञः अनेकरणोपायान् जानातीति वहुसमरनयज्ञः आतोनुपसर्गे कः इत्युपधेत्यादिना आकप्रादनुपपदात्कर्मोपपदो भवति।
विप्रतिषेधेनेति वार्त्तिकव्याख्याने भाष्यकारेणार्थलक्षणमुदाहृतः अस्यार्थस्य विवेचना सव्यसाची अर्जुनो अरातिं किरातं सादयिष्यन् अव
सादयितुकामः इत्यर्थः॥ क्रियार्थोपक्रियायां लृट् शतृ इति पूर्ववत् प्रकारेण विविधं अस्त्रं यदुदासे प्रयुक्तवानित्यर्थः॥ उपसर्गादस्यत्यूह्योरित्या
त्मनेपदं॥ विपरीतो विधिः प्रतिकूलं दैवं विधिर्विधाने दैवेपि चेत्यमरः॥ नयेन नीत्या व्रतिर्यस्य तस्य नीतिनिष्ठस्य पौरुषस्येव नीलकण्ठः शिवः स
पदि तदस्त्रं व्यर्थतां व्यर्थतामुपनिन्ये संहृतवान्॥ मालिनीवृत्तं॥६३॥ वीतेति॥ भूतपतिना शंभुना नु गृह्यते तेषु इ शेषः॥ अस्त्रेष्वपहृतेषु सत्सु

इति विविधमुदासे सव्यसाची परे स्त्रं बहुसमरनयज्ञः सादयिष्यन्नरातिं॥ विधिरिव विपरीतः पौरुषं न्याय वृत्तेः सपदि तदुपनिन्ये
रिक्ततां नीलकण्ठः॥६३॥ वीतप्रभावतनुरप्यतनुप्रभावः प्रत्याचकांक्षजयिनीं भुजवीर्यलक्ष्मीं॥ अस्त्रेषु भूतपतिनापहृतेषु जिष्णुर्वर्षि
ष्यता दिन कृते व जले पु लोकः॥६४॥ ॥ ॥ इति श्री किरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृतौ षोडशः सर्गः समाप्तः॥ ॥ ॥

वर्षिष्यता उत्तरत्र सहस्रगुणं वितरिष्यता सूर्येण जलेष्वपहृतेषु सत्सु लोक इव वीतप्रभावः गतास्त्रमहिमा अन्यत्र गतशक्तिः अत एव तनुः
तथापि यतोऽतनुप्रभावः निसर्गतः सामर्थ्यादधिकोऽन्यत्रोद्योगवान् तेनात्तिष्णुरर्जुनः जयिनीं जयशीलां जिघ्रक्षीत्यादिना इनिप्रत्ययः॥ भुजवी
र्यलक्ष्मीं भुजबलसंपदं उभयत्रापि पुरुषकारमिति यावत्। तत्कालकुण्ठितास्त्रमिति शेषः॥ प्रत्याचकांक्ष प्रत्याहर्तुमियेषेत्यर्थः॥ तद्वद्दृस्वबला
पहारेपि भुजबलेनैव जेतुमियेषेत्यर्थः॥ यथा लोकोघनादिजलोपहारेपि उपर्यान्तरेण कृष्यादिना पुरुषकारं जेतुं प्रयतते॥६४॥
इति श्री महोपाध्यायकोलाचल मल्लिनाथसूरि विरचितायां किरातार्जुनीय टीकायां घंटापथ समाख्यायां षोडशः सर्गः॥१६॥ ॥ ॥

६६ ६६

किरातस्यषोडशसर्गसमाप्तोयं।।

अथकिरास्यअष्टमसर्गसटीकः प्रारंभोयं

॥१॥ श्रीजगदंबायेनमः॥ अथेति॥ अथनिवेशानंतरं सुरांगनाः स्वमायया स्वेच्छया विशेषेण कृतैर्निर्मितैर्मंदिरैः गृहविशेषैरुज्वलं दीप्यमानं ज्व
लंतो मणयो यस्मिंस्तत् व्योमसदां गंधर्वाणां सनातनं सदातनं स्थायि चिरमित्यादिना भवार्थेषु ल्युट्प्रत्ययः। गोर्वज्रं तस्य तिरिंद्रः तस्य चा
पवर्णानि गोपुराणि यस्य तत्तथोक्तं। इसुपमापुरं नगरं वनानां विजिहीर्षया वनानि विहर्तुमिच्छया कर्मणि षष्ठी। तहुस्तस्यजुः। अ
होतेर्लिट्। अत्र ज्वलंज्वलिमिति पुरंपुरमिति वा सत्त्वं व्यंजनद्वयावृत्त्या छेकानुप्रासः। अन्यत्र तु तद्वैपरीत्या तद्वृत्त्यनुप्रासवृ
त्तिलयोरूपमायाश्च संसृष्टिः। अस्मिन्सर्गे वंशस्थं वृत्तं॥१॥ यथेति॥ यथायथं यथास्वं स्वकीयमनतिक्रम्येत्यर्थः। य

अथस्वमायाकृतमंदिरोज्वलं ज्वलन्मणी व्योमसदां सनातनं॥ सुरांगनागोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः॥१॥ यथा
यथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः॥ वनं विशंत्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपतां॥२॥

थास्वे तु यथायथमित्यमरः। नपुंसकनिपातनं तु ह्रस्वसामर्थ्यान्नभश्चरैर्गंधर्वैर्मंचैश्च सहिताः प्रभाभिः स्वदीप्तिभिः उद्भासि
ताः शैलवीरुधो याभिस्ताः पूर्वोक्ताः वनजायतेक्षणाः कमललोचनाः स्त्रियः वनं विशंत्यः क्षणद्युतिर्यासंलताः क्षणद्युती
नां विद्युतामिव रूपतां समानरूपतां दधुः मुहुः उन्मीलनात्तासां स्फुरणस्य क्षणिकत्वादिति भावः। श्लेषानुप्राणितेयमुपमा
श्लेषत्वमिति केचित् उपमयथाप्यनुप्रासेन संसृष्टिः॥ ॥ श्री छ ॥ छ ॥ छ ॥ छ ॥

निवृत्तेति ॥ निवृत्तो वृत्तस्य वर्तुलस्योरुपयोधरस्य क्लमो यस्मिन्सः पदप्रक्षेपेषु विश्रान्तिसंभवादिति भावः किंचअवनीतलात् निद्रादिविभू
षणानां नूपुरादीनां आरवो यस्मिन्सः अवनौपरिक्रमः संचारो नितम्बिनीनां नभःप्रयाणाद् दृशमधिकं पंचमी विभक्तेरिति पंचमी ॥
धृतिसंतोषमादधेभूमौ यादप्रक्षेपणामरणध्वनिश्रवणस्य सुखवत्वात् न कलाशुतद्भूगमननभोगमनादधिकं प्रीतिजनकमभूदि
तिभावः अत्र विशिष्टक्रमस्य धृत्याधाने हेतुत्वोक्तेः काव्यलिंगमलंकारः ॥ ३ ॥ घनानीति ॥ घनानि सान्द्राणि न तु विरलानि करप्र

निवृत्तवृत्तोरुपयोधरक्लमः प्रसक्तनिद्रादिविभूषणारवः ॥ नितम्बिनीनां भृशमादधौ धृतिं नभःप्रयाणादवनौ परिक्रमः ॥ ३ ॥
घनानि कामं कुसुमानि बिभ्रतः करप्रचेयान्यपहाय शाखिनः ॥ पुरोभिसस्रे सुरसुन्दरीजनैर्यथोत्तरेच्छा हि गुणेषु कामिनः ॥ ४ ॥

चेयानि हस्तग्राह्याण्यनुच्चानि कुसुमेरधिकार्थवचनइति तृतीयासमासः । कामं तु कुसुमानि बिभ्रतो न कुसुमानि तानु शाखि
नस्तरून् अपहाय सस्त्रे सुरसुन्दरीजनैरप्सरोभिः पुरोग्रेऽभिसस्रे अभिसृतं भावे लिट् न तु सुलभपरित्यज्यं कुतः तासां गमनभूदित्या
ह तथा हि कामिनो गुणेषु अतिशयेषु विषये उत्तरमुत्तरं यथा वीप्सार्थे व्ययीभावः । यथोत्तरमिच्छा येषां यथोत्तरेच्छः उत्त
रोत्तराभिलाषुका हि अत्र परिकारोऽस्थापितोऽर्थान्तरन्यासः कामित्वादेव गुणानि राभिलाषोऽपर्युपरिगत इति भावः ॥ ४ ॥

भ्रमराः स्त्रीबाहुलतां निषेविषेविरे इत्याह। तनूरिति। विलेपनामोदैर्हृताः आकृष्टाः वनालयेयो वनभृंगाः तनूः कृशाः अलक्तैररुणाः पाणय इव पल्लवा यासां ताः स्फुरंतो नखांशुना मुकुराः पुंजा एव मंजर्यस्ताः बिभ्रती लितयोक्ताः ॥ क्विप् विलासिनीनां बाहव एव लताः ताः सिषेविरे उक्तप्रकारेण लतासादृश्यात् लतात्वात्सा बाहून् सेवितवत इति भावः। अत्रसमप्रवस्तुविषयो रूपकालंकारः लताव यवानां पल्लवादीनामपि निरूपयादिति ॥५॥ वधूजनः अशोकयष्टिं ददर्शेत्याह ॥ निपीयेति ॥ शिलीमुखैरलि

तनुररलक्तारुणपाणिपल्लवाः स्फुरंनखांशूत्करमंजरीभृतः ॥ विलासिनीबाहुलताः वनालया विलेपनामोदहृतासिषेविरे ॥५॥ निपीयमानस्तवका शिलीमुखैर शोकयष्टिश्चलबालपल्लवा ॥ विडंबयंती ददृशे वधूजनैरमंददष्टोष्ठकरावधूननं ॥६॥

भिः अलिबाणौ शिलीमुखाविस्यमरः। निपीयमानस्तबकोगुच्छो यस्याः सा चलाः बालपल्लवाः यस्याः सा अत एवा मंददृष्टं दृष्टः ओष्ठो यस्मिंस्तत्करावधूननं करकंपनं तद्विडंबयंतीस्तबकयानेनोष्ठदर्शनं पल्लवचलनेन करावधूननं चानुकुर्वती सर्थः ध्रजोण्यं ताच्छील्ये इति विधूज्यप्रत्ययः अनुंमकव्यः अशोकयष्टिरणशोकशाखा वधूजनैर्ददृशे दृष्टा। अत्र विडंबयंतीतिप्रस्तुताशोकशाखाविशेषणभूतोपमामहिम्ना प्रस्तुतनायिकाप्रतीतेः समासोक्तिः उक्तविषमानतयैवोपमयाश्रंगांगीभावेन संकीर्यते ॥६॥

अथ कश्चिन्मधुकराक्रांतां कांचिदाह ॥ करोषीति ॥ मानपरिहरणमधुपाश्रयेणेनुनकश्चिद्बाधइत्याशयेन तासांबोधयति हे मानिनी नवपल्लवस्याहृतिरिवाहृतिर्यस्यौरित्युपमातो करोधुनोनाधुनः क्रियादिका कृत्तरिशानवेचेथाव्यर्थपरिश्रममात्कृथामाकुरूष करोतेश्शीरर्थेमाङि लुङ्चेथाहेतुमाह कल्पलताभिशंकयाकल्पवल्लिभ्रमेणेति भ्रांतिभ्रांतिमदलंकारः उपेयुषीउपगताषद्पदावलिः कथंनुइतत्त्रस्यतिबिभेतिनुवित्रस्यवेत्यर्थः वाभ्राशेत्यादिनाविकल्पेनश्यन्प्रत्ययः अत्र कांतापरिश्रमवैयथ्र्य

करोधुनानानवपल्लवाहृतीव्रथाहृथामानिनिमापरिश्रमं ॥ उपेयुषीकल्पलताभिशंकया कथंन्वितस्त्रस्यतिषद्पदावलिः ॥७॥
जहीहि कोपं दयितोनुगम्यतां पुरानुशेते तव चंचलं मनः ॥ इति प्रियं कांचिदुपेतुमिछतीं पुरानुनिन्ये निपुणाः सखीजनः ॥८॥

र्थ्यरूपकार्यस्यषद्पदावलेः कल्पवल्लीभ्रमेण निबंधन वीत्रासरूपकारणेनसमर्थनात्कारणेनकार्यसमर्थनरूपोर्थांतरंन्यासो भ्रांतिमदंगांगीभावेन संकीर्णः स तूपमयासंसृज्यते ॥७॥ अथ काश्चित्सखी कांचित्प्रणयकुपितामाह ॥ जहीति ॥ प्रियमुपेतुं स्वयमेवानुसर्तुं इछतीं आबद्धीनद्योर्नुमितिविकल्पान्नुमभावः कांचिन्नायकां निपुणः चित्तज्ञः सखीजनः कोपं जहीहि त्यज ओहाक्‌ त्यागे जहातेश्चेति विकल्पादीकारोदेशः दयितोनुगम्यतां अनुव्रज्यतां उभयथापि प्रार्थनायां लोट् अन्यथा चंचलमास्थि
ते१ रं तव मनः पुरानुशेते अग्रेनुशोचिष्यतेनुतप्स्यतइत्यर्थः यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लट् पुरः पूर्वमेवानुनिन्ये प्रसादयामास ॥८॥

अथ चतुर्भिः कालापकमाह॥ समुन्नतैरिति॥ समुन्नतैरुन्नतैः काशान्याश्च बालकुसुमानि तानि तानि दुकूलानि यस्मिन्नैः शालंत इति तथोक्तैः सारसपंक्तयो मेखला इव तासां परिक्वणन्त्यो येषु तैः स्वेषां कलत्राणि श्रोण्यस्तद्वच्चारवस्तैः कलत्रे श्रोणि भार्ययोरित्यमरः प्रतीरदेशैस्तटप्रदेशैः भूषिताः कुंजसमुद्रयोषितो निकुंजयुक्ता वननद्य इत्यर्थः अत्र नीरादीनां कलत्रादीनामौपम्योपमेयाभ्यां योषिद्धुत्वसाम र्थ्याच्च नदीनां योषिदौपम्यं गम्यते॥ ९॥ विहङ्गेति॥ विहङ्गपातेनोच्चपातेन भिदां भेदं षिद्भिदादिभ्योऽङ् इति अङ्प्रत्ययः उपेयुषः उप गतात्प्रवाहात्स्रुताः अत एवाभितः प्रसारिणः प्रसरणशीला इति प्रियाया उत्संग इव शीताः शुचिताः शुचीनां मौक्तिकानां त्विष इव

समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपंक्तिमेखलैः॥ प्रतीरदेशैः स्वकलत्रचारुभिर्विभूषिताः कुंजसमुद्रयोषितः॥९॥
विहङ्गपातेन भिदामुपेयुषः स्रुताः प्रवाहादभितः प्रसारिणः॥ प्रियांकशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिंदवः॥१०॥
सखीजनं प्रेमगुरूकृतादरं निरीक्ष्यमाणा इव नम्रमूर्तयः॥ स्थिरद्विरेफांजनशारितोदरैर्विकासिभिः पुष्पविलोचनैर्लताः॥११॥

त्विषो येषां ते दिक्च वनस्य प्रहासा इव स्थिता इत्युत्प्रेक्षा वारिबिंदवश्च अत्रोपमयोरुत्प्रेक्षायाश्च संसृष्टिः॥१०॥ सखीति॥ द्वौ रे फौ वर्णविशेषौ नाम्नि येषां ते द्विरेफाः भ्रमरशब्देन तदर्थो लक्ष्यते द्व्यक्षरं मसिमिति विदधातीति भाष्यकारः स्थिरा निश्चला द्विरेफा एवांजनानि तैः शारिताः शबलीकृतान्युदराणि येषां तैः शारः शबलयोरिति विश्वः अवसारिभिर्विकसितैः पुष्पाण्येव विलोचनानि तैः प्रेम्णा गुरूकृतः आदरो यस्मिन्कर्मणि तत्तथा सखीजनं निरीक्ष्यमाणाः पश्यन्त्य इव स्थिताः कुलीनाः नम्रमूर्तयो वनलतां व३
या लताश्च अत्र रूपकोत्प्रेक्षयोः संकरः॥११॥ १। १। ११। । ।।

उपेयुषीणामिति ॥ मदेनारुणैः अव्यक्तरागैः अव्यक्तरागस्त्वरुणः इत्यमरः । करिणां कपोलानां काषैः कषणैः रूपाहितश्यामरुचो जनितच्छव
प॰ णा इति तद्गुणालंकारः ॥ चंदनाम लयजो गंधसारो मलयजो भद्रश्रीश्चंदनोस्त्रियामित्यमरः । बृहतीः अधित्यकाः ऊर्ध्वभूमिः उपेयुषीणां
सुरराजयोषितां मनांसि जह्रुः अत्र चतुरुष्कोक्त्यानं घाद्दीनां विशिष्य नामेवापूर्वमनोहरणहेतुत्वोक्त्या काव्यलिंगमनुज्ञेयं ॥ १२ ॥ स्व
ति ॥ अप्सरसः स्वपुरुषाणां प्रियाणि चक्रुः चित्तहारिणा मनोहरेण शाखिनां प्रसवेन पुष्पजातेन विलोभ्यमानाः आलुभ्यमानाः
योषितः स्वगोचरे स्वविषये स्वकरप्रत्ययेसत्यपि प्रसवे इति शेषः उपकर्तुं परिचरितुं इच्छतां नभश्चराणां गंधर्वाणां प्रणयेन स्नेहेन हे

अरुणः कृष्णलोहिते

उपेयुषीणां बृहतीरधित्यका मनांसि जह्रुः सुरराजयोषितां ॥ कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चंदनाः ॥ १२ ॥
स्वगोचरे सत्यपि चित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनां ॥ नभश्चराणामुपकर्तुमिच्छतां प्रियाणि चक्रुः प्रणयेन योषितः ॥ १३ ॥
प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लंभिता ॥ न किंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवं ॥ १४ ॥

तुनां प्रियाणि चक्रुः स्वकरग्राह्यमपि प्रसवं स्वकांतप्रियार्थं तदीयमानेन वा गृहीषु इत्यर्थः ॥ १३ ॥ कस्यचित् गोत्रस्खलनानंतरं
वृत्तमाह । प्रयच्छतेति ॥ कुसुमानि प्रयच्छता ददता दयितेन नोच्चैः उच्चैस्तरां विपक्षगोत्रं सपत्नीनामधेयं लंभिता प्रापिता तन्नाम्ना आ
हूतेत्यर्थः नाम गोत्रं कुलं गोत्रमिति विश्वः अत एव मानिनी अत एव न किंचिदूचे किंतु केवलं बाष्पाकुललोचना सती च
रणेन भुवं लिलेख गोत्रस्खलनेन जनितेर्ष्यानिमित्तनिर्वेदादिति भावः मानिनी अत एव न किंचिदूचे इत्युक्तं तदुक्तं दशरू
पके तल्लक्षणा नायकीव्यापनिर्वेदश्चावमाननासनिश्वाससवैवर्ण्यनवक्रीहितसदानतता इति ॥ १४ ॥ ॥

पुष्पेषु इषुधा आहितं आरोपितं अनया नेत्र सारितमित्य
र्थः। पाणिपल्लवं च नविवेद प्रियाहस्तन्यवैतत्वादिति भावः

अन्यस्याः सन्नूरसमाह। प्रियइति॥ वा व्ययन्नति ददाति समालपती सर्थः। दिणः शत्रप्रत्ययः पाघ्रेस्यादिनायन्नो देशः। तादृशे प्रिये निब
द्धदृष्टिः अतएवोन्मुखी शिथिलश्च नथः। आकुलश्च लितनतश्च लिततादृशउद्भ्रयो निर्विबंधो यस्याः सा नारिकचांशुकं ग्रंथो नि
वीस्या दुश्च्ययो प्यथेतिमार्तेङः। अपरा न्यास्त्री अंशुकं न समादधे। नवबंधरामपारवश्यादिति भावः। एषा च प्रगल्भानायिकापा
णिपल्लवमित्यत्रान्यतरसाधकप्रबाधकप्रकं मोपमाभावादुपमारूपकयोः संकरः॥१५॥ अन्यस्याः विलासमाह। सलीलमि
ति॥ आसन्नः लतां तांसंसेन्नः पल्लवाभूषणं यस्यतं पल्लवैः सहग्रथितमित्यर्थः। कुसुमावलं सकं पुष्पशेखरं कांतदत्तमितिशे

प्रियेपरायन्नतिवा च मुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया॥ समादधे नांशुकमाहितं वृथा विदुः पुष्पेषु न पाणिपल्लवं॥१५॥ वे
सलीलमासन्नलतांतपल्लवं समासजंत्या कुसुमावतंसकं॥ स्तनोपपीडं नुनुदे नितंबिना घनेन कश्चिज्जघनेन कांतया॥१६॥
कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा॥ वलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता॥१७॥

षः। सलीलं सविलाससमासंजंत्या शिरसि रधंत्या दंशासंजस्वंजांशपीसनुनासिकलोपः। कांतयाकश्चित्स्तनयोः उपपीडस
नोपपीडं सप्तम्यां चेत्यादिना णमुल्प्रत्ययः। नितंबिना प्रशंसायामिनिः। घनेन निबिडेन जघनेन पश्चान्नितंबास्त्रीकट्याः क्लीबेतु
जघनं पुर इत्यमरः। नुनुदे नुन्नः। अंशुकातिरेकादिति भावः। एषापि प्रगल्भैव॥१६॥ अथ युग्मेनाह॥ कलत्रेति॥ विलोलनीविना
गात्रान्नामनाद्विश्लिष्टवस्त्रग्रंथिना कलत्रभारेण श्रोणीभारेण कलत्रं श्रोणिभार्ययोरित्यमरः। तथा गलन् विस्रंसमानं दुकूलं
यास्यांस्तनाभ्यां शालत इति तथोक्तेनोरसा वक्षसा तथा वलिव्यपायेन भंगिनिवृत्त्या स्फुटा रोमराजिः यस्मिन् तेन निराय
तत्वात् असारितत्वात् ताम्यता तनूभवता उदरेणोपलक्षिता यास्वभावोक्तिरलंकारः॥१७॥ ॥ ॥ ॥

विलंबेति। विलंबमानो विस्रंसमानः आकुलो विलुलितश्च केशपाशो यस्याः सा। आविष्कृतबाहुमूलया दर्शितकक्षाप्रदेशया कया
चित्कांतया तरुप्रसूनान्यपदिश्य प्रसूनग्रहणं व्याजीकृत्य व्याजोपदेशो लक्ष्यं च समरः। सादरं साभिलाषं मनोधिनाथस्य प्रियस्य
मनः समाददे। आचकर्ष। कर्मणि लिट्। सर्वांगसौष्ठवदर्शनात्संघोल्लसन्नं प्रियमनस्तत्रेति भावः। अत्र प्रियमानोहरणहेतुभिः कां
ताविशेषणपदार्थैः काव्यलिंगमुत्तिष्ठमानं स्वभावोक्त्या सहांगांगिभावेन संकीर्यते ॥१८॥ काचित्स्तनाभ्यां प्रियं जघानेत्याह ॥

विलंबमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया ॥ तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथ
स्य मनः समाददे ॥१८॥ युग्मं ॥ व्यपोहितुं लोचनतो मुखानिलैरपारयंतं किल पुष्पजं रजः ॥ पयोधरे
णोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥१९॥ ॥ श्रीगणपतिर्जयति ॥ ॥

व्यपोहितुमिति ॥ उन्नतौ पीवरौ स्तनौ यस्याः सा स्वांगाच्चेत्यादिना ङीप्। काचित् लोचनतः स्वनेत्रात् पुष्पजं रजः परागं मु
खानिलैः फूत्कारमारुतैः व्यपोहितुमपनेतुमपारयंतः किल अशक्नुवंतः किलेत्यलीके वस्तुतस्तु तदास्पर्शनलोभादपार
यंतमित्यर्थः। प्रियमुन्मनाः समुत्सुका सती अत एव पयोधरेणोरसि जघान तत्कपटपरिज्ञानजन्यादौत्सुक्यादिति भा
वः। हननस्थानत्वादुरसीति सप्तमी। इयं च प्रगल्भैव ॥१९॥ ॥ ॥ ॥ ॥ ॥

पुष्पावधारणात्वेनश्रोभावजितास्वभूदित्याह ॥ इमानीति ॥ यथाभिरामं मिति वीप्सार्थेव्ययीभावः कुसुमान्यग्रपल्लवानि च कुसुमाग्रप
ल्लवं तस्मिन्जातिप्राणिनामित्येकवद्भावान्नपुंसकत्वं इमान्यमूनि इति इत्थं निर्देशपूर्वकमित्यर्थः इदमदसोः संनिकृष्टविप्रकृष्टा
र्थे शनैरपवर्जिते पचिते सति वनश्रीर्निःसारतयेवेति हेतूत्प्रेक्षा भूरुहांस्तरूंस्तू विहाय वनितास्वपदं संदधे अत्र वनिताग
तायाः पुष्पप्रसाधनसंभवायाः लक्ष्म्याः विषयभूतायाः निगरणेन विषयेन वनश्रियो वनितागत्वोक्त्या असंबंधा रूपभेद
रूपा वा अतिशयोक्तिरलंकारः विषयस्यानुपादानाद्विषयरूपनिबध्यते यत्र सातिशयोक्तिः स्यात्को विप्रौढोक्तिजीवितेति

इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे ॥ विहाय निःसारतयेव भूरुहः पदं वनश्रीर्वनितासु
संदधे ॥२०॥ प्रवालभंगारुणपाणिपल्लवः परागपांडूकृतपीवरस्तनः ॥ महीरुहः पुष्पसुगंधिराददे वपुर्गुणोच्छ्रायमिवांगना
जनः ॥२१॥ वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः ॥ समेपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलतैः पदेपदे ॥२२॥

लक्षणादुत्प्रेक्षांगत्वं गम्यते ॥२०॥ प्रवालेति ॥ प्रवालभंगेन पल्लवलवनेनारुणपाणिपल्लव इत्यसंज्ञादित्यर्थः परागेण पुष्परजसा पांडूकृतो पीव
रस्तनो यस्य सः पुष्पैः सुगंधिः सुरभिरंगनाजनो महीरुहो वृक्षआत्तात् वपुर्गुणस्य स्वदेहगुणस्योच्छ्रायः पाणिपल्लवारुण्यादेयोऽत्कर्षः तमाद
देलब्धवानिवेत्युत्प्रेक्षा वस्तुतस्तु स्वाभाविक एव प्रवालभंगादिभिरभिव्यंज्यत इति भावः उत्कृष्टः श्रायः उच्छ्राय इत्यनेन प्रातिपदिकसमासः
न तूपसृष्टात्तद्धप्रत्ययः श्रिणीभुवोऽनुपसर्ग इति प्रतिषेधात् ॥२१॥ पंचभिः कुलकमाह ॥ वरोरुभिरिति ॥ अनुसानुषु यद्धर्मततः सकाशात्गुरुणा
खेदेन मंथरमलस विनिर्यतीनां गच्छंतीनां सुरांगनानां संबंधिभिर्वारणहस्तपीवरैः करिकरस्थूलैः वराश्चतेऽरवश्चेति तैश्चिराय खिन्नान्नव
नवपल्लवानां श्रीरिव श्रीर्येषां तान् तद्वन्मृदूनित्यर्थः अतएव समे समस्थलेपि किं पुनर्विषम इति भावः पातुं गंतुमनीश्वरान् अशक्तान् तए
वमदादिव पदे पदे विप्सायां द्विर्भावः प्रस्खलत श्वरणान्मदादिवेत्युत्प्रेक्षा ॥२२॥ ॥२२॥

विसारिइति॥ विसारिभिः कांचिमणिरश्मिभिः लब्धायात ज्जनितयेत्यर्थः मनोहरउच्छ्रायय स्येको येषां नितंबानां शोभया करपेन म
वसैकलानां द्युतिं शोभां जित्वा स्थितानि तत्तुल्यानीत्यर्थः अतएव चोपमालंकारः श्रमेणातिरिक्तैरतिशायितैर्गौरवैर्गुरुत्वैरुपलक्षि
तानि नितंबसंभारायमाणानीत्यर्थः। जघनानि वधूनां योज्यारव्यातः॥२३॥ समुच्छ्वसदिति॥ समुच्छ्वसत्संकुजकोशकोमलैर्दल
कमलमुकुलमुग्धैरिसुपमानाभिभिः प्रतारिताश्च्यः अथनाभिसंदर्भं गंयस्य संशाप्रतारितेति केशवः पुल्लिंगतायां तकविरेवप्रमा

विसारिकांचीमणिरश्मिलब्धया मनोहरोच्छ्रायनितंबशोभया॥ स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः॥२३
समुच्छ्वसत्संकजकोशकोमलैरुपाहितश्रीण्युपनीविनाभिभिः॥ दधंति मध्येषु वलीविभंगिषु स्तनातिभारादुदराणि नम्रतां॥२४॥
समानकांतीनि तुषारभूषणैः सरोरुहैरस्फुटपत्रपंक्तिभिः॥ चितानि घर्मांबुकणैः समंततो मुखान्यनुत्फुल्लविलोचनानि च॥२५

णं उपनीवि नीवीसमीपे उपाहितश्रीणि जनितोरुशोभानि उदराणि च नवविभंगिषु ऊर्मिमत्सु मध्येषु जघनेषु स्तनजघनेषु स्तनाति
भारान्नम्रतां दधंति बिभ्राणानि वा नं पुंसकस्येति विकल्पात् नुमागमः॥२४॥ समानेति॥ किं च घर्मांबुकणैः स्वेदोदबिंदुभिः
समंततश्चितानि व्याप्तानि [illegible] अनुत्फुल्लविलोचनानि अविकसदक्षीणि अतएव तुषारभूषणैः सीकरपरिवृतैः तुषारौ हिम
शीकराविति विश्वः अस्फुटपत्रपंक्तिभिरविकस्वदलावलिभिः व्याकोशविकचस्फुटा इत्यमरः सरोरुहैः समानकांतीनि
सुपमामुखानि च॥२५ ॥ ॥ ॥ २५ ॥ २५ ॥

विनिर्यतीनामिति॥सविस्मयंरूपयतःपूर्वोक्तकरचरणादीन्वर्णयतोनभश्चरान्गंधर्वानतत्पूर्वमिवतदेवप्रथमंयथातथाद्दृश्युत्प्रेक्षाईक्षणादरोंगनावलोकनादरः॥आलोचनकौतुकं विवेशपूर्वार्धव्याख्यातंअत्रकुलकेस्वभावोक्तिरुत्प्रेक्षागम्यते॥२६॥
अथजलक्रीडामारभते॥अथेति॥अथपुष्पावचयानंतरस्फुरद्भिश्चलद्भिर्मीनैःविधूतंपंकजेतिसदृङ्गखवीक्षणोक्तिःविपंकंनिष्पंकंविहारयोग्यमितियावत्।तत्रतीरेस्खलिताविचलिताउर्मिसंहतिर्यस्याः साइतिहस्तसंश्लेषोक्तिःमकलहंसनादिनीकादंबशब्दवतीतिवाग्व्यापारोक्तिः॥अतएवसुरापगागंगाकर्त्रीवधूरपूरसःकर्मभूताःपयोवगाढुमवगाहितुंगाहेरुर्दिवा
6

विनिर्यतीनांगुरुखेदमंथरंसुरांगनानामनुसानुवर्त्मनः॥सविस्मयंरूपयतोनभश्चरान्विवेशतत्पूर्वमिवेक्षणादरः॥२६॥
अथस्फुरन्मीनविधूतपंकजाविपंकतीरस्खलितोर्मिसंहतिः॥पयोवगाढुंकलहंसनादिनीसमाजुहावेववधूःसुरापगा॥२७॥
प्रशांतघर्माभिभवःशनैर्विवान्विलासिनीभ्यःपरिमृष्टपंकजः॥ददौभुजालंबमिवात्तशीकरस्तरंगमालांतरगोचरोनिलः॥२८॥

द्विकल्पःसमाजुहावेवाकारयामासेवेत्युत्प्रेक्षाअन्यापिआह्वानंशब्दपूर्वकंहस्तचालनंकरोतितद्वदीयमपीत्युत्प्रेक्षार्थइतिभावःशब्दस्थानंकलहंसनादःहस्तस्थानमूर्मिसंहतिःइतिएकारणाह्वानेसंहूतिबहुभिःलतःइत्यमरः॥ह्वयतेर्लिटिअभ्यस्तस्त्रेतिसंप्रसारणं॥२७॥
प्रशांतेति॥प्रशांतघर्माभिभवःप्रशांतोष्मबाधःवांदांतशांतेत्यादिनानिपातनात्साधुःशनैर्विवान्मंदंवहन्वातेःशतृप्रत्ययःपरिमृष्टपंकजःपद्मगंधीत्यर्थःआत्तसीकरःकृतस्तरंगमालामंतरेमध्येगोचरःस्थानयस्यसोनिलोविलासिनीभ्योभुजालंबदराविवेत्युत्प्रेक्षाविशिष्टवायुसंपर्कात्तथोत्फुल्लसुरित्यर्थः॥२८॥ ॥ ॥ ॥

गतैरिति॥ सुरस्त्रियो ऽप्सरसः सहावैः सविलासैर्गतैः गतिभिः नपुंसके भावे क्तः कलहंसानां चित्रसंगतिविलासविधुरमिति शेषः तथा नितंबभिः प्रशस्तनितंबैः कलत्रभारैः जघनभारैः पुलिनं तथा दीर्घलोचनैः मुखैः सरोजानि च साम्यगुणान्निरास्थिरे निरस्तवत्यः गुणवदगुणयोः कुतः साम्यमिति भावः अस्यतेः कर्तरि लिट् उपसर्गादस्यत्यूह्योर्वेति विकल्पादात्मनेपदं ॥ २९ ॥ विभिन्नेति ॥ विभिन्नाः विस्तृतसंघाताः पर्यंतगाः प्रांतगाः मीनानां पंक्तयो यासां ताः कृतमरुत्वतः सरित्वाभिरिंडसाविवेर्गधिर्वैः पुरः पूर्वमेवावगाढाः प्रविष्टास्तासां विश्वासार्थं गर्तग्राहादिपरिक्षार्थं चेति भावः आपसभीतिभिर प्रविष्टविषयत्वात् सभयैः विषादिभिरिति पाठेप्ययमेवार्थः सुरसुंदरीजनैस्तदेवावगाहनं

गतैः सहावैः कलहंसविभ्रमं कलत्रभारैः पुलिनं नितंबिभिः ॥ मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान्निरासिरे ॥ २९ ॥
विभिन्नपर्यंतगमीनपंक्तयः पुरो विगाढाः सखिभिर्मरुत्वतः ॥ कथंचिदापः सुरसुंदरीजनैः सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥ ३० ॥ विगाढ
मात्रे रमणीभिरंभसि प्रयत्नसंवाहितपीवरोरुभिः ॥ विभिद्यमाना विससार सारसानुदस्य तीरेषु तरंगसंहतिः ॥ ३१ ॥ श्रीः ॥ छ ॥

प्रथमं यथा तथा अत एव कथंचिद्बहुयात् प्रसमयैः विषादिभिः प्रपेदिरे ॥ छ ॥ णावगाहिरे ॥ ३० ॥ विगाढेति ॥ प्रयत्नेन संवाहिताः संचारिताः पीवराः स्थूलाः ऊरवो याभिस्ताभिः अंभसि विगाढमात्रे प्रविष्टमात्रे सप्तवसती सुप्सुपेति समासः मात्रं कार्त्स्न्येऽवधारणे इत्यमरः ॥ विभिद्यमाना स्वयं विशीर्यमाणा कर्मकर्तरि शानच् तरंगसंहतिस्तीरेषु सारसान् पक्षिविशेषान् सारसो मैथुनी कामी गोनर्दः पुष्कराह्वय इत्यादवः ॥ यद्वा सारसान् पंकजानि ग सारसो हंसे इति शब्दार्णवे उदस्य उत्सार्य विससार विस्तस्तार स्त्रीणां तथा मानां विलोडनवशात्तरंगवद्भिरभूदिति भावः ॥ ३१ ॥

शिलेति ॥ शिलाघनैः कठिनैः नाकसदां गंधर्वाणामुरस्थलैः बृहन्निवेशैर्महासंस्थानैरतिस्थूलैरित्यर्थः वधूपयोधरैश्च तटांतमितैः
नीतेन प्रापितेनात एव विभिन्नवीचिना भग्नोर्मिणाम्भसा कर्त्रा रुषेवेति हेतूत्प्रेक्षा कलुषत्वमाविलत्वं मनः क्षोभश्च ध्वन्यते भेजे कर्म
णि लिट् । यथा कश्चिन्मृदुस्वभावः केनचित्कठिनादिना सांगभंगं ताड्यितो निःप्रभावितः क्षुभ्यति तद्वदिति भावः कलुषत्वमित्यत्र वाच्य
प्रतीयमानयोरभेदाध्यवसायः अन्यथा शुद्धवाच्यस्याविलत्वस्य रोषहेतुकत्वादुत्प्रेक्षानुविधानादिति ॥२२॥ विधूतेति ॥ वि
धूता विक्षिप्ताः केशा येषां ते परिलोडिता विलुलिताः स्रजो येषां ते प्रविलुप्तचंदनाः प्रमृष्टांगरागा अतिप्रसंगादुर्नयाद्विलोडात् सुरांग स्यास५
नानां विहितागसः कृतमंडनखंडनरूपापराधा अत एवोर्मयस्तरंगाः सभया इव स्त्रीभ्यो भीता इव मुहुः प्रकंपमीयुः स्वभाविक-

शिलाघनैर्नाकसदामुरस्थलैर्बृहन्निवेशैश्च वधूपयोधरैः ॥ तटांतमीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वमंभसा ॥२२
विधूतकेशाः परिलोडितस्रजः सुरांगनानां प्रविलुप्तचंदनाः ॥ अतिप्रसंगाद्विहितागसो मुहुः प्रकंपमीयुः सभया इवोर्मयः ॥२३॥
विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममंडनेन ये ॥ हृतस्य शेषानिव कुंकुमस्य तान्विकत्थनीयान्दधुरन्यथा स्त्रियः ॥२४॥

स्यकंपस्य भयहेतुत्वमुत्प्रेक्ष्यते यद्वा सुरांगनानां विधूतकेशा इत्यादियोजना सापेक्षत्वेपि गमकत्वात्समासः स्त्रीसंग्रहणसाहसभय
साधः भयं तु रज्ञाद्भिष्य इति ॥२३॥ विपक्षेति ॥ विपक्षस्य सपत्नीजनस्य चित्तस्योन्मथना व्यथकारा इत्यर्थः बहुत्वग्रहणात्कर्तरि ल्यु
ट् येन नखव्रणा नखक्षतानि व्रणोऽस्त्रियामित्यमरः क्लीबे नाडीव्रणः पुमानित्यमरः विभ्रमस्य सौंदर्यस्य मंडनं तादर्थ्ये ष्यश्च यासादिवत्
ष्ठीसमासः न चतुर्थीसमासः यूपाय दार्वादिवत्प्रकृतिविकृतिविकाराभावादिति तेन कुंकुमलेपनादिना तिरोहिताः छन्नास्तान्नखव
व्रणान्हृतस्य क्षालितस्य कुंकुमस्य शेषानिव विशिष्टलेशानिव स्थितानित्युत्प्रेक्षा विकत्थनीयान्भर्तृवात्सल्यस्य व्यञ्जकत्वेन
श्लाघनीयान्तान्स्त्रियोऽन्यथा दधुः प्रकाशं दधुरित्यर्थः ॥२४॥ ॥

अथयुग्मेनाह सरोजेत्यादि ॥ पुरोवर्तिनि परिलीनषट्पदे ससंभ्रमभृंगेसकं कनीनिव समक्षणोरर्थसिद्धिरित्युपमानं विशिष्यतेसरोजपत्रेय
द्वा विलोलदृष्टे श्चंचलाक्ष्याः विलोचने रिव मनुरिव मुत्चौचितके किंवनतपक्ष्मसंततेश्चंचलाक्ष्याः शिरोरुहाश्चितनिशब्दंनीरवंव
तदै निश्चलं च तद्विरेफवृंदनु ॥३५॥ आगूढहासमिति ॥ किंचागूढहास्यं व्यक्तस्मितं तेनस्फुटाः दंता एव केसराः यस्य तत्तमु
खंश्चितयद्वा विकसत्पकजंनुरती स्वंसशयेनेति शेषः नलिनी वनेप्रलीनां निगूढां सखी योषितः सुचिरेणातिविलंब्य

सरोजपत्रेपरिलीनषट्पदे विशालदृष्टेः स्विदमू विलोचने ॥ शिरोरुहास्विन्नतपक्ष्मसंततेर्द्विरेफवृंदंनु निशब्दनिश्चलं ॥३५॥
अगूढहासस्फुटदंतकेसरंमुखंस्विदेतद्विकचंनुपंकजं ॥ इतिप्रलीनांनलिनीवनेसखींविदांबभूवुः सुचिरेणयोषितः ॥३६॥
प्रियेणसंग्रथ्यविपक्षसंनिधावुपाहितांवक्षसिपीवरस्तने ॥ स्रजंनकाचिद्विजहौजलाविलांवसंतिहिप्रेम्णिगुणानवस्तुनि ॥३७

विदांबभूवुः विदुर्निश्चिक्युरित्यर्थः उषविदजागृभ्योन्यतरस्यामितिविकल्पादाम्प्रत्ययः अत्रयुग्मेनिश्चयांतः संदेहालंकारः ।
॥३६॥ प्रियेणेति ॥ काचित्प्रियेण संग्रथ्यस्वयमेवरचयित्वाविपक्षसन्निधौपत्नीजनसमक्षंपीवरस्तनेवक्षसिउपाहितांस्रजंमा
लांजलाविलांमृदितांहर्षयोर्यर्थः तांनविजहौ नतत्याज नचनिर्गुणोयांतत्रकाप्रीतिरितिवाच्यं इत्यर्थांतरंन्यासेनाह गुणाः प्रे
म्णिवसंतीनवस्तुनियस्प्रेमास्पदंतदेवगुणवत् अन्यत्रतुगुणवदपिनिर्गुणमेवप्रेमनवस्तुपरीक्षयापेक्षतइतिभावः ॥३७॥ ॥

असंशयमिति ॥ स्त्रीणां नेत्रशोभार्थमंजनधारणं अंबुविहारोपगमात् द्रुतरक्तत्वं च अक्ष्णां ततः शोभनत्वतिरोधानां च निश्चितमित्युक्ते क्षते रमणी
भिः पदं अंजनन्यस्तं तदिति शेषः । यत्तदोर्नित्यसंबंधात् तदंजनमुपांतयोः रक्ततां रोद्धुं प्रतिबद्धुमेव न्यस्तं न तु शोभार्थमित्यर्थः । अन्यथा रा
गाभिव्यक्त्या शोभायाः अतिरोधानं स्यादित्यर्थः । असंशयमित्युत्प्रेक्षाव्यंजकं संशयस्याभावो ऽसंशयो ऽस्तीत्यर्थः । अर्थाभावे ऽव्ययीभावः ।
कुत एतदिति चेत् तत्राह यस्तस्मिन्नंजने सलिलेन हृते क्षालिते सत्यपि रागः पूर्वोक्त एवोपांतरक्तता किंतु प्रतिबंधाभावाद्दभितो व्याप्ते
8 स्त्वसंशयः नयनेषु शुक्लतां निरास निरस्तवान् । अस्यतेर्लिट् । श्रियं शोभां तु न निरास अतः अन्योन्यविरोधिनो रागः विरोधार्थमेवेदमंजनस्या
न तु शोभार्थं तस्यास्तदभावे ऽपि सद्भावादित्यर्थः । अंजनापगमे ऽपि तन्नयनानां राग एवालंकारो ऽभूदिति भावः । अत्रांजनन्यासमनूद्यत

असंशयं न्यस्तमुपांतरक्ततां यदेव रोद्धुं रमणीभिरंजनं ॥ हृते ऽपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियं ॥३८॥
द्युतिं वहंतो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः ॥ उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥३९॥

स्य शोभार्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणमुचितमुत्तरार्धे तस्यैव समर्थनादेवमुपपत्तेः द्रुयं दंजनन्यस्तमित्येकान्वये विरुद्धानुवाद
विरोधः स्यात् इत्यलमाबालशिक्षणीये प्रसंगैः ॥ फलोत्प्रेक्षा त्वियं ॥३८॥ द्युतिमिति ॥ द्युतिं शोभां तेजश्च वहंतः वेगिभिर्जविभिर्ज
लैरन्यत्र डैरश्च डलयोरभेदान्नृपद्वा जलं गोलकं नीरं ह्रीबेरं च जडं न्यवहितिति विश्वः । प्रलोभान्मोहात् हृताः गृहीताः उपप्लुताः
प्रदिताः यद्वा कर्तरि क्तः प्लवमाना इत्यर्थः । अन्यत्र धनग्रहणबंधनादिना पीडिताः वनितावतंसकाः च्युताधिकाराः भ्रष्टाधिकाराः स
चिवा इव तत्क्षणं शोचनीयतामाययुः ॥३९॥

विपत्रेति॥ गताः पत्रलेखाः तिलकविशेषा यासां ताः पत्रलेखाः निरलक्तकाः क्षालितरागा अधरा यासां ताः निरंजनाक्षीरपि बहुव्रीहौ
सक्थ्यक्ष्णोः स्वांगात्षच् षिद्गौरादिभ्यश्चेति ङीप् तथापि श्रियं बिभ्रतीः शोभां कारणाभावेपि शोभमाना इति विभावनालंकारः।
रामा निरीक्ष्य नभश्चरैर्गन्धर्वैस्तासां वपुषैव मंडनं अलंकृतं न तु मंडनेन तद्वपुरित्यक्षरार्थः इति बुबुधे ज्ञातं कर्मणि लिट् तासां च भाव
रमणीयानां मिकिमलंकरणेनेति भावः॥५०॥ तथेति विलासिनीजनपूर्वं जलविहारात्प्राक् प्रियानुरागेण कृतो भूषणेष्वादरो यस

विपत्रलेखा निरलक्तकाधरा निरंजनाक्षीरपि बिभ्रतीः श्रियं। निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मंडनं॥५०॥
तथानुपूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः॥ यथा जलार्द्रो नखमंडनश्रिया ददाह दृष्टीः प्रतिपक्षयोषितां॥५१॥

त्किं येन सः अनुरक्तप्रियत्वात् सम्यक्प्रसाधितः स न प्रीत्यर्थः विपक्षयोषितां सपत्नीनां दृष्टीः चक्षूंषि तथा न ददाह न दुःखी
चकार यथा जलार्द्रः सन् नखशब्देन नखक्षतानि गृह्यंते तान्येव मंडनं तस्य श्रिया तत्कृतशोभया ददाह पातयामास मंड
नांतरादपि नखमंडनमनुरागादपि तदनुभावएव सपत्नीनां दुःखहेतुरिति भावः जलार्द्रो ददाहेति विरुद्धकार्योत्पत्तिरूपो वि
षमालंकारः विरुद्धकार्योत्पत्तिर्यथा स्वभावो भवत्त्वरूपघटना वा स्याद्विषमालंकृतिः स्त्रिधेति लक्षणात्॥५१॥ ॥

शुभेति॥शुभाननाः विलोलहारा नितांतगौर्यो हृष्णांगयः गौरो रुक्मे सितेपीत इति वैजयंती भीरवस्त्राः स्त्रियः सांबुरुहेषु चलाः फेनपंक्तयो येषु
हृतानि कुंकुमानि यैः तेषु कुंकुमसंक्रमी जो घुष्टि स्पर्थः । ऊर्मिषु विषये तम मत्यर्थं परभागं गुणोत्कर्षं न लेभिरे परभाग गुणोत्कर्ष इति या
दवः तानि सामूर्मिणां वारुत्वादिगुणसाम्यात् न कश्चिद्विशेषो लक्ष्यत इति भावः अत एव सामान्यालंकारः सामान्यगुणसामा
१ न्येन यत्र वस्त्वंतरैकतेति लक्षणात् शुभाननश्च सांबुरुहाय भयविशेषणानां क्रमेणोभयेस्मिन्यथासंख्यालंकारश्चय

शुभाननाः सांबुरुहेषु भीरवो विलोलहाराश्चलफेनपंक्तिषु॥ नितांतगौर्यो हृतकुंकुमेष्वलं न लेभिरे ताः परभा
गमूर्मिषु॥४२॥ कृदांभसि व्यस्तवधूकराहते रवं मृदंगध्वनिधीरमुज्झति॥ मुहुस्तनैस्तालसमं समाददे मनोरमं
नृत्तमिव प्रवेपितं॥४३॥ ॥ ॥ ॥ ॥ ॥

थासंख्यं क्रमैकाणैव क्रमिकाणां समन्वयादिति काव्यप्रकाश लक्षणात् अनयोरंगांगीभावेन संकरः ॥४२॥ कृदेति॥ व्यस्ता
भ्यां विपर्यासिताभ्यां वधूकराभ्यां आहते एकेन करेणोत्सार्यान्येन ताडित इत्यर्थः कृदांभसि मृदंगध्वनिवद्धीरं गभीरं
रवमुज्झति तथाध्वनति सतीत्यर्थः मुहुस्तनैस्तालो गीतवाद्यनृत्यानां कालपरिच्छेदः ताल: कालः क्रियामानमिस्यमरः।
तस्य सममनुरूपं मनोरमं नृत्तमिव प्रवेपितं प्रकंपभावेन तः समाददे स्वीकृतं उपमालंकारः॥४३॥ ॥ ॥

श्रियेति ॥ श्रिया शोभया कमलानि हसद्भिः कमलसदृशैरित्यर्थः हसतीर्ष्ययस्पर्धतीति हंसदिग्नाः सदृशा पर्यायपराः उन्मूलास स्मितैः प्रतिमाग
तैः प्रतिबिंबगतैरित्यर्थः प्रतिमानं प्रतिबिंबं प्रतिमेत्यमरः मुखैरलंकृता अन्यं बूनि यस्यास्सा किं च सुरराजयोषितां कृतमानुकूल्यं वि
हाराद्युपकारो यस्यास्सा सा दृश्यं योषिद्भिरुपकृता स्वयं वतामुपचिकीर्षुर्जान्हवी गंगा प्रसादस्य स्वच्छस्य साफल्यं अर्थगौरवे अर्थ
गौरवं वस्तुष्ठीसमासनिर्वाहः अवाप अत्रोभासि विहारबिंबग्रहणयोरसंभवादित्यर्थः स्वच्छाएव हि परैरुपक्रियांते स्वयं च

श्रिया सहंहसद्भिः कमलानि सस्मितैरलंकृतां बुः प्रतिमागतैर्मुखैः ॥ कृतानुकूल्या सुरराजयोषितां प्रसाद
साफल्यमवाप जान्हवी ॥ ४४ ॥ परितः स्फुरन्मीनविघट्टितोरवः सुरांगनास्त्रासविलोलदृष्टयः ॥ उपाययुः
कंपितपाणिपल्लवाः सखीजनस्यापि विलोकनीयतां ॥ ४५ ॥ ॥ ॥

परितः सर्वतेषामिति भावः कृतानुकारेति पाठेऽनुकारोनुकूलकरणं उप स्फुरद्भिर्विवर्तमानैः मीनैः विघट्टिता उरवो यासां ताः ति
अतएवात्रसविलोलदृष्टयः कंपितपाणिपल्लवाश्च सुरांगनाः सखीजनस्यापि विलोकनीयतां उपाययुः किमुत प्रियजनस्ये
ति भावः स्वभावोक्तिरलंकारः ॥ ४५ ॥ ॥ ४५ ४५
२४ प्रकार इत्येव व्याख्येयं अत्र जान्हवीविशेषणपदार्थस्य सापल्यं प्रतिहेतु
मत्वा काव्यलिंगमलंकारः ॥ ४४ ॥ ४२

भयेति॥ मानिनी दुले भस्वयंग्रहणेति भावः। झषेण मत्स्येनाहृते सति पृथुलो मा झषो मत्स्य इत्यमरः। भयादिव वस्तुतस्तु न तथेति भावः। किं
तु मुदे तोषु क्ष्येनैवाश्लिष्य प्रियमानंदयति स्म तथा हि रामाः स्त्रियः अकृत्रिमोऽनारोपितो यः प्रेमैव रसस्तेनाहृतैर्जनितैः कृतकैः कृ
10 त्रिमैरपि ईहितैश्चेष्टितैः मनोहरंती आरोपितमपि भयं प्रेमम्मूलत्वान्मनोहरं बभूवेत्यर्थः। अत्र तुल्यानुभावेन भयेन सहजरागग्र
ग्रहणान्मीलनालंकारः। मीलनं वस्तुना यत्र वस्त्वंतरनिगूहनमिति लक्षणांतरसंभवादर्थालंकारत्वेऽसेन संसृज्यते॥४६॥ ति
कु॰५ रोहितेति॥ यं अपांविगाहादन्नितांतमाले विकीर्णैः प्रसारिभिः यायलैरलकैः केशैः तिरोहितानि छन्नप्रातानि वधूनां वदनानि द्वि
रेफवृंदैरंतरितानि छन्नानितैः सरोरुहैः स्तुल्यतां ययुरित्युपमालंकारः॥४७॥ करावितिः॥ मानिनी पयस्य गाधे सति किले

भयादिवाश्लिष्य झषाहतेंभसि प्रियं मुदानंदयति स्म मानिनी॥ अकृत्रिमप्रेमरसाहितैर्मनोहरं ति रामाः कृतकैरपीहितैः॥४६॥
तिरोहितांतानि नितांतमाकुलैरपां विगाहादलकैः प्रसारिभिः॥ ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृंदांतरितैः सरोरुहैः॥४७॥
करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसंभ्रमा॥ सखीषु निर्वाच्यमधार्ष्ट्यदूषितं प्रियांगसंश्लेषमवाप मानिनी॥४८

व॰ सलीलेमज्जनभयादेवेत्यर्थः। जातसंभ्रमा उत्पन्नभया अत एव नवपल्लवाकृती करौ धुनाना कंपयंती धुनोतेः क्र्यादित्वात् कर्त
रि शानच् सखीषु विषयेऽनिर्वाच्यमवाच्यमनिंद्यमित्यर्थः। धार्ष्ट्यदूषितं च न भवतीत्यधार्ष्ट्यदूषितं वस्तुतोरागस्कृतत्व
मपि भयमूलत्वारोपादिति भावः। प्रियांगसंश्लेषमवाप। अत्र तुल्ययोगेन भयेनांगलुकेन सहजानुरागनिगूहनान्मीलना
लंकारः। तदुक्तं काव्यप्रकाशे समानवस्तुनायं निगूह्यते निजेनागंतुनिवापितं मीलनमुदाहृतमिति॥४८॥ ॥

प्रियेति॥ प्रियेः सलीलं यथा तथा करयो र्वारितः अंजलिजैर्जलैः वारितोऽवरुद्धः सितः प्रवृद्धः संततैर्निश्वासैर्विकंपितो स्तनौ यस्य सः
सविभ्रमं सविलासं माधूतानि कराग्रपल्लवानि पाणिपल्लवानि येन सः विलसनशीला विलासिन्यः बोकषल सेति घिनुण प्रत्ययः।
ता एव जनः जातावेकवचनं यथार्थतामापन्नः स्त्रीसानेकविलासवत्तया यथार्थनामकत्वं अवापेत्यर्थः कस्मिंश्चित् रूम्यमानार्थस्य
प्रयोग इति नामकस्याप्रयोगः यथा माघे विरायया थार्थ्यमलंघि दिग्गजैरिति कविसमयुज्यते च यथा रघुवंशे परंतपो नाम यथार्थना
मेति नैषधेपि सजयत्यरिसार्थसार्थकी कृतनामा किल भीमभूपतिरिति स्वभावोक्तिरलंकारः॥४९॥ उदस्येति॥ दयितेन धैर्यका

प्रियेः सलीलं करवारि वारितः प्रवृद्धनिश्वासविकंपितस्तनः॥ सविभ्रमाधूतकराग्रपल्लवो यथार्थतामाप विलासिनीजनः॥४९॥
उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारि वारितं॥ मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे॥५०॥
विहस्य पाणौ विधृते धृतांभसि प्रियेण वध्वा मदनार्द्रचेतसः॥ सखीव कांचीपयसाघनीकृता बभार वीतोच्चयबंधमंशुकं॥५१

ठिन्यमुदस्यापनीयानुनीयेत्यर्थः प्रसादितायाः सौमनस्यं गमितायाः नतभ्रुवः स्त्रीसंबंधी करवारिभिर्वारितमवरुद्धं अत
एव निमीलन्नयनं यस्य तन्मुखं सपत्नीवदनादिव श्रियमाददे जग्राह तद्दीनीलदूरनस्यनीश्रीकत्वान्नदीयश्रीग्रहण
मुत्प्रेक्षते॥५०॥ विहस्येति॥ धृतांभसि प्रियसेचनार्थं गृहीतजले पाणौ अंजलावित्यर्थः प्रियेण विहस्य विधृते वलं वि
२२ ते सति अत एव मदनार्द्रचेतसः मदन एव परवशायाः बध्वा संबंधिनी तोच्चयबंधमुक्तनीवीग्रंथिकं समानमित्यर्थः
अंशुकं पयसा घनीकृता कांचीसखीव बभार जग्राह। स्त्रीणां किल स्त्रीष्वेवाधीनं लज्जारक्षणमिति भावः॥५१॥ ॥ ॥

निरंजनेति॥ नतभ्रुवोऽगंनायाः विग्रहे वपुषि निरंजने निर्धूतकज्जले दृशो कूर्मसाचिविलोकितं तिर्यगीक्षणं कर्तृ मंडयति स्म
तिर्यगर्थे साचि तिर्यञ्चम॰ अयावकं क्षालितलाक्षारागं ओष्ठपल्लवं च वेपथुः कंपो मंडयति स्माद्वितो थु जिति थुच् प्रत्ययः।
अतिलकोतिलकरहितं तदास्पदं तिलकस्थानं ललाटं आस्पदं प्रतिष्ठायामिति निपातः वलिक्रियालेखावंधश्च
मंडयति स्म तदा निरलंकारस्यांगनाशरीरस्य तच्छरीरविकार एवालंकार इत्यर्थः॥५२॥ प्रियेणेति॥

निरंजने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवं नतभ्रुवो मंडयति स्म विग्रहे वलि
क्रियावातिलकं तदास्पदं॥५२॥ प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष
सांत्वनैः॥ जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोऽनुनये भृशायते॥५३॥

काचित्प्रियेण विपक्षतः सपत्नीतश्चरमं पश्चात् सिक्ता सति चुकोप सांत्वनैरनुपैः न तु तोष तथाहि रूढप्रणयस्य
गाढप्रणयो जनस्य संबंधि चेतसोऽमर्षः कोपः किमपि कुतो वा हेतोरनुनये सति अन्यत्र शांतिहेतुरनुनयोऽत्र प्रकोपा
याये भवति तत्र कारणं तु न ज्ञायत इत्यर्थः भृशायते गाढो भवति भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः इति क्यङ्॥५३

निमीलदिति॥ प्रियोपकंठं प्रियसमीपे अत्यंतसंयोगे द्वितीया निमज्जतीनां गाहमानानामत एव निमीलंती निमिषंतीति आकेकराणि आकेकरंव तिलोचनानि चक्षुंषि यासां आकेकरलक्षणं तु न्तर्वलितासे दृष्टिराकेकरा किंचित्स्फुटायां गे प्रसारिता मीलिताधपुटालोके तारा व्यावर्त्तनोत्तरे ति तासां स्त्रीणां कृतो गात्रवेपथुः कंपो

निमीलदाकेकरलोलचक्षुषां प्रियोपकंठं कृतगात्रवेपथुः॥ ॥
निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे॥५४॥

येन सः श्वसितैर्निश्वासैरुद्धतावुत्पतितौ स्तनौ येन सः श्रमः खेदो नु मदनो नु पप्रथे प्रादुर्बभूव निमज्जनप्रियसन्निधानरूपो भयकारणसंभवान्नेत्रनिमीलनगात्रंकंप निश्वासधारणात्संदेहः स एवालंकारः॥५४॥

इत्थमिति ॥ पीनैस्तनैः गुरुभिर्जघनैश्च श्रोणीलं तद्वत्ति तथोरुभिः सलिलनोदनसामर्थ्योक्तिः स्थलस्य साक्षात्प्राप्णं गतान्नद्वंद्वे
कवद्भावः वनिताभिरित्थं विहस्य उदस्यमानं नुद्यमानं उत्सर्पितैरूपरिभावं प्रापितैरूर्मिचयो लंघिततीरदेशो येन तद्वा
रि औत्सुक्यं विहारसहिष्णुत्वं तमनुज्ञं प्रेरितमिवेत्युत्प्रेक्षा नुदधिदेशादिना निष्ठानत्वं पुरोगं प्रतस्थे स्खलनवदिति
तिभावः ॥५५॥ तीरांतरमिति ॥ रथांगनाम्नां मिथुनाम्नां मिथुनानि चक्रवाकद्वंद्वानि अन्यानि तीराणि तीरांतराणि

इत्थं विहस्य वनिताभिरुदस्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः ॥ उत्सर्पितोर्मिचयलंघिततीरदेशमौ
त्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥५५॥ तीरांतरेषु मिथुनानि रथांगनाम्नां नीत्वा विलोडितसरोजवनश्रियः स्ताः ॥
संरेजिरे सुरसरिज्जलधौतहारास्तारावितानतरला इव यामवत्यः ॥५६॥ ॥

नीत्वा नियोज्यते त्यर्थः अविहितलक्षणस्तास्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः विलोलिताः सरोजवनश्रियो याभिस्ताः
सुरसरिज्जलैर्धौतहाराः क्षालितमुक्तावलयस्ताः स्त्रियस्तारावित[redacted]नैः उडुगणैस्तरला भासुरा हारेवं चलेपी
ति वैजयंती ॥ यामवत्यो रात्रय इव पुरः यथा नक्षत्रगणसहिता रात्रयश्चक्रवाकानां मिथुनानि तीरांतरं नयंती रात्रौ
चक्रवाकानां विगमस्तथा स्त्रियोपीति भावः ॥५६॥ ५६ ५६॥

रागा सलिलस्य शोभ्या साम्यमाह ॥ संक्रांतेति ॥ संक्रांतैश्चंदनरसैर्मलयजद्रवैराहितो वर्णभेदो रूपांतरं यस्य तद्वि
छिन्नानि त्रुटितानि यानि भूषणानि तेषां येमणिप्रकरामणिगणास्तेषामंशुभिश्चित्रं नानावर्णं बद्धोर्मितरलतरंगितं
नाकवनिताभिः परिभुक्तं पूर्वं परिभुक्तं पश्चाभुक्तं पूर्वकालेत्यादिना तत्पुरुषः सिंधोर्गंगायाः सलिलं शस्तेत्येतिश

संक्रांतचंदनरसाहितवर्णभेदं विछिन्नभूषणमणिप्रकरांशुचित्रं ॥ बद्धोर्मिनाक
वनितापरिभुक्तमुक्तं सिंधोर्बभार सलिलं शयनीयलक्ष्मीं ॥५७॥ इति श्रीकि
रातार्जुनीये महाकाव्ये लक्ष्म्यंके भारवीकृतौ जलक्रीडावर्णनं नामाष्टमः सर्गः ॥ ॥

यनीयतल्पं बद्धुलगहणात्साधुः तस्य लक्ष्मीं बभार दधौ सुरसरित्सलिलं भुक्तमुक्तं शयनीयगुणसाम्यात्तद्वच्छुशुभ इति
भावः ॥ अत एव निदर्शनालंकारः लक्षणं तूक्तं ॥५७॥ ॥ ॥ ५७॥
इति श्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्या
यां घंटापथसमाख्यायां अष्टमः सर्गः समाप्तः ॥ ॥ ॥ ॥ ॥

8

13

ग्रं० ५२०

अथ किरातस्य अष्टमसर्गस्सटीकः समाप्तोयं

१२

श्री॥ किरातस्यायंसप्तमसर्गसटीकः प्रारंभः॥

श्रीगणपतिर्जयति ॥ श्रीमद्भिरिति ॥ अथप्रस्थानानंतरं श्रीमद्भिः सरथेगजेनसुरथगजास्तैः तेनसहेतितुल्ययोग इति त्रयाणां लोकानां
भर्तुः त्रिलोकभर्तुरिंद्रस्य तद्धितार्थेत्यादिना उत्तरपदसमासः । सचिवैः गंधर्वैः गुप्तानां सुरांगनानां प्रस्थानं अलघुषु महत्सु विमानानां रं
ध्रेषु कुहरेषु भिन्नः प्रतिध्वानैरनेकीभूतः अतएव संमूर्छन् प्रसरन् मृदंगनादः समभिदधे आचख्यौ पौरेभ्य इति शेषः । अस्मि
न्सर्गे प्रहर्षणीवृत्तं म्नौज्रौगस्त्रिदशयतिप्रहर्षणीयं ॥१॥ सोत्कंठैरिति ॥ सोत्कंठैरवेक्षणोत्सुकैरित्यर्थः । अमरगणैर

श्रीमद्भिः सरथगजैः सुरांगनानां गुप्तानामथ सचिवैस्त्रिलोकभर्तुः । संमूर्छन्नलघुविमानरंध्रभिन्नः प्रस्थानं समभिद
धेमृदंगनादः ॥१॥ सोत्कंठैरमरगणैरनुप्रकीर्णान्निर्याय ज्वलिततरत्विषः पुरान्मघोनः ॥ रामाणामुपरि विवस्वतः स्थितानां
नासेदे चरितगुणत्वमातपत्रैः ॥२॥ ॥ ॥२॥ ॥२॥ ॥ २॥ ॥

नुप्रकीर्णादाकीर्णात् ज्वलिततरत्विषः दीप्तप्रभात् मघोनः पुरादमरावत्याः निर्याय निर्गत्य याते ल्यपू । विवस्वतः सूर्योपरि
स्थितानां आतपात्त्रायंत इति आतपत्रैः सुपीयोगविभागात्कप्रत्ययः । चरितगुणत्वं सामर्थ्यकृत्यं नासेदे न प्राप्तं तासां
सूर्योपरिस्थितत्वादातपत्राणामसंभावः ॥२॥ २॥ २॥ २॥ ॥

धूतानामिति ॥ अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिः धूतानामिति दुर्निमित्तसूचनं आयासाद्धुतिप्रयासाद् विशदलोचनो
त्पलानां वधूनामुष्णांशुद्युतिजनितः आतपरक्तः कपोलानां रागः पाटलत्वं मदनजनितां श्रियं तत्सदृशीं करोतीत्यर्थः । अतए
व निदर्शनालंकारः । आनिन्ये आनीतवान् वधूरिति शेषः । आङ्पूर्वो नयतेः कर्तरि लिट् उकारानुबंधत्वादात्मनेपदं ॥ ३ ॥
तिष्ठद्भिरिति ॥ कथमपि वाढं कथमादि तथाप्यंते यत्ने गौरववाढयोरित्यमरः । देवतानामनुभावात्सामर्थ्यात् तिष्ठद्भिरपतद्भिरित्यर्थः ।
रथविशेषणमेतत् । प्रजविभिर्वेगवद्भिस्तुरंगैः आयतं दूरमारूढैः रथौघैर्वियत्याकाशे नेमीनां चक्रधाराणां चक्रधारा प्रधिर्नेमी

धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानां ॥ आनिन्ये मदविहितां श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः ॥ ३ ॥
तिष्ठद्भिः कथमपि देवतानुभावादारूढैः प्रजविभिरायतं तुरंगैः ॥ नेमीनामसति विवर्तने रथौघैरासेदे वियति विमानवत्प्रवृत्तिः ॥ ४ ॥
कांतानां कूलपुलकैः स्तननागरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभः ॥ आपेदे श्रमसलिलोद्गमो विभूषां रम्याणां विकृतिरपि श्रियं तनोति ॥ ५ ॥

रित्यादयः । विवर्तने भ्रामणेऽसति विमानवद्गिमानानामिव स्युस्प्रेक्षा । तत्र तस्येवेति प्रत्ययः । प्रवृत्तिर्गतिरासेदे प्राप्तासदेः कर्मणि
लिट् ॥ ४ ॥ कांतानामिति ॥ कांतानां स्तननागानां नागरागे रक्तपुलकैर्जनितोद्भवः लतेरोमांचव इत्यर्थः । प्रच्युताः प्रमृष्टास्तिलका
कायेषां तेषु वक्त्रेषु मौक्तिकाभः श्रमसलिलोद्गमः स्वेदोद्भेदो विभूषां विभूषणं प्रपेदे संपन्नः कर्तरि लिट् । रम्याणां
स्वभावसुंदराणां विकृतिरपि श्रियं तनोति अतः स्वेदस्यापि विभूषणत्वमुपपद्यत इति भावः ॥ ५ ॥ ॥ ५

कि० २१७
॥२२॥

राजद्भिरिति। मरुतां पथि आकाशे राजद्भिर्दीप्यमानैरभिन्नरूपैरविच्छिन्नाकारैरत एवोल्कानां नक्षत्रपातानां अर्चिर्भिर्विस्फुटं गति
र्येषां तैर्निर्दीप्तमार्गाणि तैः कनकस्य निकाषः कषणं तस्य राजी रेखा तद्वत् गौरैर् रुचैः। गौरैः पीतेरुणे श्वेते इति विश्वः। ध्व
जांशुकानां तेजोभिः पताकाकान्तिभिः आयामत्वं तेषामेव दैर्घ्यं सातिरेकः सातिशयः क्रियते स्मेव कृत इव दीर्घाः ध्वजपटाः स्व
तेजःप्रसारेण दीर्घतमा इव लक्ष्यन्ते इत्युत्प्रेक्षा अत्रोल्कानामुपमानुप्राणितेति॥ ६॥ रामाणामिति॥ मालेवमा[illegible]स्य
सौकुमार्यमावर्जितं येन तस्मिन् कुसुमार इत्यर्थः। समाप्तां वपुषि आतपस्य सहत्वे रुचि योगे षष्ठी सहत इति संहक्षमं पचा

राजद्भिः पथि मरुतामभिन्नरूपैरुल्कार्चिर्विस्फुटगतिभिर्ध्वजांशुकानां॥ तेजोभिः कनकनिकाषराजिगौरैरायामः क्रियत इव स्म
सातिरेकः॥ ६॥ रामाणामवर्जितमाल्यसौकुमार्ये संप्राप्ते वपुषि सहत्वमातपस्य॥ गंधर्वैरधिगतविस्मयैः प्रती
येक कल्याणी विधिषु विचित्रता विधालुः॥ ७॥ ॥७॥ ॥ ७ ॥ ॥ ७॥ ॥

यच्चूतस्य भावः सहत्वं तस्मिन् संप्राप्ते सति अधिगतविस्मयैः संप्राप्तमाश्चर्यं यैः गंधर्वैः विधालु विधिषु सृष्टिषु कल्या
णी साध्वी प्रेयसी उपकारकत्वादिति भावः विचित्रता नानाविधत्वं प्रतीयते गालाश्यातात्प्रलिपूर्वादिणः कर्म
णि लिट्॥७॥ ॥ ७ ॥ ७ ॥ ७॥

सिंदूरैरिति। सिंदूरैर्नागसंभवाख्यैः रागद्रव्यैः सिंदूरं नागसंभवमित्यमरः। कृतरुचयो लंकृता इत्यर्थः। सहेम्नः कक्ष्याभिर्मध्येभबंधनैः
सहेमकक्षाः तेन सहेति तुल्ययोगः इति बहुव्रीहिः। कक्षा प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबंधने इत्यमरः। स्रोतोभिः सप्तभिर्मदस्रा
वीभिः करात्कटाभ्यां मेढ्राभ्यां नेत्राभ्यां च मदस्रुतिरिति पालकाव्यो करान्नासारंध्राभ्यामित्यर्थः। मदं क्षरंतो वर्षंतः त्रिद

सिंदूरैः कृतरुचयः सहेमकक्षाः स्रोतोभिस्त्रिदशगजा मदं क्षरंतः॥ सादृश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः
स्फुरितशतह्रदैः पयोदैः॥८॥ अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यंतादहिममयूखमंडलस्य॥ आशानामुपरि वि
ततामिवैकवेणीं रम्योर्मिस्त्रिदशनदीं ययुर्बलानि॥ ॥ ॥ ॥

शगजाः अरुणस्यार्कस्यांशूनां रागेण आरुण्येन भिन्नैः संसृष्टैर्वर्षद्भिः स्फुरितशतह्रदैः स्फुरिततडितैः पयोदैः सा
दृश्यं ययुरित्युपमालंकारः॥८॥ अत्यर्थमिति॥ बलानि सैन्यानि अत्यर्थं दुरुपसदात् अहिममयूखमंडलस्य सूर्यमंड
लस्य पर्यंतात् समीपात् दूरमुपेत्य गत्वा आशानामुपरि विततां गुंफितामेकवेणीमिव स्थितामित्युल्लक्षा रम्या
ऊर्मयस्तरंगा भंग्यश्च यस्याः स्तां त्रिदशनदीं मंदाकिनीं ययुः प्रापुः॥ ॥ ॥ ॥

3 आमत्तेति॥ आमत्तैर्भ्रमरकुलैः आकुलानि उत्थापितानि ग्रथितानि अन्योन्यं संरब्धानि च रजांसि येषु तानि पंकजानि धुन्वन् कंपय
न् सुरभिरित्यर्थः। गगननदीतरंगैः शीतो मातरिश्वा वायुः कान्तानामप्सरसां संतापं विरमयति स्म शमयामास मातरिश्वयति श्वां
तरिक्षे अंतरिक्षे मातरि श्वयतीति वेति नैरुक्ताः॥१०॥ संभिन्नैरिति॥ इभतुरंगस्यावगाहने नर्मध्ये नेन संभिन्नैः संक्षु
भितैः सुरापगायाः पयोभिः कर्तृभिः अनुपदं विपद्व्याप्तिरित्यर्थः लक्षणे इत्थंभूताख्याने सादिना कर्मप्रवचनीयत्वात् द्वि
तीया गुर्वी विपुलैः विमानपंक्तिः सुकृतीनामिति शेषः। प्राप्यत स्वर्वत्समथं यथा तथा आकाशगंगा यास्तदाभावादिति

आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्धूतग्रथितरजांसि पंकजानि॥ कांतानां गगननदीतरंगशीतः संतापं विरमयति स्म मा
तरिश्वा॥१०॥ संभिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवीं विमानपंक्तीः॥ तत्पूर्वं प्रतिविदधे सुरापगाया वप्रांतस्खल
लितविवर्त्तनं पयोभिः॥११॥ कांतानामग्रहचरिता सथोरथानामक्षाग्रक्षतसुरवेश्मवेदिकानां॥ निःसंगं प्रधि
भिरुपाददे विवृत्तिः संपीडक्षुभितजलेषु तोयदेषु॥१२॥ ॥१२॥ ॥१२॥ ॥

भावः वप्रांते वप्रांतेषु रोधोभूमिषु वप्रः पितरि केदारे वप्रः प्राकाररोधसोरिति वैजयंती। स्खलितानि तैर्विवर्तनप्रसावत्ति
त्वाद्यंतरस्खलनं प्रतिविदधे चक्रे इत्यतिशयोक्तिः॥११॥ कांतानामिति॥ ग्रहेभ्य रिता सूर्यादिभिराश्रिता कर्मणि क्तः
यथो मार्ग ल्कांतानां निष्क्रांतानां अक्षाश्चक्राधाराः दारुविशेषास्तेषामग्रैः क्षताः विदारिताः सुरवेश्मवेदिका येस्तेषां रथा
नां प्रधिभिः नेमिभिः चक्रैः। चक्रं रथांगं तस्यांतो नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः। संपीडनेन नोदकेन क्षुभितानि जलानि
येषां तेषु तोयदेषु मेघेषु निःसंगमप्रतीघातं यथा तथा विवृत्तिः परिभ्रमणमुपाददे इत्युक्ता इत्यतिशयोक्तिः स्वभावोक्त्या संसृज्यते॥१२॥

तप्तानामिति ॥ विषाणभिन्नाः दंतैः क्षताः विषाणं शृंगदंतयोरिति हलायुधः । अत एव क्षरंतः स्रवंतो घना मेघास्तप्तानां सुरकरिणां प्र
ल्हादमुपदधिरे उपचक्रे । तथा हि परोपकारे युक्तानां आसक्तानां महतां सतां रुजस्तु पीडयस्त्वपि विपये कल्याणी हितकारिणी प्रवृत्ति
र्व्यापारो भवति खलु अर्थांतरन्यासः । ततो युक्तं मेघानां गजदंतक्षतानामपि तदाल्हादकत्वमिति भावः ॥१३॥ संवातेति ॥ संवातां
संवहता वाते निर्गस्य धौ... प्रत्ययः । अनिलेन कामिनेति भावः दिव्यस्त्रीणां जघनेषु वस्त्रांचलं पदं शुकं तस्मिन्विवृत्तिमयसां रमुहुर्नीयमा
ने सति पर्वयस्य स्रस्त पृथु विशालं मणिमेखलांशुजालमूर्वीयुतकं इव चुल्लूनकारव्यमिव युतकं संश्रये युगमेयो तने संमुल्ले

तप्तानामुपदधिरे विषाणभिन्नाः प्रल्हादं सुरकरिणां घनाः क्षरंतः ॥ युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजस्त्वपि
प्रवृत्तिः ॥१३॥ संवातामुहुरनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्ते ॥ पर्यस्यत्पृथुमणिमेखलांशुजालं संजज्ञे युतकमिवां
वांतरीयमूर्वोः ॥१४॥ प्रस्यान्द्रींहितिलकास्तुषारपातैः प्रल्हादं शमितपरिश्रमा दिशां ततः कांतानां बहुमतिमाययुः पयो
दा नाल्पीयान्बहुसुकृतं हि नस्ति दोषः ॥१५॥ ॥ १५ ॥ १५ ॥ १५ ॥ १५ ॥

ने पिबसि विश्वः । अंतरे भवमंतरीयमधोंशुकं अहो दिव्यश्चेति छप्रत्ययः । अंतरीयोपसंख्यानपरिधानान्यधोंशुक इत्य
मरः । संजज्ञे संजातं जनिधातोः कर्त्तरि लिट् । उत्प्रेक्षालंकारः ॥१४॥ प्रस्येति ॥ तुषारपातैः सीकरवर्षैः । तुषारो हिमशीकरे
विति विश्वः । प्रस्यान्द्रींहितिलका मार्जितपत्त्रिकाः ५ पि शमितपरिश्रमाः प्रल्हादमानंदं दिशंतः पयोदाः कांतानां
कर्त्तरि षष्ठी ॥ बहुमतिं सन्मानमाययुः । तथा हि अल्पीयानल्पो दोषो बहुप्रभूतं सुकृतमुपकारं न हिनस्ति न विहंति ॥१५॥

यातस्येति॥ मथिततरंगं बद्धोर्मितस्य स्वंगिमतः स्येकतस्या भेव भायस्य तस्मिन्निगम॥ निपूयां स्मियसमात्तस्मि न्विपयसि निर्जलेशेषाद्वि
भाषेति विकल्पान्नसमासो नः उरः प्रभृति पाठस्तु पयः शब्दस्यैकवचनांतस्यैवेति न कश्चिद्विरोधः वारिवाहजाले मेघवृंदे विछेद
त्रुटिं यातस्य सुरधनुषः इंद्रचापस्य त्रिदशवधूजनानां गभ्यास्तां मणीनां तदंगसंगि विभूषामणीनामित्यर्थः प्रभाः कांतयः संधान
मातेनुः चक्रुः॥ अत्राभरणप्रभाणामिंद्रधनुषोपि संबंधे संधानाभिधानाद् तिशयोक्तिः॥१६॥ संसिद्धाविति॥ संसिद्धौ का
र्यसिद्धिविषये इतीत्थं भाविनापि प्रकारेण कर्त्तव्यमिति करणीयं तेन संनिबद्धैः संबद्धैः संयोगितैरित्यर्थः॥ आलापैराभाषणैरु

यातस्य मथिततरंगसैकताभे विच्छेदं विपयसि वारिवाहजाले॥ आतेनुस्त्रिदशवधूजनांगभाजां संधानं सुरध
नुषः प्रभामणीनां॥१६॥ संसिद्धाविति करणीयसन्निबद्धैरालापैः पिपतिषतां विलंघ्य वीथिं॥ आसेदे दशशतलो
चनध्वजिन्या जीमूतैरपिहितसानुरिंद्रकीलः॥१७॥ ॥ ॥ १७ ॥ ॥ १७॥

पलक्षितया स्यादाभाषणमालापः इत्यमरः॥ दशशतानि संख्या येषु तानि लोचनानि यस्य सः सहस्रलोचन इत्यर्थः तस्य
ध्वजिन्या सेनया पिपतिषतां पक्षिणां वीथिं पक्षिमार्गमित्यर्थः पित्संतोनभसंगमा इत्यमरः। तनिपतीत्यादिना विकल्पा
दिडागमः विलंघ्य जीमूतैर्मेघैः जीवस्योदकस्य मूतः पटबंधो येषां तैः पृषोदरत्वात्साधुः अपिहितसानुराच्छिन्नत
टुन्नत इत्यर्थः इंद्रकील आसेदे प्राप्तः सिदेः र्लनेः कर्मणि लिट्॥१७ ॥ ॥ ॥१७॥ ॥

आकीर्णेति ॥ विलासिनीनां मुखनलिनैः उपमितसमासः आकीर्णा व्याप्ता स्फुटान्यसंकुचितानि विशदातपत्राणि श्वेतपत्राणि फेनादिव
यस्यां सा तथा तूर्यध्वनितैर्वाद्यघोषैर्गभीरं यथा भूभर्तुरिंद्रकीलस्य शिरस्यापतंती सा सेना नभोनदी मंदाकिनी वरेजे शु
शुभे ॥१८॥ सतुलत्वमिति ॥ पयोमुचां मेघानां वितानैः सतुलत्वं दधति सति संरंभादादरात् जवेनाभिपतति मेघवृंदमाधावति तु
त्यधावतइत्यर्थः । रथो भूतान् रथान्नियमितैः आकृष्टैः रश्मिभिः प्रग्रहैः भुग्ना आकुंचिताः घोणाः प्रोथा येषां तैः कुंचितं नत

आकीर्णमुखनलिनैर्विलासिनीनामुद्भूतस्फुटविशदातपत्रफेना ॥ सा तूर्यध्वनितगभीरमानदंती भूभर्तुः शिरसि न
भोनदीव रेजे ॥१८॥ सतुलत्वं दधति पयोमुचां विताने संरंभादभिपतति रथाञ्जवेन ॥ आनिन्युर्नियमितरश्मिभुग्नघो
णाः कृच्छ्रेण क्षितिमवनामिनस्तुरंगाः ॥१९॥ माहेंद्रं नगमभितः करेणुवर्याः पर्यंतस्थितजलदा दिवः पतंतः ॥ सादृश्यं
निलयननिष्प्रकंपपक्षैराजग्मुर्जलनिधिशायिभिर्नगेंद्रैः ॥२० ॥ ॥२० ॥ २० ॥

माविद्धं कुटिलं भुग्नं वेल्लितमित्यमरः । किरणप्रग्रहौ रश्मी इत्यमरः । घोणा तु प्रोथमस्त्रियामित्यमरः । अवनमंतीत्यव
नामिनो अवनतपूर्वकायास्तुरंगाः कृच्छ्रेण महता संबंधेन क्षितिमानिन्युरिति स्वभावोक्तिः ॥१९॥ माहेंद्रमिति ॥
माहेंद्रं नगं अभितः इंद्रकीलाभिमुखं अभितः परित इत्यादिना द्वितीया दिवोंतरिक्षात्पतंतो वतरंतः पर्यंते
स्थिताः पार्श्वस्था जलदा येषां ते करेणुवर्याः करेणुरिभ्यां स्त्री नेभ इत्यमरः । न निर्धारण इति षष्ठीसमासनिषे
धात्सप्तमीति । योगविभागात्समासः निलयने स्थाने निःप्रकंपपक्षैः निश्चलपक्षैर्जलनिधिशायिभिर्नगेंद्रैर्मैनाकादिभिः
सादृश्यमाजग्मुरित्युपमा ॥२० ॥ २०

उत्संगइति।महाद्रेरुत्संगेमूर्धनिविषयेयत्समंसमंचविषमंचनिम्नोन्नतंतस्मिन्समविषमेद्वंद्वैकवद्भावः वियदभिपातलाघवेनगगनसंचारपाटवेनसमेमेकरूपमारोहावरोहरहितमित्यर्थः।क्रांतानांगच्छतांतुरंगमाणांखुरपदवीखुरपंक्तिः उपनदिनदीसमीपेऽव्ययीभावश्चेतिनपुंसकत्वाध्रस्वत्वंसेकतेषु-आमूलान्मूलमारभ्यसामग्र्यंसाकल्यंभविष्यन्नङ्गीपूलेभेसैकतादन्यत्रनिम्नेषुगगनचारेणासमप्रदेशावद्विषमेखुरस्पर्शाभावाद्विच्छिन्नाखुरसरणिः सैकतेषुनतुसर्वत्रसमानत्वाद्विन्नेस

उत्संगेसमविषमेसमंमहाद्रेःक्रांतानांवियदभिपातलाघवेन॥आमूलादुपनदिसैकतेषुलेफेसामग्र्यं
खुरपदवीतुरंगमाणां॥२१॥सध्वानंनिपतितनिर्झरासुमंद्रैःसंमूर्छन्प्रतिनिनदैरधित्यकासु॥
उ[redacted]द्भिवैर्घनरवशंकयामयू[redacted]रैःसोत्कंठंध्वनिरूपश्रुअश्रुवेरथानां॥२२॥ ॥

र्थः॥२१॥सध्वानमितिर।सध्वानंसशब्दंनिपतितनिर्झराःप्रवाहायासुतासुप्रवाहोनिर्झरोझरइतिअमरः।।
अधित्यकासुऊर्ध्वभूमिषुउपत्यकाद्रेरासन्नाभूमिरूर्ध्वमधित्यकेत्यमरः।उपाधिभ्यांत्यकन्नासन्नारूढयोरित्य
कन्मंद्रैःगंभीरैःकलोमंद्रस्तुगम्भीरइत्यमरः।प्रतिनिनदैःप्रतिध्वानैःसंमूर्छन्वर्धमानोरथानांध्वनिःघनरवशंकया
गजितभ्रमेणभ्रांतिमदमदलंकारः उद्भीवैर्मयूरैःसोत्कंठंउपश्रुश्रुवेश्रुतःश्रुणोतेःकर्मणिलिट्॥२२॥ ॥

संभिन्नामिति॥ अविरलपातिभिर्निरंतरमासारैः पुष्पमेखलं तंतटेभिरित्यर्थः। अवामेखलाश्रोणिस्थाने द्विकटके कटिबंधे सिंबंधन इतिया
दवः। नीलानां मणीनां मयूखैः शंसभिन्नामेकान्हताम् तएव नभोंतराले विच्छिन्नामिव स्थितामिवेत्युत्प्रेक्षा॥ वप्रांमस्तुतिं वप्रादक
धारां वनिताऽवलोकयांबभूवुः। वप्रांमस्तुतेः स्वधवलिमसंगेन गंगेंद्रनीलानां नीलिमस्वाकारस्वरूपतद्गुणे स्थापिताविच्छेदोत्प्रेक्षा इति
तयोरंगांगीभावेन संकरः तेन वानीले विच्छेदिभ्रमरूपो भ्रांतिमानुच्यते॥२३॥ आसन्नेति॥ धुरंगतास्तेषां धूर्गता नागाहृणां
धिपंमवस्या वह्लाय आसन्नायां द्विपपदव्यां वनगजमार्गे योमदानिलस्तस्मै क्रुध्यंतः तत्प्रति कुप्यंतः क्रुधद्रुहेर्ष्यार्थानांसंप्रदान

संभिन्नामविरलपातिभिर्मयूखैर्नीलानां भृशमुपमेखलं मणीनां॥ विच्छिन्नामिव वनिता नभोंतराले वप्रांमस्तुत्तिमवलोक
यांबभूवुः॥२३॥ आसन्नद्विपपदवीमदानिलाय क्रुध्यंतो धियमवमत्य धूर्गतानां॥ सव्याजं निजकरिणीभिरात्तचित्ताः प्रस्थानं सुर
।दी३ करिणः कथं विदुः॥२४॥ नीरंध्रं पथिषु रजो रथांगनुन्नं पर्यस्यन्नवसलिलारुणं वहंती॥ आतेने वनगहनानि वाहिनी साघ
मीतक्षुभित [redacted] लले व [redacted] जनुकन्या॥२५॥ ॥ २५ ॥ ॥ २५ ॥ ॥

लाश्चतुर्थी। सव्याजं सकपटं निजकरिणीभिरात्तचित्ताः आकृष्टचित्ताः सुरकरिणो देवनागाः प्रस्थानं कथं विदीषुः अभिलेषुः॥२४॥
नीरंध्रमिति॥ नीरंध्रं सांद्रं पथिषु रथांगेश्चक्रैर्नुन्नं प्रेरितं नुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः इत्यमरः पर्यस्यत्प्रसरन्नवस
लिलमिवारुणं रजो वहंती सा वाहिनी सेना धर्मांतप्राव क्षिक्षुभितजलौकलुषोदके इत्यर्थः। जन्हुकन्या गंगेव वनानि फलपुष्पप्र
धानिनी गहनानि वैशीर्णारण्यानि वतानि आतेने व्याप्नोत् अत्रोपमा गतवाक्यगतोपमयोः सजातीययोरंगांगिभावेन संकरः॥२५॥

संभोगेति॥ अथ वृत्रारेः शक्रस्य सहायाः सचिवा गंधर्वाः उपगंगं गंगायाः समीपे अव्ययीभावः॥ अयनपुंसकत्वाद्ध्रस्वत्वं संभोगक्षमगहनामुपभोगयोग्यवनां ज्वलितामणयो येषु तानि सैकतानि बिभ्राणां भृतो धातोः कर्तरि शानच् न्यूनैः स्वयं पतितैः कुसुमैः आचितां व्याप्तामविरलाः सांद्राः शाद्वलाः शादप्रायप्रदेशाः यस्याः सा तां धरित्रीं अध्यूषुरधितष्ठुर्वसतेर्यजादित्वात्संप्रसारणं अत्र धरित्री विशेषणसामर्थ्यानां अधिवासस्थानेषु प्रवृत्तिविहेतुत्वादनेकपदार्थाहेतुककाव्यलिंगमलंकारः॥ २६॥ भूभर्तुरिति॥ तदा हरिसखवाहिनी निवेशो गंधर्वसेनाशिबिरं निवेशः शिबिरोद्वाहनेस्थानेषु प्रकीर्तितः इति शाश्वतः॥ भूभर्तुः पर्वतस्योर्व्याः समधिकं पूर्वस्मादप्याधि

संभोगक्षमगहनामथोपगंगं बिभ्राणां ज्वलितमणीनि सैकतानि॥ अध्यूषुस्तनुकुसुमाचितां सहाया वृत्रारेरविरलशाद्वलां धरित्रीं॥ २६॥ भूभर्तुः समधिकमाददे तदुर्व्याः श्रीमत्तां हरिसखवाहि[redacted] नीनिवेशः॥ संसक्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः॥ २७॥ २७॥

कं यथा तथा श्रीमत्तां श्रियमित्यर्थः आददे जनयामास॥ तथाहि महोदयो गस्योत्कर्षाभिधानादप्राकृतभक्तियोगस्योत्कृप्राधान्या नाम महात्मनां संसक्तौ सम्यक् संबंधे संभक्तावितिपाठे सम्यक्सेवायां किमसुलभं न किंचित् दुर्लभमित्यर्थः यतो यदृच्छया दैवाद्योगोप्युच्छ्रायमुत्कर्षं नयति अत्र प्राकृतयदृच्छया योगस्योत्कर्षाभिधानादप्राकृतभक्तियोगस्योत्कृप्राधान्याभिधापकत्वं कैमुतिकन्यायेनार्थापत्तिरिति॥ प्राकरणिकादप्राकरणिकाद् प्राकरणिकादर्थापत्तिरलंकारः तदुक्तं एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथापि ततः कैमुत्येनयतः सा स्यादर्थापत्तिरलंकृतिरिति॥ २७॥ २७॥ २७॥

सामोदा इति॥ सामोदाः ससौरभाः कुसुमप्रधानास्तरवः शाकपार्थिवादिषुदृष्टव्यः तेषांश्रियः समृद्धयः विविक्ताः वितनप्रदेशाः विविक्तवि
जनेन त्रिःशलाकस्तथा रह इत्यमरः किसलयशालिनी लतानां संपत्तिरेते अमरांगनोपभुक्ताः सतः पुमान् स्त्रियेति पुल्लिंगैकशेषः।
साफल्यं ययुः तथा हि यया लक्ष्म्याकरणेन परेषां उपकुरुते॥ लक्ष्मीवानुनितिशेषः। सा लक्ष्मी ताव्येति भावः परेषामित्यत्र अनुकरोति
भगवतो नारायणस्येत्यादिवत् क्रिययायोगे हि संबंध सामान्ये षष्ठी॥ २८॥ क्षांत इति॥ क्षांतोपि त्रिदशवधूजनः पुरस्तादग्रे लीनां
नां संश्रितानां अहीनां श्वसितैर्निश्वासैर्विलोलाः पल्लवा येषां तेषां चंदनानां संपर्कं हतविनयैर्दुर्जनैरवलैरावृतानां सेव्यानां से

सामोदाः कुसुमतरुश्रियो विविक्ताः संपत्तिः किसलयशालिनी लतानां॥ साफल्यं ययुर[redacted]मरांगनोपभुक्ताः सा लक्ष्मीरु
पकुरुते यया परेषां॥ २८॥ क्षांतोपि त्रिदशवधूजनः पुरस्ताल्लीनाहिश्वसितविलोलपल्लवानां॥ सेव्यानां हतविनयैरि
वावृतानां संपर्कं परिहरति स्म चंदनानां॥ २९॥ उत्सृष्टध्वजकुथकंकटा धरित्रीमानीता विदितनयैः श्रमं विनेतुं॥
आक्षिप्तद्रुमगहना युगांतवातैः पर्यस्ता गिरय इव द्विपा विरेजुः॥ ३०॥ ॥ ३० ॥

व्यानां प्रभूणां संपर्कमिव परिहरति स्म दुष्टवत् दुष्टसंसर्गस्य गुणाघात्वपि स्यादित्याद्यु इत्याभावः॥ २९॥ उत्सृष्टेति॥ उत्सृष्टाः आ
क्षिप्ताः ध्वजाः कुथाः आस्तरणानि कंकटास्तनुत्राणानि येभ्यस्ते प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोरित्यमरः विदि
तनयैः शिक्षाभिज्ञैर्यंतृभिः श्रमं विनेतुमपनेतुं धरित्रीमानीता निवेश्यमाना इत्यर्थः। द्विपाः युगांतवातैः आक्षिप्तान्युद्धृता
नि द्रुमाणां गहनानि येभ्यस्ते पर्यस्ता विपर्यसिता गिरय इव विरेजुः। शुशुभे॥ ३०॥ ३०॥ ॥

प्रस्थानेति॥गजपतिनाप्रस्थानश्रमेण गमनक्लेशेन जनितां निद्रां विहाय आमुक्ते सदानपंके गजमदयुक्ते शयनदेशेक्षणं विलीनं लग्नम
लीनां कुलं संरंभेण ॥ स्थानसंभ्रमेण च्यूतं भ्रष्टं श्रृंखलं निगडमिव स्फुरत्क्षणं श्रृंखलं निगडः स्त्रीरक्षा दिस्यमरः चकासे शुशुभे॥३१॥
आयस्तइति॥वनगज दानस्य गंधोऽस्यास्तीति तत्तथोक्तं रोधः परकूलं संप्राप्य गंतुमायस्तः उत्सुकः प्रयत्नं कुर्वाणइत्यर्थः॥
पतीप्रयत्नेइति धातोः कर्तरिक्तः॥ किंतु सुरसरिद्रोधेन गंगाप्रवाहेण रुद्धं वर्त्म यस्य सः नागो मत्तनिहितः स्थितस्तीक्ष्णाः अ

प्रस्थानश्रमजनितां विहाय निद्रामामुक्तेगजपतिना सदानपंके॥ [redacted] शय्यां तेक्षणमलिनां कुलं विलीनं संरंभ
च्यूतमिव भ्रष्टं श्रृंखलं चकासे॥३१॥ आयस्तः सुरसरिद्रोधरुद्धवर्त्मा संप्राप्तुं वनगजदानगंधिरोधः॥मूर्धानं निहित
शितां कुशं विधुन्वन् यंतारं न विगणयां चकार नागः॥३२॥आरोढुः समवनतस्य पीतशेषे साशंकं पयसि स
मीरितेन करेण॥ संमार्जन्नरुणमदस्रुती कपोलौ सस्वेदे मदइव शीकरः करेणोः॥३३॥ ॥३३॥

कुशे यस्मिन् तं मूर्धानं विधुन्वन् रोषादिति भावः। यंतारं न विगणयांचकार॥३२॥आरोढुरिति॥समवनतस्यात्यन्तार्थमा
कुशेयस्मिन्तं मूर्धानं विधुन्वन् रोषादिति भावः यंतारं न विगणयांचकार॥३२॥आरोढुरिति॥समवनतस्यात्यर्थमा
नतपूर्वकायस्य करेणोर्गजस्य करेणुरिभ्यां स्त्रीनेभेइत्यमरः करेण पीतशेषे पयसि आरोढुः हस्तिपकात्साशंकं सभयं स
मीरितेक्षिप्ते सतीत्यर्थः सीकरः अरुणे मदस्रुती मदधारे ययोस्तौ कपोलौ संमार्जन् प्रमृजन् [redacted] जातौ रजादौ संक्रमेवि
भाषा वृद्धिर्वक्तव्येति विभाषावृद्धिः मदइव सस्वेदे सुस्राव मदसंपृक्तस्य मदसादृश्यान् मदोपमा॥३३॥ ॥

आघ्रायेति॥ अतितृष्यता अतिपिपासतापि क्षणमात्रमाघ्राय अतिरोषादुत्तीरं तीरे विभक्त्यर्थेऽव्ययीभावः निहितं विवस्वेतु तद्घूर्णितेनालोव
नेयस्यतेन प्रतिगजदृक्षयेति भावः वारणेन हिमं शीतलमपि वनकरिणां मदाम्बुसेकैः दानधाराभिः संपृक्तं वारि नाव मेने पीतं चु
म्बनदेवेति द्योतेः कर्मणि लट्॥३४॥ प्रश्च्योतदिति॥ क्रीडन्तो वीहारवन्तो गजपतयो निम्नगायाः गङ्गायाः पयांसि प्रश्च्योतद्भिः क्षरद्भिः
मदैः सुरभीणि कृत्वा किंजल्कैः केसरैः व्यवहिताः ताम्रा दानलेखाः मदराजयो येषु तैः अत एव सरसिजगन्धिभिः कपोलैः उपलक्षि
ताः सन्तः उन्ममज्जुः अत्र मदसरसिजगन्धयोर्विनिमयोऽत्यासमपरिवृत्त्यलंकारः तेन वनगजानां निम्नगायाश्च परिमलव्यत्ययान्तर

आघ्राय क्षणमतितृष्यतापि रोषादुत्तीरं निहितमवेक्ष्य लोचनेन॥ संपृक्तं वनकरिणां मदाम्बुसेकैर्नाचेमे हिममपि वारि वारणे
न॥३४॥ प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा॥ किंजल्कव्यवहितताम्रदानलेखैरुन्ममज्जुः
सरसिजगन्धिभिः कपोलैः॥३५॥ आकीर्णा बलरजसा घनारुणेन प्रक्षोभैः सपदि तरङ्गितं तटेषु॥ मातङ्गोन्मथितसरो
जरेणुपिङ्गं कौसुम्भं वसनमिवाम्बु निर्बभासे॥३६॥ ॥ ॥३६ ॥ ॥
माञ्जिष्ठं

संरम्भो व्यज्यते॥३५॥ आकीर्णमिति॥ घनारुणेन सान्द्ररक्तेन विशेषणसमासः बलरजसा सेनापरागेण आकीर्णं सत् यदि
प्रक्षोभैः आलोडनैः तटेषु तरङ्गितं संजाततरङ्गं तारकादिभ्य इतच्। यद्वा तरङ्गवत्कृतं मत्वं तात्करोतीति णिच् कर्मणि क्तः। तावि
ष्ठवज्ञावान्मतुपो लुक् तथा मतङ्गैरुन्मथितानां लुलितानां सरोजानां रेणुभिः पिङ्गं पिशङ्गं अम्बु मञ्जिष्ठेन माहारञ्जनेनार
क्तेन माञ्जिष्ठं वसनं वस्त्रमिव निर्बभासे तेन रक्तरागादिस्मरण कौशेय्यमिति पाठे कोशाद्धूत्र कौशेयं कृमिकोशोत्थमित्यमरः॥३६

श्रीमद्भिरिति॥ श्रीमद्भिः शोभावद्भिः नियमिताः कंधराः अपरांताश्च अपरपादाग्राणि येषां तैः अपरः पश्चिमः पाद इति वैजयंती अगरु
वनेषु सांगहारं सांगविक्षेपं यथा तथा संसक्तैः निस्रुतानि प्रस्रुतानि मदांबूनि येषां तैर्गजेंद्रैः प्रस्पंदिनो जलं आविष्णा प्रबलिता ये
8 गंडशैलाः च्युतोपलाः तेषां शोभा संपद् प्राप्ता कर्मोणि लिट् गंडशैलास्तु तेस्थूलाश्च्युताः स्थूलोपला गिरेरित्यमरः। अत्रान्योन्य
शोभाप्राप्तसंभवान्न सदृशी शोभेति प्रतिबिंबत्वाक्षेपान्निदर्शनालंकारः॥२७॥ निःशेषमिति॥ गंधं वहतीति गंधवाहो वायुः

श्रीमद्भिर्नियमितकंधरापरांतैः संसक्तैरगरुवनेषु सांगहारं॥ संप्रापे निस्रुतमदांबुभिर्गजेंद्रैः प्रस्पंदिप्रबलि
तगंडशैलशोभा॥२७॥ निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर्मदजलमुज्झतामजस्रं॥ आमोदव्यव
हितभूरिपुष्पगंधं भिन्नैलासुरभिमुवाह गंधवाहः॥२८॥ ॥ २९ ॥ ॥

कर्मण्यण् निःशेषं यथा तथा प्रशमितो रेणुः येन तत् मदजलं स्रोतोभिर्मदस्रुनाडिभिः अजस्रं निरंतरं उज्झतां वर्षतां वार
१३ णानां संबंधिनं व्यवहितः तिरस्कृतो भूरिर्बहुलः पुष्पगंधो येन सः तैर्भिन्नाः प्रफुल्ला [illegible] लाः लता विशेषाः पृथ्वी
का चंद्रवालेलाइत्यमरः तत्पुष्पाणि वेलाः पुष्पे लालिप्रभृतयस्त्वलिंगाः श्रीहर्षः फले समरः। भिन्नैलावत्सुरभिं घ्राणें
द्रियतर्पणं इत्युपमा आमोदपरिमलमुवाह वहति स्म॥ ३८ ॥ ॥ ॥

सादृश्यमिति॥ गंभीरैर्मेघघोषैः सांद्रगर्जितैः सादृश्यं दधतीत्युपमादधातेः शतृप्रत्ययः वा नपुंसकस्येति विकल्पान्नुमागमाभावः॥ उन्नि
द्राः बृंहितश्रवणादेव प्रबुद्धाः क्षुभिताः संरब्धाश्च ये मृगाधिपास्तैः श्रुतानि नतु प्रतिबुद्धानीति भावः॥ अमरमहेभबृंहितानि दे
य३ वगजबृंहितानि कच्छांतान् अनूपप्रदेशान् जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध इत्यमरः॥ चकिताः गर्जनशंकया संभ्रांताः
चकोराः पक्षिविशेषाः नीलकंठा मयूरा येषु तांश्च तथाभूतान् अनेनुः भ्रांति भ्रांतिमदलंकारः॥ ४९॥ शाखेति॥ परिच्छाद्यते
नेनेति परिच्छदः परिकरो वसनाभरणादिः पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः छादेर्घेद्व्युपसर्गस्येति ह्रस्वः शाखावासवस

सादृश्यं दधति गंभीरमेघघोषैरुन्निद्रक्षुभितमृगाधिपश्रुतानि॥ आतेनुश्चकितचकोरनीलकंठान्कच्छांतानमर
महेभबृंहितानि॥ ४९॥ शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेवितानां॥ जज्ञे निवेशनविभागप
रिक्लृप्तानां लक्ष्मीः पुरोपवनजा वनपादपानां॥ ५०॥ इति श्रीकिरातार्जुनीये महाकाव्ये भारवीये सप्तमः सर्गः

क्ताः कमनीयाः परिच्छदाः येषां ते तेषाम् अध्वनि श्रमः स्तेन आतुरैः पीडितैर्वधूजनैः सेवितानां निवेशनविभागैः आवासत्तिका
वच्छेदैः परिक्लृप्तानाम् अलंकृतानां संपर्कपेभ्यः [illegible] दिसुहृद् वनपादपानां पुरे ये पुरोपवनेतना जाताः पुरोपवनजा लक्ष्मीः जज्ञे प्री
ता अत्रान्योन्यलक्ष्मीसंबंधासंभवात्तत्सदृशीति सादृश्याक्षेपाद् असंभवेत वस्तुसंभवे निदर्शनालंकारः॥ वसंततिलका
वृत्तं उक्तं वसंततिलका तभजा जगौ ग इति लक्षणात्॥ ५०॥ इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायको
लाचलमल्लिनाथसूरिविरचितायां घंटापथसमाख्यायां सप्तमः सर्गः समाप्तिमगमत्॥ ॥ ॥ ॥

७
९

। किरातसर्गः सप्तमः सटीकः समाप्तः पत्रा ४ ९

श्रीवरदमूर्त्तयेनमः ॥ अथेति ॥ अथ द्वितीयोध्यानानन्तरं रुचिरवदनः इन्द्रसाक्षात्कारसंतोषात्प्रसन्नमुखो धनंजयः अर्जुनो वासवस्य वचनेनोप
देशेन त्रिलोचनं शिवं क्लान्तिरहितं यथा तथा अभिराधयितुं प्रसादयितुं तपांसि विधिवद्विध्यर्थं यथाशास्त्रमित्यर्थः । तदर्हतीति व
तिप्रत्ययः । विदधे चक्रे ॥ अस्मिन्सर्गे स्वागता वृत्तं सजसा आदिमे सलघुकौ च नसजगुरुकेष्वथोद्गता । त्र्यङ्घ्रिगतभनजलागयुताः सजसा
पठेत् गौ चरणमेकत इति लक्षणात् ॥ १ ॥ अभीति ॥ अभिरश्मिमालिनि अभिसूर्यं भुवि एकचरणेन तिष्ठतः स्थितवतो विमलस्य बा
ह्याभ्यन्तरशुद्धिमतः धृता जयधृतिः जये बुद्धिर्येन सः तस्य । नाश्नुषोनश्नुतः उपेयिवाननाश्वाननूचानश्चेति निपातः तस्यार्जुनस्य

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनं ॥ क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनंजयः ॥ १ ॥ अभिरश्मि
मालि विमलस्य धृतजयधृतेरनाश्नुषः ॥ तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निषीदतः ॥ २ ॥ वपुरिं
द्रियोपतपनेषु सततमसुखेषु पाण्डवः ॥ व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविभाव्यवैभवं ॥ ३ ॥

बहूनां पूरणा बहुतिथाः बहुसंख्याका इत्यर्थः । तस्य पूरणे डट् । बहुपूगगणसंघस्य तिथुक् । तिथयो दिनानि प्रतिज
ग्मुः अत्र तिथिशब्दः पुल्लिङ्गः लिङ्गानुशासनात् तिथयो द्वयोरिति अभिधानात् अन्यथा बहुतिथा इत्यत्र टिलोपे ङीप् स्यात् ॥ २ ॥ वपु
रिति ॥ पाण्डवोऽर्जुनः सततं वपुषः इन्द्रियाणां चोपतपनेषु संतापकरेषु करणे ल्युट् । असुखेषु अनशनादिदुःखेषु अ
पि नगपतिर्हिमाद्रिरिव स्थिरतां दार्ढ्यं व्याप प्राप तथाहि महतां धैर्यमभाव्यं दुर्बोधं वैभवं सामर्थ्यं यस्य तत्तथोक्तं धीराणा
मकिंचित्करं दुःखमिति भावः ॥ ३ ॥

॥ ३ ॥

नेति॥ तस्यार्जुनस्य मानसं मनः सन्निहिता नियाः निपक्कसुरभीणि पाकसुगंधीनि तेषु फलेषु न पपात शुचि स्वच्छे शिशिरे शीतले पयसि च न पपा
त न किंचिदाचकांक्षेति भावः॥ लोहितादिड्भ्यः क्यष् क्यषू वा क्यषि प्राणधारणं तु तस्य तत्नैव साधुः सुकर्मणां सुकृतिनां शोभनं तप सु
तप एवामलायते भवति किं तपःस्नातानां तर्पणांतरैरिति भावः॥ लोहितादिड्भ्यः क्यषू वा क्यषः स्यात्मनेपदं लोहितादिराकृतिग
णः॥४॥ न विसिस्मियेनेति॥ सोर्जुनो न विसिस्मिये अहो महत्तपस्तप्तमिति न विस्मयं जगाम तपःक्षयलिविस्मयादिति निषेधात्
न विषसाद फलविलंबात् न भग्नोत्साहो बभूव विषादश्च तपसो भंग इति लक्षणात् सद्यः प्रीति रितिषत्वं मुहुरलसतां तपसि म
दो यमसंचयमादृदे नागमत् किंच हतशक्तिनो हतसारे अतएव पेलवे भंगुरे हतशक्तिपेलवे रजस्तमसि गुणो रुरुधे तिमहासारं

नपपात संनिहितपक्वसुरभिषु फलेषु मानसं॥ तस्य शुचिनि शिशिरे च पयस्यमलायते हि सुतपःसुकर्मणां॥४॥ न विसि
स्मिये न विषसाद मुहुरलसतां न चाददे॥ सत्वमुरुधृतिरजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे॥५॥ तपसा कृशं वपुरुवा
ह स विजितजगत्त्रयोदयं॥ त्रासजननमपि तत्त्वविदां न तदस्ति यन्न सुकरं मनस्विभिः॥६॥ ज्वलतोनलाद नुनिशीथम
धिकरुचिरंभसां निधेः॥ धैर्यगुणमवजयन्विजयी ददृशे समुन्नततरः स शैलतः॥७॥

अर्जुनस्य सत्वं न हतं स्म न हतवती॥ हंतेर्लेट्स्म इति लट्भूतार्थत्वं॥५॥ तपसेति॥ सः अर्जुनः तपसा कृशं तथापि विजितो गे त्रयस्योद
यो उत्कर्षो येन तत्तथोक्तं किंच तत्त्वविदामपि लोकरहितार्थत्वं जानतामपि त्रासजननं भयंकरं वपुरुवाह वहतिस्म नैतच्चित्रमित्याह
किमिति यन्मनस्विभिर्न सुकरं न किमिवास्ति न किमपीत्यर्थः॥ इवशब्दो वाक्यालंकारे मनस्विनामिति पाठे विशेषषष्ठी स्यादेवकर्तृयोग
लक्षणया न लोके त्यादिना निषेधात्॥६॥ ज्वलत इति॥ विजयी सोर्जुनः अनुनिशीथं अर्धरात्रे विभक्त्यर्थे व्ययीभावः॥ अर्धरात्रं नि
शीथो द्वौ इत्यमरः॥ ज्वलतो दीप्यमानादनलादधिकरुचिरंभसां निधेः धैर्यगांभीर्यं तदेव गुणस्तमवजयन् किंच शैलतः शैलाद
पि समुन्नततरः ददृशे अत्र रुच्यादिभिन्नलाघाधिक्यासंबंधाभिधानादतिशयोक्तिरलंकारः॥७॥

जपतइति॥ सदा उपांशु रहेयर्थः डमिस्यर्थः॥ रहस्योपांशु चालिंगे स्यादमरः॥ कृपीगं बर्हनशब्दमनुप्रयोगमुपांशु स्येति उपांशुलक्षणं जप्यत इति
जपस्तं जपमंत्रमित्यर्थः॥ जपतः पठतः तस्यार्जुनस्य वदनं कर्तृ अभितो विसारिभिर्दशनकिरणैर्हेतुभिः परिवेषभीषणं कर्मेमंडनमिव शु
शुभे॥ परिवेषस्तु परिधिरुपसूर्यकमंडले स्यादमरः॥८॥ कवचमिति॥ कवचं कर्म बिभ्रत् उपवीते पदे यज्ञोपवीतस्थाने निहितमारोपि
तसव्यं कार्मुकं येन स तथोक्तः॥ सोर्जुनो महेद्धधनुषा परिवीतं परिवेष्टितं भीमं गहनं वनं यस्य स तथोक्तः॥ शैलपतिरिव हिमवानिव वि
दिद्युते॥९॥ प्रविवेशेति॥ दुःशस्य तपकर्विलस्यलथाभियमसवनायनित्यस्नानायनित्यक्रमेण ३ लियावत्॥ सवनं यजने स्नाने

जपतः सदा जपमुपांशु वदनमभितो विसारिभिः॥ तस्य दशनकिरणैः शुशुभे परिवेषभीषणमिवार्कमंडलं॥८॥
कवचं स बिभ्रदुपवीतपदनिहितसज्यकार्मुकः॥ शैलपतिरिव महेद्धधनुः परिवीतभीमगहनो विदिद्युते॥९॥
प्रविवेश गामिव कृशस्य नियमसवनाय गच्छतः॥ तस्य पदविनमितो हिमवान् गुरुतां नयंति हि गुणा न संहतिः॥१०॥
परिकीर्णमुद्यतभुजस्य भुवनविवरे दुरासदं॥ ज्योतिरुपरि शिरसो विततं जगृहे निजान्मुनिदिवौकसां पथः॥११॥

सोमनीलयने पिबतीति विश्वः॥ गच्छतस्त्यधुनीगामिनस्तस्यार्जुनस्य पदैः पादन्यासैर्विनमितो हिमवान् गां भुवं प्रविवेश इत्युत्प्रेक्षा ननु
दुःशस्य कथमियद्गौरवं तत्राह गुणाः सारा दृप्योगुरुतां नयंति प्रापयंति संहतिः संघातो मूर्तिरित्यावत्॥ ननयति॥ अतः सारप
दृधिगौरवं भवति॥ ननु बाह्यो तस्योल्यात् अत्रव हेमपिंड ७ तुलपिंडा विवनिदर्शनमिति भावः॥१०॥ परिकीर्णमिति॥ उद्य
तभुजस्योर्ध्वबाहोस्तस्य शिरसः उपरि षस्यतसर्थप्रसयेनेलिषष्ठी विततं विस्तृतं भुवनविवरे द्यावापृथिव्योरंतराले प
रिकीर्णं व्याप्तं दुरासदं दुर्धर्षं ज्योतिस्तेजो मुनीनां दिवौकसां च निजान्नियतान्पथो मार्गान् जगृहे जग्राह प्रतिबबंधेत्यर्थः॥११॥ ॥

रजनीष्विति ॥ बहुलपक्षेपि रजनीषु राजतपसस्यार्जुनस्य धामभिस्तेजोभिर्भिन्नतिमिरनिकरो यस्य ततं नभः शशिरश्मीनां संगमेन हेतुना यु
ज्ञासंगतया श्रिया तत्र श्रीलुल्यैल्यया श्रियाइत्यर्थः ॥ अतएव निदर्शनालंकारोयं ॥ न जहे न त्यक्तं ॥ जहातेः कर्मणि लिट् ॥ ज्योत्स्नातुल्ययेति
इत्यर्थः ॥ १२ ॥ महतेति ॥ जिष्णोरर्जुनात् जन्मयस्य तेन जन्मोत्तरपदत्वाद्व्यधिकरणो बहुव्रीहिः ॥ महतां मयूखानां निचयेन बहुकिरणसमूहे
न शमितं तमो रुचिः ह्लतप्रभं अंशुमालिनो वपुरर्कबिंबं हीनं जितत्वाल्लज्जया जितमिवस्पुरेक्षा वीतमले विमले मेघनीहाराद्यावरणरहिते न
भसि न विरेजतिस्म ॥ १३ ॥ तमिति ॥ उदीरिता उद्गता अरुणजटा नाम शवो यस्य तं अधिगुणमधिज्यं शरासनं यस्य तमर्जुनमासुरीरसुर

रजनीषु राजतनयस्य बहुलेतरेपि धामभिः ॥ भिन्नतिमिरनिकरं न जहे शशिरश्मिसंगमयुजा नभः श्रिया ॥ १२ ॥
महता मयूखनिचयेन शमितरुचि जिष्णुजन्मना ॥ ह्रीतमिव नभसि वीतमले न विराजते स्म वपुरंशुमालिनः ॥ १३ ॥
तमुदीरितारुणजटांशुमधिगुणशरासनं जनाः ॥ रुद्रमनुदितललाटदृशं ददृशुर्मिमंथिषुमिवासुरीः पुरः ॥ १४ ॥

संबंधिनीः पुरो मिमंथिषुं मंथितुमिच्छुं मिथेः सन्नंतादुप्रत्ययः ॥ तथा अनुदितललाटदृग्यस्य तं साक्षात् त्रिपुरविजयोद्यत
मभालाक्षं रुद्रमिव जनाः सिद्धगणाः ददृशुः ॥ अत्र भालाक्षस्य रुद्रस्य संभवात् स्वतः सिद्धोयमानात् सिद्धेनेयमुपमा किंतूत्प्रेक्षा सा
चाभालाक्षमिति उपमानात् उपमेयस्य न्यूनकथनार्थे अन्वयव्यतिरेकेणोज्जीवितेत्यनयोरंगांगीभावेन संकरः ॥ उपमानातु व्यज्य
त इति अलंकारः ॥ ४१४ ॥ ॥

किं॰ टि॰

॥३१॥

मरुतामिति॥ मरुतांपतिः स्विदिन्द्रो वा अहिमांशुरुत सूर्यो वा पृथुशिखो महाज्वालः शिखी पावको वा असुकरं तपस्तप्तुं अथवा न प्रातरवपूर्व (कर्मण्यो) लिट् अत्रेडवादिकर्मारोपणमार्ष्यं प्रयोगः प्रवाहपुमनपक्रमते अयं जनः पुरुषः प्राकृतः कश्चिन्नेति सो दुर्जनस्तपसे तपस्विभिः अण
वेतिमन्वर्थी योऽण्प्रत्ययः॥ अवयये अवगतः प्रातरवपूर्वाद्यन्तमित्यलिङ्लिट् अत्रेडत्वादिकर्मारोपणव्यापवादत्वात् सामान्यमारोप्यापह्नवो
लंकारः। साम्यलक्षणत्वनिषिद्धविषयसामान्यारोपो ह्यपन्हव इति॥१५॥ नददाहेति॥ दूरगं व्यापकं हरितनयस्य धामतेजो भूरुह
वनानि वनखण्डानि यद्वदाह अग्निवदिति भावः तथायं नद्यादीनि परिशोषं न नयति स्म अर्कवदिति भावः। तथापि सिद्धतापसैः सिद्धु
वनानि वन खेडानियद्वदाह ... अतएव दुःसहत्वदाहशोषजननकव्यापारविरोधाद्विरोधाभासोलंका
श्वतापसाश्चतेः सुसहं न बभूव। अत्रास्यालौकिकं तेज इति भावः अतएव दुःसहत्वदाहशोषजननकव्यापारविरोधाद्विरोधाभासोलंका

मरुतांपतिः स्विदहिमांशुरथ पृथुशिखः शिखी तपः॥ तप्तुमसुकरमुपक्रमते न जनोऽयमित्यवयये स तापसैः॥१५॥ न ददाह भूरु
हवनानि हरितनयधाम दूरगं॥ नैष नयति परिशोषमपः सुसहं बभूव न च सिद्धतापसैः॥१६॥ विनयं गुणा इव विवेकमपनय
भिदं नया इव न्यायमवधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः॥१७॥ परिवीतमंशुभिरुदस्तदिनकरमयूखमण्डलैः॥ शंभुमुप
हतदृशः सहसा न च ते निचायितुमभिप्रसेहिरे॥१८॥ १५॥ १६॥ १७॥

रः आभासत्वे विरोधस्य विरोधालंकृतिर्मतेति लक्षणात्॥१६॥ विनयमिति॥ अथानन्तरं अशरणाः महर्षयो विनयं शिक्षां गुणाः औदार्यादयः
व शिक्षितस्य तदभावादिति भावः अपनयभिदं दुर्नीतिनिवारकं सदसत् ज्ञानं नया नीतिर्यद्वा विवेकिनो नाशुभा वादिति भावः। नीतिः षाड्गुण्यप्र
योगः नीयते अनेनेति न्यायः नियामकं प्रमाणमवधयः समयाः ख्या प्रमाणिकस्य समयोल्लंघनादिति भावः। शिवं शरणं रक्षितारं शरणं रक्षितारं ययुः
शरणं गृहरक्षित्रोरिति अमरः। अशरणाः शरणमिति चोपमा स्वपि यथायोग्यं योज्यं जग्मुः शरणं सन्नम्रा पुरिति स्यार्थः। उपमालंकारः॥१७॥ परिवीतमिति॥
उदस्तानि रस्तं दिनकरस्य मयूखमण्डलानि यैस्तैरर्कतेजोविजयिभिरित्यर्थः अंशुभिः तेजोभिः परिवीतं शंभुमुपहतदृशः प्रतिहतदृष्टय
स्ते महर्षयः सहसा सहितिति निरीक्षितुं निशामयितुं द्रष्टुमित्यर्थः चायृ पूजा निशामनयोरिति शब्दधयेत्सादिना तुमुन् नाभिप्रसेहिरे न शेकुः॥१८॥

अथेति ॥ अथ स्तवपाठानंतरं भूतभव्यभवतां भूतभव्यवर्तमानानां ईशं देवमभिमुखयितुं अभिमुखीकर्तुं कृतस्तवाः कृतस्तोत्राः नान्यार्थं इति
भावः। स्तवः स्तोत्रं स्तुतिर्नुतिः स्त्रियामिति समरः॥ तत्र महसि तेजसि कमनीयविग्रहं रम्यमूर्तिं अयुग्मानि त्रीणि लोचनानि यस्य तं पुरुषं ददृशुः॥१९॥ अथ पंच
भिः पुरुषं विशिनष्टि। ककुद इत्यादि॥ कीदृशं पुरुषं अकृशेन महता परिणाहेन विशालतया शालत इति तथोक्तं परिणाहो विशालता इत्यमरः॥
वृषस्य वृषभस्य ककुदे अंसकूटे आश्रयीकृत इति शेषः। आर्द्रचंदनेनोपमायाः कुचमंडल इव कृतबाहुं न्यस्तहस्तमत एव स्पर्शसुखमनुभ
वंतं ककुदस्य तथाविधसुखस्पर्शत्वादिति भावः। उपमालंकारः॥२०॥ स्थितमिति॥ उन्नते तुहिनशैलशिरसि हिमवतः शिखरे स्थितं कवि

अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्तवाः॥ तत्र महसि ददृशुः पुरुषं कमनीयविग्रहमयुग्मलोचनं॥१९॥
ककुदे वृषस्य कृतबाहुमकृशपरिणाहशालिनी। स्पर्शसुखमनुभवंतमुमाकुचयुग्ममंडल इवार्द्रचंदने॥२०॥
स्थितमुन्नते तुहिनशैलशिरसि भुवनातिवर्तिना॥ साद्रिजलधिजलवाहपथं सदिगश्नुवानमिव विश्वमोजसा॥२१॥
अनुजानुमध्यमवसक्तविततवपुषा महाहिना॥ लोकमखिलमिव भूमिभृता रवितेजसामवधिनाधिचेष्टितं॥२२॥

त्कोणे स्थितमित्यर्थः। तथा त्रिभुवनातिवर्तिना सर्वलोकातिशायिना ओजसा। अद्रिभिर्जलधिभिर्जलवाहपथेनाकाशेन च सह वर्तत इति
तथोक्तं आशाभिर्दिग्भिः सह वर्तत इति सदिक् उभयत्र तेन सहेति तुल्ययोग इति बहुव्रीहिः। विश्वमश्नुवानं व्याप्नुवंतमिव स्थितमित्युत्प्रेक्षा॥ अ
श्नुव्याप्तौ इति धातोः शानच्॥२१॥ अन्विति॥ जान्वोर्मध्ये अनुजानुमध्यं विभक्त्यर्थेऽव्ययीभावः। अवसक्तेन लग्नेन विततमायतं वपुर्य
स्य तेन महाहिना अवसक्तिकाबंधभूतेन सर्पेण। अधिवेष्टितमत एव रवितेजसां अवधिना पर्यंतभूतेन महीभृता लोकालोकाचले
नाधिवेष्टितमखिलं लोकमिव स्थितमित्युत्प्रेक्षा॥ अस्य सूर्यपुरमागोलोकालोकाचल इत्यागमः॥२२॥ २३॥ ॥

परिणाहिनेति ॥ पुनश्च तुहिनराशिवद्विशदं शुभ्रमुपवीतसूत्रं तां नीतेयज्ञोपवीतत्वं प्रापितमुरगं शेषाहिमनुरंजयता स्वगुणोपरक्तं कुर्वता शशिनी कुर्वेत्यर्थः ॥ परिणाहिना विशालेन विलसन्मरीचिना शशिना नीलेनागलकंठेनोपलक्षितं कंठो गलो ऽथ ग्रीवायामिति अमरः ॥ अत्रोरगस्य स्वधवलमलत्यागेनान्यजन्मानीलमगत्य तरूणालंकारः स्वगुणत्यागादन्योत्कृष्टगुणग्रहस्तद्गुण इति लक्षणात् ॥ २३ ॥ बहुभिरिति ॥ पुनः किं बहुभिरनेकैः सहस्रभुजत्वात् तैस्तैर्बाहुभिर्विराजितं शोभितं किं बाहुभिः अहीनभुजवलयैः अहीनां सर्पाणां मध्ये ईनाः श्रेष्ठाः ये भुजगाः त एव वलयानि येषां तैः सर्पाभरणैः कमिव विराजितमित्याह चंदनतरुभिरनेकैः मलयमेदिनीभृतमिव मलयाचलमिव चंदनतरवो हि अहीनां तरवोपि अहीनां महान्तो भुजंगास्तेषां वलयाश्चेष्टनं येषां तैरिव अलघुभिः कुर्महद्भिर्बहुभिः

परिणाहिना तुहिनराशिविशदमुपवीतसूत्रलं ॥ नीतमुरगमनुरंजयिता सितिना गलेन विलसन्मरीचिना ॥ २३ ॥
बहुभिश्च बाहुभिरहीनभुजगवलयैर्विराजितं ॥ चंदनतरुभिरिवालघुभिर्वलायितैर्मलयमेदिनीभृतं ॥ २४ ॥
फुल्लमालतीसितकपालकुमुदमवरुद्धमूर्धज ॥ शेषमिव सुरसरित्स्रयसां द्विरसा विभासि शशिधाम बिभ्रतं ॥ २५ ॥ कुलं

मयविशेषणं यथा धवलायतेरिति धवलश्च तेऽयाला दीर्घाश्च तैरित्युपमा ॥ २४ ॥ पुनश्च मालती जातिकुसुमं सुमना मालती जातिः पुष्पे जातिप्रभृतयः स्वलिंगा व्रीहयः फले इत्यमरः ॥ तद्वत्सितं वतत्कपालमेव कुमुदं तत्फुल्लं तमापूतं यन्नतत्तथोक्तमवरुद्धमूर्धजं व्याप्तशिरोरुहं शिरोरुहमत एव सुरसरित्स्रयसा शेषमिव नियातावशिष्टं गंगामंभः इव स्थितमित्यर्थः उत्प्रेक्षालंकारः विसारिविस्तृतं शशिधामेंदुतेजः शिरसा बिभ्रतं पुरुषं ददृशुरिति पूर्वेण संबंधः ॥ २५ ॥

मुनयेति। ततो दर्शनानंतरं मुनयोऽभिमुखमेत्य नयनविनिवेशेन नेत्रसंज्ञया चोदिताः प्रेरिताः संतः पांडुतनयस्य अर्जुनस्य तपसा जनितं त
त्सुवीक्ष्य जगतामशर्म असुखं दुःखमित्यर्थः। शर्म शांतिसुखानि वस्समरः। प्रशशंसुः सम्यक् आचचक्षिरे कथितवंतः॥२५॥ तरसेति। हे भुवने
कपुरुष वज्रो वृत्रासुर इव भीमविग्रहः कोऽप्यविज्ञातः पुरुषस्तरसा बलात्कारेणैव तरसी बलं रंहसी तिविश्वः। अमलवपुषोऽप्यूर्जस्वलम्
तैरवरपि ज्योतिरभिभूय तपस्यति तपश्चरति। कृतेन्दोरामयतपोभ्याववर्तिवरोरिति क्यप्॥२७॥ सधनुरिति॥ किंच सपुरुषो महांतामिषुधीय
स्यतन्महेषुधिधनुः कवचं वर्म उत्तममसिं खड्गं जटाः वल्कलं चीरमजिनं चर्म बिभर्ति इत्येवं रूपमिदं विरुद्धवेषधारणं मुनिता विरोधि

पुत्रमालिनीं मुनयेस्ततोऽभिमुखमेत्य नयनविनिवेशनोदिताः॥ पांडुतनयतपसा जनितं जगतामशर्मभृशमाचचक्षिरे॥२५
तरसैव कोऽपि भुवनैकपुरुषः पुरुषस्तपस्यति॥ ज्योतिरमलवपुषोपरि ने[illegible]रभिभूय वृत्र इव भीमविग्रहः॥२७॥
सधनुर्महेषुधि बिभर्ति कवचमसिमुत्तमं जटाः॥ वल्कलमजिनमिति चित्रमिदं मुनिताविरोधि न च नास्य राजते॥२८॥
चलनेऽवनिश्चलति तस्य करणनियमे सदिङ्मुखं॥ स्तंभमनुभवति शांतमरुद्ग्रहतारकागणयुतं नभस्तलं॥२९॥

तथाप्यस्य नराजत इति न किंतु राजत इति चित्रम्। आश्चर्यं संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधाविति वामनः॥२८॥ किंच तस्य पुंसश्चल
नेऽनिश्चलति यथाकरणनियमे समाधिर्षिंद्रियनिरोधे सति करणं साधकतमं क्षेत्रगात्रेंद्रियेष्वपीत्यमरः। सदिङ्मुखं दिक्सहि
तं तथा शांतैस्तिमितैः मरुतां वायूनां ग्रहाणां सूर्यादीनां च गणेर्युक्तं नभस्तलं व्योमस्तंभं निश्चलतामनुभवति भजती
त्यर्थः। अतो विश्वातिशायिनी तस्य शक्तिरुपलभ्यत इति भावः॥२९॥ २९ ॥ २९॥

नन्वेतदुपेक्ष्यमित्याशङ्क्येनाह। सइति। सपुमानोजसा विजितसारं निरस्तसत्वममरदितिजोपसंहितं सुरासुरसहितं तदिदं विश्वं पुरोऽपिधा
वति। अपिधास्यतीत्यर्थः॥ शीघ्रमेव हरिष्यतीत्यर्थः। निकटागामिके पुरः स्यमरः। यावत्पुरानिपातयोर्भविष्यदर्थे लट्। तथाहि। यत्ख
लु तेन पुंसा दुःखतरं तत्कर्म तत्किमिवास्ति न किंचित्तेन दुष्करमस्तीत्यर्थः। सामान्यविशेषणसमर्थनरूपोऽर्थान्तरन्यासः॥३०॥
न चैतदल्पफलं तपस्त्याह। विजिगीषत इति। सपुरुषो जगन्ति त्रिलोकान् युगपत् विजिगीषते यदि विजेतुमिच्छति वा पूर्ववत्समस्या
सनेपदं अथ युगपत्संजिहीर्षति संजहर्तुमिच्छति वा अभवमपवर्गं प्राप्तुमभिवाञ्छति किं तु वयमप्यस्य वयः तेजांसि तपो वा नूनं
विषयितुं सोढुं तीषसहलु मरुषरिषषइति विकल्पादिडागमः। नोक्षमाः न शक्ताः के विद्रुवः कामितानि विषहितुमभिधारयितुमि

5 सतदोजसा विजितसारममरदितिजोपसंहितं॥ विश्वमिदमपिदधाति पुरा किमिवास्ति यन्न सुकरं मनस्विनां॥३०॥ विजिगी
षति यदि जगन्ति युगपदथ संजिहीर्षति॥ प्राप्तुमभवमभिवाञ्छति वा वयमस्य नो विषहितुं क्षमा रुचः॥३१॥ किमुपेक्षसे कथय
नाथ न तव विदितं न किंचन॥ त्रातुमलमभयदार्हसि नस्त्वयि मा स्म शासति भवत्पराभवः॥३२॥ इतिगां विधाय विरतेषु मुनि
षु वचनं समाददे॥ भिन्नजलधिजलनादगुरु ध्वनयन् दिशां विवरमन्धकान्तकः॥३३॥ ॥ ॥ ॥

तिव्याचक्षते अत्र सहेस्वधारणार्थत्वं विचार्यं॥३१॥ किमिति॥ हेनाथ किं किमर्थं उपेक्षसे तत्कथयेति शेषः तव न विदितं त्वया ज्ञा
तायमानमित्यर्थः। क्तस्य च वर्तमाने षष्ठी। किंचन किमपि न हे अभयद नोऽस्मान् अलं त्रातुं अर्हसि त्वयि शासति पराभवो मा स्म भ
वनु मा भूत्। स्मोत्तरे लङ् चेति लङ्॥३२॥ इतीति॥ इतीत्थं गां वाचं विधाय सामान्यस्य विशेषणपर्यवसानात् मुनिषु विरतेषु
तूष्णीं भूतेषु सत्सु अन्धकान्तकः शिवः भिन्नस्योद्धतस्य जलधेर्जलस्य नादवद्गुरुगम्भीरं यथा तथा दिशां विवरं अन्तरालं ध्वनयन् व
चनमाददे स्वीचकार उवाचेत्यर्थः॥३३॥ ॥ ॥ ३३॥ ॥

बदरीति॥ बदरीतपोवने बदरिकाश्रमे निवासं निरतं वासिनं गां गतं भुवमवतीर्णं जगतामुदयनिधने सृष्टिसंहारौ धातुस्तयोः कर्तुः त्वमिति द्विधा
तोऽस्त्वन्प्रत्ययः अत एव न लोके त्यादिना कर्मणि षष्ठीप्रतिषेधः॥ आदिपुरुषस्य विष्णोरंशमंशभूतं नरं नरसंज्ञकं यो नारायणसख इति
भावः। अन्यथा उक्तवैपरीत्येन माऽवगतमानुषं मा जानीते त्यर्थः शृणोमालु इति गादेशः॥३४॥ अथ तस्य तपसः कारणमाह॥ द्विषत इति॥ एषः
नरः सकलभुवनान्यभितापयति अभीक्ष्णं पीडयतीति तथोक्तान् बहुलमाभीक्ष्ण्ये इति णिनिः॥ क्रान्तेत्याक्रान्ते कुलिशकरस्येन्द्रस्य वीर्ये
बले शक्ति सैन्ये येस्तान् द्विषतः शत्रून् परासितुमिच्छुः परासिसिषुः अस्यतेः सन्नन्तादुप्रत्ययः। मदुपासनं मदाराधनं करणे ल्युट्

बदरीतपोवननिवासनिरतमवगातमान्यथा॥ धातुरुदयनिधने जगतां नरमंशमादिपुरुषस्य गां गतं॥३४॥
द्विषतः परासिसिषुरेष सकलभुवनाभितापिनः॥ क्रान्तकुलिशकरवीर्यबलान्मदुपासनं विहितवान्महत्तपः॥३५॥
अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः॥ पातुमसुरनिधनेन विभू भुवमभ्युपेत्य मनुजेषु तिष्ठतः॥३६॥
सुरकृत्यमेतदवगम्य निपुणमिति मूकदानवः॥ हन्तुमभिपतति पांडुसुतं त्वरया तदत्र सह गम्यतां मया॥३७॥

महत्तपो विहितवान्॥३५॥ अथास्य मानुषावतारेण कारणमाह॥ अयमिति॥ विभुः प्रभुः अयं नरोऽच्युतः कृष्णश्च सरसिरुहजन्मनो
ब्रह्मणो वचनेन प्रार्थनया असुरनिधनेन करणेन प्रजाः पातुं भुवमभ्युपेत्य मनुजेषु तिष्ठतः वस्तुतः साक्षान्नरनारायणावेतौ कृष्णार्जुनौ वि
त्यर्थः॥३६॥ अथास्य सत्त्वसंपदं प्रकाशयितुमाह॥ सुरेति॥ मूकदानवो मूकाख्यः कश्चिदसुरः एतावसांउवहूसं सुरकृत्यमिति
नैपुणमवगम्य साधु निश्चित्य सपांडुसुतमर्जुनं हन्तुमभिपतति तस्मात्कारणात् अत्रार्जुनाश्रये विषये आश्रमं प्रतीत्यर्थः। मया
सह त्वया गम्यतां द्रष्टुमिति शेषः॥३७॥ ॥ ३७॥ ॥ ३८॥ ३८॥ ॥ ॥ ८८

पी॰

विवरइति॥पापेनिरतिर्यस्यसएषदानवोविवरेरं अपिएकां तेऽ स्यर्थः एनंपांडवमनिगूढंप्रकटमभिभवितुंनपारयन्नशक्नुवन्॥ विभाषानञी
तिनञ्समासः॥ अविशंकिलयारूपगूहनाः निःशंकितयावराहमायया वराहरूपकच्छेस्यर्थः॥ विजयंव्यवस्यति विजयंप्रतिउद्युक्तइ
स्यर्थः॥३८॥तत्किंभवतीत्यत्राह॥निहतेति॥विडंबितंअनुकृतं किरातनृपतिवपुर्येनतद्रूपधारिणेस्यर्थः॥मयानिहतेरिपौवराहेमु
क्तेनिशितविशिखःसन्नयंपांडवःप्रसभंप्रसह्यमृगयाविवादंमृगप्रहारेकलहंनाचरिष्येति॥करिष्यतिमसहतमेवमृगंप्रहत्येस्व
यंअहमेवप्रहर्त्रेतिकलहमिष्यतइत्यर्थः॥३९॥ततोपिकिंभावीत्यत्राह॥तपसेति॥तपसानिरस्तोपीडितोअतएवकृशःस्तस्यपूर्वेण
लेतिसमासः॥तथाविरहितसहायसंधस्यतस्यैकाकिनोमृधेरणेमृधमास्कंदनंसंरम्भमितिसमरः॥ अधिकुप्यतोअधिकंकुप्यतोस्य

विवरेपिनैनमनिगूढमभिभवितुमेषपारयन्॥ पापनिरतिरविशंकितया विजयंव्यवस्यतिवराहमायया॥३८॥
निहतेविडंबितकिरातनृपतिवपुषारिपोमया॥ मुक्तनिशितविशिखःप्रसभंमृगयाविवादमयमाचरिष्यति॥३९॥
तपसानिपीडितकृशस्यविरहितसहायसंपदः॥ सत्वविहितमतुलंभुजयोर्बलमस्यपश्यतमृधेधिकुप्यतः॥४०॥
इतितानुदारमनुनी[illegible]यविषमहरिचंदनालिना॥ घर्मजनितपुलकेनलसद्गजमौक्तिकावलिगुणयुतेनवक्षसा॥४१॥

पांडवस्यसत्वनिहितंस्वभावकृतंस्वाभाविकमित्यर्थः॥ सत्वोस्त्रीजंतुषुक्लीबेव्यवसायेपराक्रमेआत्मभावेपिशादौद्रव्येसत्वंस्वभावयोः प्रा
णेबलेंतःकरणेइतिवैजयंती॥ अतुलंभुजयोर्बलंशक्तिंपश्यतबलेशक्तिर्बलंसैन्यमितिशाश्वतः॥४०॥अथत्रिभिरुद्देश्यकिरातभावंवर्ण
यति॥इतीत्यादिभिः॥शिवइतीसंतान्मुनीनुदारंयुक्तियुक्तमनुनीयशिक्षयित्वाउक्तेतियावत्॥रुचिरःकिरातपतिःएनापतिःसंयत्तइत्यन्वयः
किरातसेनापतिवेषधारीशिवइवभवेदित्यर्थः॥कथंभूतःविषमःआविष्टविन्यासःहरिचंदनालयोरेखायस्मिंस्तेनघर्मणस्वेदेनजनिताःपुलकाः
यस्मिन्नघर्मस्यादातपेग्रीष्मेप्युष्णेस्वेदांभसारपीतिविश्वः॥लसंतोगजमौक्तिकानांकरिकुंभोद्भवमौक्तिकानामावलयएवगुणाःसूत्राणियः
स्मिंस्तेनवक्षसोपलक्षितः करिणांमुक्ताःयोषिताअगस्त्यःनीमूतकरिमत्स्याहिवंशशंखवराहजाःशुक्त्युद्भवाश्चविज्ञेयाअष्टौमौक्तिक

वदनेनेति ॥ पुष्पितलतांतैर्विकसितलताग्रैः नियमिताः संयताः विलंबिनश्चते मौलयः केशा यस्य तेन । चूडाकिरीटकेशाश्च संयता मौलय इत्य
भिधुः समरः । शिखिपिच्छलांछिते कपोल भित्तीयस्य तेन वदनेन रुचिं शोभां बिभ्रत ॥ ४२ ॥ बृहदिति ॥ पुनश्च जलद इव नदती ति जलद नादी कर्त्त
र्युपमाने इति णिनि । उपनिहिते कमार्गणं सन्निहितेकबाणं बृहत् धनुरुद्वहन् अत एव मेघनिचय इव स्थितः रूपमा केवलके तु स्वभावोक्ति
रलंकारः स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनमिति लक्षणात् ॥ ४३ ॥ अनुकूलमिति ॥ अस्य शिवस्य अनुकूलं विधिं सप्रियमिति निश्चि
त्य आत्तविग्रहैर्गृहीत किरातविग्रहैः तथा भूतः निपरशवः कुठाराश्च चापा निबभ्रतानियैस्तैः प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ इति निष्ठा
याः परनिपातः गणपतिभिः प्रमथमुख्यैः महतीं वनेचरचमूं विनिर्ममे । निर्मिता माङ् कर्मणि लिट् ॥ ४४ ॥ विरचय्येति ॥ अथेश्वरा लया ऽनुमति

वदनेन पुष्पितलतांतनियमितविलंबिमौलिना ॥ बिभ्रदरुणनयनेन रुक्‌ शिखिपिच्छलांछितकपोलभित्तिना ॥ ४२ ॥ बृहदुद्वहन्
जलदनादि धनुरुपहितैकमार्गणं ॥ मेघनिचय इव संवदृते रुचिरः किरातपृतनापतिः शिवः ॥ ४३ ॥ त्रिभिर्विशेषकं ॥ अनुकू
लमस्य च विचिंत्य गणपतिभिरात्तविग्रहैः ॥ शूलपरशुशरचापभृतीं महतीं वनेचरचमूं विनिर्ममे ॥ ४४ ॥ विरचय्य काननवि
भागमनु गिरमथेश्वराज्ञया ॥ भीमनिनदपिहितोरुभुवः परितोऽपदिश्य मृगयां प्रतस्थिरे ॥ ४५ ॥
क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः ॥ पूर्णपृथुवनगुहाविवरः सहसा भयादिव ररास भूधरः ॥ ४६ ॥

रे विभक्त्यर्थेऽव्ययीभावः । गिरेश्च सेनकस्येति समासः । काननविभागं कृत्वेत्यर्थः । भीमैर्निदनैः कलकलैः पिहिता गुरवो भुवो यैस्ते तथो
क्ताः संतः स्रोतगं मृगयामपदिश्य व्याजीकृत्य परितः प्रतस्थिरे ॥ ४५ ॥ क्षुभितेति ॥ क्षुभितास्त्रस्ताः अभिनिःसृताः स्वस्थानान्निर्गता वि
भिन्ना मुक्तसंघाताश्च ये शकुनयो मृगाश्च तेषां यूथानि तेषां निःस्वनैः पूर्णानि पृथूनि वनानि गुहा विवराणि च यस्य स भूधरः
सहसा भयादिव सुस्रेक्षारराससचुक्रोश ॥ ४६ ॥ ४५ ॥ ४६ ॥ ४६ ॥

नेति॥ पथि पलायनमार्गे विरोधिनी जातिवैरिणी मृगाणां सिंहव्याघ्रादीनां विहंगानां काकोलूकानां च संहतिः रुषं परस्परक्रोधं नेयाय किं
तु सहैव चचारेत्यर्थः। तथाहि भूरिप्रभूता भीर्यासु ताः सममं साधारण्येनागताः आपदः सहजमपि वैरं सपदि घ्नंति न हि संघातव्यसने
घुष्मतो यतते वैरानुबंध इति भावः॥४७॥ चमरीति॥ वंशविततिषु वेणुगुल्मेषु विषक्ताः प्रियबालाः प्रियरोमाणो बालधयः पुच्छा
नि येषां तैः। पुच्छोस्त्री लूमलांगूले बालहस्तश्च वालधिरित्यमरः। चमरीगणैः गणबलस्य सेवधिनितद्भुतुके इत्यर्थः। संबंधमात्रविवक्षा
यां षष्ठी अन्यथा भीत्रार्थानां भयहेतुरिति पंचमी स्यात्। बलवति प्रबले भये उपस्थिते प्राप्तेपि धृतिरादृदे स्वीकृता बालच्छेदभयात् प्राणहा
निमपि स्वीकृत्य स्थिता इत्यर्थः॥४८॥ हरेति॥ प्रतिभये भयहेतौ भयंकरे भयं करं प्रतिभयमित्यमरः। प्राप्तेपीति शेषः। गजमदैः सुगंधयः

न विरोधिनी रुषमियाय पथि मृगविहंगसंगतिः॥ प्रतिसहजमपि भूरिभियः सममागताः सपदि वैरमापदः॥४७॥
चमरीगणैर्गणबलस्य बलवति भयेप्युपस्थिते॥ वंशविततिषु विषक्तपृथुप्रियबालवालधिभिरादृदे धृतिः॥४८॥
हरसैनिकाः प्रतिभयेपि गजमदसुगंधिकेसरैः॥ स्वस्थमभिददृशिरे सहसा प्रतिबोधजृंभितमुखैर्मृगाधिपैः॥४९॥
बिभरांबभूवुरपवृत्तजठरशफरीकुलाकुलाः॥ पंकविषमिततटाः सरितः करिभग्नवेदनरसारुणंपयः॥५०॥

सुरभयः केसरा येषां तैः तानेकगजैरित्यर्थः। सहसा सेनाकलकलश्रवणानंतरमेव प्रबोधेन निद्रापगमेन जृंभितानि व्याकोशितानि मुखा
नि येषां तैः मृगाधिपैः स्वस्थं निःशंकमेव हरसैनिकाः अभिददृशिरे ईक्षिताः॥ न तु किंचित् क्षुभितमित्यर्थः। पुत्त्र्ये च तद्गजनाम केसरिणा
मिति भावः॥४९॥ बिभरामिति॥ अपवृत्तजठरैस्तत्का लक्ष्यो मालुंठितो हरैः शफरीकुलैराकुलाः पंके विषमितानि दुर्गमीकृतानि तटानि कु
लानि यासां ताः सरितः करिभिः पलायमानैरिति शेषः। मृगणानां मार्गरोधितया भग्नानां [illegible] रितश्चेति निम्नानत्वेचं दनानां रसैर
रुणं पयो बिभरांबभूवुः। भीह्रीभृहुवां श्लुवच्चेति विकल्पादाम् प्रत्ययः। कृञ्चानुप्रयुज्यते लिटीति भुवोनुप्रयोगश्च॥५०॥५०॥

महिषेति ॥ महिषैः क्षतानि विदलितानि तैर्गुरुभिस्तमालैर्नलदैरुशीरैश्च सुरभिः व्यस्तानि विक्षिप्तानि शुकनिभानि शुकवर्णानि शिलाकुसुमानि शैलेयाख्य ओषधिविशेषा येन स अनः शिलकं इत्यर्थः । कालानुसार्यं वृद्धश्म पुष्पशीतशिवानि तु शैलेयमित्यमरः । शुकनिभं तिस्वरूपक थनं सदागतिः वायुः वनसदां वनेचराणां परिश्रमं प्रणुदन् अतीमं दद इत्यर्थः । ववौ वातिस्म ॥ ५१ ॥ मथितेति ॥ स च सप्लवः प्राणिसंक्षोभः निदाघो ग्रीष्म इव सरसीः सरांसि कासारः सरसी सरइत्यमरः । मथितांभसः संक्षुभितोदकाः रयेण पलायनवेगेन विकीर्णा व्याकीर्णा यथात थाम्रदिताः निःपीडिताः कदल्यो गवेधुकास्तृणधान्यविशेषाश्च यासां तास्तथोक्ताः तृणधान्यानि नीवाराः स्त्री गवेधुर्गवेधुके त्यमरः । म

महिषक्षतागरुतमालनलदसुरभिः सदागतिः ॥ व्यस्तशुकनिभशिलाकुसुमः प्रणुदन्ववौ वनसदां परिश्रमं ॥ ५१ ॥
मथितांभसो रयविकीर्णमृदितकदलीगवेधुकाः ॥ क्लान्तजलरुहलताः सरसीर्विदधे निदाघ इव सत्त्वसंप्लवः ॥ ५२ ॥
इति चालयन्नचलसानुवनगहनजानुमापतिः ॥ प्राप मुदितहरिणीदशनक्षतवीरुधं वसतिं महेन्द्रसूनवीं ॥ ५३ ॥
स तमाससाद घननीलमभिमुखमुपस्थितं मुनेः ॥ पोत्रनिकषणविभिन्नभुवं दनुजं दधानमतिसौकरं वपुः ॥ ५४ ॥

दिता इति क्लिष्टत्वेति गुणप्रतिषेधः क्लान्ता जलरुहलताः पद्मिन्यो यासु ता एवं भूता विदधे ॥ ५२ ॥ इतीति ॥ उमापतिः स्थाणुरचलस्य सानुषु वनेषु उपभोग्यवृक्षेषु गहनेषु दावेषु जातान् सत्त्वानिति शेषः । चालयन्मुदितानां हरिणीनां दशनैः क्षता वीरुधो लता यस्यां तां इन्द्रसूनोरिमां माहेन्द्रसूनवीं वसतिं निवसतिराश्रमस्तं अनुवहिवसस्यर्तिभ्यश्चेति औणादिको वसतेरतिप्रत्ययः प्राप ॥ ५३ ॥ स इति स शिवो घननीलं मेघमेचकं मुनेरभिमुखमुपस्थितमागतं पोत्रस्य मुखाग्रस्य विकषणेन उल्लेखनेन विभिन्ना वि[illegible] दारिता भूर्येनासौ तं मुखाग्रं क्रोडहलयोः पोत्रं गोत्रं तु नाम्नि वंशे स्यमरः हलसूकरयोः पुवइति अत्र प्रत्ययः ॥ सूकरस्येदं सौकरं वाराहं वपुर्दधानं दनुजं समाससाद ॥ ५४ ॥ ॥ ५४ ॥ ५४ ॥ ५४ ॥ ५४ ॥ ५५ ॥

४

कच्छांतइति॥ लक्ष्मीवान् मादुपधायाश्च मतोर्वोऽयवादिभ्यइति मकारस्य वकारादेशः॥ सशिवः सुरसरितः कच्छांते अनूपप्रांते जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः इत्यमरः॥ सेनां विधाप्य स्थापयित्वेत्यर्थः॥ कतिपयैः किरातवर्यैरन्वीतः अनुगतः सन् इणूगताविति धातोरनुपूर्वात्कर्मणि क्तः॥ सगुल्मजालैर्लताप्रतानसहितैस्तरुगुल्मैः प्रच्छन्नश्छादितः वांतांतशांतेत्यादिना निपातः॥ अस्य वराहस्य पदं अ

कच्छांते सुरसरितो निधाय सेनामन्वीतः स कतिपयैः किरातवर्यैः॥ प्रच्छन्नस्तरुगहनैः सगुल्मजालैर्लक्ष्मीवाननुपदमस्य संप्रतस्थे॥५५॥ ॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारवीकृतौ द्वादशः सर्गः॥

नुपदं पदानुसारेणेत्यर्थः॥ संप्रतस्थे समवप्रविभ्यः स्थः इत्यात्मनेपदं॥ प्रहर्षिणी वृत्तं॥ ५५॥ इति श्रीमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां द्वादशः सर्गः समाप्तः॥ शुभंभवतु॥

अथसुखसंगित्वेलिंगमाह ॥ अविमिति ॥ सपुरुषोद्विषतांवधेनविषयाभिरतिंविषयसुखमभिलष्यतिवांछतिवा अभ्याशेस्यादिनाश्यन्प्रस
यएतद्विषयासक्तत्वं । अविमृश्यमसंदिग्धंवं अस्दुपधात्वात्क्यपिवलतेरितिक्यपृदियस्मात्सविधिःसविमर्शिइत्यादिनाश्लोकोक्ता
नुष्ठानप्रकारः भववितये संसारमुक्त्येनभवतिकुतःशरासनंधनुःक्वमुक्तिपथश्चक्वपरस्परविरुद्धमित्यर्थः । नखलुहिंसा
साध्यमुक्तिरितिभावः । अर्थांतरन्यासोलंकारः ॥४४॥ नचशापभयंसंभाव्यं अस्मादित्याह । पृथ्विति ॥ पृथुधाम्निमहातेजसितत
स्मिन्पुरुषविषये अन्यमुनिवत् अन्यस्मिन्मुनाविवतत्रतस्येवेतिवतिप्रत्ययः विकृतिःकोपविकारश्चभवतीभिर्मापरिबोधिमा
विज्ञापिमाशंकातियावत् बुध्यतेःकर्मणिलुङ् माङ्योगादाशीरर्थेअडागमाभावश्च तथाहिस्वयशांस्यवतांरक्षतांयशोधनानामि

अविमृश्यमेतदभिलष्यतिसःद्विषतांवधेनविजयातिशयं ॥ भववीतयेनहितथासविधिःक्वशरासनंक्वचविमुक्तिपथः ॥४४॥
पृथुधाम्नितत्रपरिबोधिचमाभवतीभिरन्यमुनिवद्विकृतिः ॥ स्वयशांसिविक्रमवतामवतांनवधूष्वघानिविमृशंतिधियः ॥४५॥
आशंसितापचितिचारुपुरःसुराणामादेशमित्यभिमुखंसमवाप्ययस्तु ॥ लेभेपरंद्युतिममर्त्यवधूसमूहःसंभावनाह्यधिकृतस्यतनोतितेजः ॥४६॥

त्यर्थः विक्रमवतांधियश्चितानिवधूषुविषयेअघानिव्यसनानिदुःखेनोव्यसनेष्वघमितिवैजयंतीनविमृश्यंतीत्यर्थांतरन्यासः स्त्री
किंशोच्याशूराणांयशोहानिकरत्वान्नैसर्वथावोहिनस्तीसइत्यर्थः ॥४५॥ आशंसितेति ॥ अमर्त्यवधूसमूहोपूर्वोगणःसुराणांपुरो
गे आशंसितापचितिभिःअपेक्षितसंभावनाभिश्चारुयथातथाक्षयार्थयोर्ण्यचितिरित्यमरः अभिमंतसमक्षंस्वामिनःइतिपूर्वो
क्तमादेशंनियोगंसमवाप्यपरांद्युतिंलेभेतथाहिअधिकृतस्यक्वचिदधिकारेनियुक्तस्यसंभावनास्वामिकृतापूजाकीर्ति
तनोति ॥४६॥ ॥४६ ॥ ४६ ॥ ४६ ॥ ४६ ॥ ॥

प्रणतिमिति ॥ अथ प्रणतिं विधाय सद्मनः इंद्रस्य भवनात् प्रस्थिताः स्तनभरैर्नमितानि अंगानि यासां ताः अंगनाः अप्सरसः कंठे न्यस्य ध्येतिवत् ल्यबलोपे पंचमी प्रीतिभाजः स्वामिसंभावनया संतुष्टास्ता अंगना अचलनलिनानां लक्ष्मीं हरंतीति तथोक्तं तद्वन्मनोहरमित्यर्थः कुतः स्तिमितं निश्चलम् अमरभर्तुः इंद्रस्य ईक्षणानां सहस्रं कर्तृ इंद्रस्तु मनसा समर्थं न बभूव तासां सौंदर्यसागरस्योद्वेलत्वादि

प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः स्तनभरनमितांगीरंगनाः प्रीतिभाजः ॥ ॥ इति श्रीमहाकाव्ये किरातार्जुनीये युवतिप्रस्था-
अचलनलिनलक्ष्मीहारि नालं बभूव स्तिमितममरभर्तुर्द्रष्टुमक्ष्णां सहस्रं ॥४७॥ नं नाम षष्ठः सर्गः ॥ ६

तिभावः ॥ अत्रोपमालंकारः ॥४७॥ ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किराता-
र्जुनीयव्याख्यायां घंटापथसमाख्यायां षष्ठमः सर्गः ॥६॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

राम॥

6

श्रो।
३७०

किरातस्यअष्टमसर्गसटीकः प्रारंभः

श्रीगणेशाय नमः॥ रुचिराकृतिरिति॥ अथ आसादनानंतरं रुचिराकृतिः सौम्यविग्रहः धृतसत्पथः अवलंबित
सन्मार्गः आकारात् गुणवानित्यर्थः। यत्राकृतिस्तत्राकृतिस्तत्र गुणा इति सामुद्रिकाः। उपमानेपि समानमेतत्। स पुरुहूतसुतो
ऽर्जुनः कनकस्य विकाराः सानवो यस्य तं कनकसानुं गरुडसावर्ण्यार्थे विशेषणमेतत्। समुदायविकारषष्ठ्याश्च बहुव्रीहिः उ
त्तरपदलोपश्च। तं इंद्रकीलं परमः पुमान् विष्णुः पततां पक्षिणां पतिं गरुडमिव त्रिभिः पथिभिर्गच्छतीति त्रिपथगा भागीरथी
अन्येष्वपि दृश्यत इति डप्रत्ययः। उपपदसमासः। उत्तरपदसमासलोपश्च। तामभितो अभिमुखमारुरोह। समीपोभयतः शीघ्रं
साकल्याभिमुखेभितः इत्यमरः। प्रमिताक्षरासजसमैरुदितेति लक्षणात्॥१॥ तमिति॥ अथास्य कार्यसिद्धिनिमित्तानि सूचयन्ना

रुचिराकृतिः कनकसानुमथो परमः पुमानिव पतिं पतताम्॥ धृतसत्पथस्त्रिपथगामभितः स तमारुरोह पुरुहूतसुतः॥१॥
तमनिंद्यबंदिन इवेंद्रसुतं विहितालिनिक्वणजयध्वनयः। पवनेरिताकुलविजिह्मशिखा जगतीरुहोवचकरुः कुसुमैः॥२॥

ं वर्णयति॥ अलिनिक्वणाः जयध्वनय इव ते विहिताः अलिनिक्वणजयध्वनयो यैस्ते तथोक्ताः पवनेरिताः नुन्नाः अत एवाकुलाः
लोलाः विजिह्मशिखाः मौलय इव शिखाग्राणि येषां ते तथोक्ताः शिखाज्वालाकेकिमौल्याः शिखाग्रमौलिष्विति वैजयंती। जग
तीरुहो भूरुहाः क्विप्। अनिंद्याः अनघाः ये बंदिनः स्तुतिपाठकाः ते इव तमिंद्रसुतमर्जुनं कुसुमैरवचकरुः अभिववृषुरित्यर्थः। कृ छ
स्तृतानि निगुणः। अत्र किरतेर्वृष्ट्यर्थत्वात्वेत्यर्थः। तद्युक्तं गजेंद्राणस्यापि रोधसः प्रीतिकरत्वादिति भावः। कुसुमानां किरणं विक्षे
पार्थत्वे तु कर्मत्वमेव यथा करास्थानूवामावाकिरतीति दृश्यते वधात् नामर्थभेदात् कारकव्यत्ययः यथा सिंचतेः क्षरणार्द्रीक
रणयोः द्रवद्रव्यस्य कर्मत्वकारणत्वे यथा अमृतं सिंचति क्षरतीत्यर्थः। गोः पयः सिंचति आर्द्रीकरोतीत्यमरेनैवायुरिति अत्र वाक्य
समागतयोरुपमयोः साध्यसाधनभावादंगांगीभावेन संकरः॥२॥ ॥२॥ ॥२॥

अवधूतेति ॥ अवधूताः पंकजपरागकणाः यैस्ते तथोक्ताः इति सौरभ्योक्तिः तनूजाह्नवीसलिलवीचीः भिंदंतीति तथोक्ताः इति शैत्योक्तिः ।
सुखं पतीति सुखाः सुखस्पर्शाः इति मांद्योक्तिः । एवंविधा मरुतो वाताः तमर्जुनं सुहृदः सखायमिवाभिमुखमेत्यागस्य परिरेभि
आलिंगितवंत इत्यर्थः ॥३॥ उदितेति ॥ उदितोपलेषु उन्नतपाषाणेषु स्खलनेन प्रतिघातेन संवलिताः चूर्णिताः अत ए
व तूर्यघोष इव घुमघुमायमाना इत्यर्थः । स्फुटहंसानां सारसानां च विरावैर्युज्यंते इति तथोक्ताः क्विप् । अनुवप्रमयः ।

अवधूतपंकजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः ॥ परिरेभिरेभिमुखमेत्य सुखाः सुहृदः सुखायमि
वतं मरुतः ॥३॥ उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः ॥ मुदमस्य मांगलिकतूर्यकृतां ध्वनयः
प्रतेनुरनुवप्रमपां ॥४॥ अवरुग्णतुंगसुरदारुतरौ निचये पुरः सुरसरित्पयसां ॥ स ददर्श वेतसवनाचरितां प्रणतिं बलीय
सि विवृद्धिकरीं ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

मधः पतंतीनां वृत्तिप्रोषः । ध्वनयोस्यार्जुनस्य मंगलं प्रयोजनमेषां ते मांगलिकाः प्रयोजनमिति ठक् तैस्तूर्यैः कृतां मुदं
हर्षं प्रतेनुः अत्रान्यस्य कार्यकारणसंभवान्तूर्यकृतमुत्सवदर्शीमुदमिति प्रतिबिंबानापेक्षान्निदर्शनालंकारः ॥४॥ अवरुग्णे
ति । सोर्जुनः पुरः अग्रे अवरुग्णं तुंगसुरदारुतरौ भग्नोन्नतदेवदारुद्रुमे बलीयसी बलवत्तरे महति तादीयसुभ्रमित्युयोर्लुक् ।
सुरसरित्पयसां निचये पूरे विषये वेतसवनेन वानीरवनेनाचरितां अथ वेतसे रथाभ्रपुष्पविदुलशीतवानीरवंजुला वित्यमरः ।
समृद्धिकरीं श्रेयस्करीं लोके तथा दृष्टामित्यर्थः । प्रणतिं ददर्श या सर्वलोकदृष्टां तम्भूतामित्यर्थः ॥५॥ ॥५॥ ॥५॥ ॥५॥

विधुभुवन्नेति॥ सोर्जुनः परितः सरोजरजसारुणितं उत्तरीयं कुंकुमादिना अरुणितं संहतिमन्तीरं ध्रुतं तरङ्गाणां भीतरंगवारि भंगि शोभिव सरि
दुत्तरीयं सलिलांशुकमिव स्थितं कलहंसकुलं अवलोकयितुं अलमसत्तेनविवभूण वनेशाशांकतस्मोदयं सागरस्योद्वेलत्वादिति भावः॥ द्ध॥
दधतीति॥ सोर्जुनः क्षतीः क्षतानि दधतीं कुजः परिणताः तिर्यग्दत्तप्रहारिणो द्विरदाय स्मिन् तिर्यग्दत्तप्रहारैस्तु गजः परिणतो
मत इति हलायुधः॥ मदस्रुतिभिः मुदितालियोषिति रोधस्येधिकं धत्ति प्रीतिवबंधनि श्चलोकूलवानित्यर्थः॥ तथाहि
महान् जनः रुजम्पीडयन् अपि महेतेगुणायोत्कर्षाय भवति महत्स्तेलापीडापि द्रुभावहे वेत्यर्थः तद्रुक्रु गजेरुगण स्यापि

× दधतिक्षतीः परिणतान्द्विरदे मुदितालियोषिति मदस्रुतिभिः॥ अधिकां स रोधसि बबंध धृतिं महतेरुजन्नपि गुणाय महान्॥७×
विबभूव नालमवलोकयितुं परितः सरोजरजसारुणितं॥ सरिदुत्तरीयमिव संहतिमत्स तरंगरंगिकलहंसकुलं॥६॥ × ॥ अनु हेम +सं
वप्रमरुणैः समतां गतमूर्मिभिः सहचरं पृथुभिः॥ स रथांगनामवनितां करुणैरनुबध्नतीमभिननंद रुतैः॥८॥ ॥

रोधसः प्रीतिकरत्वादिति भावः॥७॥ अन्विति॥ सोर्जुनः॥ अनुहेमवप्रे कनकसानु समीपे समीपार्थे व्ययीभावः अरुणैः कनकू
कांत्युपरंजनादिति भावः॥ पृथुभिः ऊर्मिभिः समतां तुल्यरूपतां गतं सादृश्यात् दुर्विवेचनमित्यर्थः॥ सहमन्तं चरं सहचरं प्रियं
संहरा वृत्तस्य पवा घ्यजं तेन चरशब्देन समासः॥ करुणैः दीनैः रुतैः अनुबध्नातीं अन्विष्यंतीं रथांगनामवनितां चक्रवाकी
मभिननंद प्रलुष्टप्रियदर्शनात्तस्यानंद इति भावः॥ अत्र तावदूर्मिवर्णः स्वभावत्यागेनारुण्यस्वीकारात्तद्गुणास्त्यागाद्न्यो
त्कृष्टगुणेतिलक्षणात्॥ तन्मूलाचेयं चक्रवाक्यस्य कांतेतरंगभ्रांत्याभ्रांतिरिति तद्गुणभ्रांतिरनेनांगागीभावेन संकरः॥८॥

सितेति॥ चलवीचीनां रागो तिलक्षणा तू ।त+ म्मूर्र जेनं वर्णांति रंपाद्धंन्तस्य रचना क्रियातु त्रपटवः समर्थाः रुचयः प्रभाः अंभसि निमग्न
मपि मणिजालं स्वाश्रयीभूतमिति भावः म निगतं स्फुरितं रोषादि विकारं माकृतयो भ्रूभंगादि बाह्या विकारा इव सितवाजिने र्जुनाय
निजगदुः ज्ञापितवंत इत्यर्थः॥ ९ ॥ उपलेति॥ उपलैराहताः अत एवोद्धताश्चये तरंगाः तैः धृतं जविना वेगवता मरुता विधूय विततं च
केतकस्य शिखाव दग्रवत् विशदमपां फेनं डिंडीराब्धिकफः फेन इत्यमरः। सरितः प्रहासं विकासं हासमिवेत्युत्प्रेक्षा सोर्जुनो
मं ५ ददर्श॥ १० ॥ बहिति॥ बर्हि चंद्रकनिभं मयूरमेचक सदृशं समो चंद्रकमेचकौ इत्यमरः। बहुन्यनेकं दानपयसां पटलं जातावेकव

सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः॥ मणिजालमंभसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः॥ ९ ॥
उपलाहतोद्धततरंगधृतं जविना विधूयविततं मरुता॥ स ददर्श केतकशिखाविशदं सरितः प्रहासमिव फेनमपां॥ १० ॥
बहु बर्हिचंद्रकनिभं विदधे धृतिमस्य दानपयसां पटलं॥ अवगाढमीक्षितुमिवेभपतिं विकसद्विलोचनशतं सरितः॥ ११ ॥
प्रतिबोधजृंभणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे॥ पतदच्छमौक्तिकमणीप्रकरा गलदश्रुबिंदुरिव शुक्तिवधूः॥ १२ ॥

चनं बहुवो मदांबुबिंदवः इत्यर्थः। अवगाढं अंतः प्रविष्टं गाहेः कर्तरि क्तः। इभपतिमीक्षितुं विकसदुन्मिषत्सरितो विलोचनश
तमिवेत्युत्प्रेक्षा भ अस्यार्जुनस्य धृतिं प्रीतिं विदधे॥ ११ ॥ प्रतीति॥ प्रतिबोधः स्फुटनं निद्रापगमश्च तत्र यत् जृंभणं उच्छूनता जृंभा
वतेन विभिन्नमुखी विश्लिष्टाग्रा विवृतास्या च अत एव पतन्नच्छो मौक्तिकमणीनां प्रकरः स्तोमो यस्याः सा तथोक्ताः अत एव गलदश्रुबिं
दुरिवेत्युत्प्रेक्षा शुक्तिर्वधूरिव शुक्तिवधूः पुलिने शयनीय इवेति भावः सरोरुहदृशा अर्जुनेन ददृशे दृष्टा अत्र प्रतिबोधादि श्लिष्ट
पदोपात्तानामर्थानां शुक्तिरिवेति च धर्मोपमारूपकयोः साधकाबाधकाभावात्संदेहालंकारः। तत्सापेक्षा चेयं शुगलद्वोत्प्रेक्षेति। ते

शुचिरिति॥ अप्सु शुचिः स्वच्छः तनुना सांद्रेण च फेनस्य लवेन कणेन संवलितः संगतः विद्रुमलताया यो विटपः पल्लवः विटपः पल्ल
वे खण्डे विस्तारे स्तंबशाखयोरिति विश्वः। स्मरदायिनः कामोद्दीपकस्य दशनांशुमतः दंतकांतिसंवलितस्येत्यर्थः। दयिता
धरस्य अधिगर्थेत्यादिना षष्ठी न स्तां स्मरयति स्म लट् स्मे इति भूतार्थे लट् मितां ह्रस्वः स्मरणालंकारः॥१३॥ उपलेति॥
3 सोऽर्जुनः चंचलतरंगैः घट्टलं तत्सां क्रांतमित्यर्थः। मदगंधमुपलभ्य प्राप्य पयसः उत्थितवतां रोषादिति शेषः। करिविशे

शुचिरप्सु विद्रुमलताविटपस्तनुसांद्रफेनलवसंवलितः। स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुमतः॥१३॥
उपलभ्य चंचलतरंगधृतं मदगंधमुत्थितवतां पयसः। प्रतिदंतिनामिव स संबुबुधे करियादसामभिमुखान्करिणः॥१४
सजगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः। प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रमम पांपटलं॥१५

दंति षाणां यादसां शृंगपार्थिवादिषु दृष्टव्या प्रतिदंतिनामिवाभिमुखान्नभिगतानित्यर्थः। करिणः संबुबुधे ददर्शेत्यर्थः॥१४॥
सजगामिति॥ सोऽर्जुनः पुरोऽग्रे सहसा समुत्पिपतिषोः समुत्पतितुमिच्छोः यतेः सनंताद् उप्रत्ययः। सनि यातिदरिद्रादि
भ्यः सनू इट् वाकव्य इति विकल्पादिडागमः फणिनः प्रजविभिः अतिवेगवद्भिः श्वसितैः स्फुत्कारैर्दिव्याकाशे प्रहि
तं प्रक्षिप्तं शरदभ्रस्य विभ्रमः सौंदर्यं यस्य तत् शुभ्रं व्यापकं चेत्यर्थः। अपां पटलं पुरः उदीक्ष्य विस्मयं जगाम अत्रोपमानुप्राणि
नास्वभावोक्तिलंकारः॥१५॥१५॥

सतइति ॥ सोऽर्जुनः सैकतवतीः पुलिनवतीः अभितः शफरीणां परिस्फुरितान्येव चारवो दृशो यासां ताः सुरनिम्नगां गंगामुपयतीः भज
तीः इणः शतृ शतरि ङीप् । अत एव बृहज्जघनाः ललिताः सखीरिवास्थिताः सरितः ततार अतिचक्राम ॥१६॥ अधीति ॥ सोऽर्जु
नोऽधिरुह्यारुह्य हिरिनि तिशेषः पुष्पभरेण नम्रशिखैः नताग्रैः तरुभिः परितः परिष्कृततलां भूषितस्वरूपां अधःस्वरूपयोरस्त्री
तलमित्यर्थः । संपर्युभ्यः करोतौ भूषणे सुट् इति सुट् शुचिं शुद्धं अत एव मनसः प्रसत्तिमिव मूर्तिमनसः प्रसादमिव स्थितां तां

सततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः ॥ ललितासखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः ॥१६
अधिरुह्य पुष्पफलनम्रशिखैः परितः परिष्कृततलां तरुभिः ॥ मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिमाससाद सवनांतभुवं ॥१७॥
अनुसानु पुष्पितलतावितति: फलितोरुभूरुहविविक्तवनः ॥ धृतिमाततान तनयस्य हरेः तपसेऽधिवस्तुमचलामचलः ॥१८॥

द्धुतोलज्ञावोस्थ्रक्षा गिरेर्मूर्ध्नि विनांतभुवं आससाद अंतः शब्दस्वरूपवचनः अंतस्स्व वसितेमहत्योः स्वरूपे निश्चयेंति
क इति वेलयंती ॥१७॥ अनुइति । अनुसानु प्रतिसानु वीप्सार्थेऽव्ययीभावः पुष्पिताः संजातपुष्पाः लताविततयो यस्मिन्सः
फलिताः उरुभूरुहो यस्मिन् तानि विविक्तानि तानि वनानि यस्मिन् सः तथोक्तः अयं इंद्रकीलः हरेस्तनयस्यार्जुनस्य
तपश्च सतपश्चर्यार्थं अधिवस्तुं अधिष्ठातुं क्रियापेक्षया समानकर्तृकात्त्वे तुमुन् अचलां धृतिं उत्साह . मातता
न अत्राचल विशेषणपदार्थस्य धृलिकरणहेतुत्वात् काव्यलिंगमलंकारः ॥१८॥ ॥१८॥ १८

प्रणिति॥ अथ तत्राद्रौ विधिना योगशास्त्रविधानेन धियं चित्तवृत्तिं प्रणिधाय ध्येयविषये नियम्य नेर्गदन इत्यादिना आणतं, सुनितां
दधतस्तपस्यतः इत्यर्थः पुरातनमुनेरर्जुनस्येत्यर्थः असुकरं दुष्करं तपः श्रमं नादधौ न चकार तथा हि आत्मवतां मनस्विनां
अवसादकरं तपः श्रांतिजनकं किमिव न किंचिदित्यर्थः इवशब्दो वाक्यालंकारे॥१९॥ शमयतीति॥ धृतमिंद्रियशमो विषयव्यं
व्यावृत्तिर्विवेकमुख्यं सुखं यस्य स तथोक्तः आत्मारामइत्यर्थः। अन्यत्र धृतः कृतः इंद्रियाणां शमः संतापनिवर्तनमेकम
हितीयं सुखं आह्लादकश्चयेन स तथोक्तः शुचिभिर्निर्मलैर्गुणैर्मैत्र्यादिभिरन्यत्र कांत्यादिभिः अघमयं तमः पापरूपं तमः

प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनितां॥ श्रममादधावसुकरं न तपः किमिवावसादकरमात्मवतां॥१९॥श
मयंधृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः॥ प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः॥२०॥
अधरीचकार च विवेकगुणादगुणेषु तस्य धियमस्तवतः॥ प्रतिघातिनीं विषयसंगरतिं निरुपप्लवः शमसुखानुभवः॥२१॥

शमयन्निवर्तयन्निर्मलः अमलः शुभोऽन्यत्रसोऽर्जुनः प्रतिवासरं सुकृतिभिः सुकृतैः तपोभिरित्यर्थः स्त्रियां क्तिन्। कलाभिः शीत
रुचिश्चंद्र इव ववृधे॥२०॥ अधरीति॥ किं चेति चार्थः विवेकस्तत्त्वावधारणं स एव गुणस्तस्मात्तेन हेतुनेत्यर्थः विभाषा गुणे स्त्रिया
मिति पंचमी। अगुणेषु कामक्रोधादिदोषविषये तद्विरोधेन अस्तमानः धिषणं सगुणस्तस्मायं चित्तवृत्तिवृत्तिमस्तवतः निरासि
तवतः तस्यार्जुनस्य निरुपप्लवः निर्बाधः शमसुखानुभवः प्रतिघातिनीं सोपप्लवां विषयसंगरतिं शब्दाद्युपभोगरुचिं
अधरीचकार विषयनिस्पृहां चकारेत्यर्थः उत्कृष्टसुखलोभस्यापकृष्टे वैराग्यहेतुत्वादिति भावः॥२१॥ २२॥

मनसेति॥ प्रयतः हिंसादिरहितः मनसा ध्यानेन जपैः विशिष्टमंत्रन्यासैः प्रणतिभिः नमस्कारैः एवं मनोवाक्कायकर्मभिर्दिवोधिपतिमिंद्रंस
मुपेयिवानुपसेदिवान् सोर्जुनः सहजेतरयोर्नैसर्गिकागंतुकयोः जीयते अनेनेति जयः शम्यते अनेनेति शमः एवं च जयशमौ। वीरशां
तौ तौ दधती पुष्णती महसी तेजसी युगपद्बिभरांबभूव भीह्रीभृहुवांश्लुवच्चेति विकल्पादाम्प्रत्ययः अत्र युगपद्विरशंताधि
करणत्वाभिधानात् अस्य लोकाद्भुतं महत्त्वं युज्यते॥२२॥ शिरसेति॥ हरिन्मणीश्यामः अभिषवणेन स्नानेन कृतजन्मनो ज
निताः अतः पिशंगीरिति भावः। जटाः शिरसा वहन् सोर्जुनः अरुणस्यानूरोः दीधितिभिः परिमृष्टमूर्धनि व्याप्तसिरसि तमाल

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः॥ सहजेतरौ जयशमौ दधती बिभरांबभूव युगपन्महसी॥२२॥
शिरसा हरिन्मणिनिभः स वहन्कृतजन्मनोभिषवणेन जटाः॥ उपमां ययावरुणदीधितिभिः परिमृष्टमूर्द्धनि तमालतरौ॥२३॥
धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयन्नगुरुभिः॥ रजयांचकार विरजाः समृगान्कमिवेशते रमयितुं न गुणाः॥२४॥

तरावुपमां तरोः सादृश्यं ययाय इत्यर्थः। यमुमां तदेरौपम्याधिकरणत्वात् तदपेक्षया सप्तमी॥२३॥ धृतेति॥ धृतहेति
रपि धृतायुधोपि अधृता जिह्ममतिः कुटिलबुद्धिर्येन सः शुचिभिश्चरितैः मुनीनधरयन् वेषेणेव भीषणो न तु कर्मणेति
भावः कुतो विरजा रजोगुणरहितः सोर्जुनः मृगान् रजयांचकार रमयामास रंजेः रमण इति वक्तव्यान्नुरवीरःकोपः
तथाहि गुणाः दयादयः कमिव रमयितुं नेशते कं वशीकर्तुं न शक्नुवंत इति भावः शुद्धिरेव परं विश्वासबीजं परस्या
पिनद्रोहो नापि संस्तव इति भावः॥२४॥ ॥ २४॥ ॥२४॥

अथास्य जयः सिद्धिस्त्रिभिराह। अनुकूलेत्यादिभिः। अनुकूलपातिनं न तु प्रवाहितं अचण्डगतिं मन्दगामिनमभितः सुगन्धिं सौगन्धस्येदि
तिइकारं तत्प्रहणे पिकवीनां निरंकुशत्वात्समासः। अथवा केचिदागन्तुकत्वेऽपि एकवचनेन समासान्तमिच्छन्ति पवनमभितः
किरता प्रवर्तयतेत्यर्थः। ऋतुसमयोऽस्य प्राप्तः आर्तवः समयस्तदस्य प्राप्तमित्यण् प्रत्ययः स चासौ गुणस्त्विग्मरूपः सोऽवध
धीरितः तिरस्कृतो यस्य तं अंशुमतो रुचां निचयं सुखतां सुखस्पर्शतां नयता नयतिर्द्विकर्मकः॥२५॥ नवेति॥ प्रचये पुष्पा
वचयप्रसंगे नवपल्लवा एवांजलयः तान् बिभ्रतीति तथोक्तान् बृहतः उच्चैस्तरून् अवनतिं गमयता। मतिबुद्धीत्यादिना

अनुकूलपातिनमचण्डगतिं किरता सुगंधिमभितः पवनं॥ अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुमतः॥२५॥
नवपल्लवांजलिभृतः प्रचये बृहतस्तरून् गमयतावनतिं॥ स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयतामुपयतीं वसुधां॥२६॥
पतितैरपेतजलदान्नभसः पृषतैरपां शमयताच रजः॥ स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा॥२७॥ ॥

तरूणां द्विकर्मकत्वं प्रतिनिशं निशि निशि शयनीयतामुपयतीं शयनस्थानं भवन्तीमित्यर्थः वसुधां मृदुभिस्तृणैः स्तृणता आच्छा
दयता॥२६॥ पतितैरिति॥ अपेतजलदादनभ्रान्नभसः पतितैरपां पृषतैर्बिन्दुभिः रजश्च शमयता तपसा दयालुनेव सुत्से
क्षादयाहेतुं सुखयति परिगाढकृशः अतिक्षीणः सोऽर्जुनः परिचर्यया उक्तविधया शुश्रूषया अनुगृहीतः अनुग्रहः सत्कार ए
वं सर्वभूतानुकूल्यालिंगात्तपश्चेतिमन्तयास्यतिभावः। अत्र श्लोकत्रयमेकवाक्यत्वादुत्प्रेक्षेवप्रधानालंकारः॥२७॥ ॥

महतेति ॥ सोऽर्जुनो महते फलाय श्रेयसे सस्याय च विकसन्तं सर्वतो निमित्तं शिवं निमित्तमेव कुसुमं पुरोऽग्रे अवेक्ष्य विस्मयवशं न जगाम तथा
हि वशिनां अनुभाव एव गुणः स धैर्यं न निहन्ति विस्मयादि विकारं न जनयतीत्यर्थः जननेन्द्रा तपः क्षयेत तपक्षरति विस्मयादि
ति भावः ॥२८॥ तदिति ॥ सुकृतैस्तपोभिः करणैरभूरिभिः कतिपयैरेव वासरैः कृतं तत्कृतं वैभवं अतोऽन्यस्य न भवतीति अनन्य
संभवं अन्यस्य संभवतीत्यर्थः । पञ्चाद्यजन्तोत्तरपदेन तत्समासः उपलक्ष्य निश्चित्य आहितविषादा प्राप्तखेदा धियो येषां ते
वनचराः बहुलग्रहणात्तलुक् शतेन शतस्य वा मखानां यज्वनः शतयज्वनः शतक्रतोः असंख्येयैर्विशेषलोभोयत्विसंवि

विशेषकं ॥ महते फलाय तदवेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः ॥ न जगाम विस्मयवशं वशिनां न हि हंति धैर्यमनुभावगुणः ॥२८॥
तदभूरिवासरकृतं सुकृतैरुपलभ्य वैभवमनन्यभवं ॥ उपतस्थुराहितविषादधियः शतयज्वनो वनचरा वसतिं ॥२९॥
विदिताः प्रविश्य विहितानतयः शिथिलीकृतेऽधिकृतकृत्यविधौ ॥ अनपेतकालमभिरामकथाः कथयांबभूवुरिति गोत्रभिदे ॥३०

धानादवगंतव्यः यज्वा तु विधिनेष्टवान् इत्यमरः । सुयजोर्ङ्वनिप् । वसतिमुपतस्थुः प्रापुः ॥२९॥ विदिता इति ॥ वनेचरा
इत्यनुवर्तते विदिता विज्ञाताः अनुमतप्रवेशाः सन्त इत्यर्थः प्रविश्य विहितानतयः कृतप्रणामाः अधिकृतकृत्यस्य
नियुक्तकर्मणः शैलरक्षणलक्षणस्य विधावनुष्ठाने शिथिलीकृते सति अनपेतकालं अनतिक्रान्तकालं यथास्यात्त
था गोत्रभिदे शक्राय इति वक्ष्यमाणेन प्रकारेण अभिरामकथाः आव्यवाचः चितिप्रतिकथिकं बिवर्तवस्त्रेसङ्कुप्रत्ययः ।
कथयांबभूवुः ॥३०॥ ॥ ॥ ॥३०॥ ॥ ॥ ३० ॥ ॥ ॥

किं०स०

॥६॥

शुचीति॥शुचिनावल्कलेनवीतांछादितातनुर्यस्यसः तिमिरछिदांसूर्यादीनांअन्यतमइवस्थितइत्युत्प्रेक्षा अनघः पुरुषः हे मघवन्
भवतो गिराविंद्रकीलेजगंतीमुर्वीं तपन्तापयन्महतेजयायतपस्यति तपश्चरति॥कर्मणोरोमंथतपोभ्यांवर्त्तिचरोरित्यादिना क्यङ्
॥३१॥जयायतपस्यतीत्युक्तं तत्रयुक्तिंवक्ति॥सइति॥भीषणइतिभीषणोनंद्यादित्वात्ल्युप्रत्ययः॥तोभुजंगोपचतावितप्रभुजोयस्य
सः तथोक्तः सपुरुषोविद्विषांभयविधायिपृथुधनुर्बिभर्तितेजयायेत्यर्थः अमलेनतस्यपुरुषस्यचरितेनवचचवस्त्वर्थः

शुचिवल्कवीततनुरन्यतमस्तिमिरछिदामिवगिरौभवतः॥महतेजयायमघवन्ननघः पुरुषस्तपस्यतितपञ्जगतीं॥३१॥सबि
भर्त्तिभीषणभुजंगभुजः पृथुविद्विषांभयविधायिधनुः॥अमलेनतस्यधृतसच्चरिताश्चरितेनचातिशयितामुनयः॥३२॥
मरुतः शिवानवतृणाजगतीविमलंनभोरजसिवृष्टिरपां॥गुणसंपदानुगुणतांगमितः कुरुतेस्यभक्तिमिवभूतगणः॥३३॥

धृतानिसच्चरितानियैस्तेमुनयोतिशयिताः॥३२॥अथास्यतपः सिद्धिंकथयति॥मरुतइति॥मरुतोवाताः शिवाः सु
सुखाः जगतीपृथ्वीनवतृणाशयनासनानुकूलेत्यर्थः नभोविमलंनीहारादिरहितंरजसतीअपांवृष्टिर्भवतीतितिशेषः
किंबहुनास्यपुंसः गुणसंपदाभूतहितादिगुणसंपदाअनुगुणतांअनुकूलतांगमितोवशीकृतइत्यर्थः भूतगणः
पृथिव्यादिपंचकंभक्तिंसेवांकुरुतइवेत्युत्प्रेक्षा॥३३॥ ॥ ३३ ॥ ॥ ३३ ॥

इतरेति॥ मृगाः अंते अंतिके सीदंतीति अंतसदो अंतेवासिनः सत्सु द्विषेसादिना द्विपृ गुरुमिव इतरेतरेषां अभिभवेन अद्रोहेणाउ
पासते प्रचये पुष्पावचये तरवोऽस्य विनमंति करप्रचेया भवंति इत्यर्थः। अस्येति प्रचये सामान्ये षष्ठी किं बहुना स नगः इंद्रकी
लः भवतेव पुंस्त्वापरवान्पराधीन इत्यर्थः तदेव तस्यावधेयो भवतेत इत्यर्थः॥३४॥ उर्विति॥ किंच विपरिश्रमता आयासविश्रमराहि
त्यं उरुमहत्सत्वं अंतः सारमाह दुर्बलस्य श्रमजयां संभवादिति भावः परममुत्तमं वपुर्जयं प्रथयतीव आकारेण जिष्णुत्वं ग

इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवांतसदः॥ विनमंति चास्य तरवः प्रचये परवान्स तेन भवतीव नगः॥३४॥
उरुसत्वमाह विपरिश्रमता परमं वपुः प्रथयतीव जयं॥ शमिनोऽपि तस्य नवसंगमने विभुतानुषंगि भयमेति जनः॥३५॥
ऋषिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृतां॥ चरतस्तपस्तव वनेषु सदा न वयं निरूपयितुमस्य गतिं॥३६॥

म्यत इत्यर्थः॥ शमिनः शांतस्यापि तस्य नवसंगमने अपूर्वप्राप्तौ जनो विभुतायाः प्रभावस्यानुषंगिण्या यं कं नु हिंसत्वा
नुषंगीति भावः॥ भयमेति। शांतोऽपि प्रभावं गमयतीत्यर्थः॥३५॥ अथेदृशोऽसौ क इति चेत्तं न विद्म इत्याहुः॥ ऋषीति॥
स पुमान् ऋषिवंशजः वेति शेषः का कुर्वीय यदि दैत्यकुले जात इति शेषः यदि महति भूमिभृतामन्वये जातः तव वने
षु तपश्चरतोऽस्य गतिं स्वरूपं निरूपयितुं वयं सहत इति सहाः पचाद्यच् न स्म इति शेषः॥३६॥ ३६ ॥

अथाप्रियपरिभाषणापराधंपरिहरंती॥विगणय्येति॥अनेकगुणंबहुफलं(कै)द्वंद्वत्वाद्यनेकफलसाधनयोग्यमित्यर्थः कारणंतयोरु
पविगणय्यविचार्यअथवानिजयानैसर्गिक्याअल्पतयाबालिश्येनवोथितंतंवाभिहितंनोस्माकमसदप्यदःदुःवचनमित्य
र्थः॥असत्असाध्वपिसहितंसोढुंतीषसहेत्यादिनाविकल्पादिडागमः अर्हसिसद्देवक्रिन्नोक्तंतत्राहवनेचराःक्वनिपुणाः
मतयःविवेकबुद्धयःक्वनोभयंसंगच्छतइत्यर्थः अज्ञानंनापराध्यतीतिभावः अर्थांतरन्यासोलंकारः॥३७॥उपलभ्येति॥

विगणय्यकारणमनेकगुणंनिजयाथवाकथितमल्पतया॥असदप्यदःसहितुमर्हसिनःक्ववनेचराःक्वनिपुणामतयः॥३७॥
अधिगम्यगुह्यकगुणादितितन्मनसःप्रियंप्रियसुतस्यतपः॥निजुगोपहर्षमुदितंमघवानयवर्त्मगाःप्रभवतांहिधियः॥३८॥

उपलभ्येति॥मघवागुह्यकगणात्तन्मनसःप्रियंप्रियसुतस्यार्जुनस्यतपउपलभ्यज्ञात्वागुह्यापेक्षयासमानकर्तृकत्वा
त्ल्यप्निर्देशात्उदितंतत्तपसोदेवकार्यार्थत्वात्उत्पन्नंहर्षनिजुगोपतथाहिप्रभवतांप्रभूणांधियोनयवर्त्मगाःनीति
मार्गानुसारिण्याहिअन्यथामंत्रभेदात्तत्कार्यहानिस्यादिति॥३८॥ ॥३८॥ ॥३८॥ ॥

प्रणिधेति॥ अथ हरिरिंद्रश्चित्तं प्रणिधाय विषयांतरपरिहारेण समन्यवस्थाप्य तत्र तस्मिन्नर्जुने भक्तेन या विदिते सत्यपि उपलक्ष
णेन तेन या अपूर्व इव अविदिते सतीत्यर्थः। पूर्वादिभ्यो नवभ्यो वेति विकल्पात्तस्मिन्नादेशः। अस्यार्जुनस्य मनसः स्थिरतां दा
र्ढ्यमुपलब्धुं परीक्षितुमित्यर्थः। लोकप्रतीत्यर्थमिति भावः। सुरसुंदरीरिति वक्ष्यमाणप्रकारं वचोभिदधे॥ ३९॥ सुकुमारमिति॥
मर्मभिदां मर्मच्छिदां अस्त्रांतराणां मध्य इत्यर्थः। यतश्च निर्धारणमिति षष्ठी इतरमन्यत् कतरं बहूनां जातिपरिप्रश्ने डतमच्॥

प्रणिधाय चित्तमथ भक्ततया विदितेप्यपूर्व इव तत्र हरिः। उपलब्धुमस्य नियमस्थिरतां सुरसुंदरीरिति वचोभिदधे॥ ३९॥
सुकुमारमेकमणु मर्मभिदामतिदूरगं युतममोघतया। अविपक्षमस्त्रमपरं कतमद्विजयाय यूपमिव चित्तभुवः॥ ४०॥

यूपमिव सुकुमारं कोमलं न तु कठिनं अन्यत्तु कठिनं भवति तथा एकं न बहुलं तु अनेकं भवति अणु सूक्ष्मं न स्थूलं अ
लक्ष्यत्वादिति भावः तथा हि अतिदूरगं दूरलक्ष्यभेदि तत्तु समीपलक्ष्यभेदि तथा अमोघत्वगुणेन यत्न कदाचिल्लक्ष्
क्ष्यादपराध्यतीति भावः। अविपक्षमसप्रतिकारमस्त्रं चित्तभुवः कामस्य कर्त्तरि षष्ठी। विजयाय अस्तीति शेषः
न किंचिदस्तीत्यर्थः। अत्रोपमायाः परिकरेण इति तयोरंगांगिभावेन संकरः। साभिप्रायविशेषणत्वं परिकरः॥ ४०॥ ॥

असामर्थ्यशंकां वारयति। भवेति॥ भववीतये संसारविरक्तये हतबृहत्तमसां निरस्तमहामोहानां योगिनां संबंधि रजोगुण एव र
जो धूलिरिति श्लिष्टरूपकं तस्य शमनं निवर्तकं अवबोध अवज्ञानं एव वारि तद्वो युष्माकं असकलैरसमग्रैर्नयनान्येवाञ्जल
यस्तैः परिपीयमानमिवेत्युत्प्रेक्षा अवसादं क्षयमेति मुक्तानपि बध्नतीनां वः कथमसामर्थ्यमिति भावः। अत्रोत्प्रेक्षारूपकयोः संक
रः॥४१॥ बहुधेति। किंच पुरा जगती बहुधा गतां नानामुखेन विप्रकीर्णां कमनीयतां चन्द्राद्युपमानद्रव्यगतं लावण्यं समभिहृत्य संग
ह्य भवती विदधता स्रष्टा भूतसृजा ब्रह्मणा जनताजनसमूहः ग्रामजनबन्धुसहायेभ्यस्तल्। सुरसद्मयानसुमुखाः स्वर्लो

भववीतये हतबृहत्तमसामवबोधवारि रजसः शमनं॥ परिपीयमानमिव वोसकलैरवसायमेति नयनांजलिभिः॥४१॥
बहुधागतां जगतीति भूतसृजा कमनीयतां समभिहृत्यपुरा। उपपादिता विदधता भवतीः सुरसद्मयानसुमुखी जनता॥४२॥
तदुपेत्य विघ्नयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः॥ हृतवीतरागमनसां ननु वः सुखसंगिनं प्रति सुखावजितिः॥४३॥

कयात्रा प्रवणा उपपादिता कृता स्वर्गस्यापि यस्य सा दास्सर्वलोकविश्राम्यत्वं तासां वः कथं सामर्थ्यमिति भावः। अत्रापूर्वसाप्रकी
र्णे लावण्यसंग्रहासंबंधेपि न संबंधाभिधानात् अतिशयोक्तिः॥४२॥ अथ कार्यशमाह। तदिति॥ ततस्मात् समर्थत्वात् कलासु गी
तवादित्रादिषु कृतिभिः कुशलैः सचिवैर्गन्धर्वैः सहिता उपेत्य तस्य पुरुषस्य तपो विघ्नयत विघ्नं कुरुत विहितेत्यर्थः। विघ्नवच्छ
ब्दान्मतुवं लोकरूल निश्चिलाट्। णाविष्टवद्भावान्मतुपोलुक् न चाशक्तिशंका कार्यसिद्धौ तरं न्यासेनाह हृतेति हृतानि। वी
तरागाणां मनांसि याभिस्तासां वो युष्माकं सुखसंगिनं प्रति विजितिविजयः सुखानसुखतराखलु नतु दुष्करा॥४३॥ ॥

कि०

पैजैनाथ पाठक

श्रीगणेशाय नमः ॥ श्रीकालभैरवो जयति ॥ श्रीजगदंबायै नमः ॥ श्रीगुरुमङ्गुरोर्जयति ॥ ॥
अर्द्धांगीकृतदाक्षायण्यमपि गाढानुरागिणम् ॥ चित्रयंत्यां जगत्तेजस्समेकस्यै चिन्महसे नमः ॥ १ ॥ आलंबे
जगदालंबे हेरंबचरणांबुजे ॥ शुष्यंति यद्रजःस्पर्शान्महाः प्रत्यूहवार्धयः ॥ २ ॥ तद्दिव्यमव्ययं धा
मसारस्वतमुपास्महे ॥ यत्प्रसादात्प्रलीयंते मोहांधतमसो छटाः ॥ ३ ॥ वाणीं काणभुजीमजीगणद्
वाशासीच्च वैयासकीमंतस्तंत्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ॥ वाचामाकलयद्रहस्यम
खिलं यश्चाक्षपादस्फुरां लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ ४ ॥ मल्लिनाथकविः सोयं
मंदात्मानुजिघृक्षया ॥ तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥ ५ ॥ नारिकेलफलसंमितं वचो
भारवेः स्फुटमिदं विभज्यते ॥ स्वादयंतु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितं ॥ ६ ॥ नानानिबंधवि
षमैकपदं नितांतं नसाश्रांकसंक्रमण दिव्यनाधियामशंकं ॥ कर्तुं प्रवेशमिह भारविकाव्यबंधे घंटापथं
कमपि नूतनमातनिष्ये ॥ ७ ॥ इहान्वयमुखेनैव सर्वं व्याख्यायते मया ॥ नामूलं लिख्यते किंचिन्ना
नपेक्षितमुच्यते ॥ ८ ॥ अथ तत्रभगवान् भारविनामा कविः काव्यं यशसेऽर्थकृते व्यवहारविदे
शिवेतरक्षतये ॥ सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे इत्यालंकारिकवचनप्रामाण्यात् ।
यकांतासंमितयोपयुज्यते ॥

काव्यस्यानेकश्रेयःसाधनतांपश्यन्काव्यालापांश्चवर्जयेत् ॥ इतिनिषेधस्यागमस्यासत्काव्यविषयतांपश्यन्
किरातार्जुनीयाख्यंमहाकाव्यंचिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधन
त्वादाशीर्नमस्क्रियावस्तुनिर्देशो वापितन्मुखमित्याशीर्यतमस्यप्रबंधमुख्यलक्षणत्वाच्चवनेचरस्ययुधि
ष्ठिरप्राप्तिरूपंवस्तुनिर्दिशन्कथामुपक्षिपति ॥ श्रीयइति ॥ आदितःश्रीप्रयोगादर्णगणादिशुद्धिरि
क्याप्युक्तं ॥ उक्तं देवतावाचकाःशब्दायेचभद्रादिवाचकाःतेसर्वेनैवनिंद्याःस्युर्लिपितोगणतोपिवा ॥

श्रियःकुरूणामधिपस्यपालिनींप्रजासुवृत्तिंयमयुंक्तवेदितुं ॥ सवर्णिलिंगीविदितःसमाययौ
युधिष्ठिरंद्वैतवनेवनेचरः ॥ १ ॥

कुरूणांनिवासाःकुरवोजनपदाःतस्यनिवासइत्यण्प्रत्ययः ॥ जनपदेलुप् ॥ योमधिपस्यदुर्योधन
स्यसंबंधिनींशेषषष्ठ्यैवेतिश्रियोराज्यलक्ष्म्याःकर्तृकर्मणोःकृतीतिषष्ठीपाल्यतेअनयेतिपालिनींतांप्र
तिष्ठापिकामित्यर्थः ॥ प्रजानुरागमूलत्वात्संपदइतिभावः ॥ करणेल्युट् ॥ टिड्ढाणञ्इत्यादिनाङीप् ॥ प्रजा
सुजनेषुविषयाःप्रजास्यात्संततौजनेइत्यमरः ॥ वृत्तिंव्यवहारंवेदितुंयुंवनेचरमयुंक्तनियुक्तवान् ॥ वर्णः
प्रशस्तिरस्यास्तीतिवर्णीब्रह्मचारीवर्णीब्रह्मचारीतिप्राणिनिप्रत्ययः ॥ तस्यलिंगंचिह्नंयस्यास्तीतिवर्णिलिंगी
तदुक्तं ॥ स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणं ॥ संकल्पोध्यवसायश्चक्रियानिर्वृत्तिरेवच ॥ एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः ॥ विपरीतं

गीत्र ब्रह्मचारिवेषधारी सन्॥ स नियुक्तः वने चरतीति वनेचरः। किरातः। चरेष्ट इति टप्रत्ययः। अथवा तत्पुरुषे कृति
बहुलमित्यलुक्। विदितं वेदनमस्यास्तीति विदितः। परवृत्तान्तं ज्ञातवानित्यर्थः॥ अर्शआदित्वादच्प्रत्ययः। अथवा व
र्त्तिकर्मण्यधर्मोपचारात् द्विदितवृत्तान्तो विदित इत्युच्यते॥ उभयत्रापि पीता गावो भुक्ता ब्राह्मणा विभक्ता भ्रातर इत्या
दिवत्साधुत्वं॥ ननु कर्त्तरि क्तः। सकर्मकेभ्यस्तस्य विधानाभावात् अत एव भाष्यकारः। अकारो मत्वर्थीयः। वि
भक्तमेषामस्तीति विभक्ताः। पीतमेषामस्तीति पीताः॥ अथवा उत्तरपदलोपात् ऋद्धयः। विभक्तधना विभक्ताः
पीतोदकाः पीता इति। अत्र लोपशब्दार्थमाह। ल्यप्। गम्यमानार्थस्याप्रयोग एव लोपो विभक्ताः विभक्ता
भ्रातरः इत्यत्र धनस्य यद्विभक्तत्वं भ्रातृषूपचर्यते। पीतोदका गाव इत्यत्राप्युदकस्य पीतत्वं गोष्वारोप्यते इति
तद्वदत्रापि वनिगमनीवदितत्वं वेदितुं वनेचर उपचर्यते॥ एतेन वनायपीतप्रतिबद्धवत्सां पातुं न प्रथमं व्यव
स्यति जलं युष्मास्वपीतेषु ये त्येवमादयो व्याख्याताः। अथवा वित्तो विदितवान् सकर्मकादप्यविवक्षिते
कर्मणि कर्त्तरि क्तः। यथा आसितः कर्त्ता स्यादिति। यथा बुधधातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसिद्धेर
विवक्षातः। कर्मिणो कर्मिका क्रियेति। द्वैतवने द्वैतनाख्ये तपोवने। युधि रणे स्थिरं युधिष्ठिरं धर्मराजं।
हलदन्तात्सप्तम्याः संज्ञायामित्यलुक्। गवियुधिभ्यां स्थिर इति षत्वं॥ समाययौ संप्राप्तः। अत्र वनेचर इति
द्वयोः स्वरव्यंजनसमुदाययोर्यदावृत्तिः स त्ववृत्त्यनुप्रासो नामालंकारः। अस्मिन्सर्गे वंशस्थं वृत्तं। तल्लक्ष

कृतप्रणामेति ॥ कृतप्रणामस्य तत्कालोचितस्य कृतनमस्कारस्य सपत्नेन रिपुदुर्योधनेन । रिपौ वैरिसपत्नारिद्विषद्द्वेषण
दुर्हृदः इत्यमरः ॥ जितां सापत्नीं कृतां महीं महीभुजे युधिष्ठिराय क्रियाग्रहणात्संप्रदानत्वं निवेदयिष्यतो ज्ञापयिष्य प॰
तः ॥ लृटः सद्वे शत्रे निस्वत्प्रत्ययः । तस्य वनेचरस्य मनो न विव्यथे कथमीदृगप्रियं राज्ञे विज्ञापयामीति ~~तत्रापि~~
मनसि न चचाल इत्यर्थः ॥ व्यथ भयचलनयोरिति धातोर्लिट् ॥ उक्तमर्थमर्थान्तरन्यासेन समर्थयते ॥ न हीति ॥

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ॥
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छंति मृषा हितैषिणः ॥ २ ॥

हि यस्मात् हि तमिच्छंतीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं वक्तुं नेच्छंति ॥ अन्यथा
कार्यविघातकृतः स्वामिद्रोहीणः स्युरिति भावः ॥ अमोघमेव मृषो भाषितमभ्युह कत्वं चेति वारयु
पाद्दतौ भिन्निवाक्यामृते ॥ २ ॥

मांयम

॥३॥ तथाप्रियार्हः शासितं कथं निष्ठुरोक्तिरित्याशंक्य स्वाम्यनुज्ञया न दुष्यतीत्याशयेनाह द्विषामिति रहस्येकान्ते स वनेचरो द्विषां शत्रूणां
कर्मणि षष्ठी विघाताय विहन्तुमित्यर्थः तुमर्थाच्च भाववचनात् ॥ इति चतुर्थी भाववचनाश्चेति तुमर्थे प्रत्ययः । अत्रेता व
दर्थ्यमपि न दोषः ॥ तथापि प्रयोगवैचित्री विशेषस्याप्यलंकारत्वादेवं व्याचक्षते विधातुं व्यापारं कर्तुमिच्छतः समान
कर्तृकेषु तुमुन् द्विषो विहन्तुमुद्युक्तस्येत्यर्थः । अत एव भूभृतो युधिष्ठिरस्यानुज्ञामधिगम्य सुष्ठु भावः सौष्ठवं
शब्दसाधुत्वं सुष्ठुशब्दाद्युवादित्वादण्प्रत्ययः । उदारस्य भाव औदार्यमर्थसंपत्तिस्तयोर्द्वंद्वः सौष्ठवौ

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ॥ स सौष्ठ
वौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥३॥

दार्ये अत्रौदार्यशब्दस्याल्पाच्तरत्वेऽपि लक्षणहेत्वोः क्रियाया इत्यत्राल्पाच्तरस्यापि हेतुशब्दस्य पूर्वनिपातमकु
र्वतां सूत्रकृतैव पूर्वनिपातशास्त्रस्यानित्यत्वज्ञापनादपूर्वनिपातः । उक्तं च काशिकायां अयमेव लक्षणहेत्वोरिति
निर्देशः पूर्वनिपातव्यभिचारचिह्नमिति तदेव शेषः । तयोर्वा विशेषः । तयोर्वा विशेषः तेन शालते शोभत इति
सौष्ठवौदार्यविशेषशालिनीं ताच्छील्ये णिनिः विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थामिति वक्ष्यमाणरूपां वा
चमाददे स्वीकृतवानुवाचेत्यर्थः ॥३॥

॥३॥

× तदुक्तं। गावः पश्यंति गंधेन वेदैः पश्यंति वै द्विजाः। चारैः पश्यंति राजानश्चक्षुर्भ्यामितरे जनाः इति ॥२

तएव२

प्रथमं तावदप्रियनिवेदकमात्मानं प्रत्यक्षोभं याचते। क्रियास्विति॥ हे नृप चा क्रियासु सर्ववस्तुषु युक्तैर्नियुक्तैर्नियुक्तैरनुजी
विभिर्भृत्यैश्चारादिभिरित्यर्थः। चारंतीति चाराः चरपेवायुतं नाम्नि हादित्वादण्प्रत्ययः तएव चक्षुर्येषां ते चारचक्षुषः। स्व२
स्वपरमंडलकार्याकार्यावलोकने चाराः चक्षूंषि क्षितिपतिनामिति नीतिवाक्यामृते। निग्रहानुग्रहसमर्थाः स्वामि ति२
नो न वंचनीयाः न प्रतारणीयाः। सत्यमेव वक्तव्यमित्यर्थः। चारायचारचक्षुरपचारवद्वांसांपदेपदे विनिपात इति भा

क्रियासु युक्तैर्नृप चारचक्षुषो न वंचनीयाः प्रभवोनुजीविभिः॥ अतोर्हसि
क्षंतुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥ ॥४॥

वः। अतोप्रतार्यत्वादसाध्वप्रियं वा मुक्तमिति शेषः। क्षंतुं सोढुमर्हसि। कुतः हितं मनोहारि प्रियं च वचो दुर्लभं अ
तोमद्वचोपि हितत्वादप्रियमपि क्षंतव्यमित्यर्थः॥४॥ ॥ नर्हि तूष्णींभाव एव वरमित्याशंक्याह। सइति॥ यः सखा
अधिपं स्वामिनं साधु हितं न शास्ति। नोपदिशति। कुविप्रसीत्यादिना शासेर्दुहादिपाठाद्विकर्मकत्वं सहितानुपदेष्टा
कुत्सितः सखा किंसखा दुर्मंत्री सत्यर्थः॥ किमः क्षेप इति समासांतप्रतिषेधः। तथाय प्रभुर्निग्रहानुसमर्थः।

६४

गह१

हितादाप्तजनात्तु हितं न संशृणुते न संशृणोतीति समोगमी श्रुत्यादिना संपूर्वाच्छृणोतेरकर्मकादात्मनेपदं अकर्म
म२ कत्वं चैवविक्षितं सहितैः श्रोतापभुः किंप्रभुः कुत्सितः स्वामी पूर्ववत्समासः सर्वथा सखिवेन वक्तव्यं श्रोतव्यं
स्वामिना एवं राजमंत्रिणोरैकमत्यस्यादिष्टाशयः ऐकमत्यस्य फलमाह सदेति हि यस्मात् नृपेषु अमात्येषु च अमा

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः॥५॥

त्येषु च अव्यया सविति स्य एव अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिमनुरागं कुर्वते न जातु ज
हतीत्यर्थः। अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः। अत्र राजमंत्रिणोर्हितानुपदेशतेनाश्रवणाभ्यां दासाम
र्थ्यसिद्धैकमत्यलक्षणस्य निर्दिष्टस्य सर्वसंपत्प्रसिद्धिरूपकार्येण समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्या
सोऽलंकारः। तदुक्तं। सामान्यविशेषेण कार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यास इति॥५॥

विक्लवाः अन्ता।

संप्रतिस्वाहंकारं परिहरति। निसर्गेति॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहं दुष्टदुरित्यादिनाखप्रत्ययः। भूपतीनां चरितं क्व। अबोध
ओपहताज्जन्तवो मादृशाः पामरजनाइत्यर्थः। क्व नोभयसंघटते इत्यर्थः। तथापि निगूढतत्त्वं संवृतयाथात्म्यं विद्विषां
नयवर्त्म षाड्गुण्यप्रयोगमया अवेदि[redacted]ज्ञातमितियावत्। विदेः कर्मणि लुङ्। अयमिदं वेदनमित्यर्थः। विधेयप्रा

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः॥
तवानुभावोयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषां॥६॥

धान्यात्पुल्लिंगनिर्देशः। तवानुभावः सामर्थ्यं अनुगतो भावोरात्संप्ररूढोभाव इतिघञन्तेनप्रादिसमासः।
ननुपसर्गाद्घञ्प्रत्ययः। श्रिणीभुवोनुपसर्गेतिघञ्विधानात्। अतएव काशिकायां कथं प्रभावो राज्ञां प्ररू
ढोभावइतिप्रादिसमासः। इतिदोषपरिहारैसम्यक् ज्ञात्वैवविज्ञापयामि नतु वृथाकर्णकठोरं प्रलपयामीतिभावः।
।६।

संप्रति यद्वक्तव्यं तदाह ॥ विशंकेति ॥ सुखेन योध्यते सुयोधनः भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वक्तव्यः ॥ नृपासन
स्थः। सिंहासनस्थोपि वनमधिवसतीति वनाधि[redacted]वासी तस्मात् वनाधिवासिनोत्र वस्याहात्योत्कृष्टाद्दपीसर्थः ॥ भवतः राज्यस्
स्वतः पराभवं पराजयं विशंकमानः उत्प्रेक्षमाणः सन् दुष्टमुदरमस्येति दुरोदरं द्यूतं तच्छद्मोदराद् दित्वात् साधुः ॥ दुरोदरो
[redacted] द्यूतकारे पणे द्यूते दुरोदरमिस्यमरः ॥ तस्य छद्मना मिषेण जितां लब्धां दुर्नयर्जितामित्यर्थः ॥ जगतीं महीं

5

तः विशंकमानो भवतः पराभवं नृपासनस्थोपि वनाधिवासिनः ॥
दुरोदरछद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥७॥

जगती विष्टपे मह्यां वास्तु छंदोविशेषयोरपि ति वैजयंती ॥ नयेन नीत्या जेतुं वशीकर्तुं समीहते व्याप्रियते। न तु
दास्ते इत्यर्थः। बलवत्स्वामित्वमर्मविग्रुग्रगमं च धनं भुंजानस्य कुतो मनः समाधिरिति भावः ॥ अत्र दुरोदरछद्मजिताविशे
षणद्वारेणापदार्थस्य चतुर्थपदार्थस्य चतुर्थपदार्थ प्रति हेतुत्वेनोपन्यासाद्वितीये काव्यलिंगमलंकारः ॥ तदुक्तं ॥
हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति ॥७॥ म २।

५

॥ अथ चतुर्थसर्ग किरातः प्रारंभः सटीकः ॥ शुभंभवतु ॥ ॥

श्रीगणेशाय नमः ॥ तत इति ॥ ततः प्रस्थानानंतरं जनप्रियः सोऽर्जुनः कलहंसाः मेखला इवेत्युपमितिसमासः । अन्यत्र कलहंसा इव मेखले
ति विशेषणसमासः । कूजंती कलहंसमेखला यस्यास्तां सह पाकेन वर्तंत इति सपाकानि सस्यानि तैर्निहितैः सस्यैराहितः संपादितः पांडुते
व गुणो यस्यास्तां ॥ भुवमासादितयौवनां प्राप्तयौवनां प्रियामिवोपजनं जनसमीपेऽन्यत्र सखीसमक्षं समीपार्थेऽव्ययीभावः । उपस
साद उपगतवानुपमालंकारः ॥१॥ विनम्रेति ॥ सोऽर्जुनः विनम्रशालिप्रसवौघशालिनीः अवनतशालिपूलस्तोमशोभिनीरपेत
पंकाः निष्पंकाः ससरोरुहाण्यंभांसि यासु तास्तथोक्ताः उपायनीभूता अर्जुनं प्रत्युपहारीभूताः शरद्गुणश्रियः पूर्वोक्तशरद्गुणसंपदः यासु

ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपांडुतागुणां ॥ उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां
भुवं ॥१॥ विनम्रशालिप्रसवौघशालिनीरपेतपंकाः ससरोरुहांभसः ॥ ननंद पश्यन्नुपसीम सस्थलीरुपायनीभूतशरद्गुणश्रियः ॥२॥
निरीक्ष्यमाणा इव विस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः ॥ हृतप्रियादृष्टिविलासविभ्रमा मनोऽस्य जह्रुः शफरीविवृत्तयः ॥३॥

ताः उपसीम ग्रामसीमासु विभक्त्यर्थेऽव्ययीभावः । समासांतविधेरनित्यत्वाद् नश्चेति समासांतो न भवति । केचित्तु अन्येषां वर्गे नवपुषां दुर्गमे ग्राम ठि२
सीमन्निरित्यादि नपुंसकप्रयोगादर्शनान्नपुंसकादन्यतरस्यामिति विकल्पो नास्ति साधुरित्याहुः । स्थलीरकृत्रिमा भुवः । जानपदेत्यादिना अकृत्रिमा
र्थे ङीप् । पश्यन् ननंद अत्र शरद्गुणेषु तादात्म्येनारोप्यमाणस्योपायनस्य प्रकृतेर्नेत्रक्रियोपयोगित्वात्परिणामालंकारः ॥२॥ निरीक्ष्येति ।
विस्मयाकुलैराश्चर्यपरैः साविष्टैरत एवोन्मीलितानि पद्मान्येव लोचनानि येषां तैः पयोभिर्निरीक्ष्यमाणा इव स्थिताः । हृतप्रियादृष्टि
विलासानां विभ्रमाः शोभा याभिस्तास्तथोक्ताः इति मनोहरणहेतूक्तिः । विभ्रमः संभ्रमे स्त्रीणां शोभायां चेति वैजयंती । शफरीवि
वृत्तयो मत्सीस्फुरितान्यस्यार्जुनस्य मनः जह्रुः ॥ ॥३ ॥३॥ । ३

तुतोषेति ॥ सोऽर्जुनः सवारिजे वारिणि कलमस्य शालिविशेषस्य शालयः कलमाद्याश्चेत्यमरः । रमणीयस्य भावो रामणीयकं । योपधाद्गुरूपोत्तमा-
द्वुञ् । तत्पश्यन्नधिकं तुतोष । अनुरूपसंगमादिति भावः । तथा हि सुदुर्लभे अनुरूपसंगमे योग्यसमागमे लब्धे सतीति शेषः । प्रकर्षलक्ष्मीयो-
ग्यसमागमनिमित्तामुत्कर्षसंपदमभिनन्दितुं को नार्हति । सर्वोऽप्यभिनन्दति । सामान्यविशेषणसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४ ॥ नुनोदेति ।
आविष्कृता प्रकटीकृता फेनसंततिर्येन तत्तथोक्तं । डिंडीरोऽब्धिकफः फेनः इत्यमरः । अवाप्तः किंजल्कविभेदः केसरोपगमो येन तत्तथोक्तं । कु-
तः उच्चकैरुच्चं यथा तथा विवर्त्तिना लुठितेन पाठीनेन मत्स्यविशेषेण पराहतं ताडितं । सहस्रदंष्ट्रः पाठीन इत्यमरः । पयः कर्तृ तस्यार्जुनस्य

तुतोष पश्यन्कलमस्य सोऽधिकं सवारिजे वारिणि रामणीयकं । सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे ॥ ४ ॥
नुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंततिः । अवाप्तकिंजल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतं पयः ॥ ५ ॥
कृतोर्मिरेखं शिथिलत्वमायता शनैः शनैः शान्तरयेण वारिणा ॥ निरीक्ष्य रेमे स समुद्रयोषितां तरंगितक्षौमविपाण्डु सैकतं ॥ ६ ॥

स्थलपद्मिनीगतं तत्कोवरमित्यर्थः । वितर्कं संशयं नुनोद स्फोटयामास । पाठीनपराहत्या किंजल्कापायेन तद्दर्शनात्स्थलपद्मि-
नीशंका निवृत्तेत्यर्थः । अत्र निश्चयान्तसंदेहालंकारः ॥ ५ ॥ लूनेति ॥ सोऽर्जुनः शिथिलत्वमायतागता दिने दिने क्षीयमाणेने-
त्यर्थः । अत एव शनैः शनैः शान्तरयेण अन्यथोर्मिलेखानुदपादिति भावः । वारिणा कृताः ऊर्मयः पर्वाण्येव रेखा राजयो यस्य तत्तथो-
क्तं । तरंगा अस्य जाता तारकादित्वात्तरंगितं भंगिमयत्ता क्षौमं दुकूलं तद्वद्विपाण्डु शुभ्रमित्युपमालंकारः । समुद्रयोषितां नदीनां सिकता अ-
स्मीति सैकतं । सिकताः शर्कराश्चेत्यमरः । तोयोत्थितं तत्पुलिनं सैकतं सिकतामयमित्यमरः । निरीक्ष्य रेमे तुतुष ॥ ६ ॥

ततः स्त्रीभिः शालिगोपीर्वर्णयति। मनोरमेति॥ अणुना सूक्ष्मेण केसररेणुं किंजल्कं रेणुना। किंजल्कः केसरोऽस्त्रियामित्यमरः। योऽरेणुः परागस्तेनालंकृतमत एव मनोरमयन्तीति। कर्मण्यण्। भ्रुवोरन्तरं प्रापितं भ्रुमध्ये निवेशितमित्यर्थः। बंधुजीवकं बंधूकपुष्पं। बंधूको बंधुजीवकमित्यमरः। अलक्तताम्रस्य लाक्षारसरक्तस्याधरपल्लवस्य श्रिया शोभया समानयन्तीं समं कुर्वन्तीमिव साम्यपरीक्षां कुर्वन्तीमित्यर्थः।
2
उत्प्रेक्षालंकारः॥७॥ नवेति॥ महान्निवेशः स्थानं ययोस्तौ महानिवेशौ पीवरावित्यर्थः। पयोधरौ परितः स्तनयोः समन्तादित्यर्थः। अभितःपरितःसमयानिकषाप्रतियोगेपि च द्वितीयेति द्वितीया मुहुराहितमारोपितं नवातपालोहितं बालातपताम्रमरविंदजं रजः परागं सर्पता प्रसरता परिश्रमांभःपुलकेन स्वेदोद्गवेन चकासयन्तीं शोभयन्तीं। चकास्तेर्ण्यन्ताच्छतरि ङीप्। अलंकरणमप्यलं कुर्वतीं तत्रापि वि

मनोरमं प्रापितमंतरं भ्रुवोरलंकृतं केसररेणुनाणुना॥ अलक्तताम्राधरपल्लवश्रिया समानयंतीमिव बंधुजीवकं॥७॥
नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ॥ चकासयंतीमरविंदजं रजः परिश्रमांभःपुलकेन सर्पता॥८॥
ष३ कपोलसंश्लेषि विलोचनत्विषा विभूषयंतीमवतंसकोत्पलं॥ सुतेन पांडोः कलमस्य गोपिकां निरीक्ष्य मेने शरदः कृतार्थता॥९॥
विशेषकं॥

कृतेति भावः॥८॥ कपोलेति॥ पुनः कपोलसंश्लेषिणं दवतंसकोत्पलं विलोचनत्विषा विभूषयंतीं॥ आभरणस्याप्याभरणमिति भावः। कलमस्य गोपायतीति गोपिकां। शालिगोपीं श्रीण्वुल्प्रत्ययः निरीक्ष्य पांडोः सुतेनार्जुनेन शरदः कृतार्थता या भावः कृतार्थता साफल्यं त्वतं च तल्लोगुणवचनस्य पुंवद्भावो वक्तव्यः मेने। आमानि मन्यतेः कर्मणि लिट्। शरदः स्वगुणसंपदः सादिनियोगकानादिति भावः॥

उपारता इति ॥ पश्चिमा चासौ रात्रिश्चेति विशेषणसमासः । अपरस्त्वयमर्थः । पूर्वादिक् पश्चिमं तन्नाम इत्यादिवत् एकदेशिशब्दस्यैकदेशशब्दसमा
नाधिकरण्यादिकोपर्यवसानं न तु पश्चिमं रात्रेरिति एकदेशिसमासः । तद्विधाय के पूर्वापरौ दिक्षु नेपश्चिमशब्दग्रहणात् । अत एवाहा सर्वैकदेशे
त्यादिना न समासांतो पितस्यापि पर्वापरादिसूत्रोक्तसमासविषयत्वादिति प्रकाशे विषयत्वेकदेशिसमासमेवाश्रित्य समासांतमाह तन्न गव्यंगा
वश्चरंत्यत्रेति गोचरो गवां जन्मधिस्थानं वनं पश्चिमरात्रौ यो गोचरस्तस्मादुपारताः सन्निवृत्ताः जवेन गां भुवं पतितुं धावितुमपारयंतो ऽशक्नुवंतः ।
प्रस्नुतपीवरोधसो बहुलस्मरणात्स्रवदापीनाः । ऊधस्तु क्लीबमापीनमित्यमरः । ऊधसोनङिति स्त्रीग्रहणं कर्तव्यमिति नियमात्तनानङादेशः ॥

उपारताः पश्चिमरात्रिगोचरादपारयंतः पतितुं जवेन गां ॥ तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरोधसः ॥ १० ॥ परीत
मुक्षावजये जयश्रिया नदंतमुच्चैः क्षतसिंधुरोधसं ॥ ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवां ॥ ११ ॥ विमुच्यमानैरपि
तस्य मंथरं गवां हिमानीविशदैः कदंबकैः ॥ शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥ ॥

उत्सुकाः वत्सेषूत्कंठिताः गवां गणास्तमर्जुनमवीक्षणोत्सुकं दर्शनलालसं चक्रुः । स्वर्गेषु पशुवाग्वज्र दिङ्नेत्रघृणिभूजले लक्ष्यदृष्ट्योः स्त्रि
यां पुंसि गौरित्यमरः । अत्र स्वभावाख्यो नामालंकारः स्वभावोक्तिरलंकारो यथावद्वस्तुवर्णनमिति लक्षणात् ॥ १० ॥ परीतेति ॥ सोऽर्जुनः उक्षा
वजये उक्षांतरभंगे सति जयश्रिया परीतं वेष्टितं उच्चैर्नदंतं क्षतसिंधुरोधसं रुग्णसरित्कूलं शारदीं शरत्संबंधिनीं पुष्टिं वृद्धिं उपचयं
दधतं गवामधिपं महोक्षं सविग्रहं मूर्तिमंतं दर्पमिव सुक्षाद्ददर्श ॥ ११ ॥ विमुच्यमानैरिति ॥ हिमानीविशदैः हिमसंघातशुभ्रैः ।
हिमानी हिमसंहतिरित्यमरः । इंद्रवरुणेत्यादिना ङीपू तस्मान्नियोगादानुगागमश्च गवां कदंबकैर्वृंदैः तस्मिन् मंथरं मंदं विमुच्य
मानैरिति भावः । शरन्नदीनां संबंधिभिः शरद्ग्रहणं प्रावृड्व्यवच्छेदार्थं तत्र पुलिनदर्शनादिति भावः । पुलिनैः कूलैर्भिः गल
द्दुकूलैः जघनैरिव तस्यार्जुनस्य कुतूहलमादधे आहितं ॥ १२ ॥ १२ ॥ १२ ॥ १ ॥

3

गतानिति ॥ पांडवोऽर्जुनः पशूनां गवां सहजन्म येषां ते सहजन्मानः सोदरास्त एव बंधवस्तेषां भावस्तत्तां गतान् पशुसौहृदाभिमानव
त इत्यर्थः । गृहाश्रयं गृहविषयं प्रेम वनेषु बिभ्रतो वनेषु गृहाभिमानिन इत्यर्थः । आर्जवे ऋजुत्वे विधेयत्वे गोभिः पशुभिः कृतानु
कारान् अनुकृतानिव स्थितानुत्प्रेक्षा । ततो विधेयानित्यर्थः । गाः पांतीति गोपाः गोपालाः । अतोऽनुपसर्गे क इति प्रत्ययः । तानुपधे
नु धेनुसमीपे समीपार्थेऽव्ययीभावः । ददर्श । अत्रोत्प्रेक्षानुप्राणिता स्वभावोक्तिरलंकारः ॥१३॥ अथ [illegible] वधूभिर्बल्लवीर्नर्तकीसा
म्येन वर्णयति ॥ परिभ्रमन्निति । मूर्द्धजाः षट्पदा इव सुपमितिसमासः । सरोजचारुभिरित्युपमानुसारात् भ्रमद्भिश्चलद्भिः मूर्द्ध
जैः षट्पदैराकुलानि तैर्दंताः केसरा इवेति पूर्ववत्समासः । स्मितोदयेनादर्शिताः ईषत्प्रकाशिताः दंतकेसरा येषां तैस्तथोक्तैः ।

गतान्पशूनां सहजन्मबंधुतां गृहाश्रयं प्रेम वनेषु बिभ्रतः ॥ ददर्श गोपानुपधेनु पांडवः कृतानुकारानिव गोभिरार्जवे ॥१३॥
परिभ्रमन्मूर्द्धजषट्पदाकुलैः स्मितोदयादर्शितदंतकेसरैः ॥ मुखैश्चलत्कुंडलरश्मिरंजितैर्नवातपामृष्टसरोजचारुभिः ॥१४॥
प्रबद्धनिश्वासविकंपिताधरा लता इव प्रस्फुरितैकपल्लवाः ॥ व्यपोढपार्श्वैरपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः ॥१५॥

चलत्कुंडलरश्मिरंजितैः चंचलकनककर्णवेष्टनप्रभानुलिप्तैः अत एव नवातपामृष्टं बालातपामृष्टं यत्सरोजं तद्वच्चारुभिर्मुखैः उपलक्षि
ता ॥१४॥ प्रबद्धेति ॥ प्रबद्धेन नु अबद्धेन निश्वासेन विकंपिताधरा यासां तास्तथोक्ताः । अत एव प्रस्फुरितैकपल्लवाः । प्रचलितैकप
ल्लवा इत्यर्थः । क्वचित्सर्वाशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवदिति कैय्यटः । लता इव स्थिताः । दैवादेकपल्लव
स्फुरणस्यापि लोके संभवादुपमेयं नोत्प्रेक्षा । किं च व्यपोढानि विपर्यस्तानि पार्श्वानि येषु तैः । पाणिविहारहारिभिः पाणि
विक्षेपमनोहरैः । अंगहारोंगविक्षेप इत्यमरः । विकर्षणैः मंथगुणाकर्षणैः । अपवर्तितत्रिकाः संचलितनितंबाः यद्यपि एवं चैषांऽधरत्रिकमित्यमरः
तथापि नितंबो लक्ष्यते ॥१५॥

व्रजेति। व्रजाजिरेषु गोष्ठप्रांगणेषु। अधिकरणे सप्तमीयं। व्रजो गोष्ठाध्ववृंदेषु इति विश्वः। अंबुदनादशंकिनीर्गर्जितभ्रमवतीरिति भ्रांति
मदलंकारः। शिखंडिनां योषितो मयूरीः। योषिद्ग्रहणं मोक्ष्मातिशयार्थं। उन्मदयत्सु उन्मदाः कुर्वत्सु तत्करोतीति ण्यंताल्लट् प्रत्ययः। म
थ्नंति मंथदंडाः। वैशाखमंथमंथानमंथानो मंथदंडके इत्यमरः। विवर्तनैः भ्रमणैर्मुहुः प्रणुन्नेषु। कुपितेष्विति भावो व्यंग्यः। कुंभेषु कलशे
षु मृदंगवन्मंथरं मंदं नदत्सु सत्स्विति वाच्यसाम्यान्निभावलक्षणे सप्तमीयं॥१६॥ समंथरेति॥ मंथरं मंदं आवल्गिताः चंचलाः पी
वरास्तना यासां तास्तथोक्ताः। स्वांगाच्चोपसर्जनादसंयोगोपधादिति ङीप्। परिश्रमेण क्लांतानि म्लानानि विलोचनोत्पलानि यासां ता

व्रजाजिरेष्वंबुदनादशंकिनीः शिखंडिनामुन्मदयत्सु योषितः। मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुंभेषु मृदंगमंथरं॥१६
समंथरावल्गितपीवरस्तनीः परिश्रमः क्लांतविलोचनोत्पलाः। निरीक्षितुं नोपरराम बल्लवीरभिप्रनृत्ता इव वारयोषितः॥१७ ११
कालापके

नास्तथोक्ताः। बल्लवीः गोपीः गोपगोपालगोसंख्यगोधुगाभीरबल्लवा इत्यमरः। अभिप्रनृत्ताः नृत्यंतीः। गत्यर्थाकर्मकेत्यादिना
कर्त्तरि क्तः। गतिबुद्धिप्रजार्थेभ्यश्चेति चकारादुद्वर्त्तमानार्थत्वं॥ वारयोषितो वेश्या इव। वारस्त्री गणिका वेश्या इत्यमरः॥ सो
ऽर्जुनो निरीक्षितुं नोपरराम न विरराम तत्स्मादुपाच्चेति विभाषाकर्मकादिति परस्मैपदं। ईक्षितुमिति तुमुन्। अत्र चतुर्भि
श्लोकैर्यथायोग्यमुपमास्वभावोक्त्योः संसृष्टिः॥ ॥१७॥ ॥

पपातेति॥ सोऽर्जुनः पूर्वी प्राक्षेप्यां विजिह्मतां वक्रतां जहतः त्यजतः। शरदीनिष्पंकत्वेन समरेर त्वेषु सुगमत्वादिति भावः। जहातेः शतृ
प्रत्ययः वृषाप भुक्तां पंक्तिकसस्यसंपदः। वृषभैश्च बितिप्रांत सस्यसमृद्धीन्। सुक्ते वृषभे वृषइत्यमरः। सीमंताइव सीमंतश्च रथांगापकृत्यः।
सीमंतवंतः कृताः सीमंतिताः मलं ताल्करोतीति णिविक्राणा विष्टवश्चावान्मनुपोलुकरथांगेश्च कैः सीमंतिताः सांद्रकर्दमाः घनीभूताः पंकाये
षुतान्। प्रसक्तसंपातेन सततसंचारेण पृथूकृतान् पथो मार्गान् पपात जगामेति स्वभावोक्तिः॥१८॥ जनैरिति॥ सोऽर्जुनः उपग्रामं ग्रामसमीपुर
सुपग्रामं। विभक्त्यर्थे व्ययीभावः। अनिंद्यकर्मभिः निषिद्धवर्जितैः। वर्तिश्चेकत्रकृष्यादिरन्यत्र शिलोञ्छादिः विविक्तान्येकाग्राणि भावाः
भिप्रायः। इंगितं चेष्टा भूषणाम लंकारश्च येषां तैस्तथोक्तैः जनैर्वृताः अधिष्ठिता इत्यर्थः। अतएवाश्रमेषु मुनिस्थानेषु ये मंडपास्तद्

पपातपूर्वी जहतो विजिह्मतां वृषापभुक्तां पंक्तिकसस्यसंपदः॥ रथांगसीमंतितसांद्रकर्दमान्प्रसक्तसंपातपृथूकृतान्पथः॥१८
जनैरुपग्राममनिंद्यकर्मभिर्विविक्तभावेंगितभूषणैर्वृताः॥ भृशं ददर्शाश्रममंडपोपमाः सपुष्पहासाः स निवेशवीरुधः॥१९॥ ततः
स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषं॥ उवाच यक्षस्तमचोदितोपि तं गिरां न हि स्खलितो वसरे वसीदति॥२०॥

पमाः। मंडपोऽस्त्री जनाश्रय इत्यमरः। सपुष्पहासाः पुष्पविकाससहिताः तेन सह सादिना बहुव्रीहिः। निवेशविरुधो गृहगुल्मिः। विरुधो वल्लि
गुल्मिन्यो इति वैजयंती॥ भृशं सादरं ददर्श उपमालंकारः॥१९॥ ततइति॥ ततः सः पूर्वोक्तो यक्षः शरद्गुणश्रियं संप्रेक्ष्य दर्शनीयावर्णनी
यांचेत्यर्थः॥ शरद्गुणालोकने लोलचक्षुषं सतृष्णदृष्टिं। लोलश्च लसतृष्णयोरित्यमरः॥ तमर्जुनमचोदितोऽपि अपृष्टोऽपि गांवा
चमुवाच तथाहि॥ इंगितज्ञो भावज्ञः इंगितं हृद्गतो भाव इत्यमरः। सज्जनः अवसरे उक्तियोग्यकाले नावसीदति॥ नवाचं यच्छ
तीति नापदः। कस्याचिद्रूपादिति निषेधस्त्वनाकांक्षितोक्तिविषयेति भावः। सामान्येन विशेषणसमर्थनरूपोऽर्थांतरन्यासः॥२०

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इयामिति ॥ हे पार्थ शिवायाः कल्याणकारिण्याः नियतेः शुभावहदैवस्यायतीः फलदानकालस्येव जगतः। क्रियाः कृष्यादिकर्माणि फलैर्लो
मैः। लाभमिच्छन्ति याः सुबीजभावधनेफलमिति वेजयन्ती। कृतार्थयन्ती फले फलयन्ती। प्रसन्नाम्बुर्निर्मलोदका। अनम्बुवारिदा नि
र्जलमेघा। अनेन विशेषणद्वयेन द्याव्यापृथिव्योरनुकूल्यं सूचयति। इयं शरत् जयश्रियं पृथूकरोतु। आशीरर्थे लोट् ॥२१॥ उपैतीति ॥
सस्यं व्रीह्यादिकं परिणामेन परिपाकेन। पाकरम्यतां रम्यतामुपैति। नदीरनद्धसंगाम्भीर्यरूपत्वमुपैति। महीमपंकतां निष्पंकत्वमुपैति। तथा हि
संप्रति नवैर्गुणैः पूर्वोक्तैः शरद्धर्मैः संस्तवेन परिचयेन स्थिरं दृढमपि घनागमश्रियः प्रावृट्लक्ष्म्याः संबंधितद्विषयमित्यर्थः। प्रेम

इयं शिवाया नियतेरिवायतिः कृतार्थयंती जगतः फलैः क्रियाः। जयश्रियं पार्थ पृथूकरोतु ते शरत्प्रसन्नांबुरनंबुवारिदा ॥२१॥
उपैति सस्यं परिणामरम्यतां नदीरनौद्धत्यमपंकतां महीं नवै[illegible]गुणैः संप्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥२२॥
पतन्ति नास्मिन् विशदाः पतत्रिणो धृतेंद्रचापा न पयोदपंक्तयः ॥ तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणं ॥२३॥

तिरोहितं निरर्थकं कृतमिति शेषः। गुणवत्तराः प्रेमाणो न परिचयतन्त्रा इति भावः। वास्तवास्तवालंकारः। वास्तवमिति तैयं क्रियते वस्तुस्व
रूपकथनं यदुदाहरणं। इदं तान्निदं लक्ष्य दुमाश्वा तडयतोलु द्विधास्फोटयत्राग्रासंघट्टगारलंगल कि लीदंत्राणि संकोचयदिति ॥२२॥
पतंतीति ॥ अस्मिन्नभसि विशदाः पतत्रिणो बलाहका न पतन्ति न प्रसरन्ति। धृतेंद्रचापाः पयोदपंक्तयश्च न पतन्ति। तथापि श्री
कारणाभावेपि नभः परां सर्वोत्कृष्टां श्रियं शोभां पुष्णाति। तथाहि रम्यं स्वभावसुंदरं वस्तु आहार्यमारोप्यमाणं गुणं नापेक्षते न
छूंति ॥ तत्र स्वभावस्यैव समर्थत्वादिति भावः ॥ अत्रार्थान्तरन्यासः ॥२३॥ ॥ २३ ॥ ॥ २३ ॥

विपांडुभिरिति॥ कदंबानिलशब्देन वर्षर्तुरुपलक्ष्यते। स एव भर्ता तस्यात्यये विरहे म्लानतया निर्जलतया दुर्बलतया च विपांडुभिः च्युता निर
हिता निजा चिराभागुणा विद्युल्लता एव हेममाला मालिनी सुवर्णस्रजा आभरणानि येषां तैः पयोधरैरंबुदैः पयोधरैः स्तनैर्लक्षिता नो समन भेदपयो
5 धराविति वैजयंती। दिश एव वध्वस्तासां कृशता नर राजतेति न। किंतु राजत एव युक्तत्वात्। आर्त्तनिर्मुदिते हृष्टे प्रोषिते मलिना कृशेति सम
रणाश्वेति भावः। सामान्यतः प्रसक्तस्य मरालसंकाशस्य मनवैकेनन नञा तु त्राद्वितीयेनापि निषेधाद्यथाह वामनः। संभाव्य निषेधनिवर्त्तने द्वौ
प्रतिषेधौ इति अत्र रूपकालंकारः स्फुट एव॥२४॥ विहायेति। मदात्ययात् मदक्षयात् दरक्तकंठस्य आव्यक्तस्वरस्य कंठशब्देन तज्जः स्वरो
लक्ष्यते। शिखंडिसंबंधिनी उदिते उच्चस्वरे रुते कूजिते वांछामभिवणेच्छां विहाय श्रुतिः श्रोत्रं कर्णशब्दग्रहो श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवइत्य

विपांडुभिर्म्लानतया पयोधरैश्च्युता चिराभागुणहेममालिभिः। इयं कदंबानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते॥२४॥ विहाय
वांछामुदिते मदात्ययादरक्तकंठस्य रुते शिखंडिनः। श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाः प्रियत्वेऽधिकृता न संस्तवाः॥२५॥ अमी
पृथुस्तंबभृतः पिशंगतां गता विपाकेन फलस्य शालयः। विकासि वप्रांभसि गंधसूचितं नमंति निघ्रातुमिवासितोत्पलं॥२६॥

मरः। उन्मदहंसनिःस्वनं मत्तमरालकूजितं श्रयति रज्यति। नन्वत्र कांडे कुथं पतिक्षितपरिहारेणापि [illegible] विते प्रीसुरयइत्याशंक्यार्थांतरं न्यस्यति। गुण इति।
प्रीणातीति प्रियः इगुपधज्ञाप्रीकिरः क इति कप्रत्ययः। प्रियत्वे प्रीतिकरणत्वे गुणा अधिकृताः नियुक्ताः संस्तवाः परिचयः नाधिकृतो न समर्थ इत्यर्थः। प्रेमा
धाने गुणत्वं प्रयोजकं न परिचय इत्यर्थः॥२५॥ अमीति॥ अमी पृथुस्तंबान् गुच्छान् बिभ्रतीति पृथुस्तंबभृतः। स्तंबो गुच्छः स्तृणादिन इत्यमरः।
फलस्य प्रसवस्य विपाकेन परिणामेन पिशंगतां गताः शालयः व्रीहिविशेषाः। वप्रांभसि केदारोदके। पुंनपुंसकयोर्वप्रः केदारः क्षेत्रम् इत्यमरः। वि
कासि विकचं गंधसूचितं गंधेन सूचितं लक्षितं मसितोत्पलं निघ्रातुमाघ्रातुमिव नमंतीति पाठे द्रष्टुमिवेत्यर्थः। निर्वर्णयितुमित्यर्थः। धार
निर्वर्णनं तु निध्यानं दर्शनालोचनेक्षणमित्यमरः। अत्र फलभारानमितस्य नमनस्य निघ्राणं फलमुत्प्रेक्षते इति फलोत्प्रेक्षा॥२६॥

अथ चतुर्भिः कालापकमाह ॥ मणालिनीति ॥ मणालिनीनां पद्मिनीनां त्विषा हरितवर्णेनेत्यर्थः । अनुरंजितं तद्वर्णतामापादितमित्यर्थः । तथा अंभो
जपलाशशोभया पत्रदलकांत्या अरुणेनेत्यर्थः । विभिन्नं मिश्रितं तथा स्फुरच्छालिशिखापिशंगितं स्फुरद्भिः चलमाग्रैः पिंगलीकृतमित्युनाना
वर्णत्वादुतं विलापितं इन्द्रचापभूतमितियावत् । अहिद्विषो वज्रशत्रोः । सर्पवत्रासुरस्य वहि रिति चेलयंतो । धनुःखंडमिव स्थितं । नित्यसमासे उत्तरपद
स्य स्थितिविसर्जनीयस्य [illegible] लेष तं पयो वप्राभः अपदिश्य धावतामित्यिंगां गिना संबंधः । अत्र धनुःखंडस्य द्युतस्य लोके प्रसिद्धत्वादुत्प्रेक्षेयं
नोपमा ॥ २७ ॥ विपांडुभिरिति ॥ विपांडुभिः धूम्रं अनिलोद्धूतं अनिलेनोत्क्षिप्तं । सप्तसप्तपलाशानि पर्वसु येषां ते वृक्षाः सप्तपलाशाः केचि
त्संख्याशब्दस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवदित्युक्तं । तेषां पुष्पाणि सप्तपलाशानि द्विहीनं प्रसवे सर्वे इत्यमरः । फलेलुगित्य

मणालिनीनामनुरंजितं त्विषा विभिन्नमंभोजपलाशशोभया ॥ पयः स्फुरच्छालिशिखापिशंगितं द्रुतं धनुःखंडमिवाहिविद्विषः ॥ २८ ॥ पत्व घटितः पाठः
विपांडु[illegible]संव्यानमिवानिलोद्धुतं निरुंधतीः सप्तपलाशजं रजः ॥ अनाविलोन्मीलितबाण[illegible]चक्षुषः सपुष्पहासा वनराजियोषितः ॥ २९

णालुक् । तेषु जातं यद्रजः परागं संव्यानमिवोत्तरीयमिव । संव्यानमुत्तरीयं चेत्यमरः । निरुंधती निवारयंती अनाविलानि अकलुषाणि उ
उन्मीलितानि च बाणानि नीलसैरेयकाणि चक्षुंषि यासां तास्तथोक्ताः । नीलस्यार्थगलोदासी बाणामोदनपाक्ययीति धन्वंतरिः ।
पुष्पाणि हासा इव तैः सह वर्तंत इति सपुष्पहासा वनराजयो योषित इव वनराजियोषितः । अप्यपदिश्येत्यन्वयः । अत्र संव्यानमिवे
त्युपमैव । अन्यत्रोपमितसमासे [illegible] लिंगं यथा काविलकेन चित्कामुकेनाक्षिप्तस्तनांशुकं निरुंद्धं तेन तद्वदिति भावः ॥ २९ ॥ ॥

कि०व०

।।६२।।

अदीपितमिति।। वैद्युतजातवेदसा वैद्युताग्निना अदीपितमप्रकाशितं। विद्युत्प्रकाशस्य दृष्टिप्रतिघातकत्वात्तद्राहित्यं सद्गुण इति भावः। सि

तांबुदानां छदैः खंडैः स्तिरोहिता आतपं नवच्छिनाधीनाप्यातपबाधइति भावः। सांतरं वारिशिकूरे विरलांबुकणेस्ततां तरं व्याप्त

6 मध्यं सरोजवायुभिः शिवं रम्यं नभोवर्त्म वापदिश्य धावतामिति स्वभावोक्तिरलंकारः।।२९।। सितछदानामिति।। अदिपे

श्यधावतामिति पूर्वश्लोकत्रयोक्तं पयःप्रभृतिवस्तूपदिश्य धावतामभीषां सितछदानां पतत्रिणां हंसानां रहंसोस्तु श्वेतगरुतइत्यम

रः। रूतैः शब्दैर्ग्रथिताः दृढाः। ग्रथितं गुंफितं दृढमित्यमरः। वारिदरोधनिर्गता मेघोपरोधनिर्मुक्ताः। अनए वामलाः प्रसन्नाः दि

तः

अदीपितं वैद्युतजातवेदसा सितांबुदछेदतिरोहितातपं।। ततांतरं सांतरवारिशीकरैः शिवं नभोवर्त्मसरोजवायुभिः।।२९।।

सितछदानामपदिश्य धावतां रुतैरमीषां ग्रथिताः पतत्रिणां।। प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः।।३०।।

विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः।। असक्तमूधांसि पयःक्षरंत्यमूरूपायनानीव नयंति धेनवः।।३१।।

शः परस्परालापं प्रकुर्वत इव दिक्ष्वामेघोपरोधनिर्मुक्ताश्चिरादुछ्रसिताइति हंसकूजितव्याजेन परस्परमालापंतीत्युत्प्रेक्षा।।३०।। विहारेति।

विहारभूमेः अपरात्रगोचरादित्यर्थः। आगच्छतइति शेषः। अभिघोषमुत्सुकाः वत्सं प्रत्युत्कंठिताः। वत्सप्रेम्णा इति भावः। घोष

विषादितः माभीरपल्लीस्यादित्यमरः। च्युताविभुक्ता यूथानां कुलानां पंक्तिः श्रेणीर्बंधो याभिस्तास्तथोक्ताः। सजातीयैः कुलं यूथ

मित्यमरः। अमूर्धेनवः असक्तमप्रतिबंधं पयःक्षरंति स्रवंति। वत्सस्मरणात्स्नुवानाइत्यर्थः। क्षरतेः शतृप्रत्ययः। ऊधांसि

शरीरजेभ्यो भ्यस्येभ्यो उपायनानीवा तितोषकाणीवेत्युत्प्रेक्षा। नयंति प्राप्यंति यथा लोके कुतश्चित्प्रवासादेत्समातरः। किं चित्प्रायमानयंतित द्वदि

जगदिति॥ जगत्प्रसूतिर्जगत्कारणं। आज्यादिहविर्दुहित्यर्थः। जगतामेकपावनी मुख्यशोधनी व्रजोपकंठं गोष्ठांतिकं। दूरांतिकार्थेभ्यो द्वि
तीया चेति द्वितीया। उपकंठांतिकाभ्यर्णाभ्यग्रा अप्यभितोव्ययमित्यमरः। तनयैर्वत्सैरुपेयुषी संगता। उपेयिवाननाश्वाननूचानश्चे
ति क्वसुप्रत्ययांतो निपातः। उगितश्चेति ङीप्। असौ गवां समितिः संहतिर्मंत्रैरप्यतुषादिभिः। मंत्रो हृगादिर्गुह्योक्तिरिति वैजयंती। सं
हिता योजिताहुतिरिव समग्रां द्युतिं रूपैति। आहुतिरपि जगत्प्रसूतिर्जगदेकपाविनी च। अग्नौ प्रोक्ता हुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मरणादिति भावः॥३१॥ कृतेति॥ जितबर्हिणध्वनौ केकानुसारिणीत्यर्थः। एतेन

जगत्प्रसूतिर्जगदेकपावनी व्रजोपकंठं तनयैरुपेयुषी॥ द्युतिं समग्रां समितिर्गवामसावुपैतु मंत्रैरिव संहिताहुतिः॥३१॥
कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने॥ इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदंबकं॥३२॥

षड्जस्वरप्रायं गायंतीति गम्यते। यथाह मातंगः। षड्जं मयूरो वदतीति। गाः पांतीति गोपास्तेषां भार्या गोप्यः। आतोनुपसर्गे क इति
कप्रत्ययः। पुंयोगादाख्यायामिति ङीप्। ता एव जनः। सुरक्तो मधुरकंठो यो गोपीजनो बहुवीजनस्तस्य गीतिनिःस्वने कृतावधान
मेकाग्रचित्तं इदं पुरोवर्ति मृगीकदंबकं कुरंगयूथं भूयसीमतिमहतीं जिघत्सामत्तुमिच्छां। अदेः सनंताद् उप्रत्ययः।
लुङ्सनोर्घस्लृ इति घस्लादेशः। अपहाय हित्वा सस्यं नाभ्येति नोपैति। गीतासक्त्या क्षुधामपि न गणयतीत्यर्थः॥३२

असाविति॥ शिरसाग्रेण मूर्ध्ना नमन् प्रणयन्नपि अनास्थापरया अनादरपरया सरोरुहिण्यावधीरितो ऽवज्ञातः। अंभसा सहचरभूते
नेति भावः। शुष्यन्नसौ कलमः शालिविशेषो मनोभुवा तप्त इव कामार्त इवाभिपांडुतामुपैति। अत्र मनास्थापरयेति प्रकृतसरोरुहि
णीविशेषणसामर्थ्यादप्रस्तुतनायिकाप्रतीतेः समासोक्तिरुत्तिष्ठमानायाः सरोरुहिण्याः प्रतीयमानाया नायिकायाश्च भेदे
भेदलक्षणातिशयोक्तिमहिम्ना अवधारणप्रियासंबंधनिर्वहंती। मनोभुवा तप्त इवेत्युत्प्रेक्षा निर्वाहितस्य केत्यतिशयोन्नय
नुप्राणितासमोत्त्युपमयोरंगांगिभावेन संकरः॥३४॥ अमी इति॥ समुद्धृतसरोजरेणुनेति सौरभ्योक्तिः। हृतासारकणेनोपात्तांबु

असावनास्थापरयावधीरितः सरोरुहिण्या शिरसा नमन्नपि॥ उपैति शुष्यन्कलमस्सहांभसा मनोभुवा तप्त इवाभिपांडुतां॥३४॥
अमी समुद्धूतसरोजरेणुना हृता हृतासारकणेन वायुना॥ उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः॥३५॥
मुखैरसौ विद्रुमभंगलोहितैः शिखाः पिशंगीः कलमस्य बिभ्रती॥ शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोनुगच्छति॥३६

कणेनेति शैत्योक्तिः। धारासंपात आसार इत्यमरः। वायुना हृता आकृष्टा अमी शिलीमुखा भृंगा आपदामुपागमे राजादिभयागमे दुश्च
रिता दुष्कर्माणश्चोरादय इव गम्यत इति गंतव्यप्रदेशाद्देशोपापगमे गतिमिति वेजयंती। निश्चेतुं नालं न समर्थाः। एकत्र वायोः सार्वत्रिकत्वे
नानिश्चयादन्यत्र भयांधत्वादिति भावः॥३५॥ मुखैरिति॥ विद्रुमभंगलोहितैर्मुखैः। पिशंगीः कलमस्य शिखाः शाल्यग्राणि बि
भ्रती। व्यक्तशिरीषकोमला विकसितशिरीषसवर्णेत्यर्थः। असौ शुकावलिर्गोत्रभिदो धनुषः श्रियमनुगच्छति अनुकरोति॥
नानावर्णत्वादिंद्रधनुरिव भातीत्युपमालंकारः॥३६॥ ॥ ३६ ॥ ॥ ३६ ॥

इतीति॥ अथ तत्र तस्मिन्पूर्वोक्ते पक्षे इतीत्थं कथयति सति नातिदूरादिषद्दूरः ईषदर्थः। नञर्थस्य नञ अशब्दस्य सुप्सुपेति समासः। पिहितोच्छ्ररश्मि
बिंबस्तिरोहितार्कमंडलइत्योत्र सोक्तिः। सनगाधिराजो हिमाद्रिर्विगलितो जलभारो येषां ते तथोक्ताः। अत एव शुक्लो भासः। द्वयोरन्यतरस्य वि
शेष्यत्व विवक्षायां विशेषणसमासः। तेषां विगलितजलभारशुक्लभासामम्बुमुचां निचयइव मेघवृंदमिव ददृशे दृष्टः॥३७॥ तमिति।
जिष्णुरर्जुनोऽतनुभिर्महद्भिर्वनराजिभिः श्यामिताः श्यामला उपत्यकाः आसन्नभूप्रदेशा यस्य तं तथोक्तं। उपाधिभ्यां त्यकन्नासन्नारू
ढयोरित्यकत्प्रत्ययः। उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः। उपरि हिमानीभिर्हिमसंघातैर्गौरं शुभ्रं तं नगं हिमाद्रिमासा

इतिकथयति तत्र नातिदूरादथ ददृशे पिहितोच्छ्ररश्मिबिंबः॥ विगलितजलभारशुक्लभासां निचयइवाम्बुमुचां नगा ॥
धिराजः॥३७॥ तमतनुवनराजिश्यामितोपत्यकांतं नगमुपरिहिमानीगौरमासाद्य जिष्णुः॥ अपगतमदरागस्यानुस ॥
स्मार लक्ष्मीमसितमधरवासो बिभ्रतः शिरपाणेः॥३८॥ ॥इतिश्रीकिरातार्जुनीये महाकाव्ये भारवीकृतौ शरद्वर्णनो नाम चतुर्थः॥

द्यप्राप्य। अपगतो निवृत्तो मदरागो यस्य तस्यासितं नीलं अधरवासोन्तरीयं बिभ्रतः। सीरं हलं पाणौ यस्य तस्य सीरपाणेर्हलायुधस्य। सप्तम्युप
मानेपूर्वपदस्येति बहुव्रीहिः। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति सप्तम्याः परनिपातः। हलायुधो नीलांबरो रौहिणेयस्तालांको मुसली
हली। संकर्षणः सीरपाणिरित्यमरः। लक्ष्मीमनुसस्मार। अत्र सदृशदर्शनेन सदृशान्तरस्मरणात्स्मरणालंकारः। सदृशं सदृशानुभावाद्य
त्स्मर्यते तत्स्मरणमिति विद्याधरः॥३८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
इतिश्रीपदवाक्यप्रमाणपारावारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते किरातार्जुनीयव्याख्याने घंटापथसमाख्याने चतुर्थः सर्गः॥ ॥

॥ अथ चतुर्थसर्गकिरातः समाप्तसटीकः ॥ शुभ भवतु ॥ ॥

5

॥ ॥ किरातस्यपंचमसर्गसटीकः प्रारंभोयंम् ॥ ॥

१०

अथहिमवर्णनमारभतेतत्पंचदशभिः कुलकमाह। अथेति। अथसोऽर्जुनः मेरुः महीभृतो हेमाद्रेर्जेयायानुपार्थवानुशब्दोऽत्रवितर्केऽनुप...
या वितर्केऽचेत्समरः रभसावेगः रभसोऽत्र हर्षयोरितिवैजयंती। तद्दयस्य रभसातीव्रा उत्कंठयेतियावत। अशरोदिशा दर्कप्रसेयः। दिगंतानां दिदृ
क्षया द्रष्टुमिच्छया वा नभोऽन्तरिक्षं विलंघयितुं अतिक्रमितुं वा समुदितं समुत्पन्नमिवस्थितमित्यर्थः। उच्छ्रितं उन्नतं हिमस्याचलं हिमा
चलं अभिययौ। अनिर्द्धारितानेकफले आनस्यगुणनिमित्ताउदितादिनाक्रियो सापेक्षासो चव्यंजकाप्रयोगात्प्रतीयतइतिसंक्षेपः

अथजयाय नु मेरुमहीभृतो रभसया नु दिगंतदिदृक्षया॥ अभिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलंघयितुं नभः॥१॥
तपनमंडलदीपितमेकतः सततनैशतमोवृतमन्यतः॥ हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा॥२॥

उन्नतविलंबितं वृत्तं द्रुतविलंबितमाह। नभौ भरौ द्रुतविलंबितमिति लक्षणात्॥१॥ तपन इति। पुनः एकतः एकस्मिन्भागे सार्व
विभक्तिकस्तसिः तपनमंडलेन दीपितं प्रकाशितं अन्यतः अन्यस्मिन्भागे सततेनाविच्छिन्नेन नैशेन निशाभवेन तम
सावृतं एकत्रान्यत्रा आवान्यत्रसंगतमित्यर्थः। अत एव पुरोऽग्रे सहितेन अट्टहासेन विभिन्नतमिस्रचयं निरस्ततमस्तो
मं तथा गजचर्मणा अनुगतं पश्चाद्व्याप्तं पश्चात्सहशायेऽग्निसमरः। शिवमिव स्थितं नयननेजः। प्रसारोप्यस्यकारणइवकुत्र
चिस्पति समाप्यते उल्लिमहत्त्वातिशयोक्तिः॥२॥

क्षितीति ॥ परस्परे अन्योन्यं कुर्मस्यति हो रसर्वनाम्नो द्विर्भवतः इति वक्तव्यात् परशब्दस्य द्विर्भावः समासवच्च बहुलं यसमासवत्त्वं प्रथमैकवचनं न दा पूर्वपदस्य बहुवचनं व्यात्प्रथमैकवचनं कस्कादित्वाद्विसर्जनीयस्य सत्वं बहुवचनं चान्यान्यशब्दवत् यथा माघे अन्योन्यं पुष्करेरा स्पृष्टं तदिति अदृष्टाः परस्परे येस्ते अदृष्टपरस्परास्तैस्तथोक्तैः । क्षितौ नभसि सुरलोके च निवसंतीति तैस्तथोक्तैः । भूर्भुवःस्वर्लोकवासिभिरित्यर्थः । कृतानि कृतं कृतास्पदं अतएव शंभुना विभुतां स्वसामर्थ्यं प्रथयितुमिव निर्मितं जगतां प्रतिनिधिं प्रतिनिधित्वमिव स्थितानीत्युत्प्रेक्षा । प्रतिकृतिः । चपुंसि प्रतिनिधिरुपमोपमानं स्यात् इत्यमरः । त्रैलोक्यस्य यादृशीं उपमां परिकरः इत्येतिभावः ॥ ३ ॥ भुजगेति ॥ पुनश्च भुजगेन्

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ॥ प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शंभुना ॥ ३ ॥

[illegible margin note] अवेरी घस्तन तस्यता । [illegible] [illegible] धर्म [illegible] योग [illegible] त

भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना ॥ समुदितं निचयेन तडित्वतीं लघयता शरदंबुदसंहतिं ॥ ४ ॥ मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ॥ दधतमुच्चशिलांतरगोपुराः पुर इवोदितपुष्पवना भुवः ॥ ५ ॥

राजसितेन शेषधवलेन नभःश्रिता गगनस्पर्शात् कनकराजिभिः रेखाभिर्विराजिताः सानवो यस्य तेन तथोक्तेन अतएव तडित्वतीं शारदंबुदसंहतिं लघयता लघुकुर्वता तत्तुल्येनेत्यर्थः । अतएवोपमालंकारः । निचयेन शिखरेण समुदितं समुन्नतं ॥ ४ ॥ मणीति ॥ पुनश्च मणिमयूखचयाः अंशुकानीव पताकादिवत्तैर्भासुराः सुरवधूभिः परिभुक्ताः लतागृहा इव यासु तास्तथोक्ताः उच्चानि शिलांतराणि गोपुराणि वपुरद्वाराणि इव शिलांतराणि शिलामध्यानि यासु ताः उदिता ऊर्जिता निपुष्पाणां वनानि यासु ताः अतएव पुर इव स्थिताः भुवो दधतं ॥ ५ ॥ ॥ ॥ ॥ ॥

अविरतेति।पुनश्च अविरतमविछिन्नं उज्झितनवारिणाव एमिंल इत्यर्थः।अतएव विपांडवः नैरविरतो नवारिपांडुभिः अतएव हिमवसक्षत्वं संभवतीति भावः।पृथुनितंबविलंबिभिः अचिरद्युतितेजसा विरहितैर्विद्युत्तेजोरहितैः आरतनिःस्वनैः प्रशांतगर्जितैश्च अन्यथा पक्ष लहानिः स्यादिति भावः।पृथुनितंबविलंबिभिः महाकटकसंगिभिः।कटकोस्त्री नितंबोद्रेरित्यमरः।अंबुदैः उदितपक्षं संजातप क्षमिव स्थितं प्राक् छिन्नपक्षस्यापि हिमाद्रेः धवलांबुदसंबंधात्पुनः पक्षोत्पत्तिमुत्प्रेक्ष्यते॥६॥ दधतमिति।पुनश्च आकरखनि र्येषाम् स्तीति ध्योनित्येन साकरिभिः आकरजैः।खनिः स्त्रियामाकरः स्यादित्यमरः।करिभिर्गजैः दंतैः क्षतैः रुग्णैः समवतारेषु ती र्थेषु समैर विषमैः असमैः असदृशैः तटैः उपलक्षिताः।तथा महितांभसः श्लाघ्योदकाः अतएव विविधेभ्यः कामेभ्यः अवगाहना

अविरतोज्झितवारिविपांडुभिर्विरहितैरचिरद्युतितेजसा॥उदितपक्षमिवारतनिःस्वनैः पृथुनितंबविलंबिभिरंबुदैः॥६॥
दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः॥विविधकाममहितामहितांभसः स्फुटसरोजवनाजवनानदीः॥७॥
नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाश्मनां॥निहितसांध्यमयूखमिव क्वचिन्निचितकांचनभित्तिषु सानुषु॥८॥

द्युपायेभ्यो हिताः अनुकूलाः चतुर्थी तदर्थ इत्यादिना समासः।स्फुटितानि विकचानि सरोजवनानि यासु ताः जवनाः वेगवतीः।द्युचंद्र मेत्यादिना युच् प्रत्ययः।नदीः दधतं तः यमकं च सनुप्रासभेदत्वाद्यमेवालंकारः।अर्थालंकारस्तत्वन्वेष्यः तस्यातिदुष्करत्वादस्मयो चोपिनादियते।तदुक्तं प्रायशो रामके चित्रे रसवद्भिर्न गम्यते॥७॥ नवेति॥पुनश्च नवानि विदानिद्राणि चयानि जपाकुसुमानि तांम्रपु ष्पिका पुष्पिका पुष्पाणि तेषां त्विषइव त्विषा येषां उपुष्पं जपापुष्पं ताम्रपुष्पिके तिवाग्भटः द्युतिमतां महाश्ममामणीनां पद्मरागाणा मित्यर्थः।विशेषणसामर्थ्यान्निकरेण समूहेन हेतुना क्वचिन्निचिताः संघटिताः कांचनभित्तयो येषु तेषु सानुषु निहिता रचिताः सां ध्याः संध्यायां भवाय स्मिन्न्तमिव स्थितं कांचनभित्तिषु पद्मरागप्रभाप्रसारादुदितसंध्यातमिव भातीत्युत्प्रेक्षा॥८॥ ॥ ॥

पृथ्विति ॥ पुनश्च पृथुभिः कदंबकैः नीपकुरंबकैः विजितं कदंबमाहुः सिद्धार्थे नीपे च निकुरंबके सुनय आपि विश्वः ग्रथित ■ मालैर्बद्धपंक्तिभि
स्तमालवनैस्तापिञ्छवनैराकुलं आकीर्णः । कालस्कंधस्तमालस्यात्तापिच्छोपीत्यमरः । लघु तुषारमल्पासीकरं यत्तुषारजलं हिमोदकं तास्य्यो
तति वर्षतीति तं तथोक्तं । तुषारो हिमसीकरावितिशाश्वतः । सदानाः समदाः सदानात्ताः शोभना नाग्रयेयदंतिनः तेषां तायेन तं तथोक्तं ॥ ९ ॥
परित्यक्ताः रहित इति ॥ रहितरत्नचयान् रत्नचयान् रहिताः रिक्ताः रत्नचयायैस्तैस्तान् रत्नशिलारहितान् शिलोच्चयान् शिखराणि नदधतां भवनाः अपल ता
लतागृहरहिताः दरीभुवा गुहाः प्रदेशाः भेदर्दरी तु कंदरो वा स्त्री देवखातबिले गुहे समरः । किंतानि पुलिनानि अंबुरुहाणि चयासांताः

पृथुकदंबकदंबकराजितं ग्रथितमाल तमालवनाकुलं ॥ लघुतुषार तुषारजलश्च्युतं धृतसदानसदाननदंतिनं ॥ ९ ॥
रहितरत्नचयान्नशिलोच्चयानपलताभवनान्नदरीभुवः ॥ विपुलिनांबुरुहान्नसरिद्वधूरकुसुमान्दधतन्नमहीरुहः ॥ १० ॥
व्यथितसिंधुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः ॥ फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ॥ ११ ॥

सरितावधूरिव सरिद्वधूर्न दधतं अत्र सरितां वधोपम्यात्पुलिनानां अंबुरुहाणां वदनजघनवदौपम्यं गम्यते । अकुसुमान्म
हीरुहो वृक्षान्न दधतं । किं तु रत्नादिसंपन्नादनेव शिलोच्चयादीन्दधतमित्यर्थः । महाविभाषाया नात्र नञ्समासः ॥ १० ॥ व्यथि
तेति ॥ पुनश्चानीरशनैर निर्मेखलैः सरशनैरित्यर्थः । घनैर्निबिडै अमरलोकवधूजघनैर्व्यथितसिंधुं क्षोभितनदीकं अयम
परः स्वर्ग इति भावः । रम्यालतावीरुधो बकुलाः केसराश्चयेषां तैस्तथोक्तैः । विशारदो मधुगंधो बकुलः सचैसर इति वैद्यकं ।
फणभृतां कुलैरभितस्ततं व्याप्तं तथा विततं तविस्तृतं ॥ ११ ॥ ९ ॥ १२ ॥ १३ ॥

दयिताः प्रियाः

सइति॥ अनेकाश्चिन्तामणिप्रभा येषां तैस्तथोक्तैः हिमेनपांडुभिः शिखरैः ससुरचापं सेंद्रचापं अपपयो निर्जलः अतएव विशदः श्वेतं अपपयो विशदं
अविरलं देवान्निश्चलं अतः शिखरशंका भूदित्यर्थः। किं बुध्वनितेन गर्जितेन सूचितं अंबुमुचां चयं। अविरलमुपचितं अत्र कविकल्पि
तदृश्यात्। शिखरमेघसंदेहो मेघनिश्चयाभिश्चयात्तः संदेहोलंकारः॥१२॥ विकचवारिरुहमिति। पुनश्च विकचवारिरुहं भिस्वविकसिता
रविंदमित्यर्थः। ध्वनिसामर्थ्यात् कलहंसगणैः सह वर्तत इति सकलहंसगणं। कादंबः कलहंसस्यादित्यमरः। यद्वा कलाः सर्वे हंसगणाय
स्मिन्तत्तथोक्तं॥ शुचिनिर्यानिर्मलं मानसाख्यं सरो दधतं हतेर्ष्ययाकुतश्चिन्निमित्तात् कुपितये त्यर्थः। अगात्मजया पार्वत्या सकलहंस
विवादं सगणं सप्रमथं। गणाः संप्रमथाः ख्याता इति वैजयंती। शुचिमानसं अघविनिर्मुक्तं चित्तं शिवं वदधेतां एतेन सकलशैलबंध

सुरचापमनेकमणिप्रभैरपपयो विशदं हिमपांडुभिः। अविरलं शिखरैरुपबिभ्रतं ध्वनितसूचितमंबुमुचां चयं॥१२॥
विकचवारिरुहं दधतं सरः सकलहंसगणं शुचि मानसं। [illegible] अगात्मजया च हतेर्ष्यया सकलहंसगणं शुचिमानसं॥१३॥
ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना। मुहुरनुस्मरयंतमनुक्षपं त्रिपुरदाहमुमापतिसेविनः॥१४॥

कर्मादिना गापसन्त्व ध्माज लिवदायां बहि

तमुक्तं॥१३॥ ग्रहेति॥ दिवमभितो दिवोभितं अभितः परित इति द्वितीया॥ ग्रहाश्चंद्रादयो विमानानि। व्योमयानं विमानोस्त्रीत्यमरः।
तेषां गणान् ज्वलयता प्रदीपयता मितांद्रहस्य। औषधिजेन तृणविशेषजन्येन कृशानुना [illegible] हत्याकर [illegible] पेन अनुक्षपं प्र [illegible]
तिरात्रमीप्सार्थमव्ययीभावः। उमापतिसेविनः प्रथमादीनां तिबुद्धीत्या दिनादिकर्मकत्वात् त्रयाणां पुराणां समाहारस्त्रिपुरं [illegible] स्या
८दिनासमासः। पात्रादिभ्यः प्रतिषेधो वक्तव्य इति प्रतिषेधः। तस्य दाहं त्रिपुरदाहं मुहुरनुस्मरयंतं तेन च अधिगमर्थस्यादिना दाहमित्यत्र ष
ष्ठी किं न स्यात्। तस्याः शेषार्थविधानात्। शेषत्वस्याविवक्षितत्वादिति। अत्र कविसंमतसादृश्यात् स्मृतीतिस्मरणालंकारः॥१४॥

ताद्रिता

ब्रह्मरन्ति विघ्नती व्याधीनां तेलके: कथमेतदिति चेन्न

विततेति ॥ विततशीकरराशिभिर्विस्तृतकणसमूहैः उच्छ्रितैरुत्सर्पितैः कुतः उपलरोधेन विवर्तिभिरंबुभिः धृतसितव्यजनामिव गृहीतामलचामरा
मिव स्थितामिव सुरेक्षा [illegible] उन्नतसानुसमु[illegible] तामेहतीं जाह्नवीं गंगां दधतं ॥ १५ ॥ अनुचरेणेति ॥ अथानंतरं मंगलारंभे प्रक्रमकार्ये [illegible]थो
अथ्येस्य मरः धनाधिपतेरनुचरेण यक्षेण नगविलोकनेविस्मित[illegible]ः सोर्जुनः आदरात् प्रियंवचनं जगादेत्युक्तः गदनेर्गत्यर्थस्य द्वाहादि[illegible]
लात्प्रधानेकर्मणि लिट् । अपहभाषणदोषपरिहरति मुखरेति मुखरो वाचालस्तं अपहभाषण[illegible]परिहरति मुखरे ति मुखरता
वाचालत्वं अपहृत्य परिभो[illegible] पिता पीतियावत् । अवसरे आतुराकांक्षासमये विराजते । हि आकांक्षितमप्[illegible] पिबेत्यादिति भावः ॥ १६ ॥
अलमिति ॥ हिमनगो रैः शुभ्रैः शिरोभिः शिखरैः घनवर्त्मखं सहस्रधा कुर्वन्निति पाठः पुन्निवास[illegible]सुरेक्षाएव[illegible]ले लोधिपो हिमवान्विलोकि

विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्त्तिभिरंबुभिः ॥ दधतमुन्नतसानुसमुद्धतां धृतसितव्यजनामिव जाह्नवीं ॥ १५ ॥ कुलकं
अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः ॥ स जगदे वचनं प्रियमादरान्मुखरता वसरे हि विराजते ॥ १६ ॥ अलमे
ष विलोकितः प्रजानां सहसा संहतिमंहसां विहंतुं ॥ घनवर्त्म सहस्रधेव कुर्वन् हिमगौरैरचलाधिपः शिरोभिः ॥ १७ ॥ ॥
इह दुरधिगमैः किंचिदेवा[illegible]गमैः सततमसुतरं वर्णयंत्यंतरं ॥ अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परं ॥ १८ ॥

तोदृष्टमात्र एव प्रजानामंहसां संहतिं पापसंघातं सहसा विहंतुमलं समर्थः । पर्याप्तवचनं नेष्वलमर्थेषु इति तुमुन् । औपच्छंदसिकं वृ
त्तं ॥ अत्र[illegible] लक्षणोक्तं ॥ १७ ॥ इहेति ॥ इह अस्मिन्पर्वते असुतरं न भवतीत्यसुतरं दुस्तरमित्यर्थः ।
तं । अंतेर्यंतथैव शेषं त्वौपच्छंदसिकं सुधाभिरूचेमितिलक्षणात् ॥ १७ ॥ इह दुरधिगमैर्दुर्गमैरागमैः पुराणर्षिभिः किंचिदेव सततं वर्णयंति । न तु [illegible] चित्प्रत्यक्षे तं
खलु प्रत्ययः । अंतरं मध्यभागं पुरूर्वत्वतरं न त्वदुरधिगमे दुर्गमे आगमैः पुराणर्षिभिः किंचिदेव सततं वर्णयंति न तु [illegible]
णनिःशेषं ज्ञातुमशक्यत्वादिति भावः । किंतु अतिविपिनमतिगहनं दिग्व्यापिनं अमुं गिरिं परं पुरुषं परमात्मानमिव [illegible] परं केवलं प
रमव्ययमित्यर्थः केवलइति विश्वः । पद्मयोनिर्ब्रह्मयोनिर्ब्रह्मैव वेद नान्य इत्यर्थः । विद्या[illegible]लटावेतिणलादेशः ॥ अत्रोपमा
यमकयोः संसृष्टिः क्षमाचतुरंगरसपति । नैत्तितोगः क्षमा ॥ १८ ॥ ॥ १८ ॥ ॥ ॥ १८ ॥ ॥

रुचिरेति॥ असौ गिरिः रुचिराणि पल्लवानि पुष्पाणि च येषां तैस्तथाभूताः लतागृहा येषु तैस्तथोक्तैः। उपलसज्जलजैः जलराशिभिः करणैः उपकान्तं
कान्तसमीपे धृतिमतीः धैर्यवतीरपि समीपस्थानपि प्रियानवगणयतीः मानिनीरित्यर्थः। स्त्रियः संततमुत्सुकतां नयति [illegible]लितां सा मान्तु
ग्रथिशिथिलयतीत्यर्थः। अथवा उपकान्तं धृतिमतीः तुष्टिमतीरपि सुरतरसात्पिपुनरपि उत्सुकतां नयतीत्यर्थः। उभयत्राप्युद्दीपकत्वा
दतिशयोक्तिः वृत्तमुक्तं॥१९॥ सुलभैरिति॥ नयवता नीतिमता अयवता भाग्यवता च सुलभैर्नान्यैरमनैरित्यर्थः। अयः शुभावहो विधि
रित्यमरः। निधीनां महापद्मादीनां महापद्मश्च पद्मश्च शंखो मकरकच्छपौ। मुकुंदकुंदनीलाश्च खर्वश्च निधयो नव इत्यमरः। गुह्यकानां चाधिपः कुबे
रस्तं रमयंतीति तथोक्तैः। कर्मण्यण्। परमैरुत्कृष्टैर्धनैः करणैरमुना क्षितिभृता अतिभृता आपूर्णा सती मही जगती स्वर्गपाताललोकोऽस

रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः। नयति संततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः॥१९॥
सुलभैः सदा नयवताऽयवता निधिगुह्यकाधिपरमैः परमैः। अमुना धनैः क्षितिभृताऽतिभृता समतीत्य भाति जगती जगती॥२०॥
अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलां। अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः॥२१॥

मतीत्य अतीत्य भाति अमानुषैरपि दुर्लभा संपदोऽत्र संभवतीति भावः। अत्र धनाधिक्यातिपदार्थस्य विशेषणगत्या जगदति
क्रमणहेतुत्वोक्त्या काव्यलिंगं तस्य यमकेन संसृष्टिः। प्रमिताक्षरावृत्तं प्रमिताक्षरा सजससैरुदितेति लक्षणात्॥२०॥
अखिलमिति॥ अमुष्य गौरीगुरोः हिमवतः इदमखिलं त्रयाणां भुवनानां समाहारस्त्रिभुवनमपि तद्धितार्थेत्यादिना समासः। पा
त्रादित्वात्स्त्रीत्वप्रतिषेधः। तुलां साम्यं नैतीति मन्ये यद्यपि जनैरविदितविभवो ज्ञातमहिमा भवानीपतिः सदा एनं गिरिं व
सति अस्मिन्वसतीत्यर्थः। उपान्वध्याङ्वस इति कर्मत्वं प्रभावत्वं स्वशरविरतिर्ननौ रौप्रभा अतोऽयं धर्मक्षेत्रमिति भावः॥२१॥

रा

वीतेति। वीते निवृत्ते जन्मजरसी यस्य तद्वीतजन्मजरसं तस्य वीतजन्मजरसः। जराया जरसन्यतरस्यामिति जरसादेशः। अत्र तदन्तविधिरिष्टः। जर
सादेशेव भाषभाष्ये, स्वयंसत्रकारमतेयत्नुतापकास्वेन स्यादेशबाधकत्वाश्च तथाहि यङ्ः सिउ सामिनात्स्याइ तिस्यादेशबाधकेना त्वपरत्वा
स्वरत्वाबाधनं भवेत् तदेपि मउस्योर्नपुनः उ हिंसंभवति। मतद्वयेपि तन्मुत्यंङ् सियस्पूर्वबाधनं परत्वात् जरसादेशस्तस्मात्स्यादेशबाध
नान्नुलापकंच यत्रकाङ् स्यापीवादेशाविना दितिईकारदीर्घयोस्तत्र वैयर्थ्यं तन्नैवि ना एत्वसवर्णदीर्घ च स्तुपसि द्धूर्नवैयतः व्य
र्थस्त्वीक्षरस्याणाङ्गमैतत् तलापकं फणीस्वातंत्र्या। जरसादेशं जगो पूर्वस्य बाधनात् समर्थनप्रपंचस्तु भाष्यकैय्यटयोः स्फुटः एवं

वीतजन्मजरसं परं शुचि ब्रह्मणः पदमुपैतुमिच्छतां। आगमादिव तमोपहादितः संभवंति मतयो भवच्छिदः ॥२२॥

चयदत्र जरस इति केषांचित्पाठं तरकल्पनं तदज्ञानविजृंभितमेव ब्रह्मणः परमात्मनः संबंधि परमुत्कृष्टं शुचि निष्कलं
कूपं धमं इति पदस्थानं तादात्म्यलक्षणं मुक्तिमित्यर्थः। उपैतुं प्राप्तुमिच्छतां मुमुक्षूणामित्यर्थः। आगमात् शास्त्रादिव तमो
पहात् इति तमोपहादविद्यानिवर्तकात्। अपेक्लेशतमसोरिति ङप्रत्ययः। इतः अस्माद्द्रिरेर्भवच्छिदं तीति भवच्छिदः
संसारनिवर्तकाः सत्सूद्विषे त्यादिना क्विप्। मतयस्तत्त्वज्ञानानि संभवंति क्षेत्रविशेषस्यापि ज्ञानोत्पादकत्वादि
तिभावः। न केवलमयं भोगभूमिः किंतु मुक्तिक्षेत्रमपीति तात्पर्यं रथोद्धतावृत्तं लक्षणं रोनराविह रथोद्धता लगावि
ति॥२२॥

दिव्येति॥ अस्मिन् गिरौ चरणलाक्षारागैः सह वर्त्तन्ते ता स्तथोक्ताः धेनुकपुष्पापितादिबंधेषु सपावकस्त्री पादतलस्पर्शो द्रागा क्रिता इत्यर्थः।
निपतिताः व्यानतकरले स्त्रीणामधोमुखत्वात् भ्रष्टाः पुष्पापीडाः कुसुमशेखरा यस्मात्तास्तथोक्ताः। शिखास्थापीडशेखरा वित्यमरः। पी
२ डा भाजो विमर्दभाजो भंगिनिरित्यर्थः। भ्रामस्रंसखोलिताः सर्वत्र कुटिभ्रमणसंभवादिति भावः कुसुमैश्चिताः कुसुमान्विता इत्यमा
जो रातिक्रिकरणेषु स्तनभुजाघनयनानां शय्यातलस्थापिता न्मर्दनाय कुसुमास्तता इत्यर्थः। दिव्यस्त्रीणां संबंधिन्यः शैलेऽस्मा
रिवक्षितिशय्यास्तल्यामिसंज्ञायां समजनिषदेत्यादिना क्यप्। शागपातेरागोद्रेके सतियः साप्रांसः सतस्थः सुरतविशेषस्ते
जाता वेदकस्च नं सुरतविशेषाणित्यर्थः। शंसंतिसूचयंतिविवृण्वती त्यर्थः। अत्र लाक्षारागादि पदार्थानां सुरतविशेषः शंसनं मतिविशेष

दिव्यस्त्रीणां सचरणलाक्षारागारागापातेनिपतितपुष्पापीडाः॥ पीडाभाजः कुसुमचिताः साशंसं शंसंत्यस्मिन् सुरतविशेषं शय्याः॥२३॥

णगत्या हेतुत्वोन्त्या काव्यलिंगं संघमंकेन संसज्यते जलधरमालावत्तं धेनुकादिलक्षणं तु रतिरहस्ये। न्यस्तहस्तयुगलानिजपदे यो
षिदेति कटिरुरूटवल्लभा। आनतायदिशनैरधोमुखी धेनुकं वृषवदुन्नतेप्रिये॥१॥ स्वभुयां च मतिवल्लुभे पिया यो विदा वर्तितवलु भापितं
व्यानतं रतमिदं यदिप्रियास्यादधोमुखचतुष्पदाकृतिः॥२॥ तत्कटिसमधिरूढवल्लभस्या दृषादिपश्चसंस्थितस्थितः॥ क्षितिः चक्र
वद्भ्रमतिकुंचितांघ्रिका भ्रामरं निजघनेसमुल्लगे॥३॥ सर्वतः कटिपरि भ्रमणाय दिशैर्वपूर्वमिदमुक्तमुक्तं। भुगत स्तनभुजास्यमस्तकी पु
न्नतां स्वयमधोमुखीस्त्रियां॥४॥ क्रामसिवकरदृष्टमेहनेवल्लभेकरिपदं तदुच्यते। प्रसोति तेपाणिपादेन शय्यास्पर्शि मुखारसि॥५॥
उन्नतायाः स्त्रियाः कस्यां मार्जारिकरणं विदुरितिग्रंथांतरे॥२३॥

गुणइति॥ जगताम्प्रहिते जगाद्भिः पूज्यमाने। मतिबुद्धौ सादिना वर्त्तमाने क्तः। क्तस्य च वर्त्तमाने इति षष्ठी। अत्र हिमवत्योषधयस्तरूपत्ये तिभिन्न
यशालिन्यधिपतौ नीतिसंपन्ने राज्ञि श्रियः संपद इव गुणसंपत्या। अन्यत्र संध्यादिगुणसंपदा परं महिमानं उभयत्रापि प्रकाशसामर्थ्यं सम
धिगम्य ज्वलितुं न विरमंति। अविरतं ज्वलयंतीत्यर्थः। अन्यत्र रात्रादीवे (?) चेति भावः॥२४॥ कुररीति॥ इहाद्रौ कुररीगणः। उत्क्रोशः कु
ररोस्समाविस्समरः। रूतरवः तरवः कुसुमैरानताः कमलं सकमलं सपद्मा। कमलं जलपद्मयोरिति विश्वः। किं चैरणाः द्रुमाः आवरणं व
यासां ताः। वरणावरणाः वरणो वरणः सेतुस्तिक्तशाकः कुमारकइत्यमरः। सनलदाः सोशीराः अभयं नलदं सेव्यमूलस्यो शीरमस्त्रि
ल१ यामित्यमरः। अनलं संतापं घृतिरवं उपयंतीति इति अनलदाः सनलदाः श्चताः अनलदाः सिंधवः करिणां मुदे भवंतीति शेषः। नकुत्रापितु

गुणसंपदा समधिगम्य परं महिमानमत्र महिते जगतां। नयशालिनि श्रिय इवाधिपतौ विरमंति न ज्वलितुमोषधयः॥२४॥ कुर
रीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलं। इह सिंधवश्च वरणावरणाः करिणां मुदे सनलदानलदाः॥२५॥ सादृश्यंग
तमपनिद्रचूतगंधैरामोदं मदजलसेकजं दधानः। एतस्मिन्मदयति कोकिलानकाले लीनालिः सुरकरिणां कपोलकाषः॥२६॥

न वैपरीत्यमिति भावः॥२५॥ सादृश्यमिति॥ एतस्मिन्नद्रौ अपनिद्रचूतगंधैः सादृश्यं गतं फुल्लाम्रपुष्पसदृशं मदजलसे
कजमामोदं परिमलं दधानो बिभ्राणः। अतएव लीनालिः संसक्तभ्रमरः सुरकरिणां कष्यते अनेनेति काषः कपोलानां काषणस्था
नं द्रुमस्कंधादि अकाले वसंतातिरिक्ते काले कोकिलान्मदयति मिलां द्रुस्वः (?) अत्र वसंतरूपकारणाभावेपि मदाख्यकार्योत्पत्तिकथनाद्विभा
वनोलंकारः तदुक्तं कारणेन विना कार्योत्पत्तिर्भावना तु सा। चूतगंधैः सादृश्यमित्युपमा वा। आमोदं दधानमिति पदार्थहेतुकाक
व्यालिंगेन चांगांगीभावेन संकीर्यते किं च कोकिलाव कोकिलानां मदं गंधे चूतगंधभ्रांत्या प्यालिमदःत्कारो व्यज्यते प्रहर्षिणी

सनाकेति॥ पुनश्च सनाकवनितं साशरं संवितं वेः कृटकैः रचितं सुनिनदैः आघघोषैः स्वदैः प्रवादैर्वर्तते अमुष्मिन् गिरौ इत्यर्थः। उपान्वध्याङ्वसः इति क
र्मत्वं। अवतोऽधर रक्षवकस्य फणावतो नागराजस्य मत इष्टा। मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः। तथा गात्वष्ठीरसेन परात् उत्कृष्टा परा स्तस्य व
सुधास्वक्तम्न् लोकासुधा अमृतमधिवसति अतो नत्र भूतले कुत्रापि सुधा नास्तीत्यर्थः। मेरुप्रतिमोयं गिरिरिति भावः। अत्र प्रस्तुत विशेषणसा
म्यादप्रस्तुत मेरुप्रतीतेः समासोक्तिरलंकारः सयमकेन संसृज्यते रथोद्धतागतिवृत्तं॥२७॥ श्रमदिति॥ अस्मिन्नद्रौ श्रीमल्लुलाए व भव
ने ओषधयः तृणज्योतिष्येव प्रदीपाः नवानि हरिचंदनपल्लवानि सुरतरु किसलया न्येवशय्याः। हरिचंदनमाख्यातं गोशीर्षे सुरपाद
परतिक्लिष्टः। रतिश्रम हारिणः सरोजवाताश्च सुदरीभ्यः क्रियाग्रहणाच्चतुर्थी। दिवो दिवं अधिगार्थस्यादिना षष्ठी। समर्तुं नदिशंति वि
स्मारयंतीत्यर्थः। स्वर्गादति। वरिश्यते असाविति भावः। अत्र पूर्वार्धे रूपकत्रयं स्फुटमेव॥२८॥ ईशार्थमिति॥ ईशायः ईशार्थं यथा तथेति

सनाकवनितं नितंबरुचिरं चिरं सुनिनदैर्नदैर्वृतममुं॥ मतापफणवतोऽवतो रसपरापरास्तवसुधासुधाधिवसति॥२७॥ श्रीमल्लु
ताभवनमोषधयः प्रदीपाः शय्यानवानि हरिचंदनपल्लवानि॥ अस्मिन् रतिश्रमजितश्च सरोजवाताः स्मर्तुं दिशंति न दिवः सुरसुंद
रीभ्यः॥२८॥ ईशार्थमंभसि चिराय तपांसि चेरुस्तोयादे विलंघनविलोलविलोचनायाः॥ आलंबताग्रभुजमत्र भवानिभवान्या श्चोतन्निदाघसलिलं घट

क्रियाविशेषणं अर्थेन सह नित्यसमासः सर्वलिंगता वक्तव्या चिराय चिरं अंभसि तपांसि चेरुस्या अत एव यादो विलंघतनाकिलोलविलोच
नायाः जलजंतु विघट्टन चकितेक्षणायाः तपस्तोयधिकंदस्त्वेव तयापि लोभयंस्यादिति भावः। यादांसि जलजंतवः इत्यमरः। भवान्याः भवप
त्न्याः प्रयोगकालापेक्षोपनिर्देशः। इंद्रवरुण भवेत्यादिना ङीष्। आनुगागमश्च करैकदेशस्यापि कर शब्द गं चासौ करश्चेति समानाधि
करणसमासः। अत एवाहवामनः हस्ताग्रागुण गुणिनौ दृग्वितितमम्नकरं भवः श्चोतन्निदाघसलिलांगुलिनास्त्र बस्वेदांगुलिनेति
सात्विकोदयोक्तिः। करेणात्र गिरौ वालंबीत गृहीतवान्। अत्राद्भुतातीतवृत्तांतस्य प्रत्यक्षवदभिधानात् भाविकालंकारः अतीतानाग
तेयत्र प्रत्यक्षवदलक्षितो अत्यद्भुतार्थ कार्यत्वाद्भाविकं तदुदाहृतमिति लक्षणात्॥ वसंततिलका वृत्तं॥२६॥ २६॥ २९॥
२९॥ ॥२९॥

हसान्ग्रभे मैदाभे

अत एव देवासुराः संयत्ता इति तैत्तिरीयश्रुतिः

यनेति ॥ देवाश्च असुराश्च देवासुरैः येषां च विरोधः शाश्वतिक इति नैकवद्भावः यतः एषां कार्य एव विरोधः नागोव्याघ्रादिवच्छाश्वतिक
इत्याहुः । येन मंदराद्रिणा मंथदंडीभूतेनेति भावः । अयविद्धसलिलोपक्षिप्तजलः अत एव स्फुटं नागस्य पाताललयस्मिन्नेवंभूतोऽम्बुधिरस
तैर्मंमंथे मथितः मंथातेर्द्विकर्मकत्वात् दुहादित्वाद् प्रधाने कर्मणि लिट् । अहिर्यत्र मंथगुणीकृतस्य वासुकेरित्यर्थः मंथानं मंदरं कृत्वा
तु वासुकिमित्यादि भागवतवचनात् । व्यावर्तनैर्वेष्टनैः अहितांकैः कृतचिह्नैः सानुभिः खव्यालिखन्पाठ यन्निव विभाति । अत्रोऽन्नत्या मेरुः
त्पादानेनैव लेखनोत्प्रेक्षणात् । अनुपातगुणनिमितातिक्रिया स्वरूपोत्प्रेक्षा ॥३०॥ नीतेति ॥ इह अद्रौ अधिशिखरशेखरं हेलोश
रुस्यैर्मयूखैः संक्रान्तैरिति भावः । उच्छ्रायं विस्तारितमित्यर्थः तथा नीलाभोः सितप्रभैरत्नैः इन्द्रनीलैर्विरचितपरभागा तत्सन्निधाना
नीतो

येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमंबुनिधिर्ममंथे ॥ व्यावर्तनैरहिपतेरयमाहितांकः खव्यालिखन्निव विभाति स
२२ मंदराद्रिः ॥३०॥ नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रैरानीलाभैर्विरचितपरभागा रत्नैः ज्योत्स्नाशंकामिह वितरति हंसश्येनीमध्येऽप्यह्नः स्फ
टिककटकभूमिश्छाया ॥३१॥ दधत इव विलासशालिनृत्यं मदुपततापवनेन कंपितोऽमिति इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयः
नि

लुब्धोत्कर्षा इत्यर्थः । हंसवैरश्येनी श्वेतवर्णा इत्यर्थः । विशदश्येतपांडुरा इत्यमरः । वर्णादनुदात्तात्तोपधान्नो न इति श्येतशब्दात्
ङीप् । तकारस्य च नकारः स्फटिकानां कटानां च भित्तय स्तासां छाया कांतिः अह्नो मध्ये मध्याह्नेऽपीत्यर्थः । मुहुः ज्योत्स्नाशंकां ज्यो
त्स्नाभ्रांतिं वितरति जनयतीति भ्रांतिमदलंकारः ॥३१॥ दधत इति ॥ इह अद्रौ मदुपततामंदं वहता पवनेन कंपितोऽपि कजानि नि
येषु तानि लेषु ललितविलासिनीजनस्य भ्रूगतिवत्कुटिलेषु ईषत्तरंगितेष्वित्यर्थः । पयः सु विलासशालिनृत्यं दधत इव स
विलासं नृत्यंतीवेत्युत्प्रेक्षा । पुष्पिताग्रावृत्तं ॥३२॥ ॥३२॥ ॥ ३२ ॥ ३२ ॥३२॥

अस्मिन्निति ॥ अस्मिन्हिमाद्रौ पिनाकभर्त्रा शिवेनाधीरविलोचनायाः चकितदृष्टेः स्मरादर्शनादिति भावः ईश्वरायाः गौर्याः । स्थेशभासेत्यादिना वरच्प्रत्ययः । पुंयोगाविवक्षायां न ङीप् । आबद्धवेपथुः प्राप्तकंप इति सात्त्विकोक्तिः । द्वितीयार्थे तृतीया ॥ विन्यस्तमंगलमहौषधिर्य

स्तो वांकुरादिर्यस्मिन्सः पाणिस्त्र[redacted]गलितः उरगएव प्रतिसरो कौतुकसूत्रं यस्य तेन । आहुः प्रतिसरो हस्तसूत्रे मण्डल्ये च मंडने इति विश्वः । करेणासौ लीलमगृह्यतेति दिव्यस्य पार्वतीपरिणयनवर्णनं । [redacted] स्वार्थे मिश्रणानुग्रहेत्यादिना स्यप्योनरूपं भाविकमलंकारः ॥ ३३ ॥ क्रामद्भिरिति ॥ घनपदवीमाकाशं क्रामद्भिर्व्याप्नुवानैरनेकसंख्यैः परः सहस्रैरित्यर्थः । क्वचिदनेकवर्णैरिति प्रामादिकः पाठः इति वैयर्थ्या[redacted] दिति ॥ घनपदवीमाकाशं क्रामद्भिर्व्याप्नुवानैरनेकसंख्यैः परः सहस्रैरित्यर्थः ... शुचिमणिभ्यः जन्म येषां तैः जन्माद्युत्तरपदो बहुव्रीहिः । व्यधिकरणो व्यत इति वामनः । तेजोभिः विभि[redacted]न्नो व्यतिमिश्रः शुचिमणिभ्यः जन्मस्फटिकेभ्यः जन्म येषां तैः

अस्मिन्नगृह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोचनायाः । विन्यस्तमंगलमहौष[redacted]धिरीश्वरायास्स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३ ॥ क्रामद्भिर्घनपदवीमनेकसंख्यैस्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः । उस्राणां व्यभिचरतीव सप्तसप्तेः पर्यस्यन्निह निचयः सहस्रसंख्यां ॥ ३४ ॥ व्यधत्त यस्मिन्पुरमुच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः ॥ स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥ ३५ ॥

सहस्रसंख्याता यता अति-

न्नः अत एव पर्यस्यन्प्रसर्पन्सप्तसप्तेः सूर्यस्य उस्राणां किरणानां निचयो निकरः सहस्रमिति संख्यां स्व[redacted]मिति शेषः । व्यभिचरतीत्यमतिरिवेत्युत्प्रेक्षा ॥ ३४ ॥ व्यधत्तेति ॥ यस्मिन्कैलासे धनाधिपः कुबेरः पुरां विजेतुः शिवस्य धृतये संतोषायोच्चगोपुरमुन्नतपुरमुन्नतपुरद्वारं । पुरद्वारं तु गोपुरमित्यमरः । पुरमलकाख्यापुरीं व्यधत्तानिर्मितवान् । तस्य तत्सखित्वादिति भावः । एष कैलासः उपान्तसर्पिणः प्रान्तचारिणो विवस्वतः सूर्यस्याकालेऽप्रसिद्धेतरकालेऽस्तमयं करोतीत्युत्प्रेक्षा । वस्तुतस्तु कारणाभावात् ... कार्यजन्मप्रसंगाद्व्यत्प्रेक्षा सा चोपान्तरवर्तितया संबंधेऽसंबंधिलक्षणातिशयोक्त्युत्थापितेति विवेकः । अस्तमिति मकारान्तमव्ययं [redacted]ना [redacted]यशब्देन षष्ठीसमासः वृत्तं [redacted] ॥ ३५ ॥ ३५ ॥ ३५ ॥ ३५ ॥ [redacted] ॥

एतदंतेनेति कर्मणि ... नस्य पर्यायजंते [redacted]

वंशस्थं

नानारत्नेति॥ अस्मिन्कैलासे अन्तः सानुष्वित्यर्थः। विभक्त्यर्थेऽव्ययीभावः नानारत्नज्योतिषां अनेकमणिकान्तीनां सन्निपातैर्व्यतिकरैश्छन्नेषु
गूढाद्दिनेषु वा ह्रोतः शंकितेत्यादिना निपातः वप्रान्तरेषु कटकमध्येषु बद्धां बद्धाम्॥ आभीक्ष्ण्ये बद्धा दृढो स्यादिता मित्यर्थः नित्यवीप्सयोरिति नि
त्यार्थे द्विर्भावः नित्यमाभीक्ष्ण्यमिति काशिकायाम् एकपदं चैतत्॥ भित्तिशंकामिति सिंसंदेहं आवावान्नाभीक्ष्णमायतनः आङ्पूर्वाद्वा
धातोः शतृप्रत्ययः द्विर्भावादिपूर्ववत्। मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः अनिप्रत्ययः तस्युरूपे कृते बकुलमित्यलुक्
निहंतीति निवर्तयति। वायुसंचाराद्भित्तिभावो ऽवधार्यत इत्यर्थः आतो निश्चयान्तःसंदेहालंकारः॥ ३६॥ रम्येति॥ अस्मिन्नद्रौ शाद्वाः

नानारत्नज्योतिषां सन्निपातैश्छन्नेष्वन्तः सानुवप्रान्तरेषु॥ बद्धां बद्धां भित्तिशंकाममुष्मिन्नावानावान्मातरिश्वा निहंति॥ ३६॥ र
म्यानवद्युतिरपैति न शाद्वलेभ्यः श्यामीभवन्त्यनुदिनं न नलिनीवनानि॥ अस्मिन्विचित्रकुसुमस्तबकाचितानां शाखाभृतां परिणमं
तिपैनपल्लवानि॥ ३७॥

शष्पाणि संत्येषु विति शाद्वलाः तेभ्यः शाद्वलेभ्यः शाद्वलः शादहरितः इत्यमरः नडशादाड्ड्वलच् रम्यानवद्युतिः नापैतीति किं तु नित्या
इत्यर्थः। नलिनीवनान्यनुदिनं सर्वदा श्यामीभवन्ति न कदाचित्पाण्डुरीभवन्तीत्यर्थः। विचित्रकुसुमस्तबकैराचितानां व्याप्तानां शा
खाभृतां तरूणां पल्लवानि न परिणमन्ति न जीर्णीभवन्तीत्यर्थः सर्वत्रार्थः अत्र प्रस्तुतस्यैव तद्वस्तुगतकान्तिस्थैर्यरूपकार्यस्य वर्णनात् तद्
प्रस्तुतमिव कारणं कश्चिदसाधारणः कैलासस्य महिमावगम्यत इति पर्यायोक्त्यलंकारः तदुक्तं कारणं गम्यते यत्र प्रस्तुता
कार्यवर्णनात् कार्यवर्णनात् प्रस्तुतत्वेन संबंधनात् पर्यायोक्तमुच्यत इति॥ ३७॥ ॥ ३८ ॥
दानतनमेवेद्र

परीति॥ इहाद्रौ परिसरविषयेषु पर्यंतदेशेषु विषयेदेशे प्रति निपातः मृगीभिर्हरितत्तृणांकुरमशंकया नीलतृणांकुरभ्रांत्येति भ्रांतिमदलंकारः ली
ढा पूर्वमास्वादिताय ग्रा न्मुक्ता लीढमुक्ता अधनप्ररूढ इत्यादिवत्पूर्वकाले इत्यादिनाधिकरणसमासः नवशुककोमलाः शुकसवर्णाः मणी-
नां मरकतमणीनां भासः रविकरैः संवलिताः संमिश्रिताः ससः फलंति संपूर्णीभवंतीत्यर्थः इतियावत्॥ ३८॥ उत्फुल्लेति॥ अस्मिन्नद्रौ वाया
दिभिर्वातसमूहैः पाशादिभ्यो य इति यप्रत्ययः। अमुष्मात् दृश्यमानादुत्फुल्लस्थलनलिनीवनात् जलपतितस्य परागस्योत्थानसंभवा
५ हलं। त्स्थलकमलेभ्य उत्फुल्लसंफुल्लयोरूपसंख्यानात् निष्ठानत्वं उत्थापितः विपत्तिः समंताद्विवर्तितः परिमंडलितः अंतराले तु दृश्यमानेति
भावः। सरसिजसंभवः पद्मोद्भवः परागः रूप्यभिप्रायेण जसरसिजशब्दप्रयोगो दृष्टव्यः कनकमयातपत्रलक्ष्मीमाधत्ते अनुकरोति
अत्र परागस्यातपत्रलक्ष्मीसंबंधासंभवात् तस्य सदृशीं लक्ष्मीमिति प्रतिबिंबादौपादक्षसंभवधर्मसंभवे निदर्शनालंकारः। तदुक्तं असंभ से १

हरित परिसरविषयेषु लीढमुक्ताः प्रथमं तृणोद्गमशंकया मृगीभिः॥ इहनवशुककोमलामणीनां रविकरसंवलिताः फलंति भासः॥ ३८॥
उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसंभवः परागः॥ वात्याभिर्वियति विवर्तितः समंतादाधत्ते कनकमयातपत्रलक्ष्मीं॥ ३९॥
इह सनियमयोः सुरापगायामुषसि सयावकसव्यपादलेखा॥ कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्त्तनेषु॥ ४०॥ ॥

वधर्मयोगादुपमानोपमेययोः प्रतिबिंबक्रियागम्यात्र साम्यातिदर्शनेति॥ ३९॥ इहेति॥ इहाद्रौ उषसि प्रभाते सुरापगायां
लक्ष्मणया तत्कूले सयावका सलक्तका सव्यपादलेखा वामचरणमुद्रा यस्यां सा यावकोलक्तको [illegible] मामप्यभिस्यमरः। तथा विषमाविषम [illegible] वि ५२
षमा विमहदल्पानियस्यां सा विवर्त्तनेषु प्रदक्षिणक्रियासु पदवी शिवयोः प्रदक्षिणपद्धतिरित्यर्थः। सनियमयोः संध्यादिनि
यमयुक्तयोः शिवाश्च शिवश्च तयोः शिवयोरितिविरहरहितयोः उमाशंकरयोः पुमान् स्त्रिया इत्येकशेषः। शरीरयोगमर्धांग
संघट्टनरूपं कथयति। सनियमयोरितिविरहरहितौ शिवाविति भावः। अत्र पदवीविशेषणपदार्थयोः कथनं प्रति हेतुत्वो
क्तया काव्यलिंगमलंकारः॥ ४०॥ ॥ ४०॥ ॥ ४०॥ ॥

वार

सम्मितिः ॥ इह हाद्रोरनतभिमयूखजालैः संमूर्छितां बहलीनं भवतां आलोलानां नरु शाखानामंतरेषु रंध्रेषु निर्गतानां प्रसृतानां घर्मघृतेरंशूनां शो
घीम्नानेजसामादर्शमंडलनिभानि दर्पणबिंबसदृशानीत्युपमालंकारः पटलानि समूहाः मुहुर्वारं समुल्लसंति पुनःपुनः स्फुरंतीत्यनु
संतानेन लतानां मावत्वाभावाच्च नान्यत्रमरकतपाषाणादि प्रादुर्भावः संभवतीति भावः ॥५१॥ शुक्लैरिति ॥ शुक्लैः सितैर्मयूखनिचयैः
तेजःपुंजैः परिवीतमूर्तिः [illegible] लिंगितदेहः वप्राभिघातेन वप्रक्रीडया परिलतः मंडलीकृतो [illegible] येन स तथोक्तो गणना
थः प्रमथनाथस्योक्षा वृषभः उक्षानड्वान्बलीवर्द ऋषभो वृषभ इत्यमरः वधूजनमनःसु शशांकशंकां चंद्रभ्रांतिं कुर्वन् तेषां भोः स भावः अमु ध्यादिति

संमूर्छितं तारजनतत्भिमिमयूखजालैरालोलपादपलतांतरनिर्गतानां ॥ घर्मघृतेरिह मुहुः पटलानि धाम्नामादर्शमंडलनिभानि समुल्लसंति ॥५१॥
शुक्लैर्मयूखनिचयैः परिवीतमूर्तिर्वप्राभिघातपरिमंडलितोरुदेहः ॥ शृंगाण्यमुष्य भजते गणभर्तुरुक्षा कुर्वन्वधूजनमनःसु शशांकशंकाम् ॥५२
संप्रतिलब्धजन्म शनकैः कथमपि लघुनि क्षीणपयस्युपेयुषि भिदं जलधरपटले ॥ खंडितविग्रहं बलभिदो धनुरिह विविधाः पूरयितुं
भवंति विभवः शिखरमणिरुचः ॥५३॥

ण्याद्रेः शृंगाणि भजते सेवते अत्र शंकाशब्दस्य संदेहार्थत्वे संदेहालंकारः । भ्रांतिपरत्वे भ्रांतिमदलंकारः । यथेच्छसि तथास्तु सत्वो
क्षविशेषणोत्थेन काव्यलिंगेनानागांगीभावेन संकीर्यते ॥५२॥ संप्रतीति ॥ इह अद्रौ विविधा नानावर्णाः शिखरमणिरुचः संप्रति शर
दीत्यर्थः लघुनि गुणिकृतं क्षीणपयसि अत एव भिदां भेदं भिद्भिदादिभ्योऽङ् इत्यङ् प्रत्ययः । उपेयुषि गते जलधरपटले मेघमंडले कथ
मपि शनकैः लब्धजन्मलानमित्यर्थः । अत एव खंडितविग्रहं विच्छिन्नस्वरूपं बलभिदः इंद्रस्य धनुः पूरयितुं विभवः समर्थाः भवंति
अत्रेंद्रधनुषो मणिरुचिना असंबंधे संबंधकथनादतिशयोक्तिरलंकारः वंशपत्रपतितं वृत्तं ॥५३॥

णां

स्नपितेति। मुहुहांद्रे शंभोरिंदुलेखा स्नपिता निसिक्तानि नवानिलतानां तरुरूपप्रवालानि तैः अमृतलवस्रावामृतबिंदुनिष्पंदनशालैते नै
र्मयूखैः संततं सर्वकालं असितयामिनीषु कृष्णपक्षरात्रिषु अपि वनांतममलयति धवलयति। अन्यत्र नैतद्दृष्टमिति व्यतिरेको व्यज्यते॥ ५४
क्षिपतीति। यो ऽद्रिरनुवनं विततां विस्ततां रोचनकीरूवं सौवर्णिकांतिमित्यर्थः एवनयारुको [redacted] रोचनकी। लाक्षारोचना
शकलकर्दमादुकूटिद्राणजिह्वादिना अपूपुत्प्रेक्षते बृहतीवासो बृहतिका चेति तां महान्तरासंगमिव। द्वौ प्रावर[redacted]त्तरासंगो
समौ बृहतिका तथेत्यमरः। क्षिपति प्रसारयति अनेकाहिरणमय्यः कंदरा यस्य सः हिरणमयशब्दः दांडिनायनहास्तिनायनेत्या

स्नपितनवलतातरुप्रवालैरमृतलवस्रुतिशालिभिर्मयूखैः॥ सततमसितयामिनीषु शंभोर्धवलयतीह वनांतमिंदुलेखा॥ ५४॥
क्षिपति योऽनुवनं वितताम्बृहद्बृहतिकामिव रोचनिकीरुचं॥ अयमनेकहिरण्मयकंदरस्तव पितुर्दयितो जगतीधरः॥ ५५॥ सक्तिं
जवादयनयस्यनिलेलतानां वैरोचनैर्द्विगुणिताः सहसामयूखैः॥ रोधो भुवां मुहुरमुत्र हिरण्मयीनां भासस्तडिद्विलसितानि
विडंबयंति॥ ५६॥ ॥ ॥ ५६ ॥ ॥ ॥ ५६ ॥ ॥ ॥

दिना निपातनात्साधुः अयं पुरो वर्तीगिरिः तव पितुरिंद्रस्य दयितः प्रियः जगत्याधारो जगतीधरः यस्तोगांतव्यं इंद्रकीलाख्य इत्यर्थः।
५५॥ सक्तिमिति॥ अमुत्र अमुष्मिन्नद्रौ अनिले वायौ जवात् सक्ति निलतानां सक्तिमन्योन्यसंगमं नयति सति सहसा हठाद्वैरोचनैः सा
वि पिंत्रैर्मयूखैः द्विगुणीकृताः द्विरावृत्तिकृता इति द्विगुणिताः गुणास्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुष्विति वैजयंती। हिरणमयी
नां हिरणविकाराणां दांडिनायनेत्यादिना निपातनात्साधुः। रोधोभुवां तटभुवां भासः मुहुस्तडिद्विलसितानि विडंबयंती
अनुकुर्वतीत्यर्थः उपमालंकारः॥ ५६ ॥ ॥ ५६ ॥ ॥ ५६ ॥ ॥

कर्षणेति॥ इह हद्रो कर्षणेन कं कूपनेन कं पस्तेन निरस्ताः महाहयो महासर्पा येभ्यस्तेः क्षणं विमत्तमतंगजावर्जितैः मत्तमातंगजरहितैः कुतः मदस्ना
रा१ पितैरेव तमद सिक्तैरित्यर्थः मितो हस्तद इति कृत्वा तं हरिचंदनैश्चंदनद्रुमैः सुरगजस्यैव गतं प्राप्तिरनुमीयते हरिचंदनविशेषणैः काव्यलिंगमुक्त
२ जाल यं॥४७॥ जलदेति॥ जलदैर्घनैर्मेघवृंदैः सांद्रैरसिताश्मनामिंद्रनीलानां मरीचिभिः किरणैः भानुः करो मरीचिस्त्री पुंसयोर्दीधितिः स्त्रियामिति
त्यमरः। उपहितप्रचया विघटितसंघाता अत एव दीपितं कंदरं अप्रकाशितगह्वराः विवस्वद्दीप्तिस्तिमिरैः संवलितास्संहता मिश्रिता भव तो४
वनी सुरक्षा॥४८॥ भव्येति॥ इह हद्रो भव्यः शांतो भवन्नपि मुनेर्व्यासस्य शासनेनेंद्रारोधनरूपेण क्षात्रपथि क्षत्रियमार्गे स्थितो गरहितशस्त्र एव
त्यर्थः। हतप्रमादो प्रमत्तः सन् तपस्य तपश्चर्यां कुरु तपस्येति कर्मणो रोमंथतपोभ्यां वर्तिचरोरिति क्यप्। तदंता द्वातोर्लोट् न च सर्वभूतेहितकारि

कूर्षणकं पनिरस्तमहाहिभिः क्षणविमत्तमतंगजवर्जितैः॥ इह मदस्नापितैरनुमीयते सुरगजस्य गतं हरिचंदनैः॥४७॥ जलदजालघनैरसि
ताश्मनामुपहतप्रचये हमरीचिभिः॥ भवति दीप्तिरदीपितकंदरा तिमिरसंवलितेव विवस्वतः॥४८॥ भव्यो भवन्नपि मुनेरिह शासनेन क्षा
त्रे स्थितः पथि तपस्य हतप्रमादः॥ प्रायेण सत्यपि हितार्थकरे विधौ हि श्रेयांसि लब्धुमसुखानि विनांतरायैः॥४९॥ मा भूवन्नपथहृतस्तवेंद्रिया
श्वाः संतापे दिशतु शिवः शिवां प्रसत्तिं॥ रक्षंतस्तपसि बलं च लोकपालाः कल्याणीमधिकफलां क्रियां क्रियासुः॥५०॥ ॥ ॥

णोमेविं प्रमादः करिष्यतीति विश्वसितव्यमित्यर्थांतरंन्यासे नाह प्रायेणेति हि यस्मात्प्रायेण बाहुल्येन प्रायो वयसि बाहुल्ये इत्यमरः। हित
मर्थं करोतीति न सि हितार्थकरे विधौ व्यापारे सति अंतरायैर्विना श्रेयांसि लब्धुमसुखानि अशक्यानि इत्यर्थः। अश्व वराक धर्षयादिनास त२
मानवकर्तके तु मुनुकल्याणावैरिणः सर्वत्र सर्वस्यापि संतीति भावः॥४९॥ मा भूवन्निति॥ तवेंद्रियाण्येवाश्वास्तेपथेन हरंतीत्यपथहृतो मा भु
वन्नुत्तामपथगामिनी मा भूवन्नित्यर्थः। माङ्याशिषि लुङ् संतापे तपः क्लेशे सति शिवः शिवां साध्वीं प्रसत्तिं प्रवृत्तिमुत्साहं दिशतु किं चेति
चार्थः लोकपाला इंद्रादयस्तपसि विषये बलं शक्तिं रक्षंतो वर्धयंतः संतः कल्याणीं साध्वीं क्रियामनुष्ठानं अधिकफलां क्रियासुः कु
र्वंतु करोतेराशिषि लिङ्॥५०॥ ॥५०॥ ॥ ॥ ॥५०॥ ॥ ॥
तो

इति॥ प्रियार्हं राजराजभवनस्येयक्षेट्‌ इति हितं प्रियं वचनमितिशेषः पूर्वोक्तमुक्त्वा सयदि स्वकीयं धामस्थानंगतवति सतिपथासुतेऽर्जुनः सोत्कंठं सो
त्सुक्यं किमपि प्रदध्यौ चिंतयामास तथा हि सद्वियोगः सुजनवियोगः भृशमरतिं व्यथां संधत्ते करोतीत्यर्थः अर्थान्तरं न्यासः॥५१॥ तमिति॥
अकृशाः पूर्णाः लक्ष्म्याः शोभायस्य सो ऽकृशलक्ष्मीति निबहुवचनान्तत्वा दुर्व्रीहिः एवमुरःप्रभृतिभ्यः कवितिकप्प्रसंगेन वकाशं तत्र यो या
लक्ष्मीशब्दस्येदूत्परवचनांतस्यापाठात्‌ नापि न घ्नृत श्चेत्यस्याप्यवकाशः उरःप्रभृतिपाठसामर्थ्यादेव शेषिकस्तु वैभाषिक इत्यविरोधः सो
सर्वतः जुनः सर्वत्र सारयोगादुत्कृष्टवस्तुप्रयोगात्‌ सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु इत्यमरः। अनतिशयनीयमनतिक्रमणीयं

इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे धामस्वं गतवति राजराजभृत्ये। सोत्कंठं किमपि पृथासुतः प्रदध्यौ संधत्ते भृशमरतिं हि सद्वियोगः॥५१॥
तमनतिशयनीयं सर्वतः सारयोगादविरहितमनेकेनांकभाजा फलेन॥ अकृशमकृशलक्ष्मीश्चेतसाशंसितं सस्वमिव पुरुषकारं शै
लमभ्याससाद॥५२॥ इति श्रीकिरातार्जुनीये महाकाव्ये भारवीकृतौ इंद्रकीलाभिगमनो नाम पंचमः सर्गः॥ समाप्तः ५॥ ॥

अनेकेन बहुना अंकभाजा समीपगतेन शीघ्रभाविनेति यावत्‌ फलेन कार्यसिध्या विरहितमभूत्‌ कार्यसिद्धेरवश्यं कार्यसाधकमित्यर्थः।
अकृशमतनुमुन्नतमिति यावत्‌ चेतसाशंसितं प्राप्तुमिष्टं शैलमिंद्रकीलं स्वमात्मनीनं पुरुषस्याकारं कर्मतं पुरुषकारं उक्तविशे
षणविशिष्टं पौरुषमिवाभ्याससाद मालिनीवृत्तं॥५२॥ ॥५२॥ ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिता
यां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां इंद्रकीलाभिगमनो नाम पंचमः सर्गः॥ श्री कृष्णार्पणमस्तु समाप्तः॥

जगतिसकलविद्यासिंधुमुष्टिंधयानांपरमणितिपरीक्षायुज्यलेसज्जनानां ॥ तदिहममनिबंधेदूषणंभूषणंवाप्यवतियदिविदग्धैस्त
र्ह्यवश्यंविमृश्यं ॥५८॥ ॥ ॥ ॥ इतिश्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांकिरातार्जु
नीयव्याख्यायांघंटापथसमाख्यायामष्टादशःसर्गः समाप्तोयमग्रंथः ॥ श्रीरामचंद्रार्पणमस्तु ॥
नैवाकृतिःफलतिनैवकुलंचशीलंविद्यानचापिनचयत्नकृतापिसेवा ॥ पुण्यानिपूर्वतपसाखलुसंचितानिकालेफलंति

व्रजतयरिपुलोकंपादपद्मानतःसन्नादितइतिभवेनश्लाघितोदेवसंघैः ॥
निजगृहमथगत्वासादरंपांडुपुत्रोधृतगुरुजयलक्ष्मीधर्मपुत्रंननाम ॥५८॥

पुरुषस्ययथैववृक्षाः ॥१॥ वनेरणेशत्रुजलाग्निमध्येमहार्णवेपर्वतमस्तकेवा ॥ सुप्तंप्रमत्तंविषमस्थितंवारक्षंतिपुण्यानिपुराकृ
तानि ॥२॥ श्रीमन्महादेवइतिप्रसिद्धनाम्नाथहाम[?]चित्रलवंश[?]लं ॥ तत्सुतपुत्रेणकिरातकाव्यमलेखिमहेश्वरशर्मदं ॥३॥ ॥
संवत्‌१९०८ विरोधीसंवत्सरेपौषेशुक्लद्वितीयांकिरातसटीकंसमाप्तं ॥ ॥ ॥ ॥ ॥ ॥

कि

-१०२२८

नं २६८२ ध

किरातार्जुनीय टीका

(अपूर्ण) घण्टापथः

१८५ पत्राणि

शारदा

कर्ता — मल्लिनाथ

नयेनजेतुं जगतींसमीरनइत्युक्तं नस्त्रकार मेवाह ॥ तथेति ॥ साशंकोपि जितोव क्रोवंचवइतियावत् ।सदुर्योधनो भवज्जिगी
त२ षयागुणैर्भवंलमतिक्रोमिष्ठ येत्यर्थः ।हेता विनितत्नीया ।गुणसंपदानदाक्षिण्यादिगुणगरिमावृणेन शुभ्रंयशः तनोति।
सदृक् लोगुणलोभनीयांत्वत्सेपदं आलसा कर्तुं लब्नोत्तस्यगुणवत्त्वोमात्मनः प्रकटयतीत्यर्थः। नन्वेवंगुणिनं नः सतोपिस
ज्जनविरोधोमहानस्त्यस्यदोषः इत्याशंक्यसोपिसन्नसंसर्गलाञ्छेनीचसंसर्गलाभेनीचसंगमाद्दूरमुत्कर्षोसहत्वादि स्याहस
मितिं ।तथाहि ।भूतिसमुन्नयन्नुत्कर्षमापादयन् ।लटः शानशानचावित्यादिनाशतृप्रत्ययः।पुनः ल[illegible]हरणसामर्थ्यासथमा टा५

तथापितिस्त्रः सभवज्जिगीषयातनोतिशुभ्रंगुणसंपदायशः ॥ समुन्नयन्भूतिमनार्यसंगमाद्दूरं विरोधोपिसमंमहात्मभिः॥४८॥

सामा।नाधिकरण्यं महात्मभिः समंसहेत्यर्थः साकंसमंसहेत्यमरः ।अनार्यसंगमात् दुर्जनसंसर्गात् पंचमी विभक्ति
विरोधो इतिपंचमीवरमनाक्प्रियंदेवादत्ते वर श्रेष्ठेत्रिषुक्लीबंमनाक्प्रियमित्यमरः ।अत्रमैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य
पि२ भूतिंसमुन्नयन्नितिसस्यपूर्ववाक्यान्वयेसमाप्तस्यवाक्यार्थस्यपुनरादानात्समाप्तपुनरात्तरव्यांतदोषापत्तिः ।नदुक्तं का
व्यप्रकाशेसमाप्तपुनरात्तं नात्समाप्तपुनरात्तकमिति।नचवाक्यांतरेमेतत् ॥ येनोक्तदोषपरिहारस्यात् ॥ अर्थांतरं
न्यासोलंकारः ।सचभूतींसमुन्नयनमितिसस्यपदार्थस्यविशेषणद्वाराविरोधपरत्वं।प्रतिहेतुत्वाभिधानरूप
[redacted] काव्यलिंगानुप्राणितइति ॥४८॥

कि॰ स॰

॥६॥

ननु कातर्यं केवलानी [illegible] निरित्या रांक्यना तियुक्त पौरुषमस्य साह। ऊतेति। षण्णां वर्गो षड्वर्गः। अरिणामं तः शत्रूणां का
मक्रोधादीनां षड्वर्गः। शिवभार्गव नव समासः। जस्य जयः। ह्रूतेति येन तेन न तथोक्ते न विनी ते न ने सार्थः। वनी ताधिका वंश
जा परिपालन निमित्ति भावः। अगम्य रूपं पुरुषमात्रदुःप्राप्य स्वरूपा मनोरिमामा नवीम नूपप ति सुभा त्वारक्षण णामि
त्यर्थः। पदवीं प्रजापालन पद्धतिं प्रपित्सुना। प्राप्तिपत्ति मिच्छता प्रपद्यते: सनंतादुप्रत्ययः। सनी मीमेत्यादिना र
स्यादे सादेशः। अत्र लोपोभ्यासे सप्तम्यां सलोपः। अस्ताल इत्यालस्यं यस्य तेनास्त तं द्विणा अनलसेत्यर्थः। नं द्विः जे ५

ऊतारिषड्वर्गजयेन मानवीम गम्यरूपां पदवीं प्रपित्सुना। विभज्य नक्तं दि
वमस्ततंद्रिणा वितन्यते तेन नयेन पौरुषं ॥ ६ ॥

सोमोधातुः तस्मात्तंद्राद्यपश्चेत्यो णादिकः कोंद्रिरु प्रत्ययः। कृदिकारादक्तिनो वा ङीषत्र भव्यतीति एवं हि नुमूनिद्रा तंद्रेति प
ठंतोपिक्षीरस्वामी। तथा रामायणे प्रयोगत्वादये प्रत्ययः। पौरुषं पुरुषस्योत्ते भावे कर्मणि लेजसीति विश्वः। नक्तं रात्रिदिना
वनक्तंदिवं अहोरात्रयोरित्यर्थः। अचतुरे सादिना सप्तम्यर्थे वा सोरव्ययेद्दं द्वंद्वं निपातनः समासां तः। विभज्यव
अस्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते ॥ ६ ॥
३ स्वमिस्तंद्रिमतश्च स्व दोष परदोषवदिति। तेन दुर्योधनेन पुरुषस्य कर्म पौरुषं पुरुषं पुरुषकारउ योगेशतिया वत्तायुवादिता दण प्रत्ययः ४ ॥ ६ ॥

संप्रति भृत्याद्यनुरागमाह ॥ सखीनिति ॥ गतस्मयो निरहंकारः अत एव सद्दुर्योधनः संततं साधु सम्यगकपटमित्यर्थः अनुजी
नोऽनुसारी प्रीतियुजः स्निग्धान् सखीन्मित्राणीव दर्शयते लोकस्येति शेषः । हेतुमति णिच् । णिचश्चेत्यात्मनेपदं । शोभनं
दयं येषां तान्सुहृदो मित्राणि न सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । बंधुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्का
रान् आदरात्तद्दर्शयते बंधूनां समूहो बंधुता । ग्रामजनबंधुसहायेभ्यस्तल् । कृतमाधिपत्यं स्वाम्यं यस्यां कृताधिपत्या
मिव दर्शयते ॥ बंधुनधीपतीनिव दर्शयतीत्यर्थः ॥ यथा भृत्यादिषु बुद्धिर्जायते लोकस्य तथा तान्संभावयतीत्यर्थः ॥

सखीनिव प्रीतियुजोनुजीविनः समानमानान्सुहृदश्च बंधुभिः ॥ स संततं दर्श
यते गतस्मयः कृताधिपत्यामिव साधु बंधुतां ॥ १० ॥

अत्रानुजीव्यादिषु कर्तुरीप्सिततमं कर्मेति कर्मत्वं ॥ पूर्वैस्त्वस्मिन्नेव पदार्थत्रयो वाक्यार्थमित्थं वर्णयंति । सत्राजानुजीव्यादीन्
सख्यादीनिव दर्शयते सख्यादयइवैप[?]श्यंति स सख्यादिभावेनन पश्यंतस्तांस्तथा दर्शयते स्वयमेव छंदानुवर्तितया स्वद
र्शनं तेभ्यः प्रयच्छतीत्यर्थः ॥ अर्थात्तस्येप्सिततकर्मत्वं अणिकर्तुरनुजीव्यादेस्तत्वमिवादिदृशोरात्मनेपदं उपसंख्यानमिति पा
क्षिकं कर्मत्वं एवं चाणीप्संततकर्मणो राज्ञो ण्यंतेकर्तृत्वे प्यारोह[?]हस्ती स्वयमेवेत्यादिवत् भूमाणकर्मानरत्वा भावान्नायणे दृश्य
रणादिसूत्रस्य विषय इति मत्वा नौ णिचश्चेत्येवात्मनेपदं प्रतिपेदिरे । भाष्यैस्तु रेरणादि सूत्रे विषयत्वमेवास्योक्तं । यथाह प
श्यंति भृत्या राजानं दर्शयते भृत्यैः राजा । अत्रात्मनेपदं सिद्धं भवतीति अत्राह कैय्यटः । ननु कर्मत्वं सद्भावाद
त्रात्मनेपदेन न भाव्यं उच्यते अस्मादेवोदाहरणाद्गाध्य कारस्यायमेवाभिप्राय उत्पद्यते । अ[redacted]ण्यं[redacted]नावस्थायी

स्मारतजानं दर्शयिते २

॥१८॥ यत्कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावे आत्मनेपदं न भवतीत्यर्थः। रमायेगेहयतिमनुष्यानीति। इहत्वं एयं तावदस्त्वायां कर्तृणां।
भरत्यानां गोकर्मत्वमिति भवत्येवात्मनेपदमिति॥१०॥ न चायं त्रिवर्गः प्रमाद्यतीत्याह। असक्तमिति। यथायथं स्वं विभज्य असंकी
र्णरूपं विविच्येत्यर्थः। यथायथमिति निपातनाद्द्विर्भावो नपुंसकत्वं च। ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं। पक्षे पातः पक्षपातः।
आसक्तिविशेषः समस्तुल्यो यस्यां तया समपक्षपातया तया। भक्त्या। अनुरागविशेषेण पूज्येष्वनुरागो भक्तिरित्युपदेशः। पू
ज्यश्चायं त्रिवर्गः असक्तमनासक्तमव्यसनितयेति। यावत् आराधयतः सेवमानस्य दुर्योधनस्य त्रयाणां धर्मार्थकामानां

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया॥
गुणानुरागादिव सख्यमीयिवान्न बाधतेऽस्य त्रिगणः परस्परं॥११॥

गणः त्रिवर्गः। त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः। गुणानुरागात् तदीयगुणेष्वनुरागाद्गुणवदा
श्रयत्वलोभादित्यर्थः। सख्यं मैत्रीं। सख्युर्यइति यत्प्रत्ययः। ईयिवान् उपेयिवाननिवोपगतवानित्येषु उपेपि
वाननाश्वाननूचानश्चेति क्वसुप्रत्ययान्तो निपातः। तत्रोपसर्गस्तंत्रमिति काशिकायां परस्परं न बाधते समं वर्त्तित्वा
नन्योऽश्वान्नो चानश्चेति उक्तं च धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघ
दन्य धर्मार्थकामाः परस्परानुपमर्द्देन वर्द्धन्त इत्यर्थः। उक्तं च। धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो ज
घन्य इति॥११॥

अथश्लोकत्रयेणोपायकौशलं दर्शयन्नादौ सामदानेदर्शीति। निरस्यन्नेति॥ नस्यद्दुर्योधनस्यनिरस्यपंनिर्वाधममायिकमित्यर्थः। अ
न्यथासतांदुग्रहत्वादितिभावः। सामसांत्वं। सामसांत्वमुभेसमेइत्यमरः। दानवर्जितंनप्रवर्त्तते। अन्यथालुब्धादावर्जनस्यदु
ष्करप्रियैर्दुष्करत्वादितिभावः। उक्तंचालुब्धमर्थेनगृह्णीयात्स्तब्धमंजलिकर्मणेति। तथाभूरिप्रभूतंननुकदाचिदल्पमित्य
र्थः। दानंधनत्यागः। सदित्यादरार्थेऽव्ययं। आदरानादरयोः सदसतीतिनिपातसंस्मरणात्। तस्यक्रियातांसत्क्रियांविरहय्य

निरस्यंसामनदानवर्जितंनभूरिदानंविरहय्यसत्क्रियां। प्रवर्त्तते
तस्यविशेषशालिनीगुणानुरोधेनविनोनसत्क्रिया॥१२॥

विहायत्यपि [redacted] लघुपूर्वादित्यपादेशः। नप्रवर्तते अनादरे दानवैफल्यादितिभावः। नचैवंसर्वत्रैवयेनापिकेनचित्कौशलं व्य॰ १
हानिश्चस्यादित्याह। विशेषशालिनी अतिशययोगिनीसत्क्रियागुणानुरोधेनगुणानुसारेणविनाप्रवर्त्तते। पथ्यावि नः २
वेत्यादिनात्लीया। गुणेष्ववादरेभूरिदानंचेतिनोक्तदोषावकाशइत्यर्थः। अत्रोत्तरस्यपूर्वपूर्वंवि[redacted]शेषणतया
स्था[redacted]पनादेकावल्यलंकारः। तदुक्तंकाव्यप्रकाशे। स्थाप्यतेपोह्यतेवापियथापूर्वंपरंपरं। विशेषणतयावस्तुयत्रसे
कावलीद्विधेति॥१२॥

अथदंडप्रकारमाह॥वसूनीति॥यदीदुर्योधनः वसूनिधनानिवांछन्नलोभान्नेत्यर्थः निहंतीतिशेषः॥तथामन्युनाक्रोधेन
वामन्युर्दैन्येकृतेक्रुद्धविस्मरः॥धर्मशास्त्रार्थस्मरणे क्रोधलोभेविवर्जितइतिस्मरणादित्यर्थः॥किंतुनिवृत्तकारणो
निवृत्तलोभादिनिमित्तः सन्स्वधर्मइत्येवस्वस्यराज्ञः सतोममपिधर्मोमेदंडकर्तव्यमित्यस्मात्एवहेतोरित्यर्थः॥अदं
ड्यान्दंडयन्राजादंड्यांश्चैवाथदंडयन्॥अयशोमहदाप्नोतिनरकंचैवगच्छति॥इतिस्मरणात्'इतिवागुरूपदिष्टेनप्राड्विवाके

वसूनिवांछन्नवदीनमन्युनास्वधर्मइत्येषनिवृत्तकारणः॥
गुरूपदिष्टेनरिपौसुतेपिवानिहंतिदंडेनसधर्मविप्लवं॥९३॥

पदिष्टेनधर्मशास्त्रंपुरस्कृत्यप्राड्विवाकमतेस्थितः॥समाहितमतिःपश्येद्व्यवहाराननुक्रमादितिनारदस्मरणा
त्॥दंडेनदमेनशिक्षयेत्यर्थः॥रिपौसुतेपिवास्थितमितिशेषः॥एतेनास्यसमदर्शित्वमुक्तं॥धर्मविप्लवंधर्मव्यति
रेकमंनिहंति नीवां[redacted]रयति॥दुष्ट एवास्याशत्रुः शिष्टएवबंधुननुशत्रुषुवैरंबंधुषुपक्षपातोस्तीत्यर्थः॥९३॥

* कौशलं संदर्शयति॥ विधायेति॥ शंकास्य संजाता शंकितः। अविश्वस्तः स सरितस्य स्वं मंडलं परानितरयतीति भेदेनात्मसात्कुर्वंतीति॥ १॥

संप्रति भेदं [redacted] परेतरान् नात्कुरोतीति ण्यंतात्कर्मणि ण्यप्रत्ययः। रक्षंतीति रक्षा न मंत्रगुप्तिसमर्था नित्यर्थः। नंदिग्रहीत्यादिना पचाद्य
चः। विधाय कृत्वा नियुंज्येत्यर्थः। अशंकितस्याकारं उपेति स्वयमविश्वस्तोपि विश्वस्तवदेव व्यवहरन् परमुखे नैव परान्
र्वि ३ भिनत्तीत्यर्थः। न च तान् रक्षानुपक्षलयेन तैकुर्वीरन्निरित्याह। क्रियेति। क्रियापवर्गेषु कर्मसमाप्तिषु अनुजीविसात्कृताः भृत्याधी
नाः कृताः अपवर्ज्यंत यादत्ताः इत्यर्थः। दैयत्राचेतिक्त प्रत्ययः। संपदोस्यराद्धेः कृतज्ञतामुपकारकर्तृकत्वं वदंतीप्रीतिदा
नैरेव कर्तृत्वं प्रकाशयलेन तु वाङ्मात्रेणेत्यर्थः। कृतज्ञे राजन्यनुजीविनोनुरज्यंति अनुरक्ताश्च तं रक्षंतीति भावः॥ १४॥ ॥

विधाय रक्षान्परितः परेतरानशंकिताकारमुपेति शंकितः॥ क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदं
ति संपदः॥ १४॥ अनारतं तेन पदेषु लंभिता विभज्य सम्यग्विनियोगसत्क्रियाः॥ फलंत्युपायाः परिबृंहितायतीरुपेत्य
संघर्षमिवार्थसंपदः॥ १५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अथोपायप्रयोगस्य फलवत्तां दर्शयति॥ अनारतमिति॥ तेन राज्ञा पदेषु उपादेयवस्तुषु पदं व्यवसितित्राणस्थानलक्ष्मं
प्रिवस्तुषु रित्यमरः। सम्यक् असंकीर्णमव्यस्तं च विभज्य विविच्य विनियोगसत्क्रियाः अनुग्रहः सहकार इति यावत्। तान् लं
भिताः प्रापिताः स्थानेषु सम्यक् प्रयुक्ता इत्यर्थः। उपायाः सामादयः संघर्षं परस्परस्पर्द्धामुपेत्येव स्युः अपेक्षाः परि
बृंहितायतीप्रवृद्धोत्तरफलाः स्फुरा इत्यर्थः। अर्थसंपत् अनारतं अजस्रं फलंति प्रसुवत इत्यर्थः॥ अर्थसंपदमे
वाह॥ ॥ ॥ ॥ ॥ ॥

राज्ञोपत्यानि पु

वः

अनेकेति॥ अयुग्मच्छदस्य सप्तपर्णस्य प्रसूनस्य गंध इव गंधो यस्य सोयुग्मच्छदगंधिः सप्तम्युपमानेत्यादिना बहुव्रीहिः उत्तरप
दलोपश्च उपमानाच्चेति समासांत इकारः। नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः। उपायनमुपग्राह्य
मुपहारस्तथोपदेत्यमरः। राज्ञोऽपत्यानि पुमांसो राजन्याः क्षत्रियाः। राजश्वशुराद्यदिति यत्प्रत्ययः। राज्ञोऽपत्ये जातिग्रह
णात्साधुः। रथाश्च अश्वाश्च रथाश्वं सेनांगत्वादेकवद्भावः। अनेकेन संकुलं तदीयमास्थाननिकेतना

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरं।
नयत्ययुग्मच्छदगंधिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥१६॥

जिरं सभामंडपांगणं भृशमार्द्रतां नयति। किंलक्षणं नयति एतेन महासमृद्धिरस्योक्ता। अत एवो
दात्तालंकारः। तथा चालंकारसूत्रं समृद्धिमद्वस्तु वर्णनमुदात्तमिति ॥१६॥

संप्रतिजनपदस्यक्षेमकरत्वमाह ।सुखेनेति ॥चिरायतस्मिन्दुर्योधनेक्षेमंवितन्वतिक्षेमंकरेसतिदेवःपर्जन्यएवमाताएषांतेषांतेदे
वमातृकाःपृथिव्यंबुजीविनोदेशाःतेनभवतीत्यदेवमातृकाइत्यर्थः ।देशोनद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः ।स्यान्नदी
मातृकोदेवमातृकश्चयथाक्रमंमितिस्यमरः ।एतेनास्यकुल्यादिप्रवर्त्तनेकर्तृत्वमुक्तं॥कुरूणांनिवासाःकुरवोजनपदविशेषाः नः
षाःकृष्टपच्यंतइत्यकृष्टपच्याःराजसूयेत्यादिनाकर्मकर्त्तरिकृष्टसस्ययांतोनिपातनः ।तद्विपरीताःअकृष्टपच्याइव ।कृषिरेषा
तः

सुखेनलभ्यादधतःकृषीवलैरकृष्टपच्याइवसस्यसंपदः ॥ ।।
वितन्वतिक्षेममदेवमातृकाश्चिरायतस्मिन्कुरवश्चकासति ।१७॥

मस्तीतिकृषीवलैःकृषकैःरजःकृष्येत्यादिनाकर्मकर्त्तरिकृ[redacted]त्वलच्प्रत्ययः ।वलइतिदीर्घः ।सुखेना नः
लेशेनलभ्यालब्धुंशक्याःपरसंपदोदधतोधारयंतः ।नाभ्यस्ताच्छतुरितिनुमागमप्रतिषेधः ।चकासतिस
र्वोत्कर्षेणवर्त्तंतइत्यर्थः ।अदभ्यस्तादितिझेरदादेशः ।जक्षित्यादयःषडिसभ्यस्तसंज्ञासंपन्नजनपदत्वात्त नः
र दसंतापकत्वाच्चदुःसाध्योयमितिभावः ॥ १७ ॥ ॥ १७ ॥१७॥

नन्वेवं जनपदानुवर्त्तिनः कथमस्थाः सलाभो तत्राह उदारकीर्त्तेर्महायशसः उदारो दात्रमहतेः रिस्यमरः दयावतः
ये परदुःखप्रहाणेच्छोः अतएव प्रशांतबाधप्रशमितोपद्रवं क्रियाविशेषणं वा चादांतप्रशान्तेसादिर्नशमिधातोर्व तानिसातो
निपातः अभिरक्ष्यया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः संपादयतः वसूपमानेन कुबेरोपमानां वसुमयूखाग्निधनाधि स्यस्य २
10 पेष्वितिविश्वः अस्यदुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरूपस्तुता द्रावितामेदिनी वसूनि धनानि वसुतीय [redacted] ध्र

उदारकीर्त्तेरुदयं दयावतः प्रशांतबाधं दिशतोभिरक्षया॥ ।
स्वयं प्रदुग्धेस्य गुणैरुपस्तुता वसूपमानस्य वसूनि मेदिनी॥१८॥

ना॰ नेमणा वितिवैजयंती॥ स्वयंप्र॰ दुग्धे अक्लेशेन दुह्यते इत्यर्थः दुहेः कर्मकर्त्तरि लट् दुहस्नुनमां यक्चिणौ विति यक्॥ यं॰
प्रतिषेधः यथा केनचिद्दुग्धेन वक्लिता रक्षिता चगौः स्वयं प्रदुग्धे तद्वदिति भावः अलंकारस्तु [redacted] विशेषणमात्रसाम्या
दप्रस्तुतस्य गम्यत्वे समासोक्तिरिति सर्वस्वकारः अत्र प्रतीयमानया गवा सह प्रस्तुताया मेदिन्या भेदे अभेदलक्ष
णातिशयोक्तिवशादेष्यते नोक्तिरिति संक्षेपः॥१८॥ ॥१८॥ ॥१८॥ ॥१८॥

ननसंहताः धर्यर्थे नञर्थस्य नशब्दस्य सुप्सुपेति समासः। मिथ उत्तरत्र ये मिथो विरोधात् स्वामिकार्यं कृतं न भवंतीति भिन्नवृत्तय

वीरभटानुकूल्यमाह॥ महौजसेति॥ महौजसो महाबलाद् दुर्बलानामुपकारकत्वादिति भावः। मानः कुलशीलाद्यभिमान एव धनं ये-
षां मानधनाः अन्यथा कदाचिद्दलदर्पाद्धिकुर्वीरन्नपीति भावः। धनार्चिता धनैः सत्कृताः अन्यथा दारिद्र्यादेनं त्यजेयुरिति भावः।
संयति संगरे लब्धकीर्तयः बहुयशसः दृप्ताः। अन्यथा कदाचिन्न युध्येयुरित्यर्थः। संहता मिथः संगताः स्वार्थं न भिन्नं वर्तन्ते
तीति भिन्नवृत्तयः पूर्ववत्समासः। अन्यथा स्वामिकार्यहानिः स्यादित्युभयत्रापि तात्पर्यार्थः। धनुर्भृतः आयुधीयाः तेऽनु

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्॥१९॥

अत्रोपलक्षणमेतत् प्राधान्याद्ग्रहणं तस्य दुर्योधनस्य असुभिः प्रियाणि समीहितुं कर्तुं वाञ्छन्ति। आनृण्यार्थं प्रा-
णान्दातुमिच्छन्ति अन्यथा दोषस्मरणादिति भावः। अत्र महौजस्त्वादिपदार्थानां प्राणदानवृत्तं व्यानां प्रतिविशेषणं स्याहे- पर
तुत्वाभिधानात्काव्यलिंगमलंकारः। लक्षणं तूक्तं तथा साभिप्रायविशेषणत्वात्परिकरालंकार इति द्वयोस्तिल-
तंडुलवद्विविक्ततया स्फुरणात् संसृष्टिः॥१९॥ ॥१९॥ ॥१९॥ ॥१९॥ ॥१९॥ श्रीरस्तु॥ श्री

संप्रति स्वराष्ट्रवत्परराष्ट्रवृत्तांतमपि स वेत्तीत्याह॥ महीभृतामिति॥ अशेषितक्रियः समापि●तकृत्यः अफलोदयं कर्मेत्यर्थः। स दुर्योधन नः
सच्चरितैः शुद्धचरित्रैः स्वामि●कैरित्यर्थः। चरंतीति चराः तैः प्रणिधिभिः परराष्ट्रवृ॥ महीभृतां क्रियाः प्रारंभाः निःशेषं वेद वेत्ति॥ विदो ल
टो वेति णल●देशः। स्वरहस्यं तु न कथ्यत इत्याह॥ महोदयैरिति। धातुरिव तस्य दुर्योधनस्य हितमुद्योगं महोदयैर्महावृद्धिभिः हितमनु
हि४ बध्नंतीत्यनुबंधीनीति हितानुबंधिभिः स्थायिभिरित्यर्थः। फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते फलानुमेयास्तस्य प्रारंभा इत्यर्थः॥२०॥
मित्रवत्तमाह॥ न तेनेति॥ तेन राज्ञा क्वचित्कुत्रापि सह ज्यया मौर्व्या सज्यं। मौर्वी ज्या शिंजिनी गुण इत्यमरः। तेन सहेति तुल्ययोगे इति

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः॥ महोदयैस्तस्य हितानुबंधिभिः प्र
तीयते धातुरिवेहितं फलैः॥२०॥ न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननं॥
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनं॥२१॥

बहुव्रीहिः। धनुरुद्यतं आननं वा कोपविजिह्मं कोपकुटिलं न कृतं यस्य कोपेनाप्येवं नोदेति कुतस्तस्य युद्धप्रसक्तिरपीति भा
ति१ वः। कथं तर्हि आज्ञाकारयिता इत्यत्राह। गुणेषु शौर्यादिष्वनुरागेण माल्यपक्षे सौरभ्यानुषंगेणेत्यर्थः। अथवा सौरभ्यगुणात्मके मे
न नराधिपैरस्य शासनमाज्ञा माल्यमिवमाल्यं तदिव चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् इति क्षितिस्वामिभिः शिरोभिरुह्यते धार्यते
वचिस्वपीत्यादिना यहते यकि संप्रसारणं। अत्रोपमा स्फुटैव॥२१॥

संप्रसास्य धार्मिकत्वमाह । सइति ॥ इद्धशासनः अप्रतिहताज्ञ इत्यर्थः । सदुर्योधनः नवयौवनोद्धतं प्रगल्भं धुरंधरमित्यर्थः । दुःखेन शास्यत इ २१
ति दुःशासनः तं भाषायां शासियुधी सादिना खल्‌ अर्थे युच्‌ प्रत्ययः यौवराज्ये युवराजकर्मणि आ[illegible]दित्वात्‌ ष्यञ्‌ । विधाय नियुज्येत्यर्थः ।
पुरोधसा पुरोहितेनानुमतोनुज्ञातस्तस्मिन्न्यासके स्वे सतीत्यर्थः । तदुल्लंघने दोषस्मरणादिति भावः । तिष्ठतीति भूतार्थेक्तः । नतु मतिबु
द्धि इत्यादिना वर्तमानार्थे अन्यथा पुरोधसे इत्यत्र क्तस्य च वर्तमान इति षष्ठी स्यात्‌ । अ[illegible]हस्सः मखेषु क्रतुषु हिरण्यं रेतो यस्य तं हिरण्यरेतसम्‌ ल्लोन ४
निं धिनोति प्रीणयति धिन्वे प्रीणनार्थाद्धिन्वि इत्यस्मात्‌ रूपस्यारवे सु प्रत्ययः । अकारश्चान्तादेशः ॥ २२ ॥ न चैतावतानिश्चिंतो गैर्भाव्यमित्याशङ्क्य इति ॥

सयौवराज्येन वयौवनोद्धतं विधाय दुःशासनमिद्धशासनः ॥ मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसं ॥ २२ ॥
प्रलीनभूपालमपि स्थिरायति प्रशास दावारिधि मंडलं भुवः ॥ स चिंतयत्येव भियस्त्वदेष्यतीरहो दुरंता बलवद्विरोधिता ॥ २३ ॥

प्रलीनेति । सदुर्योधनः प्रलीनभूपालं निःसपत्नमित्यर्थः । स्थिरायति चिरस्थायीत्यर्थः । भुवो मंडलं आवारिधेः सन्न आवारिधि
आ उदधि इत्यव्ययीभावः । प्रशासत्‌ दापयत्‌ त्वपि जक्षित्यादयः । षडिति अभ्यस्तसंज्ञानाभ्यस्तात्‌ शतुरिति नुमागमप्रतिषेधः त्व
तः एष्यतीत्यागामि[illegible] धातूनामनेकार्थत्वात्‌ उक्तार्थसिद्धिः । अथवा पूर्वविप्रातः । एतेरधस्यू[illegible]तिव[illegible]द्वि लट्‌ सद्वेतिशतृप्र ८
त्ययः । उगितश्चेति ङीप्‌ । आछीनद्योरि[illegible]तीति विकल्पान्नुमभावः सेमभावः । भियो भयहेतून्‌ विपद इत्यर्थः । चिंतयत्यालोचय
त्येव स एवार्हः अहो बलवद्विरोधिता दुरंता दुष्टावसाना सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वमनार्यपर्यवसा
य्येवेत्याश्चर्यं सामान्येन विशेषसमर्थनरूपोर्थान्तरन्यासः ॥ २३ ॥ २३ ॥ १ ॥ २३ ॥

ननु गूढाकारेंगितस्य त्वया कथं निरधारि इत्यत्राह। कथेति॥ कथाप्रसंगेन गोष्ठीवशेन जनैः अन्यत्र कथाप्रसंगेन विषये ~~~ नक
थाप्रसंगो वा ~~~ विषये धे ~~ वा अवदितिश्च॥ एकवचनस्यानंतत्वाज्जनविशेषणं उदाहृतात् उदीरितात् तवाभिधानात्त्वन्नामधेया
वि ३ स्मारकाद्धेतोः हेतौ तिपंचमी। आख्याह्वे अभिधानं च नामधेयं च नाम च इत्यमरः॥ अनुस्मृतः आखंडलसूनुविक्रमः स्मृतार्जुनप
राक्रमः सन् सुदुःसहात् दुःसहात् स्मारकात् आखंडलसूनुः इंद्रानुजः उपेंद्रो विष्णुरित्यावत् सुवसुनंधुपुत्रेनुजे रवावितिविश्वः॥
12

कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः॥ ॥
तवाभिधानाद्व्यथते नताननः सुदुःसहान्मंत्रपदादिवोरगः॥२४॥

तस्य विपक्षी गरुड इत्यर्थः॥ तस्य क्रमः पादविक्षेपः सोनुस्मृतो येन स तथोक्तः॥ स्मृत सगरुड महिमा उरग इव नता
ननः सन् व्यथते दुःखायते पीडा बाधा व्यथा दुःखमित्यमरः॥ अस्युत्कट भयसेवादि विकाराद्दुर्योधन इति भावः ~~ वैजय
मन्विच्छ सुत्रादि ~~~ पराजयमिति न्यायादुर्जनोत्कर्षे कथं न युधिष्ठिरस्य भूषणमेवेति सर्वमवदातं॥२५॥

सा तदास्थितिं तत्तस्मात्त्वयि जिह्मं कूपटं कर्तुमुद्यते त्वां जिघांसौ विसर्थः। तत्र इति। तत्र तस्मिन् दुर्योधने विधेयं कर्तव्यमुत्तरं प्रतिक्रिया आशु
विधीयतां ननु तत्कर्तव्यमपि त्वयैवोऽस्मतामित्यत्राह। परेति। परप्रणीतानि परोक्तानि वचांसि चिन्वतां संगृह्णतां मादृशां वार्त्ताहा
रिणामित्यर्थः। गिरः प्रवृत्तिसाराः कृत्तमात्रैकसाराः वादिने वयं न तु कर्तव्यार्थोपदेशासमर्थाः। अतः स्वयैव निधार्यमिति सामा
न्येन विशेषणसमर्थनादर्थान्तरं न्यासः। २५॥ इतीति॥ वनसन्निवासिनां पत्यौ वनेचराये ति गिरमीरयित्वामुत्के आत्तस

मि १ तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरं॥ परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः॥२५॥ इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवा
सिनां॥ प्रविश्य कृष्णा सदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः॥२६॥

त्क्रिये गृहीतपारितोषिके गते सति तु पिर्दीनमेव वारणां चेतनं नेहितं लोभात् स्वामि कार्ये सतीव समयतं तद्इतिनी
तिवाक्यामितं। अथ महीभृता राज्ञा कृष्णा सदनं द्रौपदीभवनं प्रविश्य अनुजसन्निधौ तद्वनेचरोक्तं वचनमाचचक्षे।
आख्यातं अथवा कृष्णेति द्रौपदी सदनं प्रविश्याऽनुजसान्निधौ तद्वचः कृष्णा आचचक्षे आख्यातवती हाऽदु
दर्द्विके स्त्रप्रधाने कर्मणि लिट् २६ २६॥ ॥ २६॥ २५॥
मेकता

अथात्मन समयं यः प्रवंती सती साह ॥२

निशम्येति ॥ ततो द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं ऋद्धिरूपां निशम्य ततो द्विषतः आगतास्तस्तु तस्याः अभ्ययात्यनीयपु। अपा
कृतिनिराकारात्विनियंतुं निरोद्धुमक्षमासती नृपस्य युधिष्ठिरस्य मन्युर्व्यवसाययोः क्रोधोद्योगयोः दीपिनीः संवर्द्धनीः गि
रः उदाजहार जगाद ॥ २७ ॥ भवेति। भवादृशाः भवद्विधाः पंडिताइत्यर्थः। तेषु विषये सदादिष्विसादिनाकृस आसर्वनाम्न
इत्याकारादादेशः ॥ प्रमदाजनोदितं स्त्रीजनोक्तं वेदः। क्वावचित्स्वपीसादिनासंप्रसारणं। अनुशासनं वियोगवचनं

13

निशम्य सि[redacted]द्धिं द्विषतामपारू तीस्ततस्ततस्याविनियंतुमक्षमा ॥ नृपस्य मन्युव्यव
सायदीपिनीरुदाजहारद्रुपदात्मजागिरः ॥ २७ ॥ भवादृशेषु प्रमदाजनोदितं भवत्यधि
क्षेपइवानुशासनं। तथापि वक्तुं व्यवसाययंति मां निरस्तनारीसमयादुराधयः ॥ २८ ॥

अधिक्षेपस्तिरस्कार इव भवति अतो न युक्तं वक्तुमित्यर्थः। तथापि निरस्तनारीसमयाः त्याजितशालीनारूपस्त्रीस
माचाराः समाश्रयाः १ भद्रामश्रयाः। शापथावाराक्रोलासितांतमं विहित्यमदुराधयः समयोल्लंघनहेतुत्वात्। दुष्टामनोव्य
था। पुंस्याधीमानसी व्यथाइत्यमरः। मां वक्तुं व्यव्यवसाययंति प्रेरयंति किंचिदयुक्तं दुःखिनो नाभिभावः ॥ २८ ॥ ति२

चतुर्भिः श्लोकैः कोपादापयंती साह ॥ १

४ अखंडेति ॥ आखंडलतुल्यधामभिरिंद्रसमप्रतापैः स्ववंशजैर्भूपतिभिर्भरतादिभिश्चिरमखंडमविछिन्नं यथा तथा मही त्वया मदश्रोतंती तिमदश्वसुतं क्षिपता मदश्वा विणा मतंगजेन स्त्रगिवा सहस्तेन स्वकरेण स्वचापलेनेत्यर्थः अपवर्जिता परिहृता स्वदोषादेवा यसमर्थागमइत्यर्थः ॥ २९ ॥ स्वदोषादयमनर्थ इत्युक्तस्तद्दोषः कुटिलेषु वक्रेष्टित्य मेवेत्याह व्रजंतीति ॥ मूढधियोऽ

अखंडमाखंडलतुल्यधामभिः श्चिरं धृता भूपतिभिस्ववंशजैः ॥
त्वयात्महस्तेन मही मदश्रुता मतंगजेन स्त्रगिवापवर्जिता ॥ २९ ॥ व्रजंति
ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः ॥ प्रविश्य हि घ्नंति शठा स्तथाविधानसंवृतांगान्निशिता इवेषवः ॥ ३० ॥ ३० ॥

या १ विवेकबुद्ध्यः ते पराभवं व्रजंति ये मायाविषु मायावत्सु विषये अमायास्याद्दिनानि प्रत्यर्थमायिनो मदंतः ओह्यादि त्वाप्तिनि प्रत्ययः ॥ न भवंति अत्रार्थांतरं न्यस्यति प्रविश्येति शठा गूढविप्रकारिणः धूर्तास्तथाविधास्तथाविधान् अ २
कुटिलानसंवृतांगान् अवर्मितशरीरान्निशिता इषवः प्रविश्य प्रवेशं कृत्वा घ्नंति अर्जवं हि कुटिलेषु न नीतिरिति भावः ॥ ३० ॥

 संधिविग्रहयानासनसंश्रयद्वैधीभावाः षड्गुणाः पणबंधः संधिः अपकारो विग्रहः यानं शिबिकादिरणभयात् पर्वताद्यारोहणमासनं विग्रहभीत्या समर्थाश्रयणं संश्र-
यः येकेनसह संधाय अपरेण सह विग्रहः कारणं द्वैधीभावः इति षड्गुणाः ॥३१॥

नवलक्ष्मीचांचल्यादयमर्थः स्वापेक्षादोषमूलत्वादित्याशयेनाह ॥ गुणेति ॥ अनुरक्तसाधनः अनुकूलसहायत्वात् उक्तं च कामंदके । उद्योगादनि
वृत्तस्य सुसहायस्य धीमतः । छायेवानुगता तस्य नित्यं श्रीः सहचारिणी । इति कुलाभिमानी क्षत्रियत्वाभिमानी च त्वदन्यः त्वत्तो
न्यः अन्यासादिना पंचमी । कोनराधिपः गुणैः शौर्यादिभिः सौंदर्यादिभिः अनुरक्तां कुलजां कुलक्रमागतां कुलीनां च मनोरमां श्रि
यं आत्मवधूं स्वभार्यामिव । वधूर्जाया स्नुषा स्त्री चेत्यमरः । परैः शत्रुभिरपहारयेत् । स्वयमेवापहारयेत् । धनक्रीडादिनाइत्यर्थः ।
कालवशेनबहुरवङ्गूयापहारो पि राज्ञां मानहानिकरत्वादनुपेक्षणीयः ॥३१॥ अथ दशभिः कोपोद्दीपनं करोति । भवंतमिति ॥

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ॥ परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियं ॥३१॥
भवंतमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ॥ कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥३२॥

हे नरदेव हे नरेंद्र एतर्हि इदानीं अस्मिन्नापत्काले इत्यर्थः । एतर्हि संप्रतीदानीमधुना सांप्रतं तथेत्यमरः । इदमोर्हिल् इति र्हिल् प्रत्ययः ।
एतेतौ रथोरित्येतावादेशः । आपदोमेवाह । मनस्वीगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्तमानं शत्रुकृतां दुर्दशा
नुभवंतमित्यर्थः । भवंतमुदीरितः उद्दीपितो मन्युः क्रोधः शुष्कं नीरसं स्नुषेः कइति निष्कातकारस्य ककारः । शमी चासौ
तरुश्चेति विशेषणसमासः शमीतरुं शमीग्रहणं शीघ्रज्वलनस्वाभाव्यात् तरुं तं उच्छिखः उद्गतज्वालः घ[redacted]
णीज्वाले अपि शिखे इत्यमरः । वह्निरिव कथं न ज्वलयति चित इत्यर्थः । मितां ह्रस्व इति ह्रस्वः ॥३२॥

नन्वंतशत्रुत्वादयं क्रोध एव वश्या उत एवे त्याशंक्याह ॥ अवंध्येति ॥ अवंध्यकोपस्य अत एवापदां विहंतुर्निग्रहानुग्रहसमर्थस्येदृ
तिशेषः । देहिनो जंतव स्वयमेव वश्या वश्यंगता भवंति वशंगत इति यत्प्रत्ययः । अतः कोपिनो भवितव्यमित्यर्थः ॥ व्यतिरे
केत्वा निष्फलमाह ॥ अमर्षशून्येन निष्फलकोपेन जंतुना कन्ययाशो क इति बुद्धिरिति तनीया हृदयस्य कर्म हार्दं स्नेहः प्रेमा ना प्रि
यता हार्दं प्रेम स्नेह इत्यमरः । युवादित्वादण्प्रत्ययः । हृदयस्य हृदयव पदसमसोष्वित्ति हृदादेशः । जातहार्देन जा

अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव देहिनः । अमर्ष
शून्येन जनस्य जंतुना न जातहार्देन न विद्विषादरः ॥ ॥ ३३ ॥

तस्नेहेन सता आदरेन अमर्षहीनस्य रागद्वेषाव किंचित्कार इत्यर्थः ॥ अथवा विद्विषाऽस्तादर कि
राभयं न दरो स्त्रियां भयेऽश्व भ्रेइ इत्यमरः । एकस्मिन्नेव प्रयोगे संधिवशाद्द्विधापि पदच्छेदः । पुंवाक्ये
पुनरेष ॥ अतः स्थाने कोपः कार्यः सोऽयस्त्वथा न कोप इति भावः ॥ ॥ ३३ ॥

वा॰ ह्य॰

परिभ्रमन्निति॥ लोहितचंदनोचितः उचितलोहितचंदनैर्हिताहितादिष्विति साधुः॥ अभ्यस्तरक्तचंदनइत्यर्थः॥ आमस्तेषु चित इत्याय्यं द्वितीयादवः॥ महारथो रथवादैरुभयत्रापिप्रा गिरिशिरो षः॥ अयं तु रेणुरूषितो धूलिकलुषितः पादो भूमिं न नीतौ पद्भ्यां पादचारी अत्यर्थमिति वा पदातिः पा द्भ्यामिति अव्ययतिभ्यांस्वे सुनुदैस पादस्ये सोणगदिकरूपप्रत्ययः॥ पादस्य पदाजातिगोपहतेष्विति पदादेशः॥ गिरिषु अंतिर्गिर् विभ क्त्यर्थेव्ययीभावः॥ गिरेश्च सेनकस्येति विकल्पात् समासांतभावः॥ परिभ्रमन् अयं वृकोदरो भीमः॥ सत्यधनस्येति सत्यमेव धनं यस्य तस्य अद्यापि सत्यमेव रक्ष्यतो न तु आंतर इति भावः॥ नैवेति शेषः॥ मानसं दुनोति॥ न परितापयति॥ किंच श्चित्कामप्र

ऱ्यां॥ तंत्रं॥

ता॰४

परिभ्रमन्लोहितचंदनोचितः पदातिरंतर्गिरिरेणुरूषितः॥ महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः॥३४॥ विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः॥ स वल्कवासांसि तवाधुना हरन्करोति मन्युं न कथं धनंजयः॥३५॥ ३५ ३ १ २ ४

वेदनइत्यमरः॥ स्वाभिप्रायाविष्करणं कामप्रवेदनं॥३४॥ विजित्येति॥ वासवउपमाउपमानं यस्य स वासवोपमइंद्रतु ल्यो योधनंजयउत्तरान्कुरून्मेरोरुत्तरान् अमानुषानैषविशेषान्विजित्य प्राज्यं प्रभूतं प्रचुरं प्राज्यमित्यमरः॥ कुप्यादन्यदकु प्यं हेमरूप्यात्मकं स्यात्कोशं चहिरं णं चहेमरूप्ये कृताकृते ताभ्यां यदन्यत्तत्कुप्यमित्यमरः॥ वसु धनमयच्छत् दत्तवान् प्रा प्रेत्यादिना दाणो यच्छादेशः॥ स धनं जयतीति धनंजयोर्जुनः संज्ञायां भृवृ जीत्यादिना खच्प्रत्ययः॥ अरुर्द्विषदंतस्या दिनामुमागमः॥ अधुना अस्मिन्काले अधुनेति निपातनात्साधु॥ तव वल्कवासांसि आहरन्कथं तव मन्युं क्रोधं दुःखं वा न करोति॥३५

ने॰३

वा॰

वनांतेति॥ वनांतो वनभूमिरेव शय्या तया कठिनीकृता कृतीकृठिनीकृतो देहो आकारो देह आहति वेजयंति। विघ्नकसमंततस्तु परितःस
वंतो विश्व गिसपीत्यमरः। कृत्वा चितिः कृत्व व्याप्तो विशुलीले कृशोरित्यर्थः। अत एवाम्लानो गिलितिसंभवो गजा विवस्थितावि स्तुपमीयु
धः२ गमनातो मा भ्रीपुत्रा वित्यर्थः। यमोदंडेरत्वां ज्ञेसंयमपचेति विश्वः। वि लोकयस्त्वं संयमो संतोषनियंध तिर्योगांतरे धैर्ये धार धृति३
धः४ णा पुर लुप्ति पुटुलिविबाधितुं कथं नो सहसेनप्रवर्त्तसे शाकधृ वेत्यादि नानुमुनअहो [redacted] नमहधैर्य इति भावः॥२६॥ अथ
देशां५ रालोदुर्दृष्टेयितुं मुपेद्धाटयति। इमामिति। इमां वर्त्तमानां तवैवमां तावर्क त्वदीयां त्वदास्य इमि त्यर्थः। तव कममका वेके वचनइ

वनांतशय्या कठिनीकृताकृती कृत्वा चिनो विघ्नगिवाम्लौगजौ॥ कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयं नुत्सहसेन बाधि
तुं॥२६॥ इमामहं वेदनतावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः॥ विचिंतयंत्या भवदापरंपरां रुजन्ति चेतः प्रसभं ममाधयः॥२७॥

तितव कादेशः। धियं त्वदापद्विषयां चित्तवृत्तिमहं न वेद कीदृशी वा न वेद्मि परबुद्धेरप्रत्यक्षत्वादिति भावः। चिरोत्कटे अवि
चा२ तिमिटोत्कणादेशः। न [redacted] समहष्टांते नायत्रत्वादुः खिमनुमानं शंक्यते धीरादीष्व नेकनिदकृत्वादित्याशयेनाहेति चित्तवृत्त
यो विचित्ररूपा धीराद्यनेकप्रका[redacted]रः खलु किंतु परामुत्कटां भवदापदं विचिंतयंत्या भावयंत्या मम चेतश्चित्तमाधयो मनो
व्यथाः। उपसर्गे घोः किरिति किप्रत्ययः। प्रसभं प्रसह्य रुजंति भजंती रुजो भंग इति धातोर्लट्। पस्य नाम पिदुःस
हदुःखक्षननीत्वद्विपत्तिरनुभवती रक्षा न करोतीति महाचित्रमित्यर्थः। चेतइस्सत्र रुजार्थानां भाववचनानाम
मज्वेरिति षष्ठी न भवती तत्र दोषाधिकाराच्छेषत्वस्य चवेवक्षिकत्वादिति॥ ४ ॥२७॥ ॥ ॥

तदापदमेवश्लोकत्रयेणाह॥पुरेति॥यस्त्वंमहाधनंतुबहुमूल्यंश्रेष्ठमित्यर्थः।महाधनमहाम[redacted]ल्यमितिविश्वः।शयनंशय्यामधिरू
ढःसन्स्तुतयश्चगीतयश्चमंगलानितैःकरणभूतैःपुराविबुध्यसेवैतालिकैरितिशेषः।पूर्वंविबोधितइत्यर्थः।पुराबुद्धस्मइति
16 भूतार्थेलट्।सत्वमदभ्रदर्भंबहु[redacted]कुशं।अस्त्रीकुशंकुथोदर्भः अदभ्रंबहुलंबह्वितिचामरः।स्थलीमकृत्रिमभूमिंजानप
देत्यादिना अकृत्रिमार्थेङीप्।एतेनदुःसहस्पर्शत्वमुक्तं।अधिशीङ्स्थासांकर्मेतिकर्मत्वं अधिशय्यशयित्वातपस्यप
देशः।अशिवैरमंगलैःशिवारुतैःक्रोष्टुवासितैःशिवाहरीतकी।क्रोष्टुशमीनघापनलवच्चु[redacted]माइतिवैजयंती[redacted]नि छा१

पुराधिरूढःशयनंमहाधनंविबोध्यसेयःस्तुतिगीतमंगलैः॥अदभ्रदर्भामधिशय्यसस्थ
लींजहासिनिद्रामशिवैःशिवारुतैः॥३८॥पुरोपनीतंनृपरामणीयकंद्विजातिशेषेणय
देतदन्धसा॥तदद्यतेवन्यफलाशिनःपरंपरैतिकार्श्यंयशसासमंवपुः॥३९॥ ॥

द्रांजहासीअद्येतिशेषः॥३८॥पुरेति॥हेनृपयदेतत्तेवपुःपुराद्विजातिशेषेणद्विजभुक्तावशिष्टेनांधसा।नभीस्सा
क्तीभक्तमन्धोन्नमित्यमरः।रमणीयस्यभावोरामणीयकंमनोहरत्वमुपनीतंप्रापितंनयतेर्द्विकर्मकत्वात्प्रधानेकर्मणिक्तः।प्र कसात्र
छ३ धानकर्मण्याख्येयेलादीनाहुर्द्विकर्मणामितिवचनात्।अद्यवन्यफलाशिनस्तेतवतद्वपुर्यशसासमंपरमतिमात्रंका
र्श्यंपरैतिप्राप्नोति॥उभयमेवक्षीयतइत्यर्थः।अत्रसहोक्तिरलंकारः।तदुक्तंकाव्यप्रकाशेसासहोक्तिःसहार्थस्यब हो३
लादेकार्थवाचकमिति॥३९॥

मणि १ अनारतमिति ॥ अनारतमजस्रं मणि[illegible] पीठशायिनोर्मयपादपीठस्थायिनोर्योचरणोराजशिरःस्रजांनमन्नृपालमौलिस्रजोरजः । परागोरंजय
तौतौचरणौमृगैर्द्विजैश्चतपस्विभिरालूनशिखेषाच्छिन्नाग्रेषुबर्हिषांकुशानांबर्हिःकुशाङ्कुतान्त्रयोरितिविश्वः । येनेषुनिषीदतस्तिष्ठतः ॥ ४० ॥
मनुष्य[illegible]र्वप्राणिसाधारण्यामापदीकृतापरिवेदनेस्यत्राह ॥ द्विषन्निति । यद्यतःकारणादियंदशाअवस्थाद्दशावंतावस्थायामिति
विश्वः । द्विषंतोनिमित्तोयस्याःसाद्विषन्निमित्ताशत्रुकृतेत्यर्थः । ततोमेमनःसमूलंसामूलंसात्रायंउन्मूलयतिवदेवकीलापुत्रदुःखाये
दृस्याह । परेति । परैःशत्रुभिःअपर्यासिताअकुंचितांवीर्यसंपद्येषांमानिनांपराभवोविपदुत्सवएवेतिवैधर्म्येणार्थांत

अनारतंयौमणिपी[illegible]शायिनावरंजयद्राजशिरःस्रजांरजः ॥ निषीदतस्तौचरणौवनेषुतेमृगद्विजालून
शि[illegible]खेषुबर्हिषाम् ॥ ४० ॥ द्विषन्निमित्तायदियंदशाततःसमूलमुन्मूलयतीवमेमनः ॥ परैरपर्यासितवीर्यसंप
दांपराभवोप्युत्सवएवमानिनाम् ॥ ४१ ॥ विहायशांतिंनृपधामतत्पुनःप्रसीदसंधेहिवधायविद्विषां ॥ व्रजं
तिशत्रूनवधूयनिस्पृहाःशमेनसिद्धिंमुनयोनभूभृतः ॥ ४२ ॥

रंन्यासोमानहानिदुःखहानिस्वादितिभावः ॥ ४१ ॥ विहायेति ॥ हेनृप । शांतिंविहायत्यक्त्वातत्प्रसिद्धंधामतेजोद्वि
षांविधायपुनःसंधेहिंकुरुद्धासन्नोभावाकिंक्रोधेनेत्यत्राह । व्रजंतीति ॥ निस्पृहामुनयःशत्रून
विधूयानिर्जित्यशमेनक्रोधवर्जनेनसिद्धिंव्रजंतीतिंके[illegible]वत्यकार्यवद्राजकार्यंनशांतिसाध्यमित्यर्थः ॥ ४२ ॥

अंगीकुर्विस्यर्थः । प्रसीदप्रार्थनायाक्रोधेदूशमेनकार्यसिद्धौकिं २ ॥ × भूभृतस्तुन १

श्रीः

पुरेति॥किं च धामवतां तेजस्विनां परनिकारासहिष्णुतामित्यर्थः। पुरः सरतीति पुरःसराः अग्रेसराः पुरोग्रेतौ सर्तेष्टः प्रत्ययः। यशोधनाः भवादृशाः ग्रेषु
निकारं दुःसहमिति दुःसहं ईदृशं उक्तप्रकारं प्राप्य रतिसंतोषमधिकुर्वते स्वीकुर्वते चेत् हंतेति मनस्वीता अभिमानिता निराश्रया सती हता तेजस्विजनै इति खेदः
कृतार पावांमनस्विताहतात्यर्थः। अतःपराक्रमितव्यमिति भावः। यद्यप्यत्र प्रसहनस्यासंगतेरधिपूर्वात्कृञो रे तेराधेः प्रसहन इत्यात्मनेपदेन भव नः
तिप्रसहनपरिभव इति काशिका तथाप्यस्याकर्त्रभिप्रायविवक्षायामेव प्रयोजकृञाकर्त्रभिप्रायेस्वरितञितः इत्यादिनैवात्मनेपदं सिद्धं ॥४३॥
अथेति। अथवा पक्षांतरे निरस्तविक्रमः सन् चिराय चिरकालेनापि क्षमां क्षांतिमेवाश्रित्य निक्षां त्योक्षमे समरः। सुखस्य साधनं पर्येषि अन्वगच्छसि तर्हि ल
क्ष्मीपतिलक्ष्मराजचिन्हं कार्मुकं विहाय धरतीति धरः पचाद्यच्। जटानां धरो जटाधरः सन् इह वने पावकं जुहुधि पावके होमं कुर्वित्यर्थः। अधिकर
पुरःसराधामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशं भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हंत हता मनस्विता ॥४३॥ अथ क्षमा
मेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनं विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सन् जुहुधीह पावकं ॥४४॥ न समयपरिर
क्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः। अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि संधिदूषणानि ॥४५॥
णेकर्मते लोपवादः विरमस्य धिं धनुषेत्यर्थः। कुम्भोहेर्द्धिः ॥४४॥ अथ समयोल्लंघनाद्विभेषि तत्तदपि नेत्याह। परेषु [redacted] शत्रुषु निकृतिः
परप्रधानं येषु तेषु तत्तथोक्तेषु अपकारवत्सु परेषु सत्सु भूरिधाम्नो महौजसः प्रतिकारक्षमस्ये त्यर्थः। ते तव समयस्त्रयोदशवत्स
रान्तं वने तिष्ठामीत्येवंरूपा तेसंवित् समयः शपथाचारकालः सिद्धांतसंविदः समरः। तस्य परिरक्षणं तत्क्षमं न युक्तं क्षमं शक्ते हिते
त्रिषु इति समरः। हि यस्माद्विजयार्थिनो विजिगीषवः क्षितीशाः अरिषु विषये सोपाधि सकपटं यथा तथा॥ कपटोस्त्री व्याजदंभोप
धयः छ [redacted] द्म कैतवे इत्यमरः। संधिदूषणानि विदधति केनचिद्व्याजेन दोषानापाद्य संधिं विघटयन्तीत्यर्थः। शा
ठ्यस्य हि तिग्मिषोः सर्वथा सौचे तिकार्यसाधनं प्रधानं अन्यत्समयरक्षणादिकमप्रासंगिकस्येति भावः। अर्थान्तरन्यासोलंकारः। पुष्पि

नर्कि वि सा हा ॥६

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति। विधीति। विधिः दैवविधिर्विधाने दैवे समः। समयः कालः तयोर्नियोगात् नियमनाद्धेतोर्दुरतिक्रमत्वादि
तिभावः। अगाधितुरन्तरे आपत्पयोधिरिवेत्युपमितिसमासः। दिनकृतमिवेति समासः। दिनकृतमिवेति वक्ष्यमाणानुसारात्। तस्मिन्नाप
त्पयोधौ मग्नं सूर्योपि सायं सागरे मज्जति। अपरेद्युरुन्मज्जतीत्यागमः दीप्तिः प्रतापः। आतपश्च तस्य संहारेण जिह्मं मुप्रसन्नं शि
थि॰ थिलवसु अन्यत्र शिथिलघनं यन्याः शिथिलरश्मिवसुद्रुह्यतो कोशौ वसुतायघनेमणा। विहित वेजयंती शिथिलेवल्लमिति पाठे तु भय
त्रापि शिथिलप्राप्तिकमित्यर्थः। अथारिपुतिमिरमिव तेऽपि पुतिमिरमुदस्य निरस्योदीपमानं उदयं तं अगतावितिधातोर्दीर्वोलकरिशानवेत्वादि दि का॰ ५
नादेदीनकृतमिव लक्ष्मीमुयः समभ्येतु भजतु आशिषिलिङ्‌लोटाविति लोट्‌ नमका
विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलवसुमगाधे मग्नमापत्पयोधौ। रिपुतिमिरमुदस्योदीयमा
नं दिनादौ दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥ ४६॥ इति श्रीकिरातार्जुनीये भारवीकृतौ प्रथमः सर्गः॥

प्र॰ रिनयामंगलाचरणतया रूपगलयासर्गान्तश्लोकेषु लक्ष्मीशब्दयोगः। यथाह भगवान्भाष्यकारः मंगलादीनि मंगलमध्यानि
मंगलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्तीति पूर्णोपमेयं मालिनीवृत्तं
संसर्गत्वाद्वृत्तभेदात्पथाह दंडी सर्गैरनतिविस्तीर्णैः प्रस्ययवृत्तेषु संधिभिः सर्वत्र भिन्नसंसर्गैनिरूपेतं लोकरंजनमिति। अथ कविः
कविः काव्ये वर्णनामाख्यानपूर्वकं सर्गसमाप्तिकथनं महाकाव्य इति महच्छब्देन लक्षणसंपत्तिसूचिता किरातार्जुनीय इति
५ ॥ थ॰ काव्यवर्णयोः कथनं प्रथमः सर्गः समाप्त इति शेषः॥ ॥ एवं तु तत्रत्यापि द्विषष्टिं तं किरातोऽर्जुनो वधीकृत्य कृतो ग्रंथः किराता
र्जुनीयं शिशुक्रंदयमसद्वंद्वजनादिभ्यः छ इति छ प्रत्ययः राघवपाण्डवीयमिति वत्तथाप्यर्जुन एवात्र नायकः। किरा
तस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः। यथाह दंडी वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि। तज्जयान्नायकोत्कर्षं

*आयतैः सु

18 तेनुवर्णयंतिहि ख्याव्यंसंग्रहः । नेतामध्यमपांडवो भगवतो नारायणस्यांशजस्तस्योत्कर्षहेतुः तेनुवर्णितयादिव्यः
किरातः पुनः शृंगारादिरसोयमत्रांगि विजयीवीरप्रधानेरसः । शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलमि
ति ॥४६॥ ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयटीकायां घंटापथस
माख्यायां प्रथमः सर्गः समाप्तः ॥ ॥ ॥ ॥ ॥

22